श्रीगंगासहकल्पद्रुम

[निर्णयात्मकः प्रथमस्तबकः]

सम्पादकः प्रकाशकश्च

श्रीभाष्याचार्यपं० हरिनामदत्तशास्त्रितनय-


विद्यावाचस्पति–स्मार्त-भास्कर-राजमान्य–पं० देवीप्रसादशास्त्री

(चूरू, बीकानेर)

पं० विश्वम्भरप्रसादशर्मणः प्रबन्धेन

विकास प्रिंटिंग वर्क्स, सहारनपुरे मुद्रितम्

प्रथम-संस्करणम् } १९९५ वि० { मूल्यम् रुप्यकद्वयम्



भूभृन्मौलिमणिर्विजेतृतरणिर्विद्याग्रणीः कीर्तिमान् ।
बीकानेरपतिर्हि जङ्गलधरः सम्राट्स्थली [थली] पालकः ।
मानी मित्रकलत्रपुत्रसहितः सामात्यभृत्यान्वितो ।
गङ्गासिंहनृपो मनोभृतकृपो जीयाच्चिरं वीरुजः ॥

दाक्षिण्येन विलासयन् वसुमतीं प्रीत्या प्रजाः पालयन् ।
विद्वद्वृन्दमुखारविन्दवनिकामञ्जःसमुल्लासयन्
वैरिध्वान्तमुदासयन् भुजबलैर्दीप्त्यादिशो भासयन् ।
बीकानेर-मही-महेन्द्रमिहिरो मह्यान्महीं शासयन् ॥

आत्मीयेन बलेन भारतपतेः साहाय्यमुच्चैः सृजन् ।
योऽजैषीत्खलु जर्मनीयसमरे यौरोप भूवर्तिनि
कीर्तिं चीनरणाङ्गणेऽपि परमां योऽवाप सोऽयं नृपः ।
सर्वत्रारिमतंगजेषु कुरुतात् शार्दूलविक्रीडितम् ॥

यः शुष्कां सिकतामयीं मरुमहीं पानीयपूर्णामनु-
ष्ठातुं हन्त सरिद्वरावतरणे प्रख्यातसत्पौरुष
पुण्यात्प्राप्तमनोरथः स जगतीजाग्रत्कथःक्ष्मापतिः ।
भूमौ भातु भगीरथप्रतिनिधिः प्रज्ञासमज्ञाम्बुधिः ॥

कीर्ति कन्दलयन्कुलं विमलयन् कार्पण्यमुत्कालयन् ।
कारुण्यं कलयन्कलिं विकलयन्सन्मार्गमावोधयन्
दारिद्र्यं दलयन्स्थलीं सलिलयन् प्रीत्या प्रजाः पालयन् ।
राष्ट्रं साधुनिभालयन् विजयतात् बीकाणनाथः प्रभुः ॥५॥

हेमाद्रिदाननिरतौ त्वयि भूपवर्ये
बीकापुरं कनककान्तिमयं प्रजातम् ॥
स्वर्णोत्सवस्य परमोज्ज्वलदीप्तिभाभिः ।
विश्वं प्रकाशमयमेव समस्तमासीत् ॥६॥

नित्यं प्रजावर्गसुखैकबुद्धिः जीव्याश्चिरं पुत्र-सुपौत्रयुक्तः ।
बीकापुरी भारतभालरत्नम् संजायतां भूप भवत्सुराज्ये ॥७॥

कल्याणं कुरुतान्नित्यं भगवान् कमलापतिः ।
यशश्चभासतां लोके यावच्चन्द्रदिवाकरौ ॥८॥

शुभाकांक्षी—
देवीप्रसाद-शास्त्री (चूरुनिवासी)

● पर्णाशमा ●



श्रीगणेशायनमः

श्री गङ्गासिंह-कल्पद्रुमः

सुजयतु वीणापाणिर्देवी देवैर्निरन्तरं वन्द्या ।
विकिरतु(त्रि) लोचनकलया सकलासु कलासु पाण्डित्य

सदा भक्तस्वान्तः कमलवनविद्योतनकरी
निरस्तध्वान्तौघा कविकुलमनः प्राङ्गणचरी ।
जगत्कल्याणार्थं मधुमहिषविध्वंसनकरी
सदाराध्याऽऽराध्यामुपदिशतु साध्यां सुसरणीम्

अथ संवत्सरनिर्णयः

सम्यक् वसन्त्यस्मिन् ऋयन्तु मासादयः स संवत्सरः । द्वा
मासात्मकः । स च मासत्रैविध्येन त्रिविधः । चान्द्रः सावनः

भाष्याचार्यं गुरुं नत्वा देवीं भगवतीं तथा ।
देवीप्रसादनामाहं कुर्वे प्रमाणसंग्रहम् ॥ १ ॥
सोऽकामयत द्वितीयो मे आत्मा जायेतेति स मनसा

कीर्ति कन्दलयन्कुलं विमलयन् कार्पण्यमुत्कालयन् ।
कारुण्यं कलयन्कलिं विकलयन्सन्मार्गमाबोधयन्
दारिद्र्यं दलयन्स्थलीं सलिलयन् प्रीत्या प्रजाः पालयन् ।
राष्ट्रं साधुनिभालयन् विजयतात् बीकाणनाथः प्रभुः ॥

हेमाद्रिदाननिरतौ त्वयि भूपवर्ये
बीकापुरं कनककान्तिमयं प्रजातम् ।
स्वर्णोत्सवस्य परमोज्ज्वलदीप्तिभाभिः ।
विश्वं प्रकाशमयमेव समस्तमासीत् ॥६

नित्यं प्रजावर्गसुखैकबुद्धिः जीव्याश्चिरं पुत्र–सुपौत्रयुक्तः ।
बीकापुरी भारतभालिरत्नम् संजायतो भूप भवत्सुराज्ये ॥७

कल्याणं कुरुतान्नित्यं भगवान् कमलापतिः ।
यशश्चभासतां लोके यावच्चन्द्रदिवाकरौ ॥८॥

शुभाकांक्षी—
देवीप्रसाद-शास्त्री-(चूरुनिवासी)

❁ धर्मात्मा ❁



श्रीगणेशाय नमः

श्री गङ्गासिंह-कल्पद्रुमः

सुजयतु वीणापाणिर्देवी देवैर्निरन्तरं वन्द्या ।
विकिरतु(त्रि) लोचनकलया सकलासु कलासु पाण्डित्यम् ॥

सदा भक्तस्वान्तः कमलवनविद्योतनकरी
निरस्तध्वान्तौघा कविकुलमनः माङ्गल्यकरी ।
जगत्कल्याणार्थं मधुमद्दिपविध्वंसनकरी
सदाराध्याऽऽराध्यामुपदिशतु साध्यां सुसरणीम् ॥

अथ संवत्सरनिर्णयः

सम्यक् वसन्त्यस्मिन् अयनर्तुमासादयः स संवत्सरः । द्वादशमासात्मकः । स च मासत्रैविध्येन त्रिविधः । चान्द्रः सावनः सौर

भाष्याचार्यं गुरुं नत्वा देवीं भगवतीं तथा ।
देवीप्रसादनामाहं कुर्वे प्रमाणसंग्रहम् ॥ १ ॥
सोऽकामयत द्वितीयो मे आत्मा जायेतेति स मनसा वाचं

कीर्तिं कन्दलयन्कुलं विमलयन् कार्पण्यमुत्कालयन् ।
कारुण्यं कलयन्कलिं विकलयन्सन्मार्गमाबोधयन् ॥
दारिद्र्यं दलयन्स्थलीं सलिलयन् प्रीत्या प्रजाः पालयन् ।
राष्ट्रं साधुनिभालयन् विजयतात् बीकाणनाथः प्रभुः ॥५॥

हेमाद्रिदाननिरतौ त्वयि भूपवर्ये
बीकापुरं कनककान्तिमयं प्रजातम् ॥
स्वर्णोत्सवस्य परमोज्ज्वलदीप्तिभाभिः ।
विश्वं प्रकाशमयमेव समस्तमासीत् ॥६॥

नित्यं प्रजावर्गसुखैकबुद्धिः जीव्याश्चिरं पुत्र-सुपौत्रयुक्तः ।
बीकापुरी भारतमौलिरत्नम् संजायतां भूप भवत्सुराज्ये ॥७॥

कल्याणं कुरुतान्नित्यं भगवान् कमलापतिः ।
यशश्चभासतां लोके यावच्चन्द्रदिवाकरौ ॥८॥

शुभाकांक्षी—
देवीप्रसाद-शास्त्री (चूरुनिवासी)



श्रीगणेशायनमः

श्री गङ्गासिंह-कल्पद्रुमः

सुजयतु वीणापाणिर्देवी देवैर्निरन्तरं वन्द्या ।
विकिरतु(ह्रि) लोचनकलया सकलासु कलासु पाण्डित्यम् ॥

सदा भक्तस्वान्तः कमलवनविद्योतनकरी
निरस्तध्वान्तौघा कविकुलमनः प्राङ्गणचरी ।
जगत्कल्याणार्थं मधुमहिपविध्वंसनकरी
सदाराध्याऽऽराध्यामुपदिशतु साध्यां सुसरणीम् ॥

अथ संवत्सरनिर्णयः

सम्यक् वसन्त्यस्मिन् अयनर्तुमासादयः स संवत्सरः । द्वादश-मासात्मकः । स च मासत्रैविध्येन त्रिविधः । चान्द्रः सावनः सौर

भाष्याचार्यं गुरुं नत्वा देवीं भगवतीं तथा ।
देवीप्रसादनामाहं कुर्वे प्रमाणसंग्रहम् ॥ १ ॥
सोऽकामयत द्वितीयो मे आत्मा जायेतेति स मनसा वाचा

इति । पञ्चेति माधवः । चान्द्र, सौर, सावन, नाक्षत्र, बार्हस्पत्य-भेदात् । हेमाद्रिस्त्वन्त्ययोर्धर्मशास्त्रेऽनुपयोगात्त्रिधा एव विधा आह । चन्द्रकलावृद्धिक्षयप्रयुक्तप्रतिपदादितिथीनां षष्ट्यधिकशतत्रयेण निष्पन्नो यः सः चान्द्रः । द्वादशराशिषु सूर्यसंक्रमणैर्निष्पन्नो यः सः सौरः । सावनशब्दोऽहोरात्रोपलक्षकः । तैश्च सावनैःषष्ट्यधिकशतत्रयसङ्ख्यकैर्निष्पन्नोयः सः सावनः । एकषष्ट्य-धिकशतत्रयपरिमितोबार्हस्पत्यसंवत्सरः । अनेन बार्हस्पत्यमानेन कदाचिदधिसंवत्सरोऽपि निष्पद्यते । चतुर्विंशत्यधिक शतत्रय परिमितो नाक्षत्रिकः संवत्सरः । तिलकव्रतादौ चान्द्रः । सुजन्मादि व्रते सौरः । गोसत्रादिषु सावनः । आयुर्दायादौ नाक्षत्रिकः । गोदावरीस्नानादौ बार्हस्पत्यः । चान्द्रस्य षष्टिभेदाः प्रभवादि तस्यैवान्तरभेदाःपञ्च—संवत्सरः, परिवत्सरः, इदावत्सरः, अनुवत्सरः इद्वत्सरश्चेति । प्रभवादयः षष्टिपञ्चकाः संवत्सराः तेषु द्वादशपञ्च-कानि तत्रैकैकस्मिन् पञ्चके क्रमेण संवत्सरादयो भवन्ति तेषां सङ्घो युगसंज्ञकः ।

मिथुनं समभवत् नयद्रेत आसीत् स संवत्सरोऽभवत् इति तस्मात्संवत्सरः प्रधानः । अतएवादौ संवत्सरनिर्णयःक्रियते । विप्रतिपन्नानां वाक्यानां परस्परं विरोधपरिहारो निर्णयः ।)

द्वादशेति—द्वादशमासाः संवत्सर इति श्रुतेः । न च अस्ति त्रयोदशमासः इति श्रुतेर्विरोध इति वाच्यम् । सौर सावनादिषु वत् त्रयोदशत्वं नास्ति किन्त्वधिमासपाते चान्द्रस्य तत्र संव-त्सरपदस्यानेकशक्तिकल्पनानुपपत्तेस्त्रयोदशमासा अपि द्वादशैव तत्संज्ञत्वात् एक एवाभ्यस्तो न पृथगेवासावित्यविरोधः त्रयमासा इत्यस्येति ।

त्रिविध इति—ब्रह्मसिद्धान्ते-चान्द्रसावनसौराणां मासानां

पञ्चधेति—सौरबृहस्पतिसावनचान्द्रिकनाक्षत्रिकाः क्रमेण स्युः मातुल ३६५ पाताल ३६१ अतुल ३६० विमल ३५४ पराङ्का ३२४ अवत्सराः पञ्चेतिमाधवः। अधिसंवत्सर इति तदुक्तमुत्तर-सौरे। गुरोर्मध्यमसंक्रान्तिहीनोयश्चान्द्रवत्सरः। अधिसंवत्सरस्त-स्मिन् कारयेन्न सवत्रयम्। वर्जनीयाप्रयत्नेन प्रतिष्ठासर्वनाकिनाम्। स्फुटसंक्रान्तिहीनश्चेत्केप्याहुरधिमासवत्। इति।

तिलकेति—अब्दः पञ्चविधश्चान्द्रो व्रतादौ तिलकादिके। सुजन्मादौ व्रते सौरो गोसत्रादिषु सावनः। त्रयोऽप्याचार्य्यसेवादौ विकल्प्यन्ते निजेच्छया। आयुर्दाये तु नाक्षत्रो बार्हस्पत्योऽधिवत्सरः।

प्रभवादीति—प्रभवोविभवः शुक्लः प्रमोदोऽथप्रजापतिः। अंगिराः श्रीमुखो भावो युवा धातेश्वरस्तथा। बहुधान्यः प्रमाथी च विक्रमोऽथ वृषस्तथा। चित्रभानुःसुभानुश्च तारणःपार्थिवोऽव्ययः। सर्वजित्सर्वधारी च विरोधी विकृतिः खरः। नन्दनोविजयश्चैव जयोमन्मथदुर्मुखौ। हेमलम्बी विलम्बी च विकारी शार्वरी प्लवः। शुभकृच्छोभनःक्रोधी विश्वावसुपराभवौ। प्लवङ्गः कीलकः सौम्यः साधारणविरोधकृत्। परीधावी प्रमाथी च आनन्दो राक्षसोऽनलः। पिङ्गलः कालयुक्तश्च सिद्धार्थीरौद्रदुर्मती। दुन्दुभीरुधिरोद्गारी रक्ताक्षी क्रोधनः क्षयः। प्रभवमारम्य क्षयान्तेषु षष्टिवर्षेषु द्वादश-पञ्चकानि। त इमे बार्हस्पत्याः चान्द्रा वा।

पञ्चेति—शुक्लयजुःसंहितायाम्। संवत्सरोऽसि परिवत्सरो-सीदावत्सरोसीद्वत्सरोसिवत्सरोसि। (इदुवत्सरोऽनुवत्सरः) चातुर्मास्य ब्राह्मणे तदधिष्ठातृदेवताः। अग्निर्वाव संवत्सरः आदित्यः परिवत्सरः चन्द्रमा इदावत्सरः वायुरनुवत्सरो महेश्वर इद्वत्सरः। इति। संवत्सरस्तु प्रथमो द्वितीयः परिवत्सरः। इदावत्सर-स्तृतीयश्चतुर्थश्चानुवत्सरः। इद्वत्सरःपञ्चमस्तुतत्सङ्घोयुगसंज्ञकः। स्मरेत्सर्वत्र कर्मादौ चान्द्रं संवत्सरं सदा। नान्यं यस्माद्वत्सरादौ प्रवृत्तिस्तस्य कीर्तिता। इति संवत्सरनिर्णयः।

इति । पञ्चेति मासयः । चान्द्र, सौर, सावन, नाक्षत्र, बार्हस्पत्य-भेदात् । हेमाद्रिस्त्वन्त्यानां नर्मदानामनुपयोगाच्चित्र एव विना बाह । चन्द्रस्यार्कवृद्धिक्षयप्रयुक्तप्रतिपदादितिथीनां षष्ट्यधिकशतत्रयेण निष्पन्नो यः सः चान्द्रः । द्वादशराशिषु सूर्यसंक्रमणनिष्पन्नो यः सः सौरः । सावनशब्दोऽहोरात्रोपलक्षकः । तैश्च सावनैःषष्ट्यधिकशतत्रयसङ्ख्यकैर्निष्पन्नोयः सः सावनः । एकषष्ट्य-धिकशतत्रयपरिमितोबार्हस्पत्यसंवत्सरः । अनेन बार्हस्पत्यमानेन कदाचिदधिसंवत्सरोऽपि निष्पद्यते । चतुर्विंशत्यधिक शतत्रय परिमितो नाक्षत्रिकः संवत्सरः । तिलकव्रतादौ चान्द्रः । सुजन्मादि व्रते सौरः । गोसत्रादिषु सावनः । आयुर्दायादौ नाक्षत्रिकः । गोदावरीस्नानादौ बार्हस्पत्यः । चान्द्रस्य षष्टिभेदाः प्रभवादि तस्यैवान्तरभेदाःपञ्च—संवत्सरः, परिवत्सरः, इदावत्सरः, अनुवत्सरः इद्वत्सरश्चेति । प्रभवादयः षष्टिपञ्चकाः संवत्सराः तेषु द्वादशपञ्च-कानि तत्रैकैकस्मिन् पञ्चके क्रमेण संवत्सरादयो भवन्ति तेषां सञ्ज्ञो युगसंज्ञकः ।

मिथुनं समभवत् तत्पुरेत आसीत् स संवत्सरोऽभवत् इति तस्मात्संवत्सरः प्रधानः । अतएवादौ संवत्सरनिर्णयःक्रियते । (विप्रतिपन्नानां वाक्यानां परस्परं विरोधपरिहारो निर्णयः ।)

द्वादशेति—द्वादशमासाः संवत्सर इति श्रुतेः । न च अस्ति त्रयोदशमासः इति श्रुतेर्विरोध इति वाच्यम् । सौर सावनादिषु तावत् त्रयोदशत्वं नास्ति किन्त्वधिमासपाते चान्द्रस्य तत्र संव-त्सरपदस्यानेकशक्तिकल्पनानुपपत्तेस्त्रयोदशमासा अपि द्वादशैव एकसंज्ञत्वात् एक एवाभ्यस्तो न पृथगेवासावित्यविरोधः द्वादशमासा इत्यस्येति ।

त्रिविध इति—ब्रह्मसिद्धान्ते-चान्द्रसावनसौराणां मासानां प्रभेदतः । चान्द्रसावनसौरास्त्रयः संवत्सरा अमी ।

पञ्चधेति—सौरबृहस्पतिसावनचान्द्रिकनाक्षत्रिकाः क्रमेण स्युः मातुल ३६५ पाताल ३६१ अतुल ३६० विमल ३५४ वराङ्का ३२४ श्चवत्सराः पञ्चेतिमाधवः। अधिसंवत्सर इति तदुक्तमुत्तर-सौरे। गुरोर्मध्यमसंक्रान्तिहीनोयश्चान्द्रवत्सरः। अधिसंवत्सरस्त-स्मिन् कारयेन्न सवत्रयम्। वर्जनीयाप्रयत्नेन प्रतिष्ठासर्वनाकिनाम्। स्फुटसंक्रान्तिहीनश्चेत्केप्याहुरधिमासवत्। इति।

तिलकेति—अब्दः पञ्चविधश्चान्द्रो व्रतादौ तिलकादिके। सुजन्मादौ व्रते सौरो गोसत्रादिषु सावनः। अथोऽप्याचार्यसेवादौ विकल्पन्ते निजेच्छया। आयुर्दाये तु नाक्षत्रो बार्हस्पत्योऽधिवत्सरः।

प्रभवादीति—प्रभवोविभवः शुक्लः प्रमोदोऽथप्रजापतिः। अंगिराः श्रीमुखो भावो युवा धातेश्वरस्तथा। बहुधान्यः प्रमाथी च विक्रमोऽथ वृषस्तथा। चित्रभानुःसुभानुश्च तारणःपार्थिवोऽव्ययः। सर्वजित्सर्वधारी च विरोधी विकृतिः खरः। नन्दनोविजयश्चैव जयोमन्मथदुर्मुखौ। हेमलम्बी विलम्बी च विकारी शार्वरी प्लवः। शुभकृच्छोभनः क्रोधी विश्वावसुपराभवौ। प्लवङ्गः कीलकः सौम्यः साधारणविरोधकृत्। परीधावी प्रमाथी च आनन्दो राक्षसोऽनलः। पिङ्गलः कालयुक्तश्च सिद्धार्थीरौद्रदुर्मती। दुन्दुभीरुधिरोद्गारी रक्ताक्षी क्रोधनः क्षयः। प्रभवमारभ्य क्षयान्तेषु षष्टिवर्षेषु द्वादश-पञ्चकानि। त इमे बार्हस्पत्याः चान्द्रा वा।

पञ्चेति—शुक्लयजुःसंहितायाम्। संवत्सरोऽसि परिवत्सरो-सीदावत्सरोसीद्वत्सरोसिवत्सरोसि। (इद्वत्सरोऽनुवत्सरः) चातुर्मास्य ब्राह्मणे तदधिष्ठातृदेवताः। अग्निर्वाव संवत्सरः आदित्यः परिवत्सरः चन्द्रमा इदावत्सरः वायुरनुवत्सरो महेश्वर इद्वत्सरः। इति। संवत्सरस्तु प्रथमो द्वितीयः परिवत्सरः। इदावत्सर-स्तृतीयश्चतुर्थश्चानुवत्सरः। इद्वत्सरःपञ्चमस्तुनत्सत्र्ययोयुगसंज्ञकः। स्मरेत्सर्वत्र कर्मादौ चान्द्रं संवत्सरं सदा। नान्यं यस्माद्वत्सरादौ प्रवृत्तिस्तस्य कीर्तिता। इति संवत्सरनिर्णयः।

अयननिर्णयः

अयनम्—अयते यात्यनेन ऋतुमयेण सूर्यो दक्षिणामुत्तरां चेति ऋतुत्रयमयनम्। तच्च द्विविधम्—दक्षिणं उत्तरं च कर्कसंक्रान्तिमारभ्य दक्षिणं मकरसंक्रान्तिमारभ्योत्तरम् यदुत्तरन्तद्देवानान्दिनम् यद्दक्षिणायनं सा रात्रिः।

उत्तरमिति—विष्णुपुराणे—अयनस्योत्तरस्यादौ मकरं याति भास्करः। ततः कुम्भमथमीनश्च राशेरराश्यन्तरं द्विज। त्रिष्वेतेष्वथ भुक्तेषु ततो वैषुवतीं गतिम्। प्रयाति सविता कुर्वन्नहोरात्रं ततः समम्। ततो रात्रिः क्षयं याति वर्द्धतेऽनुदिनं दिनम्। ततश्चमिथुनस्यान्ते परां काष्ठामुपागतः। राशिं कर्कटकं प्राप्य कुरुते दक्षिणायनम्। (एतदुत्तरायणनिरूपणं श्रौतस्मार्तादिकर्मार्थं ननु सूर्यस्य प्रथमोत्तरदिग् गमनारम्भकालज्ञापनार्थम्। उत्तरदिग्गमनंसूर्यस्य १६ ऊनविंशतितमेऽयनांशकाले सौर पौषमासस्यैकादशतमेदिवसे आसीत्। इदानीन्तु तत्सप्तमेवाष्टमे दिवसे ब्रह्मसौरायनांशभेदात्सम्पद्यते। एवं दिनरात्र्योः समत्वं यच्चैत्रस्य दशमे दिवसे प्रतिपादितमस्ति तथाप्यधुनायनगतिवशादन्तरितं दृश्यते। तथापि समत्वमिदानीम्सौरचैत्रस्य सप्तमे वाष्टमे दिवस एव दृश्यते। अतस्सायन मकरकर्कसंक्रान्तितः उत्तरदक्षिणदिक् गमनं दिनरात्रिवृद्धिकरं तथा सायनविषुवद्वयसंक्रान्तिदिनं दिनरात्रि समत्वकरं चेति लिपिः सर्वदाऽव्यभिचारिणीति प्रतीयते। प्रायः २५० वर्षपूर्वं एकादशदिनात्मिका स्थितिरासीत्।)

अनयोर्विनियोगः। गृहप्रवेशत्रिदशप्रतिष्ठाविवाहचौलव्रतबन्धपूर्वम्। सौम्यायने कर्म शुभं विधेयं यद्गर्हितं तत्खलु दक्षिणे च। रत्नमालायाम्—त्रिदशप्रतिष्ठायां निषेधे प्राप्ते निषेधप्रसवो ववियेपे वैखानसेनोक्तः। मातृभैरववाराहनारसिंहत्रिविक्रमाः। च स्थाप्या वै दक्षिणायने। इत्ययननिर्णयः।

ऋतुनिर्णयः

इयर्ति गच्छति अशोकपुष्पविकासादि असाधारणलिङ्गमिति वसन्तादिकालविशेष ऋतुः । स च षड्विधः । वसन्तोग्रीष्मोवर्षा शरद् हेमन्तः शिशिर इति । हेमन्तशिशिरयोरेकीकरणेन पञ्चर्तवो वा । ते च चैत्रादिमासद्वयात्मकाः । मलमासे तु मासद्वयात्क एकोमासः। पुनस्ते वसन्ताद्यृतवो द्विविधाः चान्द्राः सौराश्च । चैत्रारम्भोवसन्तादिश्चान्द्रः । मीनारम्भोमेषारम्भो वा सौरः।

वसन्तादीति—मुखं वा एतदृतूनां वसन्त इति श्रुतेः ।

मासद्वयात्मक इति—श्रुतौ । मधुश्च माधवश्च वासन्तिकावृतू शुक्रश्च शुचिश्च ग्रैष्मावृतू नभश्च नभस्यश्च वार्षिकावृतू इषश्चोर्जश्च शरदावृतू सहश्च सहस्यश्च हैमन्तिकावृतू तपश्च तपस्यश्च शैशिरावृतू इति । (तथा च भागुरिः)—वसन्तश्चैत्रवैशाखौ ज्ञेयौ तौ मधुमाधवौ । ज्येष्ठाषाढावृतुर्ग्रीष्मः शुक्रशुची च तौ स्मृतौ । प्रावृट् श्रावणभाद्राख्यौ नभोनभस्यसंज्ञितौ । मासौ शरदिषोर्जौ च तावाश्व युजकार्तिकौ । सहसहस्यौ हेमन्तौ मार्गपोषौ च तौ स्मृतौ । तपस्तपस्यौ शिशिरौ मासौ तौ माघ फाल्गुनौ ।

एकोमासइति—आह च (त्रिकाण्डमण्डनः) चान्द्रे माने यदा चैत्रमासादिर्मलिनस्तदा । शुद्धेऽपि मलिने चैत्रे वैशाखेऽपि वसन्तता । ननु सैवेयमायाता मासत्रय वसन्तता । सत्यं गत्यन्तराभावात् सैवात्राभ्युपगम्यते । नन्वत्रापि किं विकल्पः किं तद्वयाभ्युपगम्यते । मासास्त्रयो वसन्तस्था स्यवस्याद्यमथवान्तिमम्।अत्रोच्यते विकल्पोहि सौरमासेषु युज्यते। ननु चान्द्रेषु युक्तोऽसौ मलमासानुवर्तिषु । द्वादशैव हि ते मासाः सूर्यसंक्रान्ति सम्मिताः । द्वौ द्वौ मासाविहैकैकमृतुंकृत्वा तु गण्यते । ऋतवस्तत्र मीनाद्या मेषाद्या वा षडेव हि । चान्द्रस्तु मलिने मासे प्रासे मासास्त्रयोदश । विकल्प्यन्तेऽत्र यस्किञ्चिन्मा-

मासनिर्णयः

सकारान्तं मासिति प्रातिपदिकं चन्द्रवाचि तस्यायं काल इति मासः । तदीयत्वं च पञ्चदशानां कलानां वृद्धिक्षयद्वारेणाव-गन्तव्यम् । यदिदं मासत्वं सौरसावनयोरनुगतं तदीयमस्तु । मस परिमाणे इत्यस्माद्धातोर्निष्पन्नोऽयं मासशब्दः । मस्यते परिमीयते

समारभ्य गुरुमतः । ऋतुषु क्रियमाणेषु मासएकोऽतिरिच्यते । किमसा-वृतुर्मासः किम्वर्तुः सप्तमो भवेत् । प्रकृतर्तुषु वा क्वापि प्रविशत्विति चिन्त्यते । ऋतुशून्यो न कालोऽस्ति नाप्यृतुः सप्तमः श्रुतौ । तत्र तुर्यर्तुनाऽयुज्यमान इत्यृतु शून्यता । षड् वा ऋतव इत्येषा श्रुतिः सप्तमवारिका । अतः श्रुतेः स्मृतिर्बाध्या द्वैमासावृतुरित्यसौ । तस्मादधिकमासः स्यात्स्वेवर्तुषु कुत्रचित् । यत्रैषोऽन्त-र्भवेन्मासः स ऋतुस्यात्त्रिमासिकः । यद्वा—षष्टिदिनैर्मास एक एक एवोभयात्मकः । अतोऽत्रापि वसन्तत्वं स्याद्वयोरेव मासयोरिति ।

द्विविधा इति । श्रौतस्मार्तक्रियाः सर्वाः कुर्याच्चान्द्रमासर्तुषु । तदभावे तु सौरर्तुष्विति ज्योतिर्विदाम्मतम् । ऋतौ चान्द्रनिमित्तत्वं मन्त्रवर्णात्प्रतीयते । ऋतूनन्यो विदधज्जायते पुनरित्यतः । पुनः पुनर्योजायते स एव विदधदृतून् । चन्द्रः पुनः पुनर्जन्मा तस्माच्चा-न्द्रवशादृतुः । (होतृप्रकरणे) चन्द्रं प्रकृत्य प्राह तित्तिरिः । स ऋतून् कल्पयतीति चान्द्रोऽयं ऋतुकल्पकः इति । (विष्णुधर्मोत्तरे) सौर-मासद्वयं राम ऋतुरित्यभिधीयते । (अन्यत्र) वसन्ताद्यृतवो द्वेधा चान्द्राः सौराश्च चान्द्रकाः । चैत्राद्या अथ मीनाद्या मेषाद्या वा विवस्वतः । तेष्वाधानादयस्तद्वत् पञ्चमूर्ति व्रतपूजनम् ।

मीनारम्भइति—सौरेष्वृतुषु बौधायनेन (मीनमेषयोर्मेष-वृषयोर्वा वसन्तः) इत्यभिधानात् मीनादित्वं मेषादित्वं च वैकल्पिकं वसन्तस्याङ्गीकृतम् । तथा तदनुसारेण उत्तरे ग्रीष्मा-दयो विकल्प्यन्ते । इतिऋतुनिर्णयः ।

यावताकालेन चन्द्रवृद्धिक्षयौ स चान्द्रोमासः। यद्वा—चन्द्रवृद्धिक्षयाभ्यां स्वयं मस्यत इति मासः। मासश्चतुर्विधः—चान्द्रः सौरः सावनः नाक्षत्रः। पक्षयुक् चान्द्रः। सूर्यस्य राशिगतिर्यत्र परिमीयते स सौरः। अहोरात्राणां त्रिंशत्

मस्यतइति—तथाच (सिद्धान्तशिरोमणौ) मस्यन्ते परिमीयन्ते स्वकालाः वृद्धिहानितः। मास एते स्मृता मासास्त्रिंशत्तिथिसमन्विताः।

चतुर्विधइति—सौरः सौम्यश्च विज्ञेयो नाक्षत्रः सावनस्तथा। मासश्चतुर्विधः शास्त्रे क्रियाभेदान्मनीषिभिः इतिचान्द्रः शुक्लादिदर्शान्तः सावनस्त्रिंशतादिनैः। एकराशौ रविर्यावत्कालं मासःस भास्करः। सर्वर्क्षपरिवर्तैस्तु नाक्षत्रोमास उच्यते। माने मासस्तु नाक्षत्रे सप्तविंशतिभिर्दिनैः। परिशेषेषु मानेषु मासस्त्रिंशद्दिनैःस्मृतः। इति। सौरमासस्याद्यन्तौ मेषादिराशीनामाद्यन्ताभ्यां व्यवस्थितौ। सावने पुरुषेच्छादिर्नियामकः। नाक्षत्रे नक्षत्रं नियामकम्। चान्द्रस्तु दर्शान्तः पूर्णिमान्तोवेति द्विधा। तथा च श्रूयते। अमावस्यया मासान् सम्पाद्याहरुत्सृजन्त्यमावस्यया हि मासान् सम्पश्यन्ति पौर्णमास्या मासान् सम्पाद्याहरुत्सृजन्ति पौर्णमास्याहि मासान् सम्पश्यन्ति। तथा च गर्गः-पौर्णमास्यवसानः स्यान्मासोदेवऋतुस्तथा। दर्शान्तो मातुपोद्यौ (?) विन्ध्यादुत्तरयाम्यगौ। कल्पद्रुमे आर्ष्टिषेणः। दर्शान्तोवैदिकोमासोराकान्तः स्मार्त उच्यते। यद्यपि जयसिंहकल्पद्रुमे–कृष्णपक्षादिकं मासं नाङ्गीकुर्वन्ति केचन। येऽपीच्छन्ति न तेषामपीष्टो विन्ध्यस्य दक्षिणे, इति त्रिकाण्डमण्डनवचनात् शुक्लादेः मुख्यत्वम् प्रतिपादितम्। परं श्रुतिस्मृतिप्रामाण्यात् कृष्णपक्षादेरपि ग्राह्यत्वम्। तथाचाथर्वणिकाः सृष्टिप्रकरणे। संवत्सरं दक्षिणोत्तरायण सृष्टिमाम्नाय मासपक्षसृष्टिमेव मामनन्ति – मासौ वै प्रजापतिः तस्य कृष्णपक्ष एव रयिः शुक्लः प्राणः इति। अत्र कृष्णपक्षस्यैव प्रथमपाठः।

[illegible] दर्शान्तो मास स मासः । संक्रान्तिर्द्वयं मासः ।
चान्द्रस्य मासद्वैध—शुक्लादिः अमान्तः, कृष्णादिः पूर्णिमान्तः ।
पूजनादिनिमित्तं सौरमासः, सवनो मासः, त्रिंशता चान्द्रः ।
स चैत्रादि मासो न लग्ने ।

१ तथा च स्मृतौ महालय प्रकरणे । अन्नयुक् कृष्णपक्षे तु श्राद्धं कार्यं दिने दिने । इति । यदि दर्शान्तोऽपि पक्षेण तदा भाद्रपद कृष्णपक्षे श्राद्धयोगेन न संगच्छते । आश्विनमासान्तर्गतस्यैव कृष्णपक्षे । तत्र कृष्णपक्षादि पूर्णिमान्तत्वे सम्भवति । तथा च जन्माष्टमी प्रकरणे—"मासि भाद्रपदेऽष्टम्यां कृष्णपक्षेऽर्द्धरात्रके । भवेत्प्रजापते ऋक्षं जयन्तीनाम सा स्मृता । अत्र जयन्त्या भाद्रपदान्तर्गतत्वं मासस्य पूर्णिमान्तत्वं गमयति । शिष्टाचारविशेषोऽपि पूर्णिमान्तत्वे दृश्यते । यति धर्मप्रकरणे ऋतु सन्धिषु वापयेत् । यदि दर्शान्त विवक्षा स्यात् तदा दर्शस्यैव सन्धिस्यात् तत्रैव वपनम् । कुर्वन्ति च पूर्णिमायाम् । तस्मात्पूर्णिमान्तोऽपि ग्राह्यः अनुष्ठाने

शङ्करकृपया ज्ञातं प्रणम्य हरिनामकम् ।
देवीप्रसादशर्माहं वक्ष्ये विषयबोधिनीम् ॥

१ वैशाखादयो मासाः सौराश्चान्द्रा वेति सन्देहः उभयोरपि शास्त्रे दर्शनात् भारते—कार्तिकस्य तु मासस्य प्रवृत्ते प्रथमेऽहनि । त्रयोदश्यान्तु तद्युद्धं चतुर्दश्यां हतो नृपः । (नृपः जरासन्धः) नहि चान्द्रकार्तिकस्य त्रयोदशी प्रथम दिवसे भवति । तथा च श्रुतिः । तपस्तपस्यौ—शिशिरावृतुर्मधुश्च माधवश्च वासन्तिकावृतुरित्यादि । तैत्तिरीय च गाथा । उपयामगृहीतोसि मधवेत्वा गृह्णामि । उपयामगृहीतोसि माधवाय त्वा गृह्णामि । अत्र मधुमाधवादि पदानां वासन्तादि वाच्य सौर चैत्र वैशाखादि पर्यायत्वमेव । तेन तपस्तपस्यादिपदानां सौरमासादि वचनत्वावधारणात् तपस्तपस्यादि पदै रवधृत पर्यायभावानां माघादि शब्दानामपि सौर नामत्वं श्रुतितोऽवधार्यते । चान्द्रोऽपि श्रौतः स्मार्तः । (विष्णुपुराणे) माघासिते पञ्चदशी कदाचिदुपैति योगं यदि वारुणेन । ऋक्षेण कालः स परः पितॄणां नह्यल्पपुण्यैर्नृप लभ्यतेऽसौ । न चासौ सौरो माघः चान्द्रश्च सः । तथा च श्रुतिः । सा वैशाखस्यामावास्या [illegible] तस्यामादधीत । चूपस्य एव हि सर्वे [illegible]

तत्तद्वचनविशेषात् मासव्यवस्थाद्रष्टव्या । तथाहि । दर्शान्तः

भवति वृषभोग्यत्वाद्रोहिण्याः नतु मेषस्थे (नतु सौर वैशाखे रोहिणीयुक्ता वैशाखी अमावस्या सम्भवति) एवम् चान्द्रसौरयोः श्रुतिस्मृतिपरिगृहीतत्वात् विनिगमना-प्रमाणस्याभावाद्भवति माघादिपदेषु सन्देहः ।

ननु माघादिशब्दा यौगिकाः । तथाहि । नक्षत्रेण युक्तः काल इति विहिताण् प्रत्ययेन मघायुक्ता माघीति व्युत्पाद्य सास्मिन् पौर्णमासीति संज्ञायामिति विहिताणन्तरेण माघी पौर्णमास्यस्मिन्निति माघोमासश्चान्द्र एव सौरे तदसम्भवात् । नहि सौराश्विन-पौषमाघेष्वश्विनीपुष्यमघायुक्ताः पौर्णमास्यः कदाचिदपि सम्भवन्ति । तथाहि यः परो विप्रकर्षः सा पौर्णमासीति । सूर्याचन्द्रमसोः परोऽवधिरन्योन्यं सप्तराश्यवस्थानेन भवति । तेन कन्यास्थे सूर्ये मीनस्थेन चन्द्रेणैव पूर्णिमा भवति न मेषस्थेन । एवं धनुः-स्थे सूर्ये मिथुनस्थेन चन्द्रेणैव न कर्कटचन्द्रेण । मकरस्थे च सूर्ये कर्कटस्थचन्द्रेणैव न सिंहस्थेन । मेषकर्कटसिंहभोग्यत्वादश्विनीपुष्यमघानाम् । तदाहि सूर्यादष्टमराशौ चन्द्रः स्यात् । सौरे चायमपरो विशेषः (अयं वक्ष्यमाणो विशेषः न सम्भवतीति शेषः) कार्त्तिकादिमासानां द्विभत्रिभत्वमुक्तम् ।

अन्त्योपान्त्यौ त्रिभौ ज्ञेयौ फाल्गुनश्चत्रिभोमतः ।
शेषा मासा द्विभा ज्ञेयाः कृत्तिकादिव्यवस्थया ॥

न च वृषभोग्यरोहिणीयुक्ता पौर्णमासी कदाचनापि तुलादित्ये भवति (एवं वृश्चिकस्थे रवौ न मिथुन भोग्यार्द्रा युक्ता ।

सर्वत्र सूर्यावस्थितराशेरष्टमराशौ चन्द्रस्यावस्थानात् परविप्रकर्षस्य पौर्णमासी लक्षणस्यानुपपत्तेः । अन्योन्यमुभयोः सप्तमराशिस्थत्वेनैव तत्सम्पद्यते । तस्माच्चान्द्र एव योगसम्भवात् तद्वाचकत्वमेव माघादिपदानाम् ।

न च रूढिर्योगमुपहरतीति न्यायस्यायं विषयः क्लृप्तरूढिविषयत्वात्तस्य । तदुक्तम्—

लब्धात्मिका सती रूढिर्भवेद्योगापहारिणी ।
कल्पनीया तु लभते नात्मानं योगवघ्नतः ॥

अतएव प्रोक्षणीशब्दस्य यौगिकत्वमङ्गीकृतं न रूढिः । अत्रोच्यते—प्रष्टव्योऽत्र भवान् । योगवादी किममी पाठकादिवद् योगानुसारिप्रयोगा माघादिशब्दाः । यत्र यत्र योगस्तत्र तत्र प्रवर्त्तन्ते । पङ्कजादिवद्वा योगानुसारे योगव्यवस्थिते प्रयोगे तत्र योग सद्भावाद् यौगिकः । अत्र न तावदाद्यः कल्पः । त्रिरात्रपञ्चरात्रदशरात्राद्यवच्छिन्नेषु कालेषु सत्यपि तन्नक्षत्रान्वित पौर्णमासीयोगे माघादिपदप्रयोगादर्शनात् । अतएव सास्मिन्निति सूत्रे जयादित्येनेन मासार्द्धमाससंवत्सराणामेषा संज्ञेत्यभिधायोदाहृतम् । पौषोमासः पौषोऽर्द्धमासः पौषः संवत्सरः इति इह न भवति । पौषी पौर्णमासी अस्मिन् दशरात्र इति । भृतकमासे च न भवतीत्युक्तम् । भृतकमासः सावनः भृतिगणनार्थत्वात् । सावन निषेधाच्चान्द्रसौरयोः प्रयोगोऽभ्यनुज्ञातः । अथ द्वितीयः संज्ञायामिति प्रसिद्धयु-पसंग्रहात् । यत्रास्य प्रयोगस्तत्र योगोनिमित्तं मासादिषु चास्य प्रयोगो न दशरात्रि-

पूर्णिमान्तो वा चान्द्रोसौविमर्षैरपयोः । सौरो राज्ञः सावनस्तु

ष्विति । नैतत् सावने मासे सत्यपि योगे प्रयोगादर्शनाच्चान्द्र एव चेन्न । द्वितीया तृतीयाद्यारब्धेषु पूर्वतिथिसमापनीयेषु चान्द्रेष्वप्रयोगात् । प्रतिपदादिदर्शान्त एवमासीति चेत् नैतत् । माघादिनक्षत्रयोगाभावे आश्लेषादिनक्षत्रयुक्तपौर्णमासी सम्बन्धेऽपि दर्शान्ते मासि माघादिपदप्रयोगदर्शनात् यौगिकत्वानुपपत्तेः ।

अन्त्योपान्त्यौ त्रिभौ ज्ञेयौ फाल्गुनश्च त्रिभोमतः ।
शेषा मासा द्विभा ज्ञेयाः कार्तिकादिव्यवस्थया ॥

अत्र कार्तिकादिव्यवस्थयेत्यभिधानात् कृत्तिकाद्या द्विभा मासा इति सम्भ्रमपाठात् कार्तिकोपक्रमगणनेनान्त्य आश्विनः । त्रिभोरेवत्यश्विनीभरणीनामन्यतमयुक्तपौर्णमासीयोगात् उपान्त्योभाद्रःशतभिषापूर्वोत्तरभाद्रपदाभिः फाल्गुनश्चत्रिभः पूर्वोत्तरफाल्गुनीहस्तैः । इतरे तु कार्तिकादय कृत्तिकादिनक्षत्रद्विकयोगेन प्रत्येतव्याः । कृत्तिकारोहिणीभ्यां कार्तिकः । तेन रोहिणी युक्तापि पौर्णमासी कार्तिकी भवति तद्योगान्मासः कार्तिकः । एवं आर्द्रायोगान्मार्गशीर्षः । इति कथं न यौगिकः । नैतत विद्विषामस्य वादस्य हास्यास्पदत्वात् रोहिणीपदाद्धिनक्षत्रेण युक्तः काल इति विहितेनाणप्रत्ययेन रौहिणी पौर्णमासी भवति रौहिणीपदाच्च सास्मिन् पौर्णमासीति संज्ञायामित्यन्तरेण रौहिणपदनिष्पत्तेः रौहिणः मासः स्यान्नतु कार्तिकः । एवमार्द्रायोगादार्द्रो मासः । इत्यादयो भवेयुः । अतो रौहिण्यादियोगात् कार्तिकादिपदानि यौगिकानीति वदतां महार्यं लोकान् संवर्द्धयति कलम्बीत्यन्वयोरिह कृतः पुरस्कृत एव स्यात् । अथोच्यते—मासानां द्विभत्रिभत्वप्रतिपादनं तावद् दृश्यते तस्य चैतदेव प्रयोजनम् । यत् कृत्तिकारोहिण्यन्यतरयुक्त पौर्णमासीति योगात् कार्तिकपदं यौगिकं भवतु । एवमितरेष्वपि । कथं चैतत्स्यात् यदि कृत्तिकादयो रोहिण्यादिकमपि लक्षयन्ति तेन कृत्तिकारोहिण्योरन्यतरयोगेन कार्तिकपदं यौगिकं एवमन्यान्यपीति । तदयुक्तम् । नहि द्विभत्रिभत्ववचनैरौहिण्यादियोगेऽपि कार्तिकादयो यौगिका इत्याह । न च पौर्णमास्याद्विभत्वादिकं किन्तु मासानामेव । न च पाणिनिरपि रौहिण्यादियोगेऽपि कार्तिकादिपदानि पौर्णमासीषु अयोगाच्च कार्तिकादिमासेषु कार्तिकादि पदानि यौगिकानीति आह । न चाभिधीयमानमपि प्रमाणान्तरविरोधेन महणार्हं न च प्रकृतिपदस्य (स्वेतरार्थानवच्छिन्ना यत् स्वार्थस्यावबोधने । यन्नद्वन्द्वनिश्चयोर्हेतुः प्रकृतिः सा तदर्थिका) मुख्यलाक्षणिकवृत्त्याश्रयणेन यौगिकत्वं कथिदपि व्युत्पन्नम् । यदि चैवं स्यात्रथकारपदस्यापि रथमकुर्वत्यपि सौधन्वनजातीये रथकरणार्हता लक्षणया तदन्यलक्षणया वा यौगिकत्वात् त्रैवर्णिकेऽपि तत्सम्भवाद्वर्षासु रथकार आदधीतेत्यत्र त्रैवर्णिकाधिकारो दुर्वारः स्यात् । एवं गच्छतीति गौरिति व्युत्पत्तौ गमनमगमयति लक्षयतीति गरुडस्यगरुडस्यापि यौगिकार्थं स्यात् । एवं प्रासादपदमपि प्रक्षेपणमपि लक्षणया यौगिकत्वं स्यात् मायौगिकं किञ्चिन्न स्यात् । तस्मात् प्रकृतिपदस्य मुख्यार्थयोगे यौगिकत्वम् । नान्यथा यत्र तु मुख्यार्थ योगो नास्ति तत्र रूढिरेव ।

पक्षेज्योतिषिके परः। अन्यत्रापि। अमावस्या परिच्छिन्नोमासः स्याद्

किञ्च कृत्तिकादिपदानां रौहिण्यादि लक्षणया यौगिकत्वेऽपि मुख्य कृत्तिकादियोगेन यौगिकत्वस्य शीघ्रमवगमात्—कार्तिकादिमास विहितं कर्म मुख्यः नक्षत्रयोगएव व्यवतिष्ठेत न लाक्षणिकयोगे—मुख्यलाक्षणिक योगनिमित्तयो रतुल्यत्वेन तुल्यवद्विधानानुपपत्तेः। मुख्यग्रहणे च तस्य नित्यमप्राप्ते राभाका इत्यादि नित्यवद्विधानं न स्यात्। न च मुख्याभावे लाक्षणिक ग्रहणार्थं वचनान्तर मस्तीति यौगिकत्वव्युत्पादनमप्यफलं स्यात्। यदेव कृत्तिकापदस्य लाक्षणिकत्वे दूषणं तदेव कार्तिकादिपदस्य रौहण्यादियुक्त पौर्णमासि मध्यकेमासि लाक्षणिकत्वेऽपीति हेयमेवैतत्। आषाढपदमात्रन्तु यौगिकं वक्तुं शक्यते। पूर्वोत्तराषाढयो-रुभयोरप्याषाढत्वात्। किञ्च यदा योगो निमित्तं पदानां तदा किं कृत्स्ननक्षत्र योगः कृत्स्नपौर्णमास्याः अर्द्धपादादि योगोऽपि वा। तत्र कृत्स्नयोगस्यावदनेकवत्सरे रेकस्यां कदाचिदिति न तेनाभाका इत्यादिव्यवहारो नित्यवत् शक्यः। एकदेशयोगे तु मासान्तरीय नक्षत्र योगस्यावश्यम्भावात् मूलपूर्वाषाढयोर्योगे स एव चान्द्रो ज्येष्ठआषाढश्चेति स्यात्। उत्तराषाढश्रवणयोश्च योगे आषाढः श्रावणश्चेति स्यात् एवमितरत्रापि माससङ्करात् कर्मणां व्यवस्थितिः स्यात्। अल्पयोगेनापि यौगिकत्वात् भूयोऽवयवयोगादिति चेत् न उभयोस्तुल्ययोगे एकस्यापि भूयोऽवयवयोगाभावा द्विनामकत्वापत्तेः। किञ्च पूर्वमासीय नक्षत्रस्यैकस्यां पौर्णमास्यां भूयोऽवयव-योगेन तन्नामप्रवृत्तावपर पौर्णमास्याञ्च परमासीय नक्षत्रस्य भूयोऽवयवयोगेन परमासीय नामप्रवृत्तौ मध्यमासो विलुप्येत। दृष्टञ्चैतत्। तथाहि चतुर्दशोत्तर-सहस्र शाकवर्षे लिख्यमाने तुलास्थ भास्करे अश्विनीभरणीभ्यां व्याप्ता पौर्णमासी त्वाश्वयुजी। ततस्तत्रैव वत्सरे वृश्चिकस्थे भास्करे कृत्तिकारोहिणीभ्यां व्याप्ता पौर्णमासी तेन सा कार्तिक्येव। तद् योगाच्चासौ कार्तिक एव। भवतास्मिन् तदनन्तरञ्च धनुःस्थ भास्करे पौर्णमास्यां मृगशिरो नक्षत्रं नास्त्येव आर्द्रापुनर्वसु भूयोभिरवयवैः शेषे तु त्रयोदश दण्डा एव परं पुनर्वसु व्याप्ताः। तेन सा मार्गशीर्षी न तु पौषी अल्पयोगात्।

मकरादित्ये च पुष्याश्लेषाभ्याम् अर्द्धार्द्धव्याप्ता येन सा न पौषी न च माघी स्यात्। भवतु वा कथञ्चिदेकद्विदण्डगणनक्षत्राधिक योगात् सा पौषी तद् योगाच्च पौषः। माघी वा तद्योगात् माघः। अन्यतरस्तु विलुप्येत। कुम्भ-स्थादित्ये हि पौर्णमास्याः पञ्चदश दण्डा एव परं मघा व्याप्ता पूर्वफल्गुन्यातु भूय-सामवयवानां योगात् सा फाल्गुनीति तद् योगात् स फाल्गुनः स्यान्नास्ति माघः। मीनादित्येतु पूर्णिमोत्तर फाल्गुनीहस्ताभ्यां व्याप्ता सोऽपि फाल्गुन एव द्विमेवत्। अथ प्रथमं येन युक्ता पूर्णिमा तेन व्यपदिश्यते तद् योगाच्च तन्नाम्ना मास इति नास्ति मासलोपः। तैतदपि अस्मिन्नेवाब्दे कृष्णसंक्रान्ति दिने प्रथमं स्वातियुक्ता पूर्णिमा असौ चैत्रः वृषरवे च पूर्णिमा अनुराधा द्वयैकद्वियुक्ता प्रथमं तन्नाम्नी

मासानां तु । संक्रान्तिपौर्णमासीभ्यां मध्ये नूतनत्वगः । इति

वैशाखः स्यात् कर्कटे तु जैन । मिथुनस्थे पूर्णिमाया आषाढ[illegible] [illegible] कर्कटस्थेऽर्के च पौर्णमास्याः श्रवण धनिष्ठा स्यात् तेन श्रावणस्य च निर्विवादत्वात् । तुलायां पौर्णमास्या अनुराधा योगाभावे वैशाखो युक्तेन । तथा सिंहसूर्ये शतभिषापूर्वभाद्रपदाभ्यां स्यान्नान्यो भाद्र एव कन्यासूर्ये च प्रथम-युक्त भाद्रपदयोगात्माश्वि भाद्रपद स्यात् । चतुरिति योगमात्रस्य निमित्तत्वे तु मास सङ्कराच्च कर्मणामनुष्ठान अव्यवस्थितिः स्यात् । तुलायां च भास्करे अश्विनी-भरणीभ्यां युक्तं समाप्तावपि पूर्वं च कन्यायामपि रेवतीयोगाच्चाश्विन इति द्विमासो द्विराश्विनप्रसङ्गात् । तथा त्रयोदशोत्तरसहस्रशाकाब्दान्ते मीनस्थे सूर्य्ये पूर्वोत्तरफल्गुनीभ्यां पूर्णिमा तदनन्तरं मेषसूर्ये हस्तचित्राभ्यां युक्त पूर्णिमा हस्तयोगात् फाल्गुनोऽपमौ त्रयोदश दशोत्तर सहस्राब्दीय कुम्भादित्यात् प्रभृति चतुर्दशोत्तर सहस्राब्दान्त मीनभोगपर्य्यन्तेन मासद्वयलोपः । भाद्राश्विनयोरा-वृत्तत्वं फाल्गुनस्य द्विरावृत्तत्वं मासानां सङ्करः स्यात् । मास लोपे सङ्करे च सति नियतक्रमावस्थितचान्द्र द्वादशमासगोचरो माघादिपदप्रयोगो बाध्यते । न च तदुक्त प्रयोगानुसारित्वात् स्वनिमित्तबाधा क्षमत्वात् सङ्करलोपयोश्च क्रमान्तरापत्तेः । अथोच्यते—

यस्मिन्दर्शान्ते मासि मघादियुक्तपूर्णिमा तत्र माघादिप्रवृत्तिः । सूर्य्यचन्द्रयोर्हि पूर्णिमान्तएवान्योन्यं समसप्तकेनावस्थानात् परोविप्रकर्षो भवति । आदौ तु षडष्ट-केनाप्यवस्थानात् । तथाहि । त्रयोदशोत्तरसहस्रशाकान्ते मीनसूर्य्ये पूर्णिमा पूर्वोत्तर-फल्गुनीभ्यां व्याप्ता तत्र पौर्णमास्याः शेषपञ्चदशदण्डेष्वेव, परं कन्यायाश्चन्द्रः पूर्वं सिंह एव तथा चतुर्दशोत्तरसहस्राब्दादौ मेषसूर्य्ये पूर्णिमा हस्तचित्राभ्यां व्याप्ता, तत्र तुलासम्बन्धिनश्चित्रापरार्द्धस्य त्रयोदशदण्डा एव परं पूर्णिमान्ते भुताः । तदितरांशे तु पौर्णमास्याः कन्यायामेव चन्द्रो मेषे च सूर्य्यः । तथा तद्वत्सर एव वृषसूर्य्ये पूर्णिमा स्वातीविशाखाभ्यां व्याप्ता तत्वात्यंशे विशाखापदत्रये तुलायाश्चन्द्रः वृश्चिक-सम्बन्धिविशाखा शेषैरष्टाभिरेव दण्डैः परमन्ते व्याप्ता तेनान्तएव नियतं चन्द्रसूर्य्य-योरन्योन्यं सप्तमराश्यवस्थानं न पुनरादावपि तदेयमविच्छिन्नपूर्णिमात्रयेऽपि प्रथमे सूर्य्यात् षडष्टकेनैव चन्द्रस्यावस्थानम् । (अतएव मार्कण्डेयः ।)

आदिपादार्द्धमात्रेण नक्षत्रस्यान्वयेऽप्यसौ ।
तिथिरन्तेऽपि संयुक्ता विपरीता न सा पुनः ।

अस्यार्थः—सूर्य्यात् सप्तमराशिसम्बन्धिना नक्षत्रेणान्त एव नियत इति । तदन्ते तन्नक्षत्रयोगात् कार्त्तिकादिपदानि यौगिकानि इति । तदप्ययुक्तम् । चतुर्दशोत्तरसहस्र शाकाब्दे वृश्चिकस्थे धनुस्थे च सूर्य्ये पौर्णमास्यां मृगशिरोयोगस्याभावात् तदन्तयोगस्य सुतरामभावान्मार्गशीर्ष मास विलोपापत्तेः । किञ्च द्विमत्रिभत्वमन्तरेणापि प्रतिपदादि-दर्शान्ते चान्द्रेमासि कार्त्तिकादिपदप्रयोगदर्शनात् द्विभत्रिभयोगादपि कथं यौगिकत्वम् ।

किञ्च सकलतिथेः कियोगो निमित्तम् । अथ सकलभस्य योगो वा बहुयोगो वा आदौ वा अन्ते वा योगमात्रं वा सर्वं व्यभिचरति । इदन्तु नोपभोगिनिरवाद्युपक्रान्ते चतुर्दशोत्तरदशशतशाकाब्दे कार्तिके चान्द्रे तत्पूर्णिमाश्विनीभरणीभ्यां व्याप्ता । न च कृत्तिकादियुगयोगः । न च नासौ कार्तिक इति नियमात्तत्र प्रयोगस्य । तथाहि चतुर्दशोत्तरसहस्रशाकाब्दे तुलास्थादित्याष्टमदिनोपक्रान्तस्य प्रतिपदादिदर्शान्तमासस्य पौर्णमास्यश्विनीभरणीभ्यां व्याप्ता कृत्तिका रोहिण्योरन्यतरयोगाच्च कार्तिकः । तथा तदनन्तरितस्य वृश्चिकादित्य सप्तमदिनोपक्रान्तस्य प्रतिपदादिदर्शान्तमासस्य पूर्णिमा कृत्तिकारोहिणीभ्यां व्याप्ता मृगशिरआर्द्रयोश्चान्यतरयोगान्मार्गशीर्षः । एवं विध एव कार्तिको द्विपञ्चाशदधिकनवशतसंख्याते शकाब्दे अन्धुकादिदर्शितवान् । न च तौ कार्तिकमार्गशीर्षौ न भवत एवेति वाच्यं । द्वयोरेव तुलावृश्चिकादित्यारब्धत्वाद्वा । वृश्चिकधनुःसंक्रान्ति चिन्हितत्वाद्वा । कार्तिकमार्गशीर्षपदप्रयोगाविवादात् । तत्रैव च प्रयोगेण योगस्य यन्त्रितत्वात् । अनेनैव धृते दर्शान्तेऽपि सावनमासेषु प्रयोगात् ॥ अतएव (पद्मपुराणम्)—

कार्तिक्यान्तु यदा ऋक्षमाग्नेयम्भवति क्वचित् ।
महती सा तिथिर्ज्ञेया स्नानदानादिकर्मसु ॥
यदा याम्यन्तु भवति तिथौ तस्यां नराधिप ।
तिथिः सापि महापुण्या ऋषिभिः परिकीर्तिता ॥

तस्यां कार्तिक्यां याम्यं भरणी तद् योगेऽपि कार्तिकत्वमव्याहतमेव प्रतीयते । अतएव तस्मिन्कार्तिके देवोत्थानं निर्विवादम् । अन्यथा वृश्चिके देवोत्थानं क्रियमाणं न चान्द्रे न वा सौरे कार्तिके कृतं स्यात् । तुलास्थ सूर्यसप्तमदिवसे अमावस्यायां लक्ष्मीप्रबोधस्य भूतत्वात्तदनन्तरित शुक्ले पक्षे च देवोत्थानस्य तस्मिन् शुक्ले सदाविष्णुरिति नियतत्वात् । किञ्च फाल्गुनः त्रिभोमतः इति पूर्वसिद्धं फाल्गुनमुद्दिश्य त्रिभत्वं ज्ञेयं । विहित त्रिभसम्बन्धादेव फाल्गुनत्वमितरेतराश्रयं स्यात् । नचैकनक्षत्र योगनिमित्तं फाल्गुनमुद्दिश्य नक्षत्रान्तरयोगोऽपि निमित्तत्रयविधानमिति । पूर्वावधृत निमित्तविरोधः । त्रिभपदे च विध्यनुवाद दोषापत्तेः पूर्वोक्तविकल्पकलापस्य च पूर्णिमान्तेऽपि मासविशेषात्तत्रापि यौगिकत्वं निरस्तं वेदितव्यम् ।

अस्मिंश्च पूषगणये गणितज्ञेभ्यो यथोक्तकालक्रममवगम्य विद्वद्भिः श्रद्धातव्यम् ।

किञ्च पूर्णिमा तोमासः कैश्चिदेव वैशाखादिपदैर्निर्दिष्टः । यस्तु वणिग्जनमात्रप्रयोगविषयः स चान्यथा व्युत्पन्नः दर्शद्वयातिक्रमेण त्वधिमासद्विराषाढत्वादिकञ्च वदन्तो मुनयो दर्शान्तएवमासे वैशाखादिपदमिति दर्शयन्ति तदन्तस्यैव तदानीं नियमेन सूर्यसंक्रान्ति वर्जितत्वेनाधिमासत्वात् । प्रतिध्यन्तरान्तस्य प्रतिपदुपक्रान्तमासद्वयस्यैव चैकराशिसूर्योपक्रान्तत्वेन द्विराषाढादिप्रयोगविषयत्वात् ॥ (तथाहि ज्योतिःशास्त्रम्) "अमावस्याद्वयं यत्र रविसंक्रान्तिवर्जितम् मलिम्लुचः स विज्ञेयः उत्तरश्चोत्तमः स्मृतः । मिथुनस्थो यदा भानुरमावस्याद्वयं स्पृशेत द्विराषाढः स विज्ञेयः

विष्णुः स्वपिति कर्कटे । तस्मात् पूर्णिमान्तो न वैशाखादिपदवाच्यो दूरे यौगिकत्वानुसारः (अमावास्यान्तेऽप्ययौगिकत्वमेवाह विष्णुः) मार्गशीर्षीशुक्लपञ्चदश्यां मृगशिरः संयुक्तायां चूर्णितलवणस्य सुवर्णतुलाभं प्रस्थमेकं चन्द्रोदये ब्राह्मणाय प्रतिपादयेत् । पौषी चेत् पुष्ययुक्ता स्यात् तस्यां गौरसर्षपादि कल्केन भगवन्तं स्नापयेत् । माघी मघायुक्ता चेत् तिलैः श्राद्धं कृत्वा पूतो भवेत् ।

अत्र चेदित्यादिपदेभ्यो नक्षत्रयोगस्य पौर्णमास्यां कादाचित्कत्वावगमात् नित्यवन्मार्गशीर्षादिपदप्रयोगनिमित्तत्वानुपपत्तेः । अथ द्विभत्रिभत्वान्मासानां नक्षत्रान्तरयोगेऽपि तत्तत्पदप्रवृत्तेश्चेच्छब्दस्योपपत्तिरिति । तत्र आषाढ्यामाषाढयुक्तायाम् अन्नपानप्रदानेन तदेवाक्षयमाप्नोतीति न स्यात् आषाढ्यमन्तरेणाषाढीपदाप्रवृत्तेः । आषाढ्यामित्यभिधायाषाढयुक्तायामिति पुनरभिधानानुपपत्तेः ।

योगादेवाषाढत्वात् तथा (पद्मपुराणम्) कार्तिक्यान्तु यदा ऋक्षमाग्नेयं भवति कचित् । महती सा तिथिर्ज्ञेया स्नानदानादि कर्मसु । आग्नेयं कृत्तिका तद्युक्तपौर्णमास्या एव कार्तिकीत्वात् । यदेति कचिदिति वचने न स्यात् तस्य तत्र नित्यसम्भवात् तस्मात् कार्तिकादि पदानि निमित्तान्तरादेव न तु यौगिकानि कार्तिकादेः पौर्णमास्यः कार्तिक्यादिका इति सिद्धम् ।

(भारतेऽपि) माससम्बन्धेनैव पौर्णमासीनां महाफलत्वावगमात् आषाढे कार्तिके वापि माघ वैशाखयोरपि । पौर्णमासीषु दातव्यं महादानं युधिष्ठिर । (मात्स्ये) वैशाखपौर्णमास्यान्तु ग्रहणे चन्द्रसूर्ययोः । पौर्णमासी तथा माघे तस्यां दानं फलं महत् ।

तेन माघी चेत् मघायुक्ता स्यादित्यादिष्वपि [illegible] मासासम्बन्धादेव पौर्णमासीनां माघीत्वादिकं निर्णीयते । (तत्र माघीपदं रूढिकमेव न तु यौगिकमिति पूर्वपक्षिणोऽभिप्रायः) वस्तुतः पञ्जिकाकारमिश्रैः [illegible] विषयशुद्धपर्यंयुक्तं कार्तिकमाससम्भवात्तु विशाखानक्षत्रयोगिनीष्वमावास्यासु पञ्चभिर्वर्षैः पञ्चमूल्या (सूर्यान्तम सोमयागविशेषः श्रौतकात्यायने २४ अ० ४ का० १ सू० विहितः) भवन्तीति [illegible] पञ्चसु वर्षेषु न प्राप्यते । तथाहि विशाखानक्षत्रयुक्तामावास्या तुलादित्यस्याष्टादशदिनेभ्यः पुरस्तादेव वृश्चिकादित्यस्य द्वादशदिनेभ्यः पुरस्तादेव सम्भवति । तुलायामष्टादशदिनानि विशाखायां ततः पूर्वं इति निर्विवादम् । वृश्चिके तु द्वादशदिनेभ्यः पुरस्तादनुराधाज्येष्ठयोरेव । अतस्तेषु दिनेषु विशाखायां यदा न चन्द्रः तदा कथममावास्या [illegible] सूर्यचन्द्रयोरेकत्रावस्थाननियमात् । तथा [illegible] तुलादित्यस्य [illegible] विशाखायां [illegible] वृश्चिकादित्ये [illegible] । [illegible] विशाखायोगो न पुनः [illegible] कार्तिक [illegible] पञ्जिकाकारवचनं [illegible] ।

(तंत्र चेयं युक्तिः)—यदि वैशाखस्येयमिति वैशाखी गृह्यते तदा वैशाखपद
पत्तिनिमित्तमण्द्वयमवगम्य पुनरणन्तरेण वैशाखी प्रत्येतव्या तथाहि विशाखा-
त्रयुक्तात् एकेनैवाण प्रत्ययेनेति शीघ्र शब्दावगतेरविच्छेदस्य त्वशब्दार्थो भूतस्यो-
यमात्रतोऽवगतेस्तस्य बाधएवेति तेषामभिप्रायः। पौषी चेत् पुष्यायुक्तास्यादित्या-
विच्छेदात् पौषस्येति वचनार्थं अथात्राप्यविच्छेदानुरोधः। ततः संवत्सरे
वा आनयन्ति तांश्चैवोक्षणः इत्यादिवचनबलात् तदा कार्तिके तदसम्भवात्
णस्येयमिति वैशाख्यमावास्या माह्या तस्याः प्रत्यन्दभावात् यत् पुनरेतत्साधनार्थं
मन्धुकेन मेषादित्यगतामावस्यायां वैशाखीपदं रूढं नक्षत्रयुक्तायान्तु यौगिकं
नारूढितोदुर्बलमिति। तदयुक्तम्। वैशाखस्येयं वैशाखीति पदस्य कल्पप्रयोगादेव
तिसम्भवे समुदाय शक्तिकल्पनानुपपत्तेः कथं रूढिता। प्रोक्षणीशब्देऽप्ययमेव।
नीया तु लभते नात्मानं योगबाधत इत्युक्तत्वात्। ननु वैशाखपदं मासवाचकं
म्बन्धिनी च तिथिर्नावयवान्तरोपान्तायेनावयवशक्त्या यौगिकत्वमतो रूढिरेव
ते। अण्प्रत्ययेन सहावयवद्वयं यद्यपि तत्र श्रूयते तथापि वैशाखपदमेव षष्ठी-
सम्बन्धिनं लक्षयति तेन प्रकृतिपदमवयवस्थाने वर्ततइति यौगिकत्वम्। यद्वा
र्थी पदमित्यत्र प्रथमाण प्रत्ययेन वृद्धी भूतायामपि पुनरणन्तरेणापि दीर्घस्यस्थाने
भवतीति वदपराप्रिवृद्धिरण विकारस्तत्सहितं वैशाखीपदं यौगिकं लाक्षणिकमेव
शाखीपदं स्वसम्बन्धिनी ननु रूढम्। सा चेयं लक्षणा नक्षत्रेणयुक्तः कालः
मन् पौर्णमासीति संज्ञायामित्यणद्वयावगमसापेक्षत्वान्नक्षत्रयोगमात्रेणामावास्या
पावगमः शीघ्रमिति स एव वचनार्थः स्यात्। यद्वा। परमुक्तं नक्षत्रेण युक्तः
इति नक्षत्रयुक्त पौर्णमास्येव वैशाख्यादि पदेनोच्यते न कालमात्रमिति।
नागमम्। पौषी रात्रिः पौषमहः माघीरात्रिः माघमहः इति नक्षत्रेण युक्तः काल
मिन्नेवसूत्रे उदाहृतत्वात् माससम्बन्धेनोदाहरणस्यानुपपत्तेः। माससम्बन्धस्याप-
त्वात् नक्षत्रेण युक्तयोदाहरणस्यादेयत्वात् अन्यथा पं पौर्णमासीत्येवोदाहरेत्।
व सूत्रेऽपि काल इति नोच्यते नक्षत्रेणयुक्त पूर्णिमन्येवं स्यात् सास्मिन्
मासीति धर्मशास्त्रेषु च निबन्धनान्तरेऽपि प्रायशः प्रयोगो दृश्यते।

तथाच (गोभिलः)—प्रौष्ठपद्यां हस्तेनोपाकरणं तैषीमुत्सृजन्तीति। प्रौष्ठपदी-
स्य विधिरनियता तस्यां हस्तेनोपाकरणं मास एव नित्य नक्षत्रयुक्ता
पोस्त्यादिका तैषीन्तु षड्छन्दोगानामुत्सर्जनाय विधिः पौर्णमास्येव नक्षत्रयोगा-
यते इत्यनागमम्। यत्र वैशाखमासस्य वैशाखीनिमहर्ग कालादृषिनि ठप् प्रत्ययेन
नीति स्यात् इत्युपाध्यायपादानां दूषणं तदपि पौर्णावे र पुष्यायुक्तमादित्या दि।
यान्तु यत्र मासमापे यम्भवति कचित्—मासपेक्षानन्दकाभिधानाय च प्रौष्ठ-
कासुहस्त इत्यादिभि मुनिभिरेव ठप् प्रत्ययस्यापि यनाशिमापनाः
। प्रयोगमूलत्वात् व्याकरणस्य तद्बाधाऽसम्भवात् शास्त्रकारागामेवमादि
रोनात्। सामान्यतः मार्गशीर्षोऽसिनि मन्यमानः तथैव इत्यादयनम
ण प्रत्ययेन वैशाखादिपद निष्पत्ति सम्भवात्। वचिदत्र शिरे पुनर्गः

प्रवर्तेत इति पाणिनीयानां व्याख्यानात्स्वार्थे ठञ् विधेः प्राप्तेः । किञ्च वैशाखीयो श्रावणीयादि प्रयोगस्य लोके शास्त्रे चादर्शनात् कालानुमिति । च वैशाखादिषु मन् समानार्थस्य कालविशेषवचनस्य नामतोऽनुपादानात् अकालार्थे भवविशेषे तु शब्दाद्यनवकाशात् मासार्धमासमासस्य ठञ् प्रत्ययेन मासस्य आर्धमासिकमिति सिद्धत्वात् । विशेषणभिन्ने वैशाखादिष्वत ठ प्रत्ययो नात्र प्रवर्त्यते । तेन पूर्वोक्तस्य प्रयोगा उपपन्नाः ।

यदपि च वृद्धिर्यस्याचामादिस्तद्वृद्धम् इति सूत्रेण यस्येति समुदाय उच्यते अचां मध्ये यस्य वृद्धिसंज्ञक आदिभूतस्तद्रूपं वृद्धसंज्ञं भवति वृद्धसंज्ञा च वैशाखादीनामपि तेन च वृद्धाच्छ इत्यनेन छ विधानात् वैशाखीयेत्यादि भवेदिति चोद्यं तदपि परिहृतम् । किंशुकादिमासादिभिर्योगानुपपत्तेः पूर्वसूत्रत्रयप्राबल्येन छस्य बाधात् ।

किञ्च वृद्धिर्यस्याचामादिस्तद्वा नामधेयस्येति वृद्धसंज्ञा वक्तव्या वक्तृत्वेन च विशेषवाचिनः पदस्य पाक्षिकी वृद्धसंज्ञा तेन देवदत्तस्यर्देवदत्तीया-देवदत्ता-इत्युदाहृत प्रत्ययाभ्यामेवोदाहृतं तेन वैशाखादीनां कालविशेषनामत्वेन पाक्षिकी वृद्धसंज्ञा अतो वैशाखस्येयमिति वैशाखीयेयणा सिद्ध्यति । अतएव लोके माघी सप्तमी माघी द्वादश्यादि व्यपदिश्यते ।

ननु चेद् यौगिकम् द्विभद्रिभसङ्कीर्तनं किमर्थमुच्यते स्वयमेव पृच्छन् योगाभावो भवतीति साधितमवगतञ्च भवता । यदस्य प्रयोजनं नोपलभ्यते निरर्थकमेव । इदञ्चास्य प्रयोजनम् । यथाथर्ववेदगुह्यादिशास्त्राणां विषयाणाञ्च च्यवनादीनाम् । नक्षत्रकीर्तनं तथा तत्तन्मासीयनक्षत्रोपजातदिव्यान्तरीक्षभौमापत्सूचितशुभाशुभफलविपाकज्ञापनाय मासानान्नक्षत्रकीर्तनं यन्मासीयनक्षत्रे पीडयत्यनुकूलयति वा शुभाशुभनिमित्तं वा भवति तस्मिन्नेव मासि फलविपाकमवधार्यानिष्टप्रशमनाय नृपतेः ब्राह्मणाः शान्तिमादौ प्रवर्तन्ते । तथा—उपयामगृहीतोऽसि मधवेत्वा गृह्णामीत्यादि विहितमधुमाधवादिमासेज्यायां सनक्षत्रो साधिदेवता इज्यन्ते इति मासानां नक्षत्रकीर्तनप्रयोजनम् । अतएव मासः कार्तिकोऽग्निदेवत्य इत्यादिना मासानान्देवताः कीर्तिता विष्णुना ।

तस्माच्चान्द्रे सौरे वा यौगिकत्वानुपपत्तेः रूढिरेव वाच्या ।

तत्र सौर एव रूढ्यावाच्य इति जितेन्द्रियः । सौरचान्द्रयोः श्रुतिस्मृति गृहीतत्वाविशेषेऽप्यनेकशक्तिकल्पनागौरवापत्तेरेकत्र शक्तिकल्पनायां सकलजनप्रसिद्धेः सौरे विनिगमनाप्रमाणं सौरे एव वैशाखादयो मुख्याः तदपि मनोऽनुगतमिति दीक्षितेन दूषितं—सर्वजनप्रसिद्धेऽपि राजपदस्य राज्यकर्तरि (राज्ञः कर्मराज्यं तत् करोतीति राज्यकर्ता तस्मिन्) मुख्यत्वानङ्गीकारात् । "तदुक्तं वार्तिककारपादैः" । नचाल्पत्वबहुत्वाभ्यां प्रयोक्तॄणां विशिष्यते । वाच्यवाचकभावोऽयमपक्षपातादि शब्दवत् । विभीतके अक्षशब्दं यद्यल्पैः प्रयुज्यते । तथापि वाचकस्तस्य ज्ञायते शङ्खशङ्खवत् । अथ राज्ञः कर्म राज्यमिति पाणिनिना व्युत्पादितत्वात् अप्रसिद्धे च राजनि तत्कर्मनिरूपणात् ।

तत्र राजपदस्यार्थः इति अत्र न कश्चिद्विरोधः । नैतदपि पाणिनिनैव

सास्मिन् पौर्णमासीति संज्ञायां विशाखादिनक्षत्रयुक्तपूर्णिमायोगात् वैशाखादिशब्दानां व्युत्पादनात् सौरेषु–आश्विनपौषमाघेष्वश्विनीपुष्यमघायुक्तपूर्णिमानां सर्वथैवासम्भवात्। चान्द्रेतु कादाचित्केनापि योगेनात्यन्तयोगव्यावृत्त्या विशेषणत्वसम्भवात् पाणिनिपुरस्काराय मेषाद्युपक्रान्ताश्च प्रतिपदादिदर्शान्ताश्चान्द्रा एव मुख्या वैशाखादयः। तथा सा वैशाखस्येत्यादि श्रुत्या चान्द्रस्यैव वैशाखस्य निर्दिष्टत्वात् वाच्यसन्देहे यववराहादि न्यायेनैव तदवगम इति चान्द्रो वैशाखः। तत्सामान्यादितरेष्वपि तथात्वमिति न्यायात् ज्यैष्ठादयोऽपि चान्द्राएव मुख्याः।

सौरस्तु—मेषादित्यारब्धत्वगुणयोगाद् गौण इति चेत्तदूषणं। तपस्तपस्यादि श्रुत्या सौराणां माघादिद्वादशमासानामेव निर्दिष्टत्वात्। ननु—न ते माघादिपदैर्निर्दिष्टाः सत्यं—तपस्तपस्यादिपदानां लोकतः भागुरिवचनात् कोषकारस्मरणाच्च माघादिपर्य्यायत्वावधारणात्। योहि रौहिणीं लोकसिद्धामेव प्राजापत्यनक्षत्रवचनतामादाय चान्द्रस्य वैशाखमात्रस्य श्रुत्यापरिग्रहणं वदति स कथं लोकशास्त्रप्रसिद्धं माघादिपर्य्यायत्वं तपस्तपस्यादीनां बाधते। भूयसामनुरोधेन रौहिणीपदस्यैव प्राजापत्यनक्षत्रवचनत्वं कुतो न बाधते। तस्माच्चान्द्रसौरयोरुभयोरपि श्रुतिपरिगृहीतत्वात् नास्ति यववराहन्यायः।

यवादिशब्दाः किं ह्यर्थाः नो चार्य्यम्लेच्छसाम्यतः।
दीर्घशूके प्रियङ्ग्वाद्याः द्वयेऽप्यर्था विकल्पिताः॥
यत्रान्या इति शास्त्रस्थ प्रसिद्धिस्तु बलीयसी।
शास्त्रीय धर्मे तेनात्र प्रियङ्ग्वादिर्न गृह्यते॥

यवस्य दीर्घशूके आर्य्यव्यवहारः प्रियङ्गुषु म्लेच्छव्यवहारः वराहपदस्य शूकरे आर्य्यव्यवहारः कृष्णशकुनौ म्लेच्छव्यवहारः। अतो यववराहपदयोर्वाच्यसन्देहे यत्रान्या ओषधयो म्लायन्ते अथैते मोदमाना इवोत्तिष्ठन्तीति वराहं गावो नुधावन्तीति श्रुती एव नियामिके वाच्यसन्देह नारिके ततश्च एते यवाः मोदमाना स्तिष्ठन्तीति वा य शेषात् यवपदस्य दीर्घशूके वराहं गावोऽनुधावन्तीति वाक्यशेषात् वराहपदस्य शूकरे शक्तिग्रहस्तथा वैशाखपदस्य वाच्यसन्देहे सा वैशाख्यमावस्या इति श्रुतौ वैशाखपदश्रुतेः वैशाखमात्रस्यैव निर्णये सैव श्रुतिर्निर्णायिका।

किञ्च वैशाखपदवाच्यसन्देहे यववराहपदस्येव वैशाखपदस्य भवति नियामिका श्रुतिः नतु तदन्येषाम्। नह्यन्यदीय वाक्यशेषेणान्यसंशयो पनीयते तत्सामान्यादिति न्यायेन च लोकशास्त्रप्रसिद्धतपस्तपस्यादि पर्य्यायतया माघादिशब्दानामवधृत सौरवचनत्ववाधे यववाराहादिषु म्लेच्छप्रसिद्धेर्बाधादप्येकनियतामरकोषादिष्वपि बाध्येत। तस्मात्तपस्तपस्यौ शिशिरौ तौ मासौ माघफाल्गुनौ। तथा तपामाघेऽथ फाल्गुने स्यात्तपस्य इत्यादि भागुरिकोषकार स्मरणाल्लोकतश्च तपस्तपस्यादिपदसमानार्थतावगतेः। तेषां श्रुतावुपनीतत्वात् माघादिशब्दानामपि श्रुतित एव सौरार्थावगतेः। बहूनामनुरोधेन वैशाखादिपदस्यैव अन्यथाकरणमनुचितमिति विपरीतोऽत्र यववराहादिन्यायो युक्तः। न च पाणिनिपुरस्कारः तस्यापि नवसु सौरेषु चरोपात् माघपौषाश्विनेषु हि तत्पुरस्कारः। स चान्त्ययोगव्यावृत्त्याबाध्यः सोऽपि न सम्भवति—अन्यथा एवदि

स्यात् । कालाभिव्यक्तौ नात्यन्तायोगव्यावृत्त्या भवति विशेषणम् । यथा [illegible] मासश्च इति [illegible] स एव [illegible] [illegible] [illegible] परिमाणकालत्वम् । अन्यथा परिमाणकाल [illegible] [illegible] [illegible] इति । अत्र च कालाभिव्यञ्जकत्वात् [illegible] [illegible] नात्यन्तायोगव्यावृत्तिरयोगादेव । यत्राप्ययोगः तत्रापि यौगिकत्वं न [illegible] चान्द्रत्वं [illegible] इति चेन्न । मासान्तरीय चान्द्रत्वस्यापि चान्द्र- विशेषणस्यान्यतावादिति । वैशाखादिपदानामन्योन्यव्यभिचरितत्वं मत्वैव मेषाद्यारम्भ प्रतिपदादिमासगतैकत्वेनात्यन्तायोगव्यावृत्तिरुच्यते इति चेत् तर्हि मेषादा- रम्भत्वमात्रे चान्द्रसौरयोर्बाधानापत्तेः स्यात् । सौरे त्वत्यन्तायोगव्यावृत्त्या विशेषणत्वम् अप्रतिहतम् । वैशाखादिप्रयोगविषयत्वं लोकसिद्धं हि पाणिनेरनुशासनम् । अन्यथा तिथ्यन्तरारम्भेषु सायनेषु चाविशेषात् । सौरमासस्य वैशाखादिपदप्रयोगविषयत्व चान्द्रस्यैवावशिष्टं समासादि तदप्यविरुद्धम् । किञ्च विशाखानक्षत्रयुक्ता पूर्णिमा कदाचिदस्मिन्मासे भवतीति वैशाखपदप्रवृत्तौ पाणिनिपुरस्कारे वैशाखपदावयवोपात्तस्य विशाखायुक्तपूर्णिमायोगस्य प्रवृत्तिनिमित्तत्वात् कथमयौगिकत्वं पदावयवोपात्तस्य हि प्रवृत्तिनिमित्तत्वेन यौगिकत्वं सम्भवतीति निद्दण्डीतिवत् । यथा च मीमांसादर्शने षाद्दशाध्यायाद्यपूर्वपक्षे स्वर्गकामनया अत्यन्तायोगव्यावृत्त्या विशेषणत्वेऽपि योगिकत्व- मेव स्वर्गकामपदस्य न रूढिः कल्पनागौरवात् । अथ व्यक्तयन्तरयोगं विनापि रथम- कुर्वेति रथकारपदस्यैव दर्शनादयौगिकत्वम् । तदाह पाणिनिः योगप्रमाणे च तदभावे ऽदर्शनं स्यात् । यौगिकस्य योगाभावे अप्रयोगः स्यात् । इत्यर्थः । न चात्राप्रयोग इति न यौगिकत्वं तत्र—अतएव रथकरणस्यैव नात्यन्तायोगव्यावृत्त्या विशेषणत्वमपीति कथं पाणिनिपुरस्कारः । कस्याश्चिचान्द्रव्यक्तौ तद्योगो नास्तीति तत्पुरस्कार इति चेन्न । मेषस्थसूर्यारब्धायां कस्याश्चिचान्द्रव्यक्तौ योगदर्शनादेवं सौरस्यापि मेषस्थादित्यार- ब्धत्वेन समान जातीयतयात्यन्तायोगव्यावृत्त्या विशेषणत्वेन पाणिनि पुरस्कारविरोधात् । अतएव दीक्षितेन तत्पुरस्कारमभिधायापि तदपरितोषेण कारणान्तरमेवोक्तम् ।-अथ सन्देहस्तथापि वाच्यसन्देहे यववराहादिश्रुतितोनेष्यते सा वैशाख्यामावस्या या रोहिण्या सम्पद्यत इत्यन्तं तदपि च दूषितम्—उभयोरपि श्रौतत्वात् विपरीतोवा यावद्विशेषः । वैशाखादयो द्वादशैव मासाः सौराः श्रौताः । चान्द्रस्तु वैशाखएव परं श्रौतः । तदेवं भूयसामनुरोधेन सौरवचनत्वमवधार्य्यते । पाणिनेस्तु प्रकृतिप्रत्ययविभाग- करणं स्वरमात्रप्रयोजनकम् । तदाह वार्तिककारपादाः—

'यदार्थस्य विसंवादः प्रत्यक्षेणोपलभ्यते ।
स्वरसंस्कारमात्रार्था तत्र स्यात्पाणिनिस्मृतिः ॥

किञ्च—मेषादित्योपक्रान्तत्वोपाधिना चान्द्रवैशाखो वाच्यः । मेषादित्य काल एव सौरो वैशाखः । तेन सौरावगमसापेक्षा चान्द्रावगतिर्जघन्या सौरात्—तत्र—तर्हि मेषादिस्थसूर्य्योपक्रान्तत्वमेव । सौरचान्द्रयोरेकवैशाखादिप्रवृत्तेर्निमित्तमस्तु । उभयत्र च

[illegible] (स्कान्दे)—[illegible] मुख्यकाला: ।
[illegible] सर्वं [illegible] ॥ इति ।

[illegible]

[illegible] चान्द्रे प्रयोगदर्शनम् । [illegible] [illegible] न साक्षात्— [illegible] दुर्लभम्—अन्यतरस्य व्यव- [illegible] विनिगमनाप्रमाणाभावात् उभयत्र शक्तिकल्प- [illegible] विनिगमनाप्रमाणाभावात् [illegible] तदस्तु [illegible] [illegible] चान्द्रस्य तु मुख्यार्थत्वे:पीष्यित [illegible] [illegible] चान्द्रवैशाखादिगमस्य [illegible] सौराणामेव [illegible] । अतएव च—

माघे मासि चतुर्थ्यान्तु वरमाराध्य च श्रियम् ।
पञ्चम्यां कुन्दकुसुमैः पूजा कार्य्या समृद्धये ॥

तथा भविष्ये—माघे मासि तृतीयायां गुडस्य लवणस्य च ।
दानं श्रेयस्करं राजन् स्त्रीणाञ्च पुरुषस्य च ॥

मात्स्यपुराणे— यस्मान्मन्वन्तरस्यादौ रथानापुर्दिवाकरः ।
माघमासस्य सप्तम्यां तस्मात्स्यात् रथसप्तमी ॥

स्मृतिसमुच्चये— सूर्य्यग्रहणतुल्या हि शुक्ला माघस्य सप्तमी ।
अरुणोदयवेलायां तत्र स्नानं महाफलम् ॥
माघे मासि सिते पक्षे सप्तमी कोटिभास्करा ।
तस्यां स्नानार्घ्यदानाभ्यामायुरारोग्यसम्पदः ॥

इत्यादिवचनविहितवरचतुर्थीश्रीपञ्चमीमाघीसप्तमीनां मकरस्थसूर्य्ये एव नि[illegible] निर्विवादः परिग्रहः । चान्द्रमात्रवचनत्वे तु कथमनुत्कर्षः । तुल्यवदुभयवचनत्वे [illegible] सौरपरिग्रहे किं प्रमाणम् । अतएव (सौरशक्तौ प्रमाणत्वाभावादेव) दीक्षितेन नायमर्थ[illegible] विसृष्टः कष्टत्वात् । न च,

द्विरापाढक्रिया तावद् यावद्विष्णोः प्रबोधनम् ।
विबुद्धे तु हरौ कार्य्याः सूर्य्यगत्येतराः क्रियाः ॥

अनेन विबुद्धे हरौ सूर्य्यगत्या कर्मविधानात् योगनिद्रास्थे चान्द्रेण कर्तव्यता-विधिः । शयनात्प्रभृति चान्द्रस्य विरोधाच्च । ततः प्रभृति सौरस्य ग्रहणं वाच्यम् । [illegible]तः शयितेऽप्युपाकर्म रोहिण्यष्टमीश्रवणद्वादशीहरितालिकाचतुर्थीसुखरात्रिप्रभृतीनां [illegible]सौरनियमस्य दर्शनात्—विबुद्धे तु हरौ वत्सोत्सवार्थश्चान्द्रनियमदर्शनात् । तथोत्तर-[illegible]त्रिकाधिमासे आगामिवत्सरे कर्कटे शयिते भगवति श्रीपतौ शक्र[illegible]गोविष्णूत्थानां [illegible]सहकन्यातुलास्वेव दर्शनात् । शयिते विबुद्धे च हरौ मन्वन्तरादितिथीनाम् विहित-[illegible]त्वात् सौरचान्द्रयोरन्यतरावधारणं न स्यात् तस्मात् सौर एव मुख्यत्वात् अनुत्कर्षः [illegible]नैतदपि वचनं यथोक्तन्यायबलवत्त्वेनैव वर्णनीयम्—सेनाशोकाष्टमी मद-

(श्रौते कर्मणीति शेषः) यस्मिन् देशे यदाचार* इत्येव वचनान्मनो-
नोत्सव मदनभञ्जिकादीनामपि सौरेष्वेव चैत्रादित्यविधिः सिध्यति। देवशयनादौ तु जघन्य चान्द्र परिग्रहः।

तस्मात् सौरो वैशाखादिर्मुख्यो जघन्यश्चान्द्र इति स्थितम्।

सा वैशाखस्यामावस्या इत्यत्र तु मुख्यस्यान्वयाभावात् जघन्यस्यापि चान्द्रस्य परिग्रह इति। मास शब्दश्च सौरसावननाक्षत्रचान्द्रेषु त्रिंशद्गुणितषष्टिनाड्यवच्छिन्न कालरूपतया सर्वत्र वर्तमानो न पृथक्शक्तिमपेक्षते। चातुर्विधा एव मासाः पुराणे दर्शिताः।

सौरः सौम्यश्च विज्ञेयो नाक्षत्रः सावनस्तथा।
मासश्चतुर्विधः शास्त्रे क्रियाभेदान्मनीषिभिः॥

तत्र षष्टिनाड्यवच्छिन्नत्वे सावनमासे त्रिंशद्भागस्य नियतमेव। चान्द्रसौर-नाक्षत्राणां त्रिंशद्भागस्य वृद्धिह्रासादीना यद्यप्यनियतं तथाप्यौत्सर्गिकं षष्टिनाड्यवच्छिन्नत्वमादाय लक्षणकरणमतएव वृद्धिह्रासावित्युच्यते। अन्यथावृद्धिह्रास[illegible] तथाविधमासस्य चार्द्धपक्षः। द्वादशमासाः संवत्सरः ऋतुविचारेतु ऋतुप्रकरणे लिखित इति सौराश्चान्द्रावेति विचारः।

*आचारप्रशंसा—करुणारसरञ्जितावयवैर्विद्वत्कुलतिलकायमानैरनेकाचार्य्यैः सकलजनधिषणासौगम्याय नाना ग्रन्थाः काले काले विरचिताः। सर्वेप्यास्तिका यथा-कालभावि तत्तत्कर्मसु तद्वचनाप्रतिबन्धकतयैव सर्वकर्मारम्भान्कुर्वन्ति तेषां लोकद्वये अपि शम्भवति। तत्रापि मुख्यत्वेन च कालपरत्वेन देशाचारपरत्वेन जातिधर्मादिविशिष्टधर्मपरत्वेन सर्वत्रैव व्यवहारस्य सर्वजनीनत्वाद् प्रत्याद्भुतत्वाच्चेत्येषां सर्वत्रैवादरः।

(तथा च भगवान्मनुः) यस्मिन् देशे य आचारः पारम्पर्य्यक्रमागतः। वर्णानां सान्तरालानां सः सदाचार उच्यते।'

(स्मृत्यन्तरे) सोऽनुष्ठेयो भवेद्धर्मो यो लोकश्रुतिसम्मतः।' शास्त्रशिष्टविरुद्धस्तु धर्मस्त्याज्यो बुधैः सदा। कुलस्य देशस्य च चित्तवृत्तिर्न खण्डनीया विदुषा कदाचित्। यः शास्त्रानुमतः स धर्म्मो लोकोबलीयाननयोर्विरोधे।'

(देवीभागवते) यस्त्वाचारविहीनोऽत्र वर्तते द्विजसत्तमः। स शूद्रवद्बहिष्कार्य्यो यथा शूद्रस्तथैव सः। आचारो द्विविधः प्रोक्तः शास्त्रीयो लौकिकस्तथा। उभावपि-प्रकर्तव्यौ न त्याज्यौ शुभमिच्छता। ग्रामधर्मा जातिधर्मा देशधर्माः कुलोद्भवाः। परिग्राह्या नृभिः सर्वैः नैव तांल्लंघयेन्मुने। दुराचारोहि पुरुषो लोके भवति निन्दितः। दुःखभागी च सततं व्याधिना व्याप्त एव च।

(गौतमः)यद्यपि स्यात् स्वयं ब्रह्मा तथापि लौकिकाचारं मनसापि न लंघयेत्।

(तथा रत्नमालायाम्) न शास्त्रदृष्ट्या विदुषा कदाचिदुल्लंघनीयाः कुलदेश-धर्माः। मूलं हि तेषां च्युत वेदशाखा भूयादधर्मस्थिति भट्टदोषः।

(गौतमसूत्रम्) देशजातिकुलधर्मा आम्नायैरप्रतिषिद्धाः।

(प्रमाणम्) एवञ्च सर्वकर्मसु देशकालादिव्यवस्था मुख्यतो विचारणीयेत्यलम्।

अथ मलमासनिर्णयः

एकसंक्रान्तिविरहितो मासः। संक्रान्तिद्वययुक्तो वा मासो मलमासः। अस्यैव मलिम्लुच इति संज्ञा। ज्योतिःशास्त्रे अयं नपुंसकोऽपि। द्विसंक्रान्तिमासस्तु मलमास एव नाधिमासः। एषोद्विसंक्रान्तिमासः क्षयाख्यः। अयं चिरेण कालेन यदाकदाचि-दायाति नत्वेकाधिमासवत् पुनः सहसा समायाति अब्ध्यद्रिनन्दै ६७४

अस्मिन्देशेपूर्णिमान्तोमासःप्रथ्यते बुधैः। चान्द्रसौर सायनमासानां मध्ये कस्यचित् क्वचित् प्रयस्तस्त्वेज्योतिर्गणे। "सौरमासोविवाहादौ यज्ञादौ सावनः स्मृतः। आब्दिके पितृकार्य्ये च चान्द्रोमासः प्रशस्यते।"

मलमास इति—यस्मिन् मासे न संक्रान्तिः संक्रान्तिद्वयमेव वा। मलमासः स विज्ञेयो मासे त्रिंशत्तमे भवेत्। इति (काठक-गृह्य)

मलिम्लुच इति—वसिष्ठः मासद्वैधं भवेद्वर्षे तिथिद्वैधं यदा भवेत्। तत्रोत्तरोत्तमो ज्ञेयः पूर्वः स्यात्तु मलिम्लुचः।

नपुंसक इति—असंक्रान्तो हि यो मासः कदाचित्तिथिवृद्धितः। कालान्तरात्समायाति स नपुंसक उच्यते।

नाधिमास इति—राशिद्वयं यत्र मासे संक्रमेतदिवाकरः। नाधिमासो भवेदेष मलमासस्तु केवलम्।

क्षयाख्य इति—असंक्रान्तिमासो ऽधिमासः स्फुटः स्याद् द्विसंक्रान्तिमासः क्षयाख्यः कदाचित्। क्षयः कार्तिकादित्रये नान्यतः स्यात्तदा वर्षमध्ये ऽधिमासद्वयं स्यात्। स्पष्टो ऽधिमासः पतितोऽप्यलब्धो यदायदा वा पतितोऽप्यलब्धः। सेकैर्निरेकैः क्रमशोऽधिमासस्तदादिनौघः सुधिया प्रसाध्यः। तत्र परो दुष्टः आद्यः शुद्धः। एकत्रमासद्वितयं यदि स्याद्वर्षे ऽधिकं तत्र परोऽधिमासः। त्रयोदशं तु श्रुतिराह वेदे चतुर्दशः क्वापि न चास्ति दृष्टः।

समायातीति—(सिद्धान्तशिरोमणौ) गतोऽब्ध्यद्रिनन्दैर्मिते

मिते काले कश्चित् पूर्वं जातः तिथीशै१११५मिते काले कश्चिद् भविष्यति । अङ्गाक्षसूर्यै१२५६ गजाद्र्यग्निभू१३७८ कुवेदेन्दु१४१ गोकु१६मितैर्वर्षैः कश्चिदायास्यति । त्रयोदशोमासश्चान्द्र एव न सौरः । अयं च त्रयोदशो मासः त्रिंशन्मासादूर्ध्वं षट्त्रिंशत्तमात्पूर्वं भवतीति नियमः । अनयोरेवासंक्रान्तस्य संसर्पः इति संज्ञा । द्विसंक्रान्तस्यांहस्पतिरिति संज्ञा।—संसर्पोऽसंक्रान्तोऽपि न मलमासः किन्तु शुद्धतुल्यः । उत्तरएवासंक्रान्तो मलमासः ।

शाककाले तिथीशैर्भविष्यत्यथाङ्गाक्षसूर्यैः । गजाद्र्यग्निभूभिस्तथा प्रायशोऽयं कुवेदेन्दुवर्षैः क्वचिद्गोकुभिश्च । अस्यार्थः—चतुःसप्त्यधिकैर्नवशतसंख्याकैर्वर्षैः परिमिते शककाले कश्चिदुक्तमासत्रयोपेतोवत्सरोगतः । यथोक्तसंख्या चाब्ध्यद्रिनन्दैरित्यनेन पदेन विवक्षिता । अब्धयश्चत्वारः अद्रयः सप्तनन्दा नव—एतत्संख्यात्रयगमका अङ्का गणकप्रसिद्ध्या प्रतिलोम्येन लिखिता यथोक्तसंख्यायां पर्यवस्यन्ति । तिथीशैरित्यत्रापि—तिथयः पञ्चदश ईशा एकादश तत्र गणकैरङ्केषु प्रक्षिप्तेषु पञ्चदशाधिकशतयुक्तसहस्रसङ्ख्या सम्पद्यते । तावद्भिः शकवर्षैर्मिते काले कश्चिदुक्तमासत्रयोपेतः संवत्सरः । अङ्गाक्षसूर्यैरित्यत्र अङ्गानि षट् अक्षाणीन्द्रियाणि पञ्चसूर्या द्वादश तत्राङ्कप्रक्षेपे सति षट्पञ्चाशदधिकशतद्वयोपेतसहस्रसङ्ख्योपपद्यते । तावद्भिर्वत्सरैर्मिते शककाले यथोक्तमासत्रयोपेतः कश्चित्संवत्सरः ।

अस्य चोदाहरणम्—पूर्वोदाहृत ईश्वरसंवत्सर प्राचीनोभाव संवत्सरः तत्र हि भाद्रपदबहुलामावस्यायां कन्यासंक्रान्तिस्तत ऊर्ध्वमसंक्रान्तमेकं मासमतीत्य उत्तरयोर्मासयोः क्रमेण तुलावृश्चिकसंक्रान्ती तत ऊर्ध्वमेकस्मिन्नेव मासे शुक्लप्रतिपदि धनुःसंक्रान्तिः दर्शे मकरसंक्रान्तिः ततः ऊर्ध्वं कुम्भसंक्रान्तिः अनन्तरे मासे दर्शे तत ऊर्ध्वमेकमसंक्रान्तमासमतीत्य—उत्तरस्यां शुक्ल-

प्रतिपदि मीनसंक्रान्तिः । एवं सत्येकस्मिन्नेव वत्सरे द्वायसंक्रान्तौ मासौ एकोद्विसंक्रान्तमासः इति यथोक्तमासत्रयं सम्पद्यते । गजाद्र्यग्निभूभिरित्यत्रापि गजा अष्टौ अद्रयः सप्त अग्नयस्त्रयः भूरेका तत्राङ्कप्रक्षेपे सत्यष्टसप्तत्यधिकशतत्रयोपेत सहस्रसंख्या सम्पद्यते तावद्भिर्वत्सरैर्मिते शककाले कश्चिदुक्तविधः सम्पद्यते वत्सरः । कुवेदेन्दुवर्षैरित्यत्र कुरेका वेदाश्चत्वार इन्दुरेकः तत्राङ्कप्रक्षेपेणैकचत्वारिंशदधिकशतसंख्या भवति । एतावद्भिर्वर्षैः क्वचित् पूर्वोत्तरयोः क्षयमासयोर्व्यवधानं भवति । गोकुभिश्चेत्यत्र नपुंसक (ऋवर्णलृवर्णयोर्नपुंसकसंज्ञा) वर्जितेषु स्वराक्षरेषु गण्यमानेष्वोकारो नवमः सम्पद्यते कुरेका तत्राङ्कप्रक्षेपे सति एकोनविंशतिर्भवति तावद्भिर्वत्सरैः क्वचित्पूर्वोत्तरयोः क्षयमासयोर्व्यवधानं भवति ।

अत्र द्विसंक्रान्तियुक्तस्य क्षयसंज्ञायामुपपत्तिरुच्यते ।

यदा धनुःस्थे रवौ दर्शपूर्तिस्तदा यस्य मेषादिव्यवचनेन मार्गशीर्षत्वं प्राप्तम् । तथासति पूर्वोदाहृते द्विसंक्रान्ते मासे धनुःस्थे रवौ दर्शो न समाप्तः किन्तु मकरस्थे । अतः पौषमासत्वमस्य सम्पन्नम् । तथा च मार्गशीर्षस्य तत्र लुप्तत्वात्तस्य क्षयसंज्ञा युक्ता । अत एवैकमासग्रासित्वादंहसः पापस्य पतिरिति व्युत्पत्त्या स एवांहस्पतिसंज्ञयाऽपि व्यवह्रियते । स च व्यवहारो बार्हस्पत्यज्योतिर्ग्रन्थे दृश्यते—यस्मिन् मासे न संक्रान्तिः संक्रान्तिद्वयमेव वा संसर्पांहस्पती मासावधिमासश्च निन्दिताः ।

तत्र क्षयमासात् प्राचीनो यो ऽसंक्रान्तः स संसर्पः । असंक्रान्तत्वेनैतराधिकमासवत्कर्मानर्हतायां प्राप्तायां तदपवादेन कर्मार्हः सन् सम्यक् सर्पतीति संसर्पः । अयोऽपि विवाहादौ निन्दिताः । यद्वर्षमस्योऽधिकमासयुग्मं तत् कार्त्तिकादि त्रितयं हृपाख्यम् । मासत्रयं स्यात्त्यमिदं प्रयत्नाद् विवाहयज्ञोत्सवमङ्गलेषु ।

अ सौर इति—प्रतिसंक्रान्तिदर्शमासः स च अ स्यानिगमने ।

असौ चान्द्रो न सौरः स्यान्नास्ति सौरश्चतुर्दश इति ॥

नियम इति—त्रिंशत्षट्त्रिंशन्मासस्य वाह्याभ्यन्तरयोर्द्वयोः अधिमासो विकल्पेन वादरायणकीर्तित इति ।

संसर्पक इति—दर्शद्वयं यदैकस्मिन्सौरे संसर्पको भवेत्। अहस्पतिर्यदैकस्मिंश्चान्द्रौ द्वौ संक्रमौ तदा । संसर्पाहस्पती चेति त्रिविधावधिमासकौ ।

शुद्धतुल्य इति—एकस्मिन्नेव वर्षे तु द्वौ मासावधिमासकौ । प्राकृतस्तत्र पूर्वः स्यादुत्तरस्तु मलिम्लुचः । घटकन्यागते सूर्ये वृश्चिके वाऽथ धन्विनि । मकरे वाऽथ कुम्भे वा नाधिमासो विधीयते ।

(ब्रह्मसिद्धान्ते) चैत्रादर्वाङ् नाधिमासः परतस्त्वधिको भवेत्। इति ।

(वटेश्वरसिद्धान्ते) मासः संक्रान्तिहीनोऽधिक इति कथितः शीघ्रवक्रप्रचारैः। संसर्पोऽहस्पतिः स्यात् समविषमतया चालनं तत् क्षयस्य । पूर्वैश्चन्द्रार्कयोगैर्विरहित रविसंक्रान्तितश्चालनं मा स्याद्वा तस्यार्कमासो यदि न चलति चै मासयुग्मं विचिन्त्यम्। मलमासस्वरूपं—इन्द्राग्नी यत्र हूयेते मासादिः स प्रकीर्तितः । अग्निषोमौ स्मृतौ मध्ये समासौ पितृसोमकौ । तमतिक्रम्य तु यदा रविर्गच्छेत्कदाचन । आद्यो मलिम्लुचोज्ञेयो द्वितीयः प्राकृतः स्मृतः । तस्य बीजम् दिवसस्य हरत्यर्कः षष्टिभागमृतौ ततः करोत्येकमहश्छेदं तथैवैकञ्च चन्द्रमाः । एवमर्द्धतृतीयानामब्दानामधिमासकम् । ग्रीष्मे जनयतः पूर्वं पञ्चाब्दान्ते तु पश्चिमम् । अन्यत्र मध्ये विषुवतोर्भानुर्वर्द्धयेत् यान्यहानि तु । तैः सम्भृतोऽधिकोमासः पतत्येवं त्रयोदशः इति । चान्द्रो मासोह्यसंक्रान्तो मलमासः प्रकीर्तितः। (वसिष्ठः)—यस्मिन् दर्शस्यान्तादर्वाग्वा परं दर्शम् । उल्लंघ्य भवति भानोः संक्रान्तिः सोऽधिमासः स्यात् । आद्यन्तदर्शयोर्मध्ये भानोरपतयोर्यदि ।

मलमासे वर्ज्यावर्ज्यनिर्णयः

द्विविधं इति मलमासे ऽनन्यगतिकं नित्यनैमित्तिकं मलमासे
मृतानां यथा मलमासेऽपि प्रत्याब्दिकम्, अन्यमासमृतानां प्रथमाब्दिकम्

नित्यनैमित्तिकमिति—नित्यनैमित्तिके कुर्यात् श्राद्धं कुर्यान्म-
लिम्लुचे । गर्भश्राद्धं गजच्छायां प्रेतश्राद्धं तथैव च । (वनस्पति
मलिम्लुचे । गर्भश्राद्धं गजच्छायां प्रेतश्राद्धं तथैव च । गजच्छाया तु सा ज्ञेया
यदि सोमे छाया या प्राक् पूर्वा तदा । गजच्छाया तु सा ज्ञेया
पितॄणां तृप्तिदायकम् । (वनस्पतिरमावास्या) सैंहिकेयो यदा सूर्य्यं
ग्रसते पर्वसन्धिषु । हस्तिच्छाया तु सा ज्ञेया तत्र श्राद्धम्प्रकल्पयेत् ।
कर्त्तव्यानि कार्य्याणि कालादर्शे—आदृशाह सपिण्डान्तं कर्मग्रहण
कर्त्तव्यानि कार्य्याणि कालादर्शे—आदृशाह सपिण्डान्तं कर्मग्रहण जातकर्म च । रोगे
जन्मनोः । सीमन्तं पुंसवं श्राद्धं व्रतानि च । प्रायश्चित्तं निमित्तस्य
तानिरताम्ये च योगे श्राद्धं । अन्नोदकुम्भमन्वादिमहालययुगादिषु ।
यथापूर्वं परत्र वा । श्राद्धमृधादिमासिकम् । मलिम्लुचान्यमासेषु
श्राद्धं दर्शे पहरहः श्राद्धमाब्दिकम् । श्राद्धं तु पूर्वदृष्टेषु तीर्थेष्वेवं युगादिषु ।
मृतानां श्राद्धमाब्दिकम् । श्राद्धं तु पूर्वदृष्टेषु तीर्थेष्वेवं युगादिषु ।
मन्वादिषु च महानं दानं दैनन्दिनञ्च यत् । तिलगोभूहिरण्यानां
नन्दयोगयोः क्रिया । पर्वहोमश्चाग्रयणं साग्नेरिष्टिश्च पर्वणोः ।
नित्याग्निहोत्रहोमश्च देवतातिथिपूजनम् । स्नानञ्च स्नानविधिना
गोग्रासादियजनम् । तर्पणञ्च निमित्तस्य नित्यस्याप्युभयत्र च ।
प्रथमाब्दिकमिति—यमः असंक्रान्ते ऽपि कर्त्तव्यमाब्दिकं
प्रथमं द्विजैः । तथैव मासिकं पूर्वं सपिण्डीकरणं तथा । मलमास-
मृतानां तु श्राद्धं यत् प्रतिवार्षिकम् । मलमासेऽपि तत्कार्य्यमिति
याज्ञवल्क्यादिभाषितम् । तथा च (पैठिनसिः)—मलमासे मृतानान्तु
श्राद्धं यत् प्रतिवत्सरम् । मलमासे ऽपि कर्त्तव्यं नान्येषान्तु
कदाचन ।

)—अग्न्याधानकारहोमश्च पर्वचाग्रयणन्तथा । मल-
काम्या इष्टिर्विवर्जयेत् । (प्रजापतिः) न कुर्यात्
काम्यं कर्म कथञ्चन । त्यक्त्वा नैमित्तिकं श्राद्धं

गयायात्रादिकं तत्र पिण्डादिकं च कुर्य्यात् । अनित्यमनिमित्तं च महादानादिकमविपन्ननामान्नप्राशन काम्यव्रतारम्भोत्सर्जनादिकं देवप्रतिष्ठादिकं उपाकर्मादिकं च मलमासे विवर्जयेत् । अब्दोदकादि

तद्धि तत्रैव कीर्तितम् । एकोद्दिष्टश्च यच्छ्राद्धं तन्नैमित्तिकमुच्यते । तत्कार्य्यं पूर्वमासेन कालाधिक्येऽपि धर्म्मतः ।

(सत्यव्रतः)—जातकर्मणि यच्छ्राद्धं नवश्राद्धन्तथैव च । प्रतिसंवत्सरं श्राद्धं मलमासेऽपि तत्स्मृतम् । (जातकर्मणि यत् श्राद्धं जातकर्मनिमित्तश्राद्धम् एतच्छन्दोगव्यतिरिक्तपरम्) यस्मिन् राशिगते भानौ विपत्तिं यान्ति मानवाः । तेषां तत्रैव कर्तव्या पिण्डदानोदकक्रियाः । वर्षे वर्षे तु यच्छ्राद्धं मातापित्रोर्मृताहनि । मलमासेऽपि तत्कार्य्यं व्याघ्रस्य वचनं यथा इति तिथ्यर्द्धे प्रथमे पूर्वोऽपरस्मिन्नपरस्तथा । मासाविति बुधैश्चिन्त्यौ क्षयमासस्य मध्यगौ । (तिथिपूर्वार्द्धजातानां मृतानां चोत्तरमासे वर्द्धापनं श्राद्धं च विधेयम् । तिथेरुत्तरार्द्धजातानां मृतानां चोत्तरमासे वर्द्धापन श्राद्ध च विधेयम् । इति) ।

गयायात्रादिकमिति—(वायुपुराणे) गयायां सर्वकालेषु पिण्डं दद्याद्विचक्षणः । अधिमासे जन्मदिने अस्ते च गुरुशुक्रयोः । न त्यक्तव्य गया श्राद्ध सिंहस्थेऽपि बृहस्पतौ । (श्राद्धस्य यात्रापूर्वकत्वाद्गयां प्रति यात्रापि न निषिद्धा) अन्यत्र—अधिमासे सिंहगुरावस्ते च गुरुशुक्रयोः । तीर्थयात्रा न कर्तव्या गयां गोदावरीं विना । इति ।

विवर्जयेदिति—अनित्यमनिमित्तञ्च दानं च महदादिकम् । अग्न्याधानाध्वरापूर्वं तीर्थयात्रामरेक्षणम् । देवारामतडागादि प्रतिष्ठा मौञ्जिबन्धनम् । आश्रम स्वीकृतिः काम्यवृषोत्सर्गस्च निष्क्रमः । राज्याभिषेकः प्रथमश्चूडाकर्मव्रतानि च । अन्नप्राशनमारम्भो गृहाणाञ्चप्रवेशनम् । स्नानं विवाहोनामानि तथापद्य महोत्सवम् । व्रतारम्भं समाप्तिञ्च काम्यं कर्म च पाप्मनः । प्रायश्चित्तन्तु

मलमासे वर्ज्यावर्ज्यनिर्णयः

द्विविधे ऽपि मलमासे ऽनन्यगतिकं नित्यनैमित्तिकं मलमासे मृतानां यथा कदाचित् मलाब्दिकम् अन्यमासमृतानां प्रथमाब्दिकम्

नित्यनैमित्तिकमिति-नित्यनैमित्तिके कुर्य्याच्छ्राद्धं कुर्य्यान्मलिम्लुचे । तीर्थश्राद्धं गजच्छायां प्रेतश्राद्धं तथैव च । (वनस्पति गते सोमे छाया या प्राङ्मुखी तदा । गजच्छाया तु सा ज्ञेया पितृणां दत्तमक्षयम् । (वनस्पतिरमावास्या) सैंहिकेयो यदा सूर्य्यं ग्रसते पर्वसन्धिषु । हस्तिच्छाया तु सा ज्ञेया तत्र श्राद्धम्प्रकल्पयेत् । कर्तव्यानि कार्य्याणि कालादर्शे—द्वादशाह सपिण्डान्तं कर्मग्रहण जन्मनोः । सीमन्ते पुंसवे श्राद्धं प्राशने जातकर्म च । रोगे शान्तिरलभ्ये च योगे श्राद्धं व्रतानि च । प्रायश्चित्तं निमित्तस्य पश्चात्पूर्वं परत्र वा । अब्दोदकुम्भमन्वादिमहालययुगादिषु । श्राद्धं दर्शे ऽहरहः श्राद्धमूर्वादिमासिकम् । मलिम्लुचान्यमासेषु मृतानां श्राद्धमाब्दिकम् । श्राद्धं तु पूर्वदृष्टेषु तीर्थेष्वेवं युगादिषु । मन्वादिषु च यद्दानं दानं दैनन्दिनञ्च यत् । तिलगोभूहिरण्यानां सन्ध्योपासनयोः क्रिया । पर्वहोमश्चाग्रयणं साग्नेरिष्टिश्च पर्वणोः । नित्याग्निहोत्रहोमश्च देवतातिथिपूजनम् । स्नानञ्च स्नानविधिना अभक्ष्यापेयवर्जनम् । तर्पणञ्च निमित्तस्य नित्यस्याप्युभयत्र च ।

प्रथमाब्दिकमिति—यमः असंक्रान्ते ऽपि कर्तव्यमाब्दिकं प्रथमं द्विजैः । तथैव मासिकं पूर्वं सपिण्डीकरणं तथा । मलमासमृतानां तु श्राद्धं यत् प्रतिवार्षिकम् । मलमासे ऽपि तत्कार्य्यमिति भागुरिभाषितम् । तथा च (पैठिनसिः)—मलमासे मृतानान्तु श्राद्धं यत् प्रतिवत्सरम् । मलमासे ऽपि कर्तव्यं ...पः

कदाचन ।

(ऋष्यशृङ्गः)—अवषट्कारहोमश्च

मासे तु कर्तव्यं काम्या इष्टिर्विवर्जयेत् । (मज।५.

मलमासे तु काम्यं कर्म कथञ्चन । त्यक्त्वा

च कार्य्यम् । द्वयोरपि कर्मार्हत्वात् । व्यवहितक्षयमासगतत्वादिकं क्षयमास एव कार्य्यम । इति । तत्रैव वर्ज्यान्यापि स्पष्टीकृतानि । उपाकर्मोत्सर्जने अष्टक श्राद्धानि गृहप्रवेशश्चूडामौञ्जीवन्धविवाहास्तीर्थादियात्रा वास्तुकर्मैतान्यधिवर्ज्यानि । देवप्रतिष्ठाकूपारामाद्युत्सर्गो नूतनवस्त्रालङ्कारधारणम तुलापुरुषमहादानानि यज्ञकर्माधानमपूर्वतीर्थदेवदर्शनं संन्यासः काम्यवृषोत्सर्गः राजाभिषेको व्रतानि सगतिक्रमान्नप्राशनं समावर्तनमतिक्रान्तनामकर्मादिसंस्काराः ।

शुक्रास्तादावपीति—बाल्ये वा यदि वा वृद्धे शुक्रे चास्तमुपागते । मलमास इवैतानि वर्जयेद्देवदर्शनम् । (देवदर्शन चानादिदेवतायाः यदाह)—अनादिदेवतां* दृष्ट्वा गुरुः स्युर्नष्टभार्गवे । मलिम्लुचेऽप्यनावृत्तं तीर्थस्नानमपि त्यजेत् इति ।

अन्यत्र—जीवे केशरिसंस्थिते भृगुसुते नष्टे तथा बालके वृद्धे दर्शयुगाभिभे रवियुते जीवे च मासे बुधः । विद्यां पार्थिवदर्शनं सुरगृहं कूपं मठं मन्दिरम् कुर्य्यान्नेव विवाहनञ्च नगरारम्भन्तडागानि च । तथा—रविणासंयुते जीवे सिंहसंस्थे गुरौ तथा । अस्तङ्गते तथा शुक्रे बाले वृद्धे तथैव च । व्रतं यानं विवाहञ्च विद्यां पार्थिवदर्शनम् । देवतायतनं कूपतडागारामसन्दिरम् । देवादीनां प्रतिष्ठाञ्च यागं कर्णस्य वेधनम् । सर्वथानैव कुर्य्याच्च

अनादिदेवदर्शनविचारः—*पूर्वार्द्धेन दर्शने दोषमात्रकीर्तनान्निषेधकल्पनातोऽनुषङ्गस्य बलवत्त्वात् त्यजेदित्यनुषज्यते (दर्शनं त्यजेदित्यर्थः) अनावृत्तमिति च न तीर्थस्नानमित्यनेनान्वितम् । द्वयोरपि कर्मकारकत्वात् । त्यजेदित्यनेनैवान्वयः । परस्परान्वयस्त्वेकत्यजति क्रियान्वयार्थः । चतुरोमुष्टिर्गिर्विपतीतिवत् । स च देवतादर्शने ऽप्यविशिष्टः । तस्यापि त्यजेदित्यनेनैवान्वयात् । अतो वचनान्तरेषु देवतादर्शनं देवताविलोकनमित्यादिसामान्यपदानामनावृत्तदर्शनपरत्वमेवानादिदेवताज्ञानार्थमेव तदपेक्षत्वात् । अन्यथा देवतामात्रदर्शननिषेध एव स्यात् । अस्य च विशेषवचननिरपेक्षत्वात् । आवृत्तदर्शननिषेधे च तावत्कालमनादिदेवतानामपूज्यताप्यापद्येत । विधिनिषेधानुपालकस्यैव शास्त्रतो देवपूजकत्वात् । धवलेनाप्युक्तं प्राथमिकानादिदेवतादर्शननिषेधोऽयम । इति । (अन्यैस्तु न चिन्तितमिदम्) इति अनादिदेवदर्शनविचारः ।

द्वादशाहादि उभयत्रापि कर्तव्यम् । स्पष्टीकृतञ्च (धर्मसिन्धौ)— सन्ध्याग्निहोत्रादिकं नित्यं ग्रहणस्नानादिर्नैमित्तिकं कारीर्यादिकं जीवितार्थं ग्रहीतजीवनार्थं ज्योतिष्टोमादिकं च काम्यं मलमासेऽपि कार्य्यम् । ज्योतिष्टोमादिनित्यं जातेष्ट्यादिकं नैमित्तिकं पुत्रकामेष्ट्यादिकं काम्यं च मलमासोत्तरं शुद्धमास्येव कर्तव्यम् । आरब्धकामस्य मलमासेऽप्यनुष्ठानम् । नूतनारम्भः समाप्तिश्च न कर्तव्यः । तथा पूजालोपादिनिमित्तकपुनर्मूर्तिप्रतिष्ठां गर्भाधानान्नप्राशनान्तसंस्कारान् अनन्यगतिकान् ज्वरादिरोगशान्तिमलभ्ययोगे श्राद्धं व्रतादिकं नैमित्तिकं प्रायश्चित्तं नित्यश्राद्धं ऊनमासादिश्राद्धानि दर्शश्राद्धं च मलमासेऽपि कुर्य्यात् । चैत्रादौ मलमासे मृतानां बहुकालेन कदाचित्प्राप्ते तस्मिन्नेव चैत्रादौ मलमासे प्राप्ते मलमास एव प्रतिसांवत्सरिकं श्राद्धं । शुद्धमासे मृतानां शुद्धमास एव कार्यम् । प्रथमाब्दिकं मलमासेऽपि कर्तव्यम् (असंक्रान्तेऽपि कर्तव्यमाब्दिकं प्रथमम् इति हारितवचनात्) द्वितीयादिकं तु शुद्ध एव । एकादशाहान्तकर्म सपिण्डीकरणं च मलेऽपि कार्य्यम् । द्वितीयमासिकादि श्राद्धं तु मले शुद्धे चावृत्या द्विवारं कर्तव्यम् । एवं च यत्र द्वादशमासिकम् अधिकमासे प्राप्ते यस्य मले शुद्धे चावृत्या द्विवारं कृत्वा ऊनाब्दकाले ऊनाब्दिकं च कृत्वा चतुर्दशमासे प्रथमाब्दिकम् कार्य्यम् । यस्मिन्वर्षे क्षयाख्यो मासः तत्र शुद्धे अधिके

सर्वस्य मलमासे विवर्जयेत् । उपाकर्मोत्सर्जनञ्च पवित्रदमनार्पणम् । अवरोहश्च हैमन्तः सर्पाणां बलिरष्टकाः । ईशानस्य बलिर्विष्णोः शयनं परिवर्तनम् । दुर्गेन्द्रस्थापनोत्थाने ध्वजोत्थानञ्च वज्रिणः । पूर्वत्र प्रतिषिद्धानि परत्रान्यच्च दैविकम् ।

च कार्य्यम् । द्वयोरपि कर्माहत्वात् । व्यवहितक्षयमासगतत्वादिकं क्षयमास एव कार्य्यम् । इति । तत्रैव वर्ज्यान्यपि स्पष्टीकृतानि । उपाकर्मोत्सर्जने अष्टक श्राद्धानि गृहप्रवेशश्चूडामौञ्जीवन्धविवाहास्तीर्थादियात्रा वास्तुकर्मैतान्यधिवर्ज्यानि । देवप्रतिष्ठाकूपारामाद्युत्सर्गो नूतनवस्त्रालङ्कारधारणम् तुलापुरुषमहादानानि यज्ञकर्माधानमपूर्वतीर्थदेवदर्शनं संन्यासः काम्यवृषोत्सर्गः राजाभिषेको व्रतानि सगतिकमन्नप्राशनं समावर्तनमतिक्रान्तनामकर्मादिसंस्काराः ।

शुक्रास्तादावपीति—बाल्ये वा यदि वा वृद्धे शुक्रे चास्तमुपागते। मलमास इवैतानि वर्जयेद्देवदर्शनम्। (देवदर्शनं चानादिदेवतायाः यदाह)—अनादिदेवतां* दृष्ट्वा शुचः स्युर्नष्टभार्गवे । मलिम्लुचेऽप्यनावृत्त तीर्थस्नानमपि त्यजेत् इति ।

अन्यत्र—जीवे केशरिसंस्थिते भृगुसुते नष्टे तथा बालके वृद्धे दर्शयुगाग्निभे रवियुते जीवे च मासे बुधः। विद्यां पार्थिवदर्शनं सुरगृहं कूपं मठं मन्दिरम् कुर्य्यान्नैव विवाहनञ्च नगरारम्भन्तडागानि च । तथा—रविणासंयुते जीवे सिंहसंस्थे गुरौ तथा । अस्तङ्गते तथा शुक्रे बाले वृद्धे तथैव च । व्रतं यानं विवाहञ्च विद्यां पार्थिवदर्शनम् । देवतायतनं कूपतडागारामममन्दिरम् । देवादीनां प्रतिष्ठाञ्च यागं कर्णस्य वेधनम् । सर्वथानैव कुर्य्याच्च

अनादिदेवदर्शनविचारः—*पूर्वार्द्धेन दर्शने दोषमात्रकीर्तनान्निषेधकल्पनातोऽनुपन्नस्य बलवत्वान् त्यजेदित्यनुपज्यते (दर्शनं त्यजेदित्यर्थः) अनावृत्तमिति च न तीर्थस्नानमित्यनेनान्वितम् । द्वयोरपि कर्मकारकत्वान् । त्यजेदित्यनेनैवान्वयः । परम्परान्वयस्त्वेकत्यजति क्रियान्वयार्थः । चतुरोमुष्टिर्निर्वपतीतिवत् । स च देवतादर्शनेऽप्यविशिष्टः । तस्यापि त्यजेदित्यनेनैवान्वयात् । अतो वचनान्तरेषु देवतादर्शनं देवताविलोकनमित्यादिसामान्यपदानामनावृत्तदर्शनपरत्वमेवानादिदेवताज्ञानार्थमेव तदपेक्षत्वात् । अन्यथा देवतामात्रदर्शननिषेध एव स्यात् । अस्य च विशेषवचननिरपेक्षत्वात् । आवृत्तदर्शननिषेधे च तावत्कालमनादिदेवतानामपूज्यताप्यापद्येत । विधिनिषेधानुपालकस्यैव शास्त्रतो देवपूजकत्वात् । धवलेनाप्युक्तं प्राथमिकानादिदेवतादर्शननिषेधोऽयम । इति । (अन्यैस्तु न चिन्तितमिदम्) इति अनादिदेवदर्शनविचारः।

पवित्रारोपणदमनारोपे अयनाकर्म मकरसंक्रान्त्यादिपातकसंस्थाः शयना- दिपर्वनागदमनाः श्रावणीकृत्यादिकर्माणि मलमासे वर्ज्यानि । निमि- त्तकानि ज्योतिष्टोमादिविहितानि पुनः प्रतिष्ठादीनि यदिनिमित्ता- नन्तरमेव क्रियन्ते तदा न मलमासादिदोषः । कालातिपत्तौ तु शुद्ध एव कार्याणि । आग्रयणं दुर्भिक्षसंकटे मलमासे कार्यम् । अन्यथा शुद्ध एव । युगादिमन्वादि श्राद्धानां मासद्वयेऽप्यावृत्तिः ।

करणे मरणम्भयेत् । केशरिगे सुरसचिवे व्रतमुद्वाहञ्च वर्जयेत् प्राज्ञः । व्रतकरणे व्रतभङ्गः स्यात् उद्वाहे योषितान्मरणम् । बालवृद्धत्वकालम् । पश्चं वृद्धस्तु पूर्वेण दशाहं पश्चिमेन तु । प्रत्युत्थाने दशाहन्तु पूर्वेण तु दिनत्रयम् । तथा—प्राच्यामस्तङ्गमने त्रयोदश चतुर्दशान्यपरे । प्रागुदये पञ्चनिशा भृगुसुनोः षडपरे ज्ञेयाः । अस्तकालः—द्वात्रिंशद्दिवसश्चास्ते जीवस्य भार्गवस्य च । द्वासप्ततिर्महत्यस्ते पादास्ते द्वादशक्रमादिति । भङ्गयन्तरेण । पश्चं वृद्धो महास्ते तु बालस्तत्र दशाहिकः पादास्ते तु दशाहानि वृद्धो बालो दिनत्रयम् । (महास्तः शुक्रस्य बृहस्पतेस्त्वस्ति) (ब्रह्मसिद्धान्ते)—रविणा सत्तिरन्येषां ग्रहाणामस्त उच्यते । ततो ऽर्वाग्वार्धकं मौढ्यादूर्ध्वं बाल्ये प्रकीर्तितम् । (वृत्तशते)—बालः शुक्रो दिवसदशकं पञ्चकं चैव वृद्धः पश्चादन्हां त्रितयमुदितः पश्चमन्द्रयां क्रमेण । जीवो वृद्धः शिशुरपि तथा पक्षमन्यैः शिशूतौ वृद्धौ भौमौ दिवसदशकं चापरैः सप्तरात्रम् । देशभेदेन (गार्ग्यः)— शुक्रो गुरुः प्राक् च पराक् च बालो विन्ध्ये दशावन्तिषु सप्तरात्रम् । वङ्गेषु हूणेषु च षट् च पञ्च शेषे तु देशे त्रिदिनं वदन्ति । कन्यायां कर्किसंस्थे मिथुनहरिगृहे केचिदाहुर्द्विजेन्द्राः । चापे मीने च राशौ दिवसकृतिगते सिंहसंस्थे च जीवे केचिद्लुप्ते च जीवे दिनकर- किरणैर्लुप्तशुक्रप्रकाशे । अस्यापवादः—वृषे मेषे झषे कुम्भे यथती चारगो गुरुः । न तत्र काललोपः स्यादित्याह गालवो मुनिः ।

संसर्पसंज्ञके चूडाकर्मव्रतबन्धविवाहान्याधानयज्ञोत्सवमहालयराजाभिषेका एव वर्ज्याः नान्यानि कार्य्याणि । अपूर्व व्रतारम्भो व्रतसमाप्तिश्च मलमासेन सपूर्वमाघस्नानादेः त्वयंमासेप्यारम्भसमाप्ती । मलमासे यानि वर्ज्यानि तानि सर्वाण्यपि शुक्रास्तादावपि वर्ज्यानि ।

अथ द्विराषाढनिर्णयः

मलमासस्यैव द्विराषाढसंज्ञको विशेषः । इयं च द्व्याषाढसंज्ञाउत्तरभाविनि संवत्सरे हरिस्वापविवेकायोपयुज्यते । सूर्य्यः पूर्वामावास्यान्त्यक्षणं विहाय उपान्त्यक्षणादौ यदा मिथुनं व्रजति मिथुनं त्यक्त्वा सोमरहितामभावस्याञ्च विहाय कर्कटराशिं गच्छति प्रतिपदादितिथौ तदा द्विराषाढसंज्ञको भवति । हरिशयनविधिस्तदा शुद्धाषाढे भवतीति ।

विद्यारम्भं विवाहं सुरवरभवनं नैवयज्ञं प्रतिष्ठाम् । आरम्भ एव व्रतादेर्निषिद्धो न तु समाप्तिः । तदाह (काश्यपः)—अद्यैकमन्दिरगतो यदि जीवभानू शुक्रोऽस्तगः सुरवरैकगुरुश्च सिंहे । नारभ्यते व्रतविवाहगृहप्रतिष्ठा चौरादिकर्मगमनागमनश्च धीरैः । नन्वधिमासे तत्तत्कर्मनिषेधात् षष्टिदिवसत्वाच्च तन्मासस्य षष्टिदिवसेष्वेवनिषेधः स्यात् । नैतत् । षष्ट्या तु दिवसैर्मासः कथितो बादरायणैः । पूर्वमर्द्धं परित्यज्य उत्तरार्द्धं प्रशस्यते । इति अधिमासनिर्णयः ।

व्रजतीति—व्रजति यदा मिथुनं विहाय कर्कि त्यक्त्वा राजवियर्जितान्तिथिञ्च सूर्य्यः । भवति तदा नियतं द्विराषाढः सुरशयनस्य विधिर्द्वितीयमासि । अन्यच्च—मिथुनस्थो यदा भानु रमावस्याद्वयं स्पृशेत् । द्विराषाढः स विज्ञेयो विष्णुः स्वपिति कर्कटे । इति द्विराषाढनिर्णयः ।

अथ संक्रान्तिनिर्णयः

मेषादिषु द्वादशराशिषु क्रमेण सञ्चरतः सूर्य्यस्य पूर्वस्माद्राशे रुत्तरराशौ संक्रमणं प्रवेशः संक्रान्तिः अतस्तद्राशिनामपुरःसरं स संक्रान्तिर्व्यपदिश्यते । राशयश्चामी—मेषवृषमिथुनकर्कटसिंहकन्यातुलावृश्चिकधनुर्मकरकुम्भमीननामकाः । तेषु द्वादशसु चत्वारि त्रिकाणि भवन्ति—तत्रैकस्मिंस्त्रिके क्रमेण चरस्थिरद्विस्वभावास्त्रयो राशयः । चतुर्षु त्रिकेषु मध्ये मध्यमा वृषभसिंहवृश्चिककुम्भनामकाः स्थिरराशयः । तेषां विष्णुपदमितिनामशास्त्रप्रसिद्धम् । ये त्वन्तिमा मिथुनकन्याधनुर्मीननामका द्विस्वभावा राशयस्ते षडशीति मुखसंज्ञकाः । ये पुनर्मेषकर्कतुलामकररूपाश्चरराशयस्तेषु मेषतुले विषुवसंज्ञके । कर्कटमकरावयनसंज्ञकौ—सूर्य्ये कर्कटे दक्षिणायनम् सूर्य्ये मकरे उत्तरायणम् । संक्रान्तिकाले दानस्य महत्पुण्यम् ।

विषुव इति—अयने द्वे विषुवे द्वे चतस्रः षडशीतयः । चतस्रो विष्णुपदाश्च संक्रान्त्यो द्वादशस्मृताः । मृगकर्कटसंक्रान्ती द्वे तूदग्दक्षिणायने । विषुवती तुलामेषे गोलमध्ये ततोऽपराः । धनुर्मिथुनकन्यासु मीने च षडशीतयः । वृषवृश्चिककुम्भेषु सिंहे विष्णुपदी तथा । तथा च (गालवः)—स्थिरभे विष्णुपदं षडशीति मुखं द्वितनुभे । तुलामेषौ विषुवं तुर्ये दक्षिणमयनं सौम्यं मृगे सूर्ये इति शब्दवाच्यो राशिः इति ।

महत्पुण्यमिति—होमस्नानादिकमन्वयव्यतिरेकाभ्यां शातातप आह । संक्रान्तौ यानि दत्तानि हव्यकव्यानि दातृभिः । तानि नित्यं ददात्यर्कः पुनर्जन्मनि जन्मनि । रवि संक्रमणे पुण्ये न स्नायाद्यदि मानवः । सप्तजन्मसु रोगी स्याद् दुःखभागीह जायते । इति ।

अथ संक्रान्तिनिर्णयः

मेषादिषु द्वादशराशिषु क्रमेण सञ्चरतः सूर्यस्य पूर्वस्माद्राशेरुत्तरराशौ संक्रमणं प्रवेशः संक्रान्तिः अतस्तद्राशिनामपुरःसरं सा संक्रान्तिर्व्यपदिश्यते । राशयश्चामी—मेषवृषमिथुनकर्कटसिंहकन्या-तुलावृश्चिकधनुर्मकरकुम्भमीननामकाः । तेषु द्वादशसु चत्वारि त्रिकानि भवन्ति—तत्रैकस्मिंस्त्रिके क्रमेण चरस्थिरद्विस्वभावास्त्रयो राशयः । चतुर्षु त्रिकेषु मध्ये मध्यमा वृषभसिंहवृश्चिककुम्भनामकाः स्थिरराशयः । तेषां विष्णुपदमितिनामशास्त्रे प्रसिद्धम् । ये त्वन्तिमा मिथुनकन्याधनुर्मीननामका द्विस्वभावा राशयस्ते षडशीति मुख-संज्ञकाः । ये पुनर्मेषकर्कतुलामकररूपाश्चरराशयस्तेषु मेषतुले विषुवसंज्ञके । कर्कटमकरावयनसंज्ञकौ—सूर्ये कर्कटे दक्षिणायनम् सूर्ये मकरे उत्तरायणम् । संक्रान्तिकाले दानस्य महत्पुण्यम् ।

विषुव इति—अयने द्वे विषुवे द्वे चतस्रः षडशीतयः । चतस्रो विष्णुपदश्च संक्रान्त्यो द्वादशस्मृताः । मृगकर्कटसंक्रान्ती द्वे तूदग्दक्षिणायने । विषुवती तुलामेषे गोलमध्ये ततोऽपराः । धनुर्मिथुनकन्यासु मीने च षडशीतयः । वृषवृश्चिककुम्भेषु सिंहे विष्णुपदी तथा । तथा च (गालवः)—स्थिरभे विष्णुपदं षडशीति मुखं द्वितनुभे । तुलामेषौ विषुवं तुर्ये दक्षिणमयनं सौम्यं मृगे सूर्ये इति शब्दवाच्यो राशिः इति ।

महत्पुण्यमिति—होमस्नानादिकमन्वयव्यतिरेकाभ्यां शातातप आह । संक्रान्तौ यानि दत्तानि हव्यकव्यानि दातृभिः । तानि नित्यं ददात्यर्कः पुनर्जन्मनि जन्मनि । रवि संक्रमणे पुण्ये न स्नायाद्यदि मानसः । सप्तजन्मसु रोगी स्याद् दुःखभागीह जायते । इति ।

आसामेवसंक्रान्तीनां वारभेदेन संज्ञाभेदः । घोरा, ध्वांक्षी महोदर्य्या, मन्दा, मन्दाकिनी, मिश्रा, राक्षसिका, इतिनामकाः । संक्रान्तिसमयो निमेषादपिसूक्ष्मत्वाज्ज्ञातुं दुःशक्यः अतश्च तस्मिन्काले स्नानादिकं कथं कुर्य्युः इति चेत् मुख्यकालस्यातिसूक्ष्मत्वात्तत्सन्निहिते पूर्वस्मिन्परस्मिन्वाकाले स्नानादिकं कुर्य्युः । सच निर्णीयते । मेषे उभयतो दशदशघटिकाः पुण्याः । वृषे पूर्वाःषोडश—मिथुने पराःषोडश—कर्के पूर्वास्त्रिंशत् । सिंहे पूर्वाः षोडश—कन्यायां पराः षोडश—तुलायां उभयतो दशदश । वृश्चिके पूर्वाः षोडश—धनुषि पराः षोडश—मकरे उत्तराविंशतिघटिकाः । कुम्भे पूर्वाः षोडश—मीने पराः षोडश

संज्ञाभेद इति—(आह कश्यपः) । घोराध्वांक्षीमहोदर्य्या मन्दामन्दाकिनी तथा । मिश्रा राक्षसिका सूर्य्ये संक्रान्तिर्ध्यर्क्कवासरात् इति ।

दुःशक्य इति—(तदाह वृद्धवसिष्ठः) संक्रान्ति समयः सूक्ष्मो दुर्विज्ञेयः पिशितेक्षणैः । तद्योगाच्चाप्यधश्चोर्ध्वं त्रिंशन्नाड्यः पवित्रकाः । इति । संक्रान्तिकालो (भगवतीपुराणे) सुखे नरे सुखासीने यावत् स्पन्दति लोचनम् । तस्य त्रिंशत्तमो भागस्तत्परः परिकीर्तितः । तत्परायुत भागस्तु त्रुटिरित्यभिधीयते । त्रुटेः सहस्रभागार्द्धं तत्कालं रविसंक्रमः । इति ।

पूर्वस्मिन्परस्मिन्निति—(वैवस्वतः) नाड्यः षोडशपूर्वेण संक्रान्तेस्तु परेण च । राहोर्दर्शनमात्रेण पुण्यः कालः प्रकीर्तितः (इदंसामान्येनोक्तम्) विशेषेण सएवाह । त्रिंशत्कर्कटे नाड्यो मकरे विंशतिः स्मृताः । वर्तमाने तुलामेषे नाड्यस्तूभयतो दश । षडशीत्यामतीतायामष्टिरुक्ताश्च नाडिकाः (अष्टिः षोडश तच्छन्दसः षोडशाक्षरत्वात्) पुण्याख्य विष्णुपद्याञ्च प्राक्पश्चादपि षोडश । त्रिंशत्कर्कटके पुण्ये मकरे विंशतिस्तथा । (भविष्ये) दक्षिणे पुण्यमतीतेचोत्तरायणे ।

इति । (५) निशीथे (अर्धरात्रौ) पूर्वां संक्रान्तौ पूर्वोत्तरदिनयोः पूर्वापरार्धे पुण्यं । अर्धरात्रात्पूर्वं संक्रमे पूर्वदिनोत्तरार्धं पुण्यम् । अर्धरात्रादूर्ध्वं संक्रमे उत्तरदिनपूर्वार्धं पुण्यम । सायं-सन्ध्यातिरिक्ते रात्रौ मकरसंक्रमे । परदिनमेवपुण्यम । सायंसंध्यायां संक्रमे पूर्वदिने पुण्यम् । कर्कटस्य तु प्रातः संध्यातिरिक्ते रात्रौ संक्रमे पूर्वदिने पुण्यम्–प्रातः संध्यायां परदिने एव पुण्यम । संक्रान्तिवत्तदयने ऽपि । पुण्यकाल निर्णयः । मकरे तु विशेषः ।

निशीथे इति—(वृद्धवसिष्ठः) संक्रामस्तु निशीथेस्यात्पञ्चामाः पूर्वपश्चिमाः । संक्रान्ति कालो विज्ञेयस्ततः स्नानादिकं चरेत् ।

अर्धरात्रादिति—(वसिष्ठः) अन्हिसंक्रमणे पुण्यमहः सर्व प्रकीर्तितम् । रात्रौ संक्रमणे पुण्यं दिनार्धं स्नानदानयोः । अर्धरात्रादधस्तस्मिन्मध्यान्हस्योपरिक्रिया ऊर्ध्वसंक्रमणे चोर्ध्वमुदयात्प्रहरद्वयम् ।

मकरसंक्रम इति—यदास्तमन वेलायां मकरंयाति भास्करः । प्रदोषे वार्धरात्रे वा स्नानं दानं परेऽहनि ।

कर्कटस्येति—अर्धरात्रे तदूर्ध्वं वा संक्रान्तौ दक्षिणायने । पूर्वमेव दिनं ग्राह्यं यावन्नोदयते रविः । सन्ध्यालक्षणम्—सन्ध्यात्रिनाडी प्रमितार्कबिम्बादर्धोदितास्तादधऊर्ध्वमत्र । याम्यसौम्ये त्वयनेक्रमात्तः पुण्यौ तदानीं परपूर्वघस्रौ ।

(पीयूषधारायां नारदः)—सूर्यस्योदय संध्यायां यदि सौम्यायनं भवेत् । तदोदयादहः पुण्यं पूर्वाह्णः पूर्वतो यदि । सूर्यास्तमन संध्यायां यदि सौम्यायनं भवेत् । तदाह पुण्य कालः स्यात्परतश्चेत्परेऽहनि ।

अयनेऽपीति–(जावालिः) संक्रान्तिषु यदा कालस्तदीयेऽप्ययने तथा । अयने विंशतिः पूर्वा मकरे विंशतिः परा तथा च (माधवः)

अथ पक्षनिर्णयः

पक्षपरिग्रह इत्यस्माद्धातोर्निष्पन्नः । देवकार्य्यार्थं पितृकार्य्यार्थं वा पक्ष्यते परिगृह्यते यः कालविशेषः स पक्षः । अथवा चन्द्रस्य पञ्चदशानां कलानामापूर्णक्षयो वा यस्मिन् गृह्यते स पक्षः । रूढो वायं पक्षशब्दः । स च द्वेधाविभक्तस्य मासस्यैकैकमर्धद्वं ते सद्विविधःशुक्लःकृष्णश्च । चन्द्रकलावृद्ध्युपलक्षितः शुक्लः चन्द्रकलाक्षयोपलक्षितः कृष्णः । पञ्चदशस्तोमनामकेन सामसमूहेन

मकरव्यतिरिक्तेषां दश संक्रान्तिसंदर्भनिर्णये संक्रान्ति यत् पुण्यम् । इति संक्रान्ति निर्णयः ।

तौ च द्वा पक्षावनुदेवानामसुराणाञ्च क्रमेण सृष्टत्वात्तयोः पक्षयोः प्रशस्तत्वाप्रशस्तत्वे । तदेतत्सर्वं होतृब्राह्मणे तैत्तिरीयाः पठन्ति । प्रजापतिरकामयत प्रजायेतेति स तपोऽतप्यत स त्रिवृत्तं स्तोममसृजत तं पञ्चदशस्तोमो मध्यतः उदहरत तौ पूर्वपक्षश्चापरपक्षश्चाभवतां पूर्वपक्षं देवा अन्वसृज्यन्त अपरपक्षमसुराः ततो देवा अभवन् असुराश्च । यं कामयेत वसीयान् स्यादिति तं पूर्वपक्षे याजयेत् वसीयानेव भवति य कामयेत पापीयान् स्यादिति तमपरपक्षे याजयेत पापीयानेव भवति तस्मात् पूर्वपक्षो ऽपरपक्षात् कारुण्यतरः । इति वसीयान्वसुमत्तरः । पापीयान् द्रव्यहीनः । कर्तॄणां शुभफलप्रापकत्वेन करुणामनिरागेनार्हतीति कारुण्यतरः । अनयोरप्यविनियोगः शास्त्रे दर्शितः—उभौ नियुक्तौ खलु शुक्ल कृष्णौ शुभाशुभे कर्मणि तौ प्रशस्तौ । इति पक्षनिर्णयः ।

इति श्री आचार्य पं॰ हरिनामदत्तशास्त्रिविरचिते
भास्करराजमान्यविद्यावाचस्पतिश्रीदेवीप्रसादशास्त्रि
मर्णोतेगङ्गासिंहकल्पद्रुमे संवत्सरादिपक्षान्तनिर्णयः ॥

मध्ये दिनस्य त्रिमुहूर्त्तापरनामकस्य सायाह्नमूलस्य पूर्वोत्तरभागाभ्या-मुक्तत्वात्तयोः पूर्वापरकालाम्।

अथ दिवसनिर्णयः ।

स चतुर्विधः चान्द्रसौरसावननक्षत्रभेदात् । एकेन तिथिना चान्द्रः । एकेनाहोरात्रेण सावनः । आदित्यभागभोगेन सौरः । चन्द्रनक्षत्रभोगेन नाक्षत्रः ।

अथ तिथिनिर्णयः

तिथिशब्दस्तनोतेर्धातोर्निष्पन्नः । तनोति विस्तारयति वर्द्ध-मानां क्षीयमाणां वा चन्द्रकलामेकां यः कालविशेषः सा तिथिः । यद्वा यथोक्तकलया तन्यत इति तिथिः । तिथयो विध्युक्तकर्मानु-ष्ठानफलसिद्ध्यर्थं तदंगतया निर्णीयन्ते—अत्यन्ताप्राप्तप्रापणं हि विधिः । स च विधिर्वेदवाक्यम्—तस्य च प्रामाण्यं सिद्धमेव—तन्मूलत्वात्स्मृतिपुराणानामपि विधित्वेन प्रामाण्यम् । स द्विविधः—प्रवर्तको निवर्तकश्च तिथयो निर्णेतव्याः कास्तास्तिथयः इति प्रश्ने

तन्यत इति— (तदुक्तं सिद्धान्तशिरोमणौ)—तन्यते कलया यस्मात्तस्मात्तास्तिथयः स्मृताः ॥

विधिरिति—विधिरत्यन्तमप्राप्तौ नियमः पाक्षिके सति । तत्र चान्यत्र च प्राप्तौ परिसंख्या विधीयते-इति ।

प्रवर्तकइति—अमावस्यायामपरान्हे पिण्डपितृयज्ञेन चर-न्ति । दर्शे स्नात्वा पितृभ्योऽथ दद्यात्कुशतिलोदकमित्यादि ॥

निवर्तक इति—अमावस्यायां नाधीयीत नाध्यापयेत् । न

चतुर्विध इति—तिथिनैकेन दिवसश्चान्द्रे माने प्रकीर्तितः । अहोरात्रेण चैकेन सावनो दिवस. स्मृतः । आदित्यभागभोगेन सौरो दिवस उच्यते । चन्द्रनक्षत्रभोगेन नाक्षत्रो दिवसः स्मृतः ।

प्रतिपदाद्याः षोडशतिथयः त्रिंशन्मुहूर्तात्मकेनाहोरात्रेण सूर्यमण्डल सकाशाच्चन्द्रस्य प्रथमकलानिर्गमे शुक्लप्रतिपद् । द्वितीयअहोरात्रेण द्वितीयकलानिर्गमे द्वितीया एवंतृतीयादयः । एवंक्रमेणपञ्चदशेनाहोरात्रेण

छिन्द्यादार्द्रदारुनाद्यादन्नं परस्यचेत्यादिकः। एवमुक्तोभयविधवि-धयुक्त कर्म्मणो ऽधिकरणत्वेन तिथियोगम्—कालेहि कर्मचोद्यते न कर्म्मणिकालः । तथाचोक्तम् (गर्गेण)—तिथिनक्षत्रवारादिसा-धनंपुण्यपापयोः। प्रधानगुणभावेन न स्वातन्त्र्येण ते क्षमा । इति ।

षोडशेति—(तथाचस्कान्दे) अमाषोडशभागेन द्विविप्रोक्ता महाकला । संस्थिता परमा माया देहिनो देहधारिणी । अमादि पौर्णमास्यन्ता या एव शशिनः कला । तिथयस्ताः समाख्याताः षोडशैव वरानने।(श्रुतिरपि)—तस्य रात्रयः पञ्चदशकला ध्रुवैवै-वास्य षोडशीकलेति । (येयमेत्युक्ता क्षयोदयवर्जिता ध्रुवा षोडशीकला तद्युक्त कालस्तिथिसामान्यम् इति)

कलायानिर्गम इति-(सोमोत्पत्तौ) प्रथमां पिवते वन्हिर्द्वि-तीयां पिवतेरविः । विश्वेदेवास्तृतीयां तु चतुर्थीं सलिलाधिपः। पञ्चमीं तु वषट्कारः षष्ठीं पिवति वासवः। सप्तमीमृषयो दि-व्यामष्टमीमजएकपात् । नवमीं कृष्णपक्षस्य यमः प्राश्नाति वैं क-लाम् । दशमीं पिवते वायुः पिवत्येकादशीं पुमान् । द्वादशीं पितरः सर्वे समं प्राश्नन्ति भागशः त्रयोदशीं धनाध्यक्षः कुबेरः पिवते कलाम् । चतुर्दशीं पशुपतिः पञ्चदशीं प्रजापतिः । निष्पीतः कला शेषश्चन्द्रमा न प्रकाशते । कला षोडषिका यातु अपः प्रविशते सदा । अमायां तु यदा सोम औषधीः प्रतिपद्यते । तमौषधीगतं गावः पिवंत्यम्बुगतं च यत् तत्क्षीरममृतं भूत्वा मन्त्रपूतं द्विजा तिभिः । हुतमग्निषु यज्ञेषु पुनराप्यायनं शशी । दिनेदिने कला-वृद्धिः पौर्णमास्यां तु पूर्य्यत इति । (सिद्धान्तशिरोमणौ) तिथ्युत्प त्तिः । अर्काद् विनिसृतः प्राचीं यद्द यात्यहरहः शशी । तच्चन्द्रमा नमंशैस्तु ज्ञेया द्वादशभिस्तिथिरिति।

मध्ये छिन्नस्य त्रिवृत्स्तोमनामकस्य सामसमूहस्य पूर्वोत्तरभागाभ्यामुत्पन्नत्वात्तयोः पूर्वापरपक्षत्वम् ।

अथ दिवसनिर्णयः ।

स चतुर्विधः चान्द्रसौरसावननक्षत्रभेदात् । एकेन तिथिना चान्द्रः । एकेनाहोरात्रेण सावनः । आदित्यभागभोगेन सौरः । चन्द्रनक्षत्रभोगेन नाक्षत्रः ।

अथ तिथिनिर्णयः

तिथिशब्दस्तनोतेर्धातोर्निष्पन्नः । तनोति विस्तारयति वर्द्धमानां क्षीयमाणां वा चन्द्रकलामेकां यः कालविशेषः सा तिथिः । यद्वा यथोक्तकलया तन्यत इति तिथिः । तिथयो विध्युक्तकर्मानुष्ठानफलसिद्ध्यर्थं तदंगतया निर्णीयन्ते—अत्यन्ताप्राप्तप्रापणं हि विधिः । स च विधिर्वेदवाक्यम्—तस्य च प्रामाण्यं सिद्धमेव—तन्मूलत्वात्स्मृतिपुराणानामपि विधित्वेन प्रामाण्यम् । स द्विविधः—प्रवर्तको निवर्तकश्च तिथयो निर्णेतव्याः कास्तास्तिथयः इति प्रश्ने

तन्यत इति— (तदुक्तं सिद्धान्तशिरोमणौ)—
कलया यस्मात्तस्मात्तास्तिथयः स्मृताः ॥

विधिरिति—विधिरत्यन्तमप्राप्तौ नियमः
चान्यत्र च प्राप्तौ परिसंख्या विधीयते-इति ।

प्रवर्तक इति—अमावास्यायामपराह्णे
ति । दर्शे स्नात्वा पितॄन्संतर्प्य

निवर्तक इति—अमावास्यायां

चतुर्विध इति—तिथिरेकेन दिवसश्चान्द्रे
सावने दिवसः स्मृतः । आदित्यभागभोगेन
नक्षत्रे दिवसः स्मृतः ।

ह्रासवृद्धिवशेन सन्देहसद्भावात् तन्निर्णयः प्रस्तूयते ॥ तिथिस्त्रेधा खर्वा, दर्पा, हिंस्रा खर्वः समता, यतः प्रभृतिपूर्वदिने प्रारब्धा परदिने च तावत्त्वेन समाप्तिः । दर्पा वृद्धिः । परदिने ऽधिककालेन समाप्तिः । हिंस्रा क्षयः । परदिनेन्यूनकालेन समाप्तिः । तस्यैतस्य त्रैविध्यस्य त्रिपरिवर्तनविशेषेण तिथिः शुद्धा (सम्पूर्णा) खण्डा (विद्धा) चेति द्वैविध्यमापद्यते । तत्र सम्पूर्णायान्तिथौ निर्विरोधमनुष्ठानम् । विद्धायां विचार्य्यकार्य्यम् । वेधस्तु सायंप्रातस्त्रिमुहूर्तात्मकः । प्रातः कैश्चिद् द्विमुहूर्तोऽप्युक्तः उपवासातिरिक्ते

वृद्धिः प्रकीर्तिता हिंस्रः स्यात् क्षय इत्युक्तं मुनिभिस्तिथिनिर्णये।

सम्पूर्णेति—(स्कन्दपुराणे) प्रतिपत्प्रभृतयः सर्वाउदयादुदयाद्रवेः। सम्पूर्णाइतिविख्याता हरिवासर वर्जिता (हरिवासर-एकादशी) तद्भिन्ना विद्धा। सम्पूर्णाश्च तथा खण्डास्तिथयो द्विविधा मताः। शुद्धा वृद्धाश्च सम्पूर्णास्तिथयो ऽपि द्विधामताः। षष्ठिदण्डात्मिका शुद्धा वृद्धा स्याद्येऽपरेऽहनि। या न्यूना षष्ठिदण्डात्माहोरात्रा खण्डनाहि सा।

वेध इति—पक्षद्वयेऽपि तिथयस्तिथिं पूर्वांतथोत्तराम्। त्रिभिर्मुहूर्तैर्विध्यन्ति सामान्योऽयं विधिः स्मृतः इति पैठीनसिः। उदये पूर्वया तिथ्या विद्धयते त्रिमुहूर्तकैः। सायं तूत्तरया तद्वन्न्यूनया तु न विद्धयते। वैध्यापि त्रिमुहूर्तैव न न्यूना वेधमर्हति। (इति माधवः)।

द्विमुहूर्त इति—उदिते दैवतं भानौ पित्र्यं चास्तमिते रवौ। द्विमुहूर्तां त्रिरन्हश्च सातिथिर्हव्यकव्ययोः (इति विष्णुधर्मे)। द्विमुहूर्तापि कर्तव्या या निविष्टा दिवामिनी। अयं वेधः प्रातरेव। सायं तु त्रिमुहूर्तः। यां तिथिं समनुप्राप्य यात्यस्तं पद्मिनीपतिः। सातिथिस्तद्दिने प्रोक्ता त्रिमुहूर्तैव या भवेत्।

विशेषवेधः सर्वकर्मसु स्वस्वकालव्यापिनी तिथिर्ग्राह्या । एकभ
दिनोत्तरदले मध्यान्हव्यापिनी ग्राह्या। मध्यान्हःपञ्चधा विभक्तदिनस
तृतीयःभागः । उभयदिनव्याप्ताव्याप्तौ च पूर्वा इति माधवः । उभ
दिनव्याप्त्यभावे पूर्वा ।

विशेषवेध इति—नागोद्वादशनाडीभिर्दिक्पञ्च दशभिस्तथ
भूतोष्टादश नाडीभिर्दूषयत्युत्तरां तिथिम् ।

कालव्यापिनीति—(विष्णुधर्मोत्तरे)-कर्मणो यस्य यः काल
स्तत्कालव्यापिनी तिथिः । तया कर्माणि कुर्वीत ह्रासवृद्धी
कारणम् ।

एकभक्त इति—पाद्मे । मध्याह्नव्यापिनी ग्राह्या एकभ
सदा तिथिः । तथा च (बौधायनः)-उदये तूपवासस्य नक्तस्य
स्तमये तिथिः । मध्यान्हव्यापिनी ग्राह्या एकभक्तव्रते तिथिः ।

मध्यान्ह इति—मुहूर्तत्रितयं प्रातस्तावानेव तु सङ्गवः
मध्यान्हस्त्रिमुहूर्तश्च सर्वकर्मसु गर्हितः । आतृतीयादपरान्हः
सायान्हश्च ततः परम् ।

पूर्वेति—दिनद्वयेऽपि तद्व्याप्तावव्याप्तौ चैकदेशतः । सम
व्याप्तौ च पूर्वैव वैषम्येऽव्यधिकेऽप्यनाम् । (दिवार्धसमयेऽतीतेभुज्य
नियमेन यत् एकभक्तमिति प्रोक्तमतस्तत् स्यादिवैव हि) इति ।

* प्रसङ्गात् पूर्वान्हापरान्हविचारः—द्विधाविभक्तान्हः पूर्वो भागः पूर्वान्हः अपरोभागोऽपरान्हः ।

पूर्वान्हस्नानः स्यात् पूर्वान्हे स्यात्तथाधयोः ।
अपरान्हे यदा गत्री तदहर्नियमं विदुः ॥

अत्र हि पूर्वान्हपदेनान्हः पूर्वार्द्धस्य ग्रहणम् अपरान्हपदेन चापरार्द्धस्य— अन्यथा मध्यन्दिने स्नानसंध्ययोः सन्निमित्तक्रियाकालो नाभिहितः स्यात् । न च पूर्वान्हापरान्हशब्दयोरन्यतरस्मिन्मध्यान्हस्यान्तर्भावमिति वाच्यम् । विनिगमनाकारणाभा नुष्ठानव्यवस्थापरमेः । गत्री तु स्नानादिषु गत्र्यायुदयमात्र इत्यनेनैवोदयपुनाडी एव दर्शितानन्तरं निर्दिष्टत्वे यथा विनिगमः । पूर्वान्हे चेद्भावात्पा अपरान्हे भा कर्तव्यतापि स्यान्नद्वयं निर्दिष्टम् ।

तथा प्रतिपत्तु त्वमावास्या पूर्वान्हव्यापिनी यदात्थेतदपि पूर्वान्हे व्याप्तिमपरान्हे भिश्च यदन्हो द्विधैव विभागं दर्शयति। अन्यथा मध्यान्हव्यापिनीत्युक्तं स्यात्। । (कात्यायनः)– स्वभास्थाने तु पूर्वान्हे कार्याणां निर्णयं नृपः। कुर्य्याच्छास्त्रप्रणीतेन धेनामित्रकर्षणः॥ दिवसस्याष्टमं भागमन्होभागत्रयन्तु यत्। स कालो व्यवहाराणां प्रस्तुः परः स्मृतः॥ दिवसमष्टधा विभज्याष्टम प्रथमार्द्धप्रहरं विहायापरभागत्रये ह्वरूपे कुर्य्यादिति दिनार्द्धस्य पूर्वाह्नतां दर्शयति। तथा मनुः—यथा चैवापरः पक्षः श्राद्धिशिष्यते। तथा श्राद्धस्य पूर्वाह्णादपराह्णो विशिष्यते। दिनस्य त्रिभाग वेपूर्वाह्न-ध्याह्नाभ्यामपरान्हो विशिष्यत इति ब्रूयात् पूर्वापरपक्षदृष्टान्ताच्च। तद्वदेवपूर्वाह्ना-ह्पक्षयोरप्यवच्छेदादवस्थितिरित्यवगम्यते। व्यक्तञ्च (ब्रह्माण्डपुराणे)—पक्षस्य पूर्वाह्णे श्राद्धं कुर्य्याद्विचक्षणः। कृष्णपक्षे पराह्णे तु रौहिणन्तु न लंघयेत्। णं नवमघटिका। तत्पश्चु दासात् प्रहरद्वयादूर्ध्वमपराह्न इति ज्ञापयति। अतएवोक्तं ्तियेण-पूर्वाह्णापराह्णौ च यद्यपि विष्णुपुराणादिषु नाडीत्रयं पूर्वापराह्नश्च तावानि-म्। तथापि पूर्वाह्णस्य मध्याह्न यावत् स्वकालत्वाद्य एव च। अपराह्णस्य च न्हापराह्णानन्तरं प्रवृत्तस्य सूर्य्यानुवृत्तिं यावदिति तत्र प्रत्येतव्यम्। मूर्तौ च पूर्वाह्णापराह्णाभ्यामपि दिनविभागादित्यन्तम्। तस्माद्रात्रेः पूर्वापरार्द्ध-भागवदन्होऽपि पूर्वान्हापरान्हविभागेनैव द्विधाविभागः।

यत्तु कश्चित्त्रिधा विधानं तत् पूर्वापरान्हयोरेकैकदेशाभ्यां मध्यन्दिनं पृथक् ोद्दिष्टादिश्राद्धविधानार्थम्।

पूर्वाह्णे दैविकं कार्य्यमपराह्णे तु पैतृकम्। एकोद्दिष्टन्तु मध्यान्हे प्रातर्वृद्धि रकम्। आमपात्रं तु पूर्वाण्हे सिद्धान्नेन तु मध्यमे पार्वणञ्चापराह्णे तु वृद्धिश्राद्धन्तु कम्। (वृद्धौ तु कश्चित्प्रातः कश्चिन्नाग्निकमिति विधानं तत् पूर्वागतविवाहादि-ं प्रातः पुत्रजन्मादिनिमित्तन्तु नाग्निकमिति व्यवस्था)

पाराशरेण च पञ्चधा विभक्तमाह—लेखाप्रभृत्यथादित्ये त्रिमुहूर्तगते रवौ। नःस्मृतः कालोभागश्चान्हस्तु पञ्चमः॥ सङ्गवस्त्रिमुहूर्तस्तु मध्यान्हस्तत्समः। ततस्त्रयो मुहूर्ताश्च अपराण्हः प्रकीर्त्यते। पञ्चमोऽथ दिनांशोयः स सायान्ह इति यद् यदेतेषु विहितं तत्तत्कार्य्यं विजानता (दिवसस्य पञ्चदशांशो मुहूर्तः) (वराहमिहिरः)–अन्हः पञ्चदशांशो रात्रेश्चैवमुहूर्त इति संज्ञा। सच विज्ञेयस्त-या यत्राम्बुभिर्युक्ता।

तेनोदयादित्यमण्डलरेखादर्शनात् प्रभृति मुहूर्तत्रयं यावत् प्रातः कालस्ततः परं। सङ्गवः। ततोऽपि परं तावानेव मध्यान्हः॥ ततः परं तावानेवापराह्णः स च तनामश्राद्धक्रियायां व्यतीपातवत् बहुफलप्रदत्वात्। ततोऽपि परस्तावानेव :। सोऽपिचापराह्णावयवएवाल्पफलत्वेन पृथग्दर्शितः॥ अत एव छन्दोगपरि-त्यायनः। पिण्डान्वाहार्य्यकं श्राद्धं क्षीणे राजनि शस्यते। वासरस्य तृतीयां न्ध्यासमीपतः। यदा चतुर्दशीयामं तुरीयमनुपूरयेत्। अमावास्या क्षीयमाणा द्धमिष्यते॥ तृतीयांशो ऽपराह्णः सायान्हसहितो ऽन्यथा अपराह्णे श्राद्धविधौ युदासो न स्यात्। तदा च दिवसस्य चतुर्थं प्रहरञ्चतुर्दशी अनुपूरयेत्सम्यक्

पूरयेदित्यमावास्यापरदिने क्षयगामितया व्यतीपातपरनामापराह्णं न व्याप्नोति तत्र परस्मिन्नहनि श्राद्धमिष्यते । कर्तव्यतया चतुर्थप्रहरे अमावास्याप्राप्तावपि न चतुर्थयामम् अनुपश्चात् तृतीयं यामं पूरयेत् यदीति योग्यलीकयस्याध्यानमादरणीयम् । अनहाम्यश्रुतकल्पनापत्तेः । तुरीयमिति कर्मतया अवगम्यमानं परिहाय द्वितीयां कर्मप्रवचनीययोगेनोपपदविभक्तितया वर्णयित्वा कर्मतया द्वितीयस्याध्याहारात् । अनुपूरणश्चामम्यक्पूरणं लोकप्रसिद्धम् । यथोक्तं वायुपुराणे—चतुर्थे प्रहरे प्राप्ते यच्छ्राद्धं कुरुते नरः। आसुरन्तद्भवेच्छ्राद्धं दाता च नरकं व्रजेत् ।यच्चमत्स्यपुराणम् सायान्हस्त्रिमुहूर्तः स्यात् श्राद्धं तत्र तु निन्दितम् । राक्षसी नाम सा वेला गर्हितं पितृ कर्मसु। अयमप्येतत्तु निन्दयतीति यत् पूर्वमुहूर्तद्वयप्रशंसार्थं न तु कर्तव्यतार्थम्। तथा वायुपुराणे दिवसस्याष्टमे भागे मन्दीभूते दिवाकरे । वृथा श्राद्धं हि कुर्वाणो दाता च नरकं व्रजेत् । मुहूर्तद्वयार्धं यामैकभागेनाष्टधा विभक्तस्यान्होऽष्टमभागो दिनार्द्धप्रहरः । यदभिप्रायमुक्तमष्टमे लोकयात्रा वहिः सन्ध्या ततः पुनरिति पूर्ववचनेन चतुर्थप्रहरप्राप्तिमात्र एव निषिध्यते। पुनरष्टमभागे निषेधानुपपत्तिः । ततश्चोत्तरोत्तर जघन्यार्थं वचनम् । अतएवाष्टम इत्यभिधाय पुनर्मन्दीभूत इति विशेषणादतिसन्ध्यासमीपस्यैव निषेधः । तथा च—वनस्पति गते सोमे छाया या पूर्वगामिनी । गजच्छाया तु सा प्रोक्ता पितॄणां दत्तमक्षयम् । नरस्य द्विगुणछाया गजछायेति कीर्तिता । अपराह्णे त्वमावास्या तत्र दत्तं न पश्यति। शास्त्रानतिक्रमणमात्रं भवतीति । अतएव पिण्डान्वाहार्य्यकं श्राद्धं क्षीणे राजनि शस्यते । वासरस्य तृतीयांशे नातिसन्ध्या समीपतः । इति पश्युदासो न स्यात्। तदप्युक्तं मत्स्यपुराणे—ऊर्ध्वं मुहूर्तात् कुतुपाद्यन्मुहूर्तचतुष्टयम् । मुहूर्तपञ्चकं चैतत् स्वधाभवनमिष्यते । कुतुपेन सह पञ्चकम् एतत् स्वधाभवनमिति एतदपि प्राशस्त्ये तत्रापि पञ्चके कुतुपरौहिणयाख्यं मुहूर्तद्वयमेकोद्दिष्टार्थं ततः परन्तु मुहूर्तत्रय मपराह्णस्य प्रशस्ततरमित्यर्थः । अतः पूर्वाह्णे दैविकं श्राद्धमपराह्णे तु पैतृकम् । एकोद्दिष्टन्तु मध्याह्ने प्रातर्वृद्धिनिमित्तकम् । एतदपि तथैव वर्णनीयम् । अतएवजितेन्द्रियेण—रौद्रश्चैत्रश्च मैत्रश्च तथा सारभटः स्मृतः (शालकट इति माधवीये) सावित्रोविजयश्चैव गान्धर्वः कुतपस्तथा । रौहिणेयो विरिञ्चिश्च जयोऽथ नैरृतस्तथा । महेन्द्रोवारुणश्चैव भटः पञ्चदशास्मृताः । एतान् मत्स्यपुराणोक्तानेकैकमुहूर्तपरिमितान् यावन्नियतक्रमसंज्ञानभिधाय दर्शितम् । ये रौद्रादयो भटान्ताः पञ्चदशमुहूर्तास्तत्र रौद्रादिरौहिणेयान्ताः पूर्वाह्णसाध्यदैवकार्य्याय विहिताः ।।विरिञ्चिप्रभृतयश्च भटान्ताः पितृक्रियायाम्—तत्रापि पार्वणपिण्डान्वाहार्य्यादिषु विरिञ्चिजयनैरृतमपराह्णव्यतीपातापरतानकं प्रशस्तम् । यमविहन्यामावास्यामपराह्णे पिण्डपितृयज्ञेनाचरन्तीत्यादि श्रुतिसूनयः । यत्तु माहेन्द्रवारुणभटत्रिमुहूर्तात्मकः सायान्हः सोऽपराह्णसम्भवे सति निन्दितः पितृकृत्य इत्युक्तम् । अत्र तु यत् जितेन्द्रियेणोक्तम् रौहिणेयोऽपि पूर्वाह्णकार्य्यं व इत इति तत्परं नानुमन्यामहे । दिनस्य द्विधा त्रिधा पञ्चधा दशधा भागेषु रौहिणस्य पूर्वाह्णे ऽनुप्रविष्टत्वात् । अतएव रात्रौ श्राद्धं न कुर्वीत इत्यनेन रात्रिसन्ध्ययो- र्न्तपर्य्युदासः । अन्यथापराह्णविहिना सायाह्नादेः पर्य्युदासत्वाद्विरित्यनर्थकं

नक्ते दिवारात्रव्यापिनीतिथिर्ग्राह्या । (नक्तं दिवारात्रिव्रतम्) अलाभे प्रदोषव्यापिनी ग्राह्या । संध्याकालं वर्जयित्वैव

दिवारात्रव्यापिनी इति—(स्कान्दे)—दिवारात्रिव्रतं यच्च एकमेव तिथौ स्मृतम् । तस्यामुभयव्यापिन्यां कुर्यादेव व्रतं व्रती ।

प्रदोषव्यापिनीति—प्रदोषव्यापिनी ग्राह्या तिथिर्नक्तव्रते सदा । एकादशीं विना सर्वाः शुक्ले कृष्णे समाः स्मृताः । (एकादश्युपवास प्रतिनिधिरूपं तु नक्तमेकादश्युपवासदिन एव कार्यम् न तत्रैकादश्याः प्रदोषव्यापित्वापेक्षा) इति । प्रदोषपरिमाणं (स्कान्दे)—उदयात्प्राक्तनी संध्या घटिकात्रयमिष्यते । सायं

स्यात् । ततश्च सायान्हस्य नातिनिन्दितत्वम् । किन्तु व्यतीपातनाम्नः सकाशात् , रात्रिसन्ध्ययोस्तु सर्वथैवेति विशेषः । तथान्धुकेनापि परमार्थतस्तु त्रिधाद्दिवसं विभज्य यः पूर्वोभागः स पूर्वाह्णो मध्यो मध्यान्हो ऽन्यो ऽपराह्ण इत्यभिधाय उक्तमपराह्णस्य पूर्वभागे श्राद्धकरणे शक्तौ सत्यां परभागस्य निन्दितत्वम् । प्रमादाद्विना तु तत्राकरणे परभागेप्ययोषइत्यर्थः । एकोद्दिष्टन्तु मध्यान्ह इत्युक्तम् । स च गन्धर्वकुतुपरौहिणेयैस्त्रिभिः तत्रापि रौहिणेयस्य प्राशस्त्यम् । यथा वायुपुराणोक्तम्—एवं यत्र गोपतिर्गोभिः कार्त्स्न्येन तपतिक्षणे । स कालः कुतपो नाम पितॄणां दत्तमक्षयम् । तथा च भविष्यपुराणे—दिवसस्याष्टमे भागे मन्दीभूते च भास्करे । सः कालः कुतपो ज्ञेयः पितॄणां दत्तमक्षयम् । तथाचापस्तम्बः—सप्तमात् परतो यस्तु नवमात् पूर्वतः स्थितः । उभयोरपि मध्यस्थः कुतपः स उदाहृतः । अशक्तौ तत्रारम्भः । तदाह गौतमः—आरभ्य कुतपे श्राद्धं कुर्यादारौहिणं बुधः । विधिज्ञो विधिमास्थाय रौहिणन्तु न लंघयेदिति । याज्ञवल्क्यः—मृताहनि तु कर्तव्यं प्रतिमासन्तु वत्सरम् । प्रतिसंवत्सरञ्चैवमाद्यमेकादशेऽहनि । अत्र प्रतिसंवत्सरमिति श्रुतेः मृताहनि मृततिथावश्यकर्तव्यता प्रतीतेः नित्यवत् कुतपादिकालस्याप्रवृत्तेः तद्विरोधेन कुतपादौफलभूयस्त्वमेव वाच्यम् । आह सत्यव्रतः—यस्मिन् राशिगते भानौ विपत्तिं यान्ति मानवाः । तेषां तत्रैव कर्तव्या पिण्डदानोदक क्रियाः । तथा प्रचेताः—प्रेतमासस्य यः पक्षः सतिथौ प्रतिवत्सरम् । यावत् स्मरति पौत्रोऽपि एकमुद्दिश्य दापयेत् । कार्तिकादिमासषट्के च कुतपादिव्यभिचारस्य बहुशः दर्शनात् प्रतिसंवत्सर श्रुतिविरोधात् । न च पतितत्वेन कालान्तरे तत् क्रियापाताभावात् विहितकालभावी सूतकादिनाऽधिकरणे पातो भवति । अन्यथा नित्यं पातापत्तेः । अतएवाह । श्राद्धविघ्ने समुत्पन्ने मृताहाविदिते तथा । एकादश्यां प्रकुर्वीत कृष्णपक्षे विशेषत इति विवेकान्तर्गत पूर्वाह्णापराह्णविचारः ॥

तत्रापि भोजनं कार्य्यम्। संध्यायां भोजननिषेधात्। यदा नक्त तिथिः पूर्वापरयोरह्नोः प्रदोष व्यापिनी तदा परैवग्राह्या। (दिवा-रात्रिव्यापित्वात्) यतिविधुरविधवाभिश्च नक्तं सायान्ह व्यापिन्यां दिनाष्टमभागे कार्य्यम्, एवं भोजनमपि सायान्हव्या-पिन्यां दिवैव कार्य्यम्। अयाचिते तु विशेषवचनाभावात् उपवासे कृते उपवासवन्निर्णयः। न विद्यते याचितं यस्मिन्भक्षणे तदयाचितं नाम। अहोरात्रं याचितान्नं न भोक्ष्ये इत्येवं रूपः संकल्पः। अस्य चोपवासवदहोरात्रसाध्यत्वादयाचितनिर्णयो दिवारात्रियोगित्वे तस्या-मेवानुष्ठानम्। दिवारात्रिव्रतं यत्न इति स्कान्दवचनात्। यदा

सन्ध्या त्रिघटिका अस्मादुपरिभास्वतः। प्रदोपस्त्रिमुहूर्तः स्याद् भास्वत्यस्तंगते सति। तथा च (विश्वादर्शे)—प्रदोषोऽस्तमयादूर्ध्वं घटिकात्रयमुच्यते। नक्तस्य कालद्वयं (भविष्यपुराणे)—मुहूर्तोनं दिनं नक्तं प्रवदन्ति मनीषिणः। नक्षत्रदर्शनान्नक्तमहं मन्ये नराधिप। (अधिकारिभेदेन कालद्वयव्यवस्थामाह देवलः)—नक्षत्र दर्शनान्नक्तं गृहस्थस्य बुधैः स्मृतम्। यतेर्दिनाष्टमे भागे तस्य रात्रौ निषिध्यते। स्मृत्यन्तरे—नक्तं निशायां कुर्वीत गृहस्थो विधिसंयुतः। यतिश्च विधवा चैव कुर्य्यात्तत्स दिवाकरम्। स दिवाकरं तु तत्प्रोक्तमन्तिमे घटिकाद्वये। निशानक्तं तु विज्ञेयं यामार्धे प्रथमे सदा।

भोजननिषेधादिति—(मार्कण्डेयपुराणे)—चत्वारीमानि कार्य्याणि संध्यायां परिवर्जयेत्। आहारं मैथुनं निद्रां स्वाध्यायं च चतुर्थकम्।

परैवग्राह्येति—(जाबालिः)—यदि स्यादुभयोरन्होः प्रदोष-व्यापिनी तिथिः। तत्रोत्तरत्रनक्तं स्यादुभयत्रापि सायतः। अन्यत्रापि—प्रदोषव्यापिनी नक्ते तिथिर्व्याप्तिर्दिनद्वये। अव्या-प्तिर्वाप्यंशेन व्याप्तिः स्यात् सर्वथोत्तरा। इति।

तु. तिथिरेकस्मिन् दिने दिवैव अन्यस्मिन्रात्रावेव
हव्योपिन्येव ग्राह्या अहः सु तिथयः पुण्याः इति जाबालिवचन

चत्सोक्तं प्रदोषपरिमाणम्—प्रदोषोऽस्तमयादूर्ध्वं घटिका
मिष्यते इति। गौडास्तु इत्यारभ्य—अस्य सन्ध्यावन्दना
त्वादित्यन्तं (निर्णयसिन्धुकारोक्तं) तद् प्रागल्भ्य विजृम्भितं
शिवपूजने नक्तभोजने च य सोक्तप्रदोषस्यैव सर्वत्र विहित
यच्च (मदनरत्ने) नक्तस्येत्यारभ्य हिंसनंस्यादित्यन्तं(निर्णयसि
कारोक्तम्)तत्सर्वं विधिस्पृष्टे निषेधानवकाशादिति मीमांस
घोषविरोधात् घटिकाद्वयत्रयप्रदोषप्रतिपादक माधवादि
विरोधाच्चोपेक्ष्यम् (कालतत्त्वविवेचने) घटिकात्रयसंध्याग्रह
चैधनक्तभोजने नक्षत्रदर्शनानन्तरं घटिकात्रयमध्येऽपि क्रिय
न दोषः। तद्विषयत्वे तु विधिप्राप्ते निषेधप्रवृत्तौ विहितनिषे
नाष्टदोषदुष्टविकल्पापत्तेरिति अनेनव न्यायेनादित्यवारसंक्रा
दिषु रात्रिभोजननिषेधस्य रागप्राप्तविषयत्वादष्टम्यादिन
रविवारादियोगेऽपि रात्रावेव कर्तव्यमिति रत्नाकरः। य
विधवा चैव कुर्यात्सदिवाकरम्। सदिवाकरं तु तत्प्रोक्तमा
घटिकाद्वये। निशानक्तम् तु विज्ञेयं यामार्धे प्रथमे सदा इति

सौरनक्तमिति—त्रिमुहूर्तस्पृगेवाह्नि निशिचैतावती ति
तस्यां सौरं भवेन्नक्तमहन्येवतु भोजनम्। (भविष्यपुराणे)
त्वादित्यदिने ब्रह्मन्नक्तं कुर्वन्ति मानवाः। दिनान्ते ते तु भु
रन्निषेधाद्रात्रिभोजने।

उपवासवदिति—अयाचिते तु तिथयः स्वीकार्या उप
वत् इति। प्रसङ्गादन्याः कारिकाः। सोदयत्रिमुहूर्तायां कुर्य
व्रतानि च। (उदयेन सहितास्त्रयोमुहूर्ता यस्याम्) उ
तथात्वे तु पूर्वस्यु स्तदनुष्ठितिः। परत्रैव तथात्वं चेत् पूर्वा
तिथिक्षये। तिथिः साम्ये च वृद्धौ च गृह्यतां तिथिरुत्तरा। अ
चैकदेशस्य व्याप्तौ पूर्वैव गृह्यताम्। एकोद्दिष्टे न

भगवान्नाम लाभे तु दिवारात्रौ वा अनिशिदकाले नक्तभोजनं कार्य्यम । असमर्थे तु रात्रावेव । तत्र भोजनद्रव्यं पञ्चगव्यमनो-पनीतम् इति ।

नक्षत्रव्रतनिर्णयः

सूर्य्यास्तमय कालव्यापिनि नक्षत्रे नक्षत्रव्रतं । यदा अत्यन्तक्षयगामि नक्षत्रं दिनद्वयेऽप्यस्तमय कालव्यापि न भवति तदा-धंगमादर्वाक् चन्द्रेण युक्ते नक्षत्रे कार्य्यम् नक्षत्रोपवासे या तिथिः सैव नक्षत्रविहितनक्तकमत्रयोगपि ग्राह्या ।

प्रतिपन्निर्णयः—शुक्लप्रतिपत् पूर्वापराह्णव्यापिनी ग्राह्या तदभावे सायान्हव्यापिनीति माधवः । कृष्णप्रतिपत्परा—उपवासे

स्यादेकभक्तवत् । एकदेशसमव्याप्तौ क्षये पूर्वाऽन्यथोत्तरा । कृतपाद्यपराह्णान्तां व्याप्तिराब्दिकउत्तमा । तदभावे ऽपराह्णस्य व्यापिका गृह्यतां तिथिः । क्षये पूर्वोत्तरा वृद्धौ व्याप्तिश्चेदपराह्णयोः । न ग्राह्य तिथिर्गौ वृद्धिक्षयावृद्धतिथेस्तु तौ । साम्ये वृद्धे तिथेर्ग्राह्या परविद्धैव वृद्धिवत् । न स्पृशेदपराह्णे चेत् पूर्वा स्यात् कुतपो वृथा । वैषम्येणैकदेशस्य व्याप्तौ ग्राह्या महत्त्वतः । साम्येन चेत् क्षये पूर्वा परास्याद्वृद्धिसाम्ययोः । वृद्धि साम्यक्षया ग्राह्या तिथिगानोर्द्धगा इह—इति ।

प्रतिपदिति—तिथीनां प्रवरा यस्माद्ब्रह्मणा समुदाहृता । प्रतिपद्यापदे पूर्वे प्रतिपत्ते न सोच्यते इति । (मदनरत्ने)—प्रति-पत्संमुखी कार्या या भवेदपराण्हिकी । (संमुखीसायान्हव्यापि नीति निर्णयामृतोऽक्तोर्थः प्रामादिकः हेमाद्रिविरोधात् सम्मुखी पूर्वविद्धा—सापि यदा पञ्चधा विभक्तस्यान्हस्चतुर्थभागव्यापिनी तदैव पूर्वविद्धा ग्राह्या-अन्यथा सायान्हव्यापिनीति माधवः) तदभावे तु सायान्हव्यापिनी परिगृह्यताम् इति ।

कृष्णप्रतिपदिति—कृष्णा तूत्तरतोऽखिला इति दीपिका ।

कृष्णापि पूर्वा बलिपूजने गोपूजनादौ पूर्वविद्धा दिनद्वये सायान्ह-व्यापित्वे परा। चन्द्रोदयनिषेधाच्चन्द्रोदयदर्शने सा न ग्राह्या। नारीनीराजनमङ्गलमालिके तूदये घटीमात्रापि द्वितीयायुता ग्राह्या। पूर्वविद्धानिषेधात् इति।

द्वितीयानिर्णयः—उपवासे द्वितीयापरा ग्राह्या यमद्वितीया

उपवास इति—(ब्रह्मवैवर्ते)—प्रतिपत्पञ्चमी भूत सावित्री वटपूर्णिमा। नवमी दशमी चैव नैवोष्याः परसंयुताः। तथा च (जाबालिः)-प्रतिपत्पञ्चमी चैव उपोष्या पूर्व संयुता।

बलिपूजन इति—वत्सरोत्सवं च पूर्वेद्युरुपवासवदाचरेत्। श्रावणी दुर्गनवमी दूर्वा चैव हुताशनी। पूर्वविद्धैव कर्तव्या शिवरात्रिर्बलेर्दिनम्।

गोपूजनादाविति—प्रतिपद्दर्शयोगे पूजनं तु गवांमतम्। परविद्धेषु यः कुर्य्यात्पुत्रदारधनक्षयः। इति वृहद्यमः।

परेति—(पुराणसमुच्चये)—वर्द्धमानतथौ नन्दा यदि सार्ध त्रियामिका। द्वितीया वृद्धिगामित्वादुत्तरा तत्र चोच्यते इति।

चन्द्रोदर्शन इति—गवां क्रीडादिने यत्र रात्रौ दृश्येत चन्द्रमाः। सोमो राजा पशून्हन्ति सुरभीः पूजकांस्तथा।

द्वितीयायुतेति—(ब्रह्मपुराणे)—कार्तिके शुक्लपक्षे तु विधान द्वितयं भवेत्। नारीनीराजनं प्रातः सायं मङ्गलमालिका। अथ चेत्प्रतिपत्स्वल्पा नारीनीराजनं भवेत्। द्वितीयायां तदा कुर्य्यात् सायं मङ्गलमालिकाम्। लभते यदि वा प्रातः प्रतिपद् घटिका-द्वयम्। तस्यां नीराजनं कार्य्यं सायं मङ्गलमालिका। तथा च (देवीपुराणे)—प्रातर्वा यदि लभ्येत प्रतिपद् घटिका शुभा। द्वितीयायां तदा कुर्य्यात्सायं मङ्गलमालिकाम्। आश्विनान्ते यदा दर्शे नारीनीराजनं भवेत्। नारीणां तत्र वैधव्यं देशदुर्भि-क्षमेव च।

द्वितीयापरा इति—सा द्वितीया परोपोष्या पूर्वविद्धातत ८

प्रतिपद्युताग्राह्येति निर्णयामृतः । मध्यान्हव्यापिनीति हेमाद्रिः । उभयदिने मध्यान्हव्यापित्वे तदभावे परेति रामकौतुकः । इयं कर्म कालव्यापिनी ग्राह्या इति सिद्धान्तः ।

तृतीया—रम्भातिरिक्ता परा इति ।

चतुर्थी—गणेशव्रतातिरिक्ता परा गणेशव्रते तु तृतीयायुता मध्यान्हव्यापिनी ग्राह्या—परदिने सत्वे परा दिनद्वये सत्वे पूर्वा इति दिवोदासः । दिनद्वये मध्यान्हव्याप्तौ परैवेति माधवः ।

न्यथा । युग्मविधिर्यथा—युग्माग्निभूतानां षण्मुन्योर्वसुरन्ध्रयोः । रुद्रेण द्वादशीयुक्ता चतुर्दश्या च पूर्णिमा । प्रतिपद्यमावास्या तिथ्योर्युग्मं महाफलम् । इति पूर्वेद्युरसती प्रातः पूर्वेद्युस्त्रिमुहूर्तगा सा द्वितीया परोपोष्या पूर्वविद्धा ततोऽपरा (इति माधवः)।

कालव्यापिनीति—(वृद्धयाज्ञवल्क्यः)—कर्मणो यस्य यः कालः तत्कालव्यापिनी तिथिः । तया कर्माणि कुर्वीत ह्रासवृद्धी न कारणम् । (स्कन्दपुराणे)—यस्मिन् काले तु यत्कर्म तत्काल व्यापिनी तिथिः । तया कर्माणि कुर्वीत ह्रासवृद्धी न कारणम् । पौर्वाह्णिकास्तु तिथयो देवकार्य्ये फलप्रदाः । माध्याह्निकास्तथा नृणां पित्र्ये चैवापराह्णिकाः । यमपूजापराह्णे इति वचनादपराह्णव्यापिनी ग्राह्येति दिक् ।

तृतीया-रम्भातिरिक्तेति—रम्भातृतीया पूर्वा स्याद् उत्तरा स्याद् व्रतान्तरे । परेह्नि नास्ति चेत् पूर्वविद्धाऽप्यस्तु व्रतान्तरे । इति । रम्भाख्यां वर्जयित्वा तु तृतीयां द्विजसत्तम । अन्येषु सर्वकार्येषु गणयुक्ता प्रशस्यते (गणयुक्ता चतुर्थीयुता) इति ।

चतुर्थी गणेशव्रतातिरिक्तेति—(ब्रह्मवैवर्ते)—गणेशगौरी बहुल व्रतातिरिक्ता प्रकीर्तिता । चतुर्थ्यः पञ्चमीविद्धा देवतान्तरयोगतः । तथा च (बृहस्पतिः)—चतुर्थी गणनाथस्य मातृविद्धा प्रशस्यते । मध्याह्नव्यापिनी चेत्स्यात्परतश्चेत्परेऽहनि ।

संकटाभिधा कृष्णाचतुर्थी चन्द्रोदयव्यापिनी। दिनद्वये सत्वे पूर्वा तदभावे परा इति।

पञ्चमी—पूर्वा नागव्रतेपरा

षष्ठी—स्कन्दव्रतातिरिक्ता परा।

सप्तमी—पूर्वेव।

अष्टमी—कृष्णापूर्वा शुक्लोत्तरा। शिवशक्त्युत्सवे कृष्णापि परां। जन्माष्टमीव्रते निशीथव्यापिनी। दुर्गाष्टमी पूर्वविद्धा।

पूर्वेति—प्रतिपत्पञ्चमी चैव उपोष्या पूर्वसंयुता। तथा च (माधवः)–सर्वत्र पंचमी पूर्वा ग्राह्या स्कन्दव्रते परा।

नागव्रतइति—पञ्चमीनागपूजायां कार्या षष्ठी समन्विता तस्यां तु तुषिता नागा इतरा सचतुर्थिका इति।

परेति—(स्कान्दे)नागविद्धा न कर्तव्या षष्ठी चैव कदाचन सप्तमी संयुता कार्या षष्ठी धर्मार्थचिन्तकैः। (अत्रवेधः षण्मुहूर्तकः) नागविद्धास्कन्दषष्ठी सा निषिद्धा व्रतान्तरे। उत्तरस्य अलाभेतु पूर्वविद्धैव गृह्यताम्। किन्तु द्वादशनाडीभिर्नागवेधो दोषकृत् इति।

पूर्वेवति—(स्कान्दे)–सप्तमी पूर्वविद्धैव व्रतेषु निखिलेष्वपि षष्ठ्यायुता सप्तमी चैककर्तव्या तात सर्वदा।

कृष्णापूर्वेति—व्रतमात्रेअष्टमी कृष्णापूर्वाशुक्लाष्टमी परा दूर्वाष्टमी तु शुक्लापि पूर्वविद्धा विधीयते।

शिवशक्त्युत्सव इति—पक्षद्वयेऽप्युत्तरैवशिवशक्तिमहोत्सवे।

निशीथव्यापनीति–दिवा वा यदि वा रात्री नास्ति चेद्रोहिणी कला। रात्रियुक्तां प्रकुर्वीत विशेषणेन्दुसंयुताम्(इन्दुसंयुतामर्धरात्र्व्यापिनीम्) यदा कदाचिद्रोहिणिकाकलापिनहिस्पृशेदष्टमित तदा तु। निशीथकाले किल वर्तमानां जन्माष्टमीं तां मुनयो वदन्ति विविधप्रमाणप्रदर्शनपुरस्सरं (माधवाचार्येण) नामभेदातनिमित्त

[illegible]

[illegible] ।

॥ [illegible] ॥ [illegible]

[illegible] ।

[illegible]

[illegible] जन्माष्टमी[illegible]
व्रतं च [illegible] [illegible] । [illegible] व्रतं नि[illegible]
जन्माष्टमीव्रतमाहुरिति ([illegible]) । अत्र हेतुश्च नित्यका[illegible]
[illegible] ।([illegible]पुराणादिषु)जन्माष्टमीव्रतस्याकरणे[illegible]
[illegible] । जयन्तीव्रते तु न तथा । जन्माष्टमीव्रतं नित्यं[illegible]
व्रतं च काम्यम् । जन्मरोहिण्यपेक्षया व्रतस्य नाम जन्मा[illegible]
प्रसिद्धम् । जन्मयोग एव यदि प्राधान्येन गृह्येत तर्हि[illegible]
योगोऽपि तथैव किं न गृह्येत । एवं च यत्र [illegible]
संम्मिलितो योगोऽर्द्धरात्रे भवेत्तत्रैव जन्माष्टमीव्रतं[illegible]
नवम्यां यदि रात्रौ रोहिणी भवेत्तदा न तदपि जयन्ती [illegible]
हेतु रनित्यत्वे स्पष्टं जागर्त्येव । अर्द्धरात्रे रोहिण्यष्टम्योर्योगे ज[illegible]
पदप्रयोगात् जयन्त्याः फलश्रुतेः जयन्ती शर्वरीति च भग[illegible]
निमित्तत्वात् तिथि नक्षत्रमुहूर्तानां मेलके सत्येव जयन्ती[illegible]
[illegible]नान्यथा । (मुहूर्तस्तु विजयोनाम स च [illegible]
[illegible]ण पूर्वापरं दण्डद्वयम्)

जन्माष्टमीव्रते यद् द्वयोर्मतयोः प्रचारस्तत्र तिथ्यादि[illegible]
भेदापेक्षया जन्मदिनोत्सवदिनयोश्च भेदोऽपि हेतुर्भवितुमर्ह[illegible]
मथुरायामर्द्धरात्रे जन्मजातम् इति मत्वा अर्द्धरात्रव्यापि[illegible]
[illegible]तमाचरन्ति । गोकुले च प्रातरुत्सवः संजात इति तैस्ति[illegible]
व्रतं विधीयते ।

नवभेदाः । एवमेव विद्धाया नव । एवमष्टादशभेदाः ।

तथाहि, शुद्धसमाद्वादशीसमा, शुद्धसमाद्वादशीन्यूना, शुद्धसमाद्वादश्यधिका, शुद्धन्यूना समद्वादशिका, शुद्धन्यूनान्यूनद्वादशी शुद्धन्यूनाधिकद्वादशी, शुद्धाधिकासमद्वादशी, शुद्धाधिकान्यून द्वादशी, शुद्धाधिकाधिक द्वादशी । विद्धसमासम द्वादशी विद्धसमान्यून द्वादशी विद्धसमाधिक द्वादशी विद्धन्यूनासमद्वादशी विद्धन्यूनान्यून द्वादशी विद्धन्यूनाधिकद्वादशी विद्धाधिकासमद्वादशी, विद्धाधिकान्यून द्वादशी विद्धाधिकाधिक द्वादशी । समत्वंनामषष्टिघटिकात्मकत्वम् । न्यूनत्वेन्यूनत्वम् । आधिक्ये अधिकत्वम् ।

वैष्णवैररुणोदयवेधवती त्याज्या —— भानूदयात् प्राक्

श्रीकृष्णवर्णनं ऋग्वेदे—४।७।१।६ कृष्णं त एमरुशतः पुरोभाश्चरिष्ण्वर्चिर्वपुषामिदेकम् यद् प्रवीता दधतेहगर्भं सद्यश्चिज्जातो भवासीद्दूतः इति।

सर्वापूर्वेति—नवमी पूर्वविद्धैव पक्षयोरुभयोरपि । मध्यान्हे रामनवमी पुनर्वसुसमन्विता । माघा नैवाष्टमी युक्ता सनक्षत्रापि वैष्णवैः । (स्कान्दे)—कुर्याज्जवमीं तात दशम्यां तु कदाचन । कृष्णापूर्वोत्तरा शुक्ला दशम्येवं व्यवस्थिता । इति (माधवः) आपस्तम्बः) दशमी तु प्रकर्तव्या सद्गुर्गा द्विजसत्तम इति ।

सप्तादौ गौतमाः—(आङ्गिरसः) आयास्य औमण्डक वामदेवाः कारेणुपाल्यौशानसाः शरद्वान् । स्युर्गौतमा दीर्घतमाः सगोत्राः कुर्वन्तु० ॥८॥ सूत्रान्तरे त्वौशिज सोमराजः वाश्यौ शिशाख्या बृहदुक्थकाश्च । आयास्यपूर्वैः सतुला पुरोक्तैः कुर्वन्तु० ॥९॥ सगोत्रिणोऽन्ये परसूत्रजाता औतथ्यराहूगणकक्षीवन्तः स्युर्गौतमैराङ्गिरसः समस्तैः कुर्वन्तु ॥१०॥ अथ भरद्वाज (आङ्गिरसः) अथोभरद्वाजमुखोऽङ्गिरोजायेते भरद्वाजयुताश्च गर्गाः । रौक्षायणाख्याः कपयः सगोत्राः कुर्वन्तु० ॥११॥ अथ केवलाङ्गिरसः । स्युः केवला आङ्गिरसाः सगोत्राः स्वेस्वेगणे हारितविष्णुवृद्धाः रथीतराः मुद्गलाख्य संज्ञाः कुर्वन्तु० ।१२। क्वचित्तु कुत्सैर्हरिताः सगोत्राः रथीतराख्यैः पृथक्च संज्ञाः । उक्ता अमी आङ्गिरसाः समस्ताः कुर्वन्तु० । इत्याङ्गिरसगणाः ।१३।

अत्रिगणा इति—अथात्रिगाविष्ठिर मुद्गलाख्यवाद्भुतका अत्रिगणाश्चतुर्धा । गोत्रैक्यतोऽमीन मिथो विवाह्याः कुर्वन्तु० ।१४। अन्ये इति—अन्येऽत्रयः स्युस्त्रिमिताः क्वचित्तु धनंजयाश्चातिथयस्तथैव । सुमङ्गला अत्रिसमानगोत्राः कुर्व० ।१५। विश्वामित्रा इति—विश्वामित्रत इन्द्रकौशिककताख्यालौहितारौक्षकाअजाख्याअघमर्षणाश्चकुशिका धानंजयाः पूरणः । वर्गाः स्युर्दश कामकायनयुताः सर्वे सगोत्रामिथः कुर्वन्तु० ।१६। स्मृतितो मुनीश्वरसमूहा० कथका इति—विश्वामित्रगणाः क्वचित्तु कथकाः सौवर्णरेतोभिधाः शालङ्कायन साहुलाजकुशिका हैरण्यरेतोभिधाः । हर्यश्वघृतकौशिकाख्यमुनयः कापोतरेतोभिधावेणूरोहिणका इमेपि खलु कुर्युः सुमङ्गलं मम।१७। काश्यपा इति—अथ-

अष्टक लौहित इति । (रौक्षकाणां त्रयः) विश्वामित्र रौक्षकरैवण इति । विश्वामित्र गाथिन रेवणेति वा । (आजानां त्रयः) विश्वामित्रमाधुछन्दस आजेति । (अघमर्षणानां त्रयः) विश्वामित्र अघमर्षण कौशिकेति । (कुशिकानां त्रयः) विश्वामित्र देवरात औदलेति । (धानजपाना त्रयः) विश्वामित्रमाधुछन्दस धानंजयेति विश्वामित्र माधुछन्दस अघमर्षणेति वा [पूरणानाम् द्वौ] विश्वमित्र पौरणेति । [कामकायनानाम् त्रयः] विश्वामित्रदेवश्रवस दैवनरसेति । [कथकानाम् त्रयः] विश्वामित्रकाथक काथकेति । [सुवर्णरेतसाम् द्वौ] विश्वामित्रसौवर्णरेतसेति । [शालंकायनानाम् त्रयः] विश्वामित्रशालंकायन कौशिकेति । [साहुलानाम् त्रयः] विश्वामित्रसाहुलमाहुलेति [अजकुशिकानाम् त्रयः] विश्वामित्र अश्मरथ्य वाहुलेति । हिरण्यचेतसाम् द्वौ] विश्वामित्रहैरण्यरेतसेति । [हर्यश्वादीनाम् त्रयः] विश्वामित्र गाथनरैवणेति । [घृतकौशिकानाम् द्वौ] विश्वामित्र घृतकौशिकेति । [कपोतरेतसां द्वौ) विश्वामित्र कपोतरेतसेति । (वेणूनां त्रयः) विश्वामित्र गाथिनवेणवेति । (रोहिणानां त्रयः) विश्वामित्र माधुछन्दस रौहिणेति ।

इन्द्रकौशिकादिरौहिणान्तानां सर्वेषां विश्वामित्राणां परस्परमविवाहः इति । इतिविश्वामित्रगणाः ।

अथत्रयः कश्यपापपत्तेति निर्णयसिन्धुकारः । वैधु वा शाण्डिला रैभा कश्यपा लोगाक्षयः (तत्रवैधुवाणां त्रयः प्रवरा] काश्यपा अवत्सार वैधु वेति । [शाण्डिलानां त्रयः] काश्यपश्चावत्सार शाण्डिल्य इति । काश्यपअवत्सारदैवल इति वा । काश्यपअवत्सार असितेति

त्रिधा काश्यपजातवर्गास्तेनैध्रुवाः शाण्डिलरैभसंज्ञाः । गोत्रैक्यतोऽन्योन्यमनन्वयाः स्युः कुर्वन्तु० ।१८। वासिष्ठेति—अथो वसिष्ठाश्चचतुर्मिताः स्युर्वसिष्ठकौण्डिन्यपराशराश्च । तथोपमन्युः समगोत्र जाताः कुर्वन्तु० ।१९। अगस्त्या इति—अथेध्मवाहाढ्यसांभवाहा ससोमवाहाभिधयज्ञवाहाः । अगस्तयोऽमी सकुलाश्चतुर्धा कुर्व० ।२०। सूत्रान्तरेपाणिकपौर्णमासाद्या दार्भवाहा शुकहंसकाद्याः । पुलस्त्यकत्वादथ एकगोत्राः कुर्वन्तु० । २१ ।

वा। कश्यप असित देवलेति वा (त्रौ वा) देवल असितेति। (रैभ्याणां त्रयः) काश्यप अवत्सार रैभ्येति। (कमलाकरोक्त काश्यपानां त्रय) काश्यप अवत्सार असितेति। (लौगाक्षिणामपि त्रयः) काश्यप अवत्सार वासिष्ठेति। इति कश्यपगणाः। सर्व कश्यपानां परस्परमविवाहः।

अथ वसिष्ठाश्चत्वारः पञ्च ति वा—वसिष्ठाः कुण्डिनाः उपमन्यवः पराशराः जातुकर्ण्याश्च। (तत्र वसिष्ठानामेकः प्रवरः) वासिष्ठः। वसिष्ठ इन्द्रप्रमद आभरद्वसु इति कमलाकरः। (कौण्डिन्यानां त्रयः) वासिष्ठ मैत्रावरुण कौण्डिन्येति। (पराशराणां) त्रयः वाशिष्ठ शाक्त्य पराशर्येति। (उपमन्यूनां त्रयः) वाशिष्ठ इन्द्रप्रमद आभरद्वसु। जातुकर्ण्यानां वासिष्ठ अत्रि जातुकर्ण्येति। इति वासिष्ठगणाः। सर्ववशिष्ठानां परस्परमविवाहः इति। अथ चत्वारोऽगस्त्याः—इध्मवाहाः साम्भवाहाः सोमवाहाः यज्ञवाहा इति। (इध्मवाहानां त्रयः) आगस्त्य दार्ढ्यच्युत, इध्मवाह इति। (एको वा) आगस्त्येति। (साम्भवाहानां त्रयः) इध्मवाह दार्ढ्य च्युत साम्भवाहेति। (सोमवाहानां त्रयः) आगस्त्य दार्ढ्य-च्युत सोमवाहेति। (यज्ञवाहानां त्रयः) आगस्त्य दार्ढ्यच्युत याज्ञवाहेति। पाणिकाः पौर्णमासाद्याः पुलस्त्य मत्स्यादयः। एतेऽपि सूत्रान्तरे उक्ताः। (तत्र पाणिकानां त्रयः) आगस्त्य पैनाक पाणिकेति। (पौर्णमासाद्यानां त्रयः) आगस्त्य हैमवर्चि हैमोगोक इति। (पुलस्त्य मत्स्यादीनां त्रयः) आगस्त्य, माहेन्द्र मायोभुवेति। इत्यगस्त्यगणाः। इध्मवाहादि पुलस्त्य मत्स्याद्यन्तानां सर्वागस्त्यानां परस्परमविवाहः॥ अथ द्विगोत्राः—कपिलाः कताः

द्विगोत्रा इति—सार्द्धं भरद्वाजगणेश्च विश्वामित्रैर्द्विगोत्राः कपिलाः कताश्च। तो शौङ्गशैशिरयमिथो विवाहाः कुर्वन्तु॥ २२॥ कपिलानां कतानां शौङ्गशैशिरीणां च भारद्वाजैर्विश्वामित्रैश्च सार्द्धं सम्बयः। नोकाश्यपैः संकृतिभिर्वसिष्ठैर्गोत्राद्वयोऽस्मी द्विकुला विवाहाः। अर्द्धमित्राः निशि काश्यपाख्याः कुर्वं०॥२३॥ गोदेवरातानामदग्नि विश्वामित्रैर्द्विगोत्राः धनञ्जातु पैवम्। चद्रंडभागाः अन्तु संस्रिश्राः कुर्वं० ।२४ वदाविषयेश्च वसिष्ठर्नैर्जैमिनिभिः संकृतिभिर्विवाहाः। नो जातुकर्ण्या म च काम-

ङ्गा शैशिरयेभिधाः लोगाक्षयः देवराताः पनसाः जातुकर्ण्याः
मरथ्याः जातुकर्ण्याः सांकृतयः पूतिमाषाः । धनंजयाः । (कपि-
नां पञ्च) आङ्गिरसबार्हस्पत्यभारद्वाजवांदनमानवचसेति ।
तानामुक्ताः) (शौङ्गशैशिरीणाम् पञ्च) आङ्गिरसबार्हस्पत्यभार-
तकात्यकीलेति । आङ्गिरसबार्हस्पत्यभारद्वाजशौङ्गशैशिरेति
। (त्रयो वा) आङ्गिरसकात्यकीलेति । भारद्वाजकात्यकीलेति
। (लोगाक्षीणामप्युक्ताः) एतेऽह्वर्यमिश्राः निशिवाशिष्ठस्थाने
यपः । (देवरातानाम् त्रयः) विश्वामित्रदेवरातश्यौदलेति ।
व पनसानाम् । (जातुकर्ण्या वामरथ्याश्चोक्ताः) (संकृतीनां
) आङ्गिरसगौरवीतसांकृत्येति । शाक्त्यगौरवीतिसांकृत्येति
। पूतिमाषाणां सर्वं संकृतिवत् । धनंजयानामप्युक्ताः ।
द्विगोत्राः ॥

दत्तकीत कृत्रिम स्वयंदत्त पुत्रिकापुत्रादीनाम् उत्पादक-
योः पित्रोर्गोत्रप्रवराः वर्ज्याः । असमानार्षगोत्रजामुद्वहेत् ।

कुर्व० ॥ २५ ॥ स्वकीयवर्गैः सकलैर्यमिष्टैर्लोगाक्षिभिः । संकृति पूतिमाषाः ।
कर्मण्यधिकारिणोऽमी कुर्व० ॥ २६ ॥ धनंजयाख्याः सकलात्रिविश्वामित्रैर्न
रोहिणः स्युः । द्विगोत्रिणोऽमीगदिताः समस्ताः कुर्व० ॥ २७ ॥ इति द्विगोत्राः ।
दित्वा प्रवरः स्वयंशपूद्रप्रणीतैरसगोत्रपूर्वान् । गोत्राणि सम्यक् विनिर्णयं च
विद्वान्करसमहार्थम् ॥ २८ ॥ माध्यंदिनीयद्विजपुङ्गवेन गोत्रं पितुः सप्रवरं विश-
गानुस्तु गोत्रं प्रवरैर्विनैव कात्यायनाख्यो मुनिरित्युवाच ॥ २९ ॥ गान्धर्वपैशा-
वाहेर्विवाहितायाम्ननयेन वर्ज्यम् । गोत्रद्वयं सप्रवरं व्यवस्थामि पुण्यवन्तो
समस्ताः ॥ ३० ॥ इत्यापदेवगदितं मुनिपुंगवानां सन्निर्णयं विषमगोत्रसगोत्र-
नित्यं पठेदुपरि यः परमादरेण सत्संप्रदामनिवहः सहसा भजेयुः ॥ ३१ ॥
यूप १६२४ संमिते शाकेऽङ्करराजनन्दने । नभोभिधाननाम्न्युमुवकार देवनन्दनः ३
सकल्पेति—(धर्मनीरायां)—मापितृनुर्ण ... दत्तकेऽयं स्वमानवंशः ...रि च
सद्धे पालक मानमावृंशे कर्मा संनमपदेचमान्यम् । इति ।
गावृथ् इति—(स्मृत्यर्थसारे)—ग्रन्थं सगोत्रसमप्रवरविवाहविषये ... ।
मानवानां कन्यामुद्वोपयन्ति । गुरुतल्पसमाः ... शूद्रां गर्भस्थाश्चो ... पम्नां
गतस्यां परित्यज्य पालयेज्जननीमिव । अज्ञानादन्यैः शूद्रवं विनिर्भम्यु
पितृस्वसृसुतामिति । मातुः पितृस्वसुः पुत्राः मातुलान्यस्वसुः सुताः । मातु-

(ऋपेरिदमार्षं गोत्रप्रवर्तकस्य मुनेर्व्यावर्तकः प्रवरः। आर्षं च गोत्रं च आर्षगोत्रे स्वसमाने आर्षगोत्रे यस्य सः समानार्षगोत्रः। तस्माज्जाता या न भवति ताम्) सप्तानामृषीणामगस्त्याष्टमानां यदपत्यं तद्गोत्रम् स च गोत्रोद्वाहदोषः। पितृस्वसृसुताम् मातृस्वसृसुताम् मातुलसुताम् मातृसगोत्राम् समानार्षेयीं विवाह्य चान्द्रायणं चरेत्परित्यज्यैनां मातृवद्विभृयात्।: मातृगोत्रे विवाहमाहमनुः–असपिण्डा च या मातुरसगोत्रा च या पितुः। सा प्रशस्ताद्विजातीनां दारकर्मणि मैथुने। अत्र हि मातृपक्षे सापिण्ड्यमात्रे विवाहनिषेधात् मातृगोत्रे विवाहोऽभ्यनुज्ञायते। अन्यत्र असगोत्रा च या मातुरित्येवावदत्। इति। (मातृगोत्रेऽपि निषेधमाह शातातपः) मातुलस्य सुतामूढ्वा मातृगोत्रां तथैव च समानप्रवरां चैवत्यक्त्वा चान्द्रायणं चरेत्। इति। सगोत्रां मातुरप्येके नेच्छन्त्युद्वाहकर्मणि। जन्मनाम्नोरविज्ञानेऽप्युद्वहेदशङ्कित इति व्यासोक्तेः मातृगोत्रविवाहस्य पाक्षिकत्वम्। यावत्प्रवरेषु एक एव ऋषिस्तावत् समानगोत्रत्वमिति।

॥ इति संक्षिप्तगोत्रप्रवरविचारः ॥

मातुलपुत्राश्च विज्ञेयाः मातृबान्धवाः। पितुः पितृष्वसुः पुत्राः पितुर्मातृष्वसुः सुताः पितुर्मातुलपुत्राश्च विज्ञेयाः पितृबान्धवाः।

समानगोत्रत्वमिति—एक एव ऋषिर्यावत्प्रवरेष्वनुवर्तते। तावत्समानगोत्रत्वं मूनेभृग्वङ्गिरोगणादिति॥

इति श्री भाष्याचार्य पण्डितहरिनारायणशास्त्रि-
तनय॰मालभास्करराजमान्यविद्याचार्यपति
पं॰देवीदत्तदत्तशर्मविरचिते श्रीगंगासिंहकल्पद्रुमे
संक्षिप्तगोत्रप्रवरनिर्णयः

॥ अथ चैत्रमासकृत्यनिर्णयः ॥

चैत्रमासस्य सितप्रतिपदि—ब्रह्मपूजाकार्य्या । सा च उदयव्यापिनी ग्राह्या । दिनद्वये व्याप्तौ अव्याप्तौ च पूर्वैव । चैत्रेमलमासे सति तस्मिन्नेव संवत्सरारम्भ इतिनिर्णयसिन्धुकारः । मलमासस्यागामिवर्षान्तः पातित्वात् ॥ वत्सरफलश्रवणं निम्बपत्राशनं ध्वजारोपणादिकं शुद्ध एव कार्य्यम् । वत्सरारम्भ निमित्तक *तैला-

(ब्रह्मपूजेति)—भविष्ये—तस्यामादौ च सम्पूज्यो ब्रह्माकमलसम्भवः ॥ संवत्सरादौ संवत्सररूपायाः प्रजापतिप्रतिमायाः पूजनं—अथर्ववेदे— । ३ । ६ । १० । संवत्सरस्य प्रतिमां यां त्वां रात्र्युपास्महे । सा न आयुष्मति प्रजा रायस्पोषेण संसृज ॥ इति—अस्य विवरणं च शतपथे ११-१-६-१३ स ऐक्षेत प्रजापतिः इमं वात्मनः प्रतिमामसृक्षीयत संवत्सरमिति तस्मादाहुःप्रजापतिः सम्वत्सरः इत्यात्मनो ह्येतं प्रतिमामसृजत यद्वेव चतुरक्षरः सम्वत्सरश्चतुरक्षरः प्रजापतिस्तेनोहैवास्यैष प्रतिमा । इति विनिगमकात् श्रीमर्य्यादापुरुषोत्तमरामचन्द्रस्य अयोध्यां प्रवेशदिनत्वात् वसोः सम्माननिमित्याच चैत्रशुक्लप्रतिपदायां महोत्सवः ॥

(उदयव्यापिनीति)—हेमाद्रिः-चैत्रेमासि जगद्ब्रह्मा ससर्ज प्रथमेऽहनि । शुक्लपक्षे समग्रं तु तदा सूर्य्योदयेसति ॥

(पूर्वैवेति)—ज्योतिर्निबन्धे-चैत्रेसितप्रतिपदि यो वारोऽर्कोदये स वर्षेशः । उदयद्वितये पूर्वो नोदययुगलेऽपि पूर्वः स्यात् ॥ तथा च (वृद्धवसिष्ठः)-वत्सरादौ वसन्तादौ बलिराज्ये तथैव च । पूर्वविद्धैव कर्तव्या प्रतिपत्सर्वदाबुधैः ॥ दिनद्वयेऽप्युदय सम्बन्धाभावे संवत्सरारम्भ प्रयुक्त कार्य्यलोपप्रसक्त्यापिदं वचनं पूर्वविद्धाग्राहकम् ॥

*तैलाभ्यङ्ग—तैलपदेन विधौ वा निषेधे वा तिल भवं तैलम् इति योगेन तिल भव एव स्नेहविशेषोऽभिधीयते न तु सर्षपादिस्नेहसकलपदार्थानुसरणं

षष्ठ्याऽपि शुक्रवारे प्रतिपद्येव च वर्ज्यः । तथापि हि तैलगुण्डा ।

(गरुड़पुराण)-इति-पञ्चम्यां दिवसीर्यातः कर्तव्या पादगर्तः। पूर्वमर्द्धं परित्यज्य कर्तव्या शौचक्रिया । इति यथनादूर्द्ध्वां-सनस्य कार्यम् । तथाप्यशमनवस्यादिपर्यदिति ।

तिर्लागुणेति । (देवीपुराणे)—अमायुक्ता न कर्तव्या प्रतिपच्छिष्टकार्षेते । मुहूर्तमात्रा कर्तव्या तिर्लागादिगुणान्विता । तथा

बीजप्रभवस्नेहसामान्याभिधाने हि तत्र वाच्यम् । न च सामान्येन योगः सम्भव इति अतएव यौगिकैः शब्दैर्नियमाभिधीयते । स्वरूपञ्च नानाजातीयसम्भवा परस्परं भिद्यन्ते । न चैक व्यक्तियोगेऽन्यत्रायोगस्याशून्या व्यक्त्यन्तरेऽपि यौगिकत्वम-यथाकारपरस्याप्येकस्यामेव व्यक्तौ योगेन सर्वत्र यौगिकापत्तेः । ननु तैलपदस्य यौगि-कत्वे मौद्गकादिष्वपि प्रयोगः स्यात्–स्नेहत्वमुपाधेरिति चेन्न उपाधिकल्पना चेदरं सनु दायशक्तिरेव कल्प्यताम् । बीजप्रभव स्नेहमात्रे प्रयोगदर्शनात उच्यते । रूढिवादिनाऽपि बीजप्रभवत्वस्योपाधेरेव स्यात्–अन्यथा प्राणिभव स्नेहेऽपि प्रयोगापत्तेः—अतोऽत्र यौगिकत्वमेव उपाधितो युक्तं न रूढिः न च बीजप्रभवमात्रेऽपि निरुपद तैलप्रयोगः । फारञ्जैरण्डतैलादिष्वपि दर्शनात् सार्षपेऽस्तीति चेन्न तथाप्युभयत्रार्थं गतैकरूपाभा-वात् अनेकार्थतापत्तेः । योगस्तु तिलसम्भवस्नेहस्थाने प्रचुरमाहृस्यात् सार्षपेऽपि प्रयोगोवर्णनीयः—सोपपदप्रयोगस्य च प्राणिभवस्नेहेऽपि शिशुमार तैलमिक्लिशस्य तैलमित्यादिषु दर्शनाद् दुग्धसम्भव स्नेह सामान्यवचनत्वमेव कुतो नाङ्गी क्रियते । किञ्चनारिकेलादि बीजसम्भवेऽपि स्नेहेतैलशब्दो न प्रयुज्यते किन्तु नारिकेलस्य घृतमिति कथं बीजसम्भव स्नेहवचनताश्रवणम । किञ्चतैलपदस्य योगानपेक्षस्य सर्प-पादिष्वपिमुख्यत्वे स,पस्यतैलं सर्पपतैलमितिसिद्धे यदेतन् सिद्धयर्थं स्नेहेतैलमिति वक्तव्यं कात्यायनस्य तदनर्थकं स्यात् यौगिकत्वे सार्पपतैलमितिकलायस्य भक्तशरा-चमितिवद्विरोधात्तदर्थं तलवरप्रत्ययार्थं शासनमुपपन्नम् । तेन सार्षपतैलमित्यस्य पदस्य तैले न च प्रत्ययान्तस्यैकदेशस्तैलशब्दः सर्षपादि स्नेहेषु एकदेशि लक्षणया प्रयुज्यते उरूकं मन्यमाना च निष्ठमाना विष्ठेत्यत्र क शब्दोनिवकाश लक्षणः ननु तिलभवतैल-मिति यत् साधितं तदेव वा गौणम् । तस्मात् सर्वत्रतैलविधौ निषेधे च तिलभवः स्नेह-स्तैलपदेनपादेयः—तस्यापक्वस्यैव निषेधः । अमावस्यायां न गच्छेत्तु प्राप्तकालमिति-स्त्रियम् । तैलञ्च न स्पृशेद्दामं वृक्षार्दीश्छेदयेन्नतु । एवम् कुहूपूर्णेन्दु संक्रान्त्यां चतुर्दश्य-ष्टमीषु च—इत्यत्रापि तैलपदमपक्वपरमिति पूर्ववचने आममिति विशेषणात् तथा षट्त्रिंशन्मतम् । सूर्य्यशुक्रादिवारेषु निषिद्धासु तिथिष्वथ । स्नाने वा यदि वा स्नाने पक्वतैलन्न दुष्यति । सार्षपंत्वामेऽपिन निषेधोनिषेधाविषयत्वादिति सर्वं सुस्थमिति दिक् ॥ इति ॥

तिपद् ग्राह्या ।' अस्यां तैलाभ्यङ्गो वत्सराधिपपूजा निम्बपत्रभक्षणं त्सरफलश्रवणं प्रपादानादिकं कार्य्यम अस्यां ब्रह्मपूजापि कार्य्या । प्रद्यारभ्य तिलकव्रतम, आरोग्यव्रतम, विद्याव्रतम् । इयं श्वेत-कल्पादिः । अरुन्धतीव्रतारम्भः ।

ग्राह्ये । तिस्रोह्येताः पराः प्रोक्तास्तिथयः कुरुनन्दन । कार्त्ति-काश्वयुजोर्मासोश्चैत्रेमासि च भारत । इति ।

तैलाभ्यङ्गगते—वत्सरादौ वसन्तादौ बलिराज्येतथैव च । तैलाभ्यङ्गमकुर्वाणो नरकं प्रतिपद्यत इति (ज्योतिर्निबन्धे) ।

वत्सराधिपपूजेति—यश्चैत्रशुक्ल प्रतिपद्दिने वारो नृपोहि सः । तस्य पूजा विधातव्या पताकातोरणादिभिः ॥ प्रतिगेहं ध्वजाकर्म शक्त्या ब्राह्मणतर्पणम् । निरीक्षणं च कर्त्तव्यं शकुनानां शुभेप्सुभिरिति ।

निम्बपत्रमिति—(भविष्ये)-चैत्रेमासि महाबाहो पुण्या या प्रतिपत्परा । अस्यां वै निम्बपत्राणि प्राश्य संशृणुयात्तिथिम् ॥

प्रपादानमिति—तत्रैव-अतीते फाल्गुने मासि प्राप्ते चैत्र-महोत्सवे । पुण्येऽह्नि विप्र कथिते प्रपादानं समारभेत् ।

तिलकव्रतमिति—ललाटपट्टे तिलकं कुर्य्याच्चन्दनपङ्कजम् । ततः प्रभृत्यनुदिनं तिलकालङ्कृतंमुखमित्यादि । आरोग्यव्रत-मिति—संवत्सरावसाने तु पञ्चदश्यामुपोषितः । प्रातः प्रतिपदि-स्नात्वा कुर्य्याद्व्रतमनन्यधीः । विद्याव्रतमिति-चैत्रशुक्लमथारभ्य सोपवासो जितेन्द्रियः । सदा प्रतिपदं प्राप्य शुक्लपक्षस्य यादव इत्यादि ॥

श्वेतकल्पादिरिति—हेमाद्रौ-अथ कल्पादयः पुण्याः कथ्यन्ते तिथयः शुभाः । यासुश्राद्धेमनन्ततृप्तिः पितृणामक्षयो भवेत् । चैत्र-शुक्ल प्रतिपदि श्वेतकल्पः पुराऽभवत । तस्यशुक्ल त्रयोदश्यामु-

---

वृहस्पतेः—रविमार्ग वर्त्ति विचरति शशी भूमितनयो भूमि लक्ष्मीं धान्ति. गुरुर्गुरुरर्चितदरपम । दिशति देवानां गुरुरतिव भोगानुभवनम् नृणां तैलाभ्यङ्गा-मापदि गुरुवे सूर्यसुताः ॥ इति तैलविचारः ॥

चैत्रशुक्लद्वितीया—अस्यामुमापूजा शिवपूजाग्निपूजा च कार्य्या । सिंजारेति देशाचारे । बालेन्दुव्रतम नेत्रव्रतञ्च ।

चैत्रशुक्लतृतीयान्दोलनतृतीया—एतद्देशे गनगौरेति प्रसिद्धा । अस्यामुमासहितमीश्वरं सम्पूज्यान्दोलयेत् एतस्यां रामचन्द्र-

दानः समजायत । कल्पस्तु नारसिंहाख्यः कृष्णायां प्रतिपद्यभूत् अथ कृष्ण त्रयोदश्यां गौरीकल्पोऽप्यकल्पयत् । वैशाखस्य द्वितीयायां शुक्लायांनीललोहितः । चतुर्दश्यां तु शुक्लायां प्रवृत्तो गारुडाभिधः । समानस्तु द्वितीयायां कृष्णायामुदपद्यत । महेश्वरश्चतुर्दश्यां कृष्णपक्षे समागमत् । ज्येष्ठशुक्लतृतीयायां वामदेवस्य सम्भवः । पौर्णमास्यांतु तस्यैव कौर्मः प्रववृते नृप । कृष्णपक्षे तृतीयायामाग्नेयः समगच्छत । पञ्चदश्यांतु कृष्णायाः पितृकल्पः समागमत् । शुक्लां चतुर्थीमाषाढे प्राप्य रथन्तरोऽभवत् । चतुर्थ्यां तस्य कृष्णायां सोमकल्पः समापतत् । श्रावणे शुक्लपञ्चम्यां रावणः समवर्तत । तस्यैव कृष्णपञ्चम्यां मानवः प्रत्यपद्यत । षष्ठीं प्रौष्ठपदे शुक्लां प्राप्य प्राणाभिधोऽभवत् । सितेतरायां षष्ठ्यां तु तस्य तत्पुरुषाह्वयः । बृहत्कल्पस्तु सप्तम्यां शुक्लायामाश्विनस्य तु । कृष्णायामपि वैराजो विरराज महामनाः । इति त्रिंशदमी कल्पास्तिथयः परमेष्ठिनः । आरम्भतिथयस्तासु शुक्लाः पुण्यतमाः मताः । तासु श्राद्धे कृते पुण्यमाकल्पस्थायि कल्प्यत इति ॥ नवरात्रनिर्णयस्तु शारदीयनवरात्रप्रकरणे लेखिष्यामः ॥

पूजेति—(भविष्योत्तरे)-चैत्रशुक्ल द्वितीयायामुमापूजा शिवार्थिभिः । शिवपूजाग्निपूजा च कर्तव्या मुनिसत्तम ॥ तथा (देवीपुराणे)—उमां शिवं हुताशं च द्वितीयायां प्रपूजयेत् । हविष्यमन्नं नैवेद्यं देयं गन्धार्चनान्वितम् । फलमाप्नोति विप्रेन्द्र सर्वयज्ञसमुद्भवम् ॥ इति

बालेन्दुव्रतमिति—चैत्रशुक्लद्वितीयायां सम्प्राप्य सुपरानयः । दिनावसाने कुर्वीत [illegible] ।

नेत्रव्रतमिति—चैत्र शुक्ल द्वितीयायां सोपवासो जितेन्द्रियः । सायमश्वौ देवभिषजौ पूजयेत्प्रयतः सुधीरित्यादि ॥

दोलोत्सवोऽपि कार्य्यः । एषा तृतीयामुहूर्तमात्रापि परा कार्य्या । चतुर्थीयुतायां वैधृत्यादियोगेऽपि सैव कार्य्या द्वितीयायोगनिषेधस्य प्रबलत्वात् । अत्रारभ्यं सौभाग्यशयनव्रतम् कालोत्तरोक्तम् गौरीव्रतञ्च । इयं मन्वादिः मन्वादयः शुक्लाः पौर्वाह्णिकाः कृष्णाः अप-

---

आन्दोलयेदिति—(देवीपुराणे)-तृतीयायां यजेद्देवीं शङ्करेण समन्वितम् । आन्दोलयेत्ततो वत्स शिवोमातुष्टये सदा ॥

रामचन्द्र-इति—(रामार्चन चन्द्रिकायाम्) मधौ शुक्लतृतीयायां जानकीरमणंप्रभुम् । राजोपचारैः सम्पूज्य मासमान्दोलयेत्कलौ । इति ॥

परेति—मुहूर्तमात्रसत्त्वेऽपि दिने गौरीव्रतं प्रिये । शुद्धाधिकायामप्येवं गणयोगप्रशंसनात् । तथा चापस्तम्बः । चतुर्थीसंयुता या च सा तृतीया फलप्रदा । अवैधव्यकरस्त्रीणां पुत्रसौभाग्यदायिनीति ॥ ब्रह्मवैवर्ते—रम्भाख्यां वर्जयित्वातु तृतीयां द्विजसत्तम । अन्येषु सर्वकार्य्येषु गणयुक्ता प्रशस्यते । इति ।

योगनिषेधस्येति—द्वितीया शेषसंयुक्तां या करोति विमोहिता । सा वैधव्यमवाप्नोति प्रवदन्ति मनीषिणः ॥

सौभाग्येति—(मत्स्यपुराणे)-वसन्तऋतुमासाद्य तृतीयायां जनप्रिये । सौभाग्याय सदास्त्रीभिः कार्य्यं पुत्रसुखेप्सुभिरिति ॥ गौरीव्रतमिति—गौरीव्रतमथो वक्ष्ये सर्वसौभाग्यवर्द्धनम् । चैत्रशुक्लतृतीयायां गौरीव्रतं समाचरेत् । स्थण्डिले हस्तमात्रे तु कर्तव्यं गन्धमण्डलम् । कुङ्कुमेन्दुसुशीतेन वर्तुलं परिवर्तयेत् । तन्मध्ये पूजितव्या प्रतिमा हेम सम्भवा । मधुजा तदभावेतुपुराकेनापि निर्मिता । रक्तचन्दनजा वाथ कर्तव्या सा प्रमाणतः । पञ्चवृत्ताथवापूज्यातत्रमासविधानतः । (पञ्चवृत्तापञ्चपिण्डमयीम्)

मन्वादिरिति—अश्वयुक् शुक्लनवमी द्वादशी कार्तिकेसिता । तृतीया चैत्रमासस्य तथा भाद्रपदस्य च । श्रावणे चाष्टमी कृष्णा

पौर्वाह्णिकाः । दैवे मन्वादयो युगादयः पूर्वाह्णे श्राद्धे मन्वादिरपराह्णव्यापिन्येव ग्राह्या । नित्यत्वात् । अत्र पिण्डरहितं श्राद्धं कार्यम् । इदं सहस्रगुणम् । शुद्धेऽप्यमावास्यायां । श्राद्धशुक्लेऽमावास्यायामपि । इयं च मन्वादिरपराह्णव्यापिनी ग्राह्या । कालव्यापिनीत्वात् ।

पौषे चैकादशी तथा । तथाषाढस्य दशमी माघमासस्य सप्तमी । श्रावणे चाष्टमी कृष्णा ज्येष्ठे पञ्चदशी तथा । आषाढी कार्तिकी माघी चैत्री चैव विशेषतः । एता मन्वादयः प्रोक्ता मुनिभिः पूर्वदर्शिभिरिति । अमावास्याष्टमी व्यतिरिक्ता द्वादशतिथयः शुक्लाः अनेकधा तथा पदोच्चारणस्य शुक्लपक्षसम्बन्धार्थत्वात् उपक्रमोपसंहारयोश्च शुक्लकीर्तनात् ॥ अमावास्यायामयोग्यत्वात् अष्टम्यां कृष्णेत्यभिधानात् न शुक्लान्वयः । इतरास्तु शुक्ला एव ग्राह्याः । कार्तिकीफाल्गुनीत्यत्र सितापञ्चदशीति न पदद्वयस्यानुषङ्गः पूर्वस्थितञ्च पूर्णिमापदमेवानुषज्यते । एवं बहूनाम् शुक्लात्वात् सन्दिग्धतिथिष्वपि शुक्लात्वग्रहणमिति ।

पौर्वाह्णिका इति—(पाद्मे)—पूर्वाह्णे तु सदा ग्राह्याः शुक्ला मनुयुगादयः । दैवे कर्मणि पित्र्ये च कृष्णे चैवापराह्णिकाः ।

अपराह्णव्यापिनीति—कालादर्शेऽप्यपराह्णव्यापित्वं मन्वादिपूक्तमिति तत्त्वयुक्तमिति (कमलाकरः) स्नानादावुत्तरेति वचनादपराह्णव्यापिनी ग्राह्येति रत्नाकरः ।

नित्यत्वादिति—अमायुगमनुक्रान्ति व्यतीपात महालयाः । अन्वष्टक्यं च पूर्वेद्युः षण्णवत्यः प्रकीर्तिताः ।

पिण्डरहितमिति—(पुलस्त्यः) अयनद्वितये श्राद्धे विषुवद्द्वितये तथा । युगादिषु च सर्वासु पिण्डनिर्वापणादृते । अन्यत्र-विषुवायन संक्रान्ति मन्वादिषु युगादिषु । विहाय पिण्डनिर्वापं सर्वं श्राद्धं समाचरेदिति ।

शुद्धेऽपीति—प्रतिमासे मृताहे च श्राद्धं यत्प्रतिवासरम् ।

चैत्रशुक्लचतुर्थी (लड्डुकचतुर्थी) सा च तृतीयायुता ग्राह्या । अस्यां लड्डुकादिभिर्गणेशमर्चयित्वा सर्वान्कामान्प्राप्नुयात । अस्यां आश्रमव्रतं चतुर्मूर्तिव्रतञ्च ।

चैत्रशुक्लपञ्चमी (श्रीपञ्चमी)—अस्यां श्रीपूजनङ्कार्य्यम ।

मन्वादौ च युगादौ च तन्मासोभयोरपि । इति (मदनरत्ने) फलभूयस्त्वं (मात्स्ये) कृतं श्राद्धं विधानेन मन्वादिषु युगादिषु । हायनानां द्विसाहस्रं पितृणाम् तृप्तिदं भवेदिति ।

मत्स्यजयन्तीति—(पुराणसमुच्चये)—मत्स्योऽभूद्धूतभुग्दिने मधुसिते कूर्म्मो विधौ माधवे वाराहो गिरिजासुते नभसि यद् भूते सिते माधवे । सिंहो भाद्रपदे सिते हरितिथौ श्रीवामनो माधवे रामो गौरितिथावतः परमभूद्रामो नवम्यां मधोः । कृष्णोऽष्टम्यां नभसि सितपरे चाश्विने यद्दशम्याम् बुद्धः कल्की नभसि समभूच्छुक्लपष्ठयां क्रमेण । चैत्रशुक्लपञ्चमीति—चैत्रस्य शुक्लपञ्चम्याम् भगवान्मीनरूपधृगित्यादि । अपरे इति (कौङ्कणाः) आपाढे शुक्लपक्षे तु एकादश्याम् महातिथौ । जयन्ती मत्स्यनाम्नीति तस्याम् कार्य्यमुपोषणम् । अत्र निर्णये कल्पभेदेन व्यवस्था।

तृतीयायुतेति—(ब्रह्मवैवर्ते)—चतुर्थीसहिता या तु सा तृतीया फलप्रदा । चतुर्थी च तृतीयायाम् महापुण्यफलप्रदा । कर्तव्या व्रतिभिर्वत्स गणनाथ सुतोपिणी । (गणनाथं सुतराम् तोषयतीति गणनाथचतुर्थी) लड्डुकादिभिरिति—(देवीपुराणे)—गणेशे कारयेत्पूजाम् लड्डुकादिभिरादरात् । चतुर्थ्यां विघ्ननाशाय सर्वकामसमृद्धये । इति । आश्रमव्रतमिति—चैत्रस्यामले पक्षे तु सोपवासो जितेन्द्रियः । चतुर्थ्यां वासुदेवस्य कृत्वा सम्पूजनं शुभमित्यादि । चतुर्मूर्तिव्रतमिति—चैत्रशुक्लचतुर्थ्यान्तु सोपवासस्तु पूजयेत् । देवेशं चतुरात्मानं वित्तशक्त्या नराधिपः । इत्यादि ।

श्रीपूजनमिति—(मत्स्यपुराणे)—शुक्लायामथ पञ्चम्याम्

तथा हयपञ्चमीव्रतम् चन्द्रपूजनम् । पूर्वानु
क्षीरघृतनैवेद्यं दद्यात् । एषा चतुर्थीयुता का
यत्रापि मन्वादिव्रतनिर्णयः ।

चैत्रशुक्लषष्ठी (स्कन्दजयन्ती) । चैत्र
कुमारव्रतम् ।

चैत्रेमासि शुभानना । श्रीग्रामलोकान्मानुष्यं सं
इत्यादि । हयपञ्चमीति—(पद्मपुराणे)
रंहा मनोजवः । उच्चैः श्रवाः पूजनीयः
चन्द्रपूजनमिति—(विष्णुधर्मोत्तरे) पञ्चम्याम्
चन्द्रमसोनरः । आयुश्च विपुलां लक्ष्मीं सर्वैश्वर्यं च
पञ्चम्याम् पृथिवीं देवीं तथा संपूजयेन्नरः ।
नात्र कार्या विचारणा । नागानिति(देवीपुराणे)—
प्रक्रमे— पञ्चम्याम् पूजयेन्नागाननन्ताद्यान्महोरगान् ।
नैवेद्यं देयं सर्वसुखावहम् । इति । चतुर्थीयुते
ब्रह्मणो या दिनादर्वाक् कल्पस्यादिः प्रकीर्तिता ।
यायाम् कृष्णायाम् फाल्गुनस्य च । पञ्चमी चैत्रमासस्य
न्स्या तथा परा । शुक्ला त्रयोदशी माघे कार्तिकस्य तु
नवमी मार्गशीर्षस्य सप्तैताः संस्मराम्यहम् । अन्या अमावस्या वैशाखे
त्येता दशस्यापकारकाः । अन्या अमावस्या वैशाखे
चैत्रे पञ्चमी चैत्रामावास्येति कृष्णा माघत्रयोदशी
मार्गशीर्षे नवमी च ताः शुक्लाः इति (हेमाद्रिः) चैत्रशुक्लप
माध्ये निरत्नाकरः ।

स्कन्दजयन्तीति—(ब्रह्मपुराणे)—जातः स्कन्दश्च षष्ठ्या
शुक्लायाम् चैत्रनामनि । सेनापत्येऽभिषिक्तश्च देवानां ब्रह्मणा
यम् । इति । कुमारव्रतमिति—(मदनरत्ने)—चैत्रशुक्लागमा
प्रतार्थमपुनोच्यते । उक्तेन विधिना षष्ठ्यां विशेषार्पणमु
यं यजेदिति ।

चैत्रशुक्लसप्तमी—अस्यां दमनकादिभिः सूर्यपूजा कार्या । अस्यामेवानोदनसप्तमीव्रतम् । नामसप्तमीव्रतम् । सूर्य्यव्रतम् ।

चैत्रशुक्लाष्टम्यां भवान्युत्पत्तिः । अष्टमी नवमीयुता ग्राह्या। अत्र दिने भवानीयात्रा । अस्यामेव पुनर्वसुयुतायामष्टावशोककलिकाः प्राश्याः अस्यां ब्रह्मपुत्रस्नानेन ब्रह्मपदप्राप्तिः । अत्राप्याश्विनशुक्लाष्टम्यामिव देव्या महापूजा कार्य्या । एतद्देशेदधिमथीपूजा ।

दमनकादिभिरिति—(देवीपुराणे)-भास्करस्य तु सप्तम्यां पूजां दमनकादिभिः । कृत्वाप्राप्नोति भोगादीन्विगतारिर्महायशाः । इति । अनोदनसप्तमीति-शुक्लपक्षे तु चैत्रस्येत्यादि । नामसप्तमीति—(भविष्यत्पुराणे)-चैत्रात्प्रभृति कर्तव्या सर्वदा नाम सप्तमी । सूर्य्यव्रतमिति ।चैत्रशुक्लपक्षे तु सम्यक् षष्ठ्यामुपोषितः । सप्तम्यामर्च्चनं कुर्य्याद्देवदेवस्य गोपतेः । इति । नवमीयुतेति—(माधवः)-पक्षद्वयेऽप्युत्तरैव शिवशक्ति महोत्सवे । (ब्रह्मवैवर्ते)—अष्टमी नवमी युक्ता नवमी चाष्टमीयुता । इति । भवानी यात्रेति—(काशीखण्डे)-भवानींयस्तु पश्येत शुक्लाष्टम्यां मधौ नरः । न जातु शोकं लभते सदानन्दमयो भवेत् । प्राश्या इति—(लिङ्गपुराणे)-अशोक कलिकाश्चाष्टौ ये पिबन्ति पुनर्वसौ । चैत्रे मासि सिताष्टम्यां न ते शोकमवाप्नुयुरिति । ब्रह्मपुत्रस्नानेनेति-(कालिकापुराणे)-चैत्रमासि सिताष्टम्यां योनरो नियतेन्द्रियः । स्नात्वालौहित्य तोयेषु स याति ब्रह्मणः पदम् ॥ (लौहित्योब्रह्मपुत्रः) महापूजेति—(मार्कण्डेय पुराणे)-शरत्काले महापूजा क्रियते या च वार्षिकी। तस्यां ममैतन्माहात्म्यं श्रुत्वा भक्तिसमन्वितः । या च वार्षिकीत्यनेनसंवत्सरस्यादौ चैत्रशुक्ल प्रतिपत्प्रभृत्याष्टमीपर्य्यन्तं क्रियमाणापूजाभिधीयते । अतश्च शरद्वसन्तयोस्तुल्य एव दुर्गोत्सवः कार्य्यः ।

मेषा हयग्रीवपूजनम्, चन्द्रपूजनम् । पृथ्वीपूजनम् । नागान् स
क्षीरघृतनैवेद्यं दद्यात् । एषा चतुर्थीयुता कार्या । इयं कल्पादि
रत्रापि मन्वादिवन्निर्णयः ।

चैत्रशुक्लषष्ठी (स्कन्दजयन्ती) । चैत्रशुक्लषष्ठ्यामग
कुमारव्रतम् ।

चैत्रेमासि शुभानना । श्रीयमलोकान्मानुष्यं संप्राप्ता केशवाज्ञ
इत्यादि । हयपञ्चमीति—(पद्मपुराणे)-अश्वराडमृताज्जातो य
रंहा मनोजवः । उच्चैःश्रवाः पूजनीयः पञ्चम्याम् चैत्रशुक्ल
चन्द्रपूजनमिति—(विष्णुधर्मोत्तरे) पञ्चम्याम् पूजनं कृत्वा स
चन्द्रमसो नरः । आयुश्च विपुलां लक्ष्मीं सर्वैश्वर्यं च विन्दति
पञ्चम्याम् पृथिवीं देवीं तथा संपूजयेन्नरः । तामेवाप्नोत्ययत्ने
नात्र कार्या विचारणा । नागानिति(देवीपुराणे)-चैत्रमासमति
प्रक्रमे- पञ्चम्याम् पूजयेन्नागानन्ताद्यान्महोरगान् । क्षीरसर्पि
नैवेद्यं देयं सर्वसुखावहम् । इति । चतुर्थीयुतेति—(स्कन्दपुराणे)
ब्रह्मणो या दिनादर्वाक् कल्पस्यादिः प्रकीर्तिता । वैशाखस्य तृत
यायाम् कृष्णायाम् फाल्गुनस्य च । पञ्चमी चैत्रमासस्य तत्रैवा
न्त्या तथा परा । शुक्ला त्रयोदशी माघे कार्तिकस्य तु सप्तमी
नवमी मार्गशीर्षस्य सप्तैताः संस्मराम्यहम् । कल्पानामादयो
ह्येता दत्तस्याक्षयकारकाः । अन्त्या अमावस्या वैशाखे तृतीया
चैत्रे पञ्चमी चैत्रामावास्येति कृष्णा माघत्रयोदशी कार्तिकसप्तमी
मार्गशीर्षे नवमी ह्येताः शुक्लाः इति (हेमाद्रिः) चैत्रशुक्लपञ्चमी
ग्राह्येति रत्नाकरः ।

स्कन्दजयन्तीति—(ब्रह्मपुराणे)-जातः स्कन्दश्च षष्ठ्यान्तु
शुक्लायाम् चैत्रनामनि । सेनापत्येऽभिषिक्तश्च देवानां ब्रह्मणा
स्वयम् । इति । कुमारव्रतमिति—(मदनरत्ने)-चैत्रशुक्लात्समा-
रभ्य व्रतार्थमधुनोच्यते । उपोष्य विधिना षष्ठ्यां विशेषात्षण्मु-
खं यजेदिति ।

चैत्रशुक्लसप्तमी—अस्यां दमनकादिभिः सूर्यपूजा कार्या । अस्यामेवानोदनसप्तमीव्रतम् । नामसप्तमीव्रतम् । सूर्यव्रतम् ।

चैत्रशुक्लाष्टम्यां भवान्युत्पत्तिः । अष्टमी नवमीयुता ग्राह्या । अत्र दिने भवानीयात्रा । अस्यामेव पुनर्वसुयुतायामष्टावशोककलिकाः प्राश्याः अस्यां ब्रह्मपुत्रस्नानेन ब्रह्मपदप्राप्तिः । अत्राप्याश्विनशुक्लाष्टम्यामिव देव्या महापूजा कार्या । एतद्देशेदधिमथीता ।

दमनकादिभिरिति—(देवीपुराणे)-भास्करस्य तु सप्तम्यां पूजां दमनकादिभिः । कृत्वाप्नोति भोगादीन्विगतारिर्महायशाः । इति । अनोदनसप्तमीति-शुक्लपक्षे तु चैत्रस्येत्यादि । नामसप्तमीति—(भविष्यत्पुराणे)-चैत्रात्प्रभृति कर्तव्या सर्वदा नामसप्तमी । सूर्यव्रतमिति । चैत्रशुक्लपक्षे तु सम्यक् षष्ठ्यामुपोषितः । सप्तम्यामर्चनं कुर्याद्देवदेवस्य गोपतेः । इति । नवमीयुतेति—(माधवः)-पक्षद्वयेऽप्युत्तरैव शिवशक्ति महोत्सवे । (ब्रह्मवैवर्ते)—अष्टमी नवमी युक्ता नवमी चाष्टमीयुता । इति । भवानी यात्रेति—(काशीखण्डे)-भवानीयस्तु पश्येत शुक्लाष्टम्यां मधौ नरः । न जातु शोकं लभते सदानन्दमयो भवेत् । प्राश्या इति—(लिङ्गपुराणे)-अशोक कलिकाश्चाष्टौ ये पिबन्ति पुनर्वसौ । चैत्रे मासि सिताष्टम्यां न ते शोकमवाप्नुयुरिति । ब्रह्मपुत्रस्नानेनेति-(कालिकापुराणे)-चैत्रमासि सिताष्टम्यां यो नरो नियतेन्द्रियः । स्नात्वा लौहित्य तोयेषु स याति ब्रह्मणः पदम् ॥ (लौहित्यो ब्रह्मपुत्रः) महापूजेति—(मार्कण्डेय पुराणे)-शरत्काले महापूजा क्रियते या च वार्षिकी । तस्यां ममैतन्माहात्म्यं श्रुत्वा भक्तिसमन्वितः । या च वार्षिकीत्यनेनसंवत्सरस्यादौ चैत्रशुक्ल प्रतिपत्पञ्चम्याष्टमीपर्यन्तं क्रियमाणपूजाभिधीयते । अतश्च शरद्वसन्तयोस्तुल्य एव दुर्गोत्सवः कार्यः ।

चैत्रशुक्लनवमी रामनवमी—नवमी द्विधा-शुद्धा विद्धा च। शुद्धापि समान्यूनाधिका चेति त्रिधा। नक्षत्रसंयोगवियोगाभ्यां तु षड्विधा। एवं द्वादशधा। इयं तिथिर्द्वैधे या मध्यान्हव्यापिनी सैव ग्राह्या। दिनद्वये मध्यान्हव्यापित्वे मध्यान्हव्याप्त्यभावे वा या पुनर्वसुयुता सैव ग्राह्या। यदा उभयत्र पुनर्वसुयोगः एकत्रमध्यान्हेऽपरत्रमध्यान्हं विहाय तदा मध्यान्हे पुनर्वसुयुता ग्राह्या जन्मकाले योगस्य-लाभात्। यदा परदिने मध्यान्हे नवमीपुनर्वसुयोगः यदा वा दिनद्वयेऽपि पुनर्वस्वभावः तदोत्तरैव ग्राह्या। यदि तु दशम्या ह्रासवशेन पारणादिने स्मार्तानामेकादशीव्रतप्राप्तिस्तदा स्मार्तैरष्टमीविद्धोपोष्या। वैष्णवैर्मुहूर्तत्रययुता परैवोपोष्या। शुद्धाया नवम्या अलाभेमुहूर्तत्रयन्यूनत्वे वा सर्वैरष्टमी विद्धैवोपोष्या। इयं मलमासेनोपोष्या। अस्यां नवम्यां मातृकाव्रतम् भद्रकालीपूजनञ्च।

चैत्रमासे नवम्यां तु जातो रामः स्वयं हरिः पुनर्वस्वृक्ष संयुक्ता सा तिथिः सर्वकामदा। (रामार्चनचन्द्रिकायाम्) उच्चस्थे ग्रहपञ्चके सुरगुरौ सेन्दौ नवम्यां तिथौ लग्ने कर्कटके पुनर्वसुयुते मेषंगते पूषणि। निर्दग्धुं सकलाः पलाशसमिधो मध्यादयोध्याजिरे आविर्भूतमभूतपूर्वविभवं यत्किञ्चिदेकं महः। नवमी द्विधेति— शुद्धाविद्धेति भेदेन नवमी सा द्विधास्मृता। समान्यूनाधिकात्वेन शुद्धापि नवमी त्रिधा। पुनर्नक्षत्रसंयोगवियोगाभ्यां तु षड्विधा। तस्मादिमत्वेदादिभेदैर्विद्धापि षड्विधा। एवं द्वादशधाभिन्ना नवमी तत्र निर्णयः। मध्याह्नव्यापिनीति। चैत्रशुद्धा तु नवमी पुनर्वसुयुता यदि। सैव मध्याह्नयोगेन महापुण्यतमा भवेत्। इति। पुनर्वसुयुतेति—(अगस्त्यसंहितायाम्) पुनर्वस्वृक्षसंयोगः स्वल्पोऽपि यदि दृश्यते। चैत्रशुद्धनवम्यां तु सा तिथिः सर्वकामदा। इति। उभयत्रेति—केवलापि सदोपोष्या

चैत्रशुक्लदशमी—देवीपुराणे चैत्रमासतिथिकृत्यप्रक्रमेदशम्यां यमपूजनम्।

चैत्रशुक्लैकादशी—अस्यां स्त्रीभिः रुक्मिणीपूजा कार्य्या

नवमी शब्दसंग्रहात्। तस्मात्सर्वात्मना सर्वैः कर्तव्यं नवमी व्रतम्। विद्धैवचेद्दयुतात्रतं तत्र कथं भवेत्। विद्धानिषेधश्रवणान्नवमी चेति वाक्यतः। नवमी चाष्टमी विद्धात्याज्या विष्णुपरायणैः उपोषणं नवम्यां तु दशम्यांचैव पारणम्। विद्धोपोष्येति—दशम्यादिषु वृद्धिश्चेद्विद्धात्याज्यैव वैष्णवैः। तदन्येषां च सर्वेषां व्रतं तत्रैव निश्चितम्। दशम्यां पारणायाश्च निश्चयान्नवमीक्षये। विद्धापि नवमी ग्राह्या वैष्णवैरप्यसंशयम्-इति (हरिविलासे)। नक्षत्ररहितापि मध्यान्हव्यापिनी ग्राह्येति माधवः॥ वीरमवंस्वे—चैत्र शुद्धातु नवमी पुनर्वसुयुता यदि। सैव मध्यान्हयोगेन महापुण्यतमा मता। द्वयोर्मध्यान्हयुक्ता चेत्तोपोष्या पूर्वं संयुता। परविद्धैव कर्तव्या मध्यान्हव्यापिनी यदि। न कार्येति—(माधवीये)-सुजसमप्यजप्तं स्याद्योपवासः कृतोभवेत्। न कुर्य्यान्मलमासे तु महादानव्रतानि च। ननु रामनवमी व्रतस्य नित्यत्वादेकादशावन्मलमासेऽपि कर्तव्यता स्यादिति चेदत्र भ्रमः। नैकादश्युपवासस्य व्रतत्वेन प्राप्तिः। किन्तु एकादश्यां न भुञ्जीत पक्षयोरुभयोरपि इत्यादि निषेधस्य वैष्णवैर्मलमासेऽपि पालनीयत्वात्॥ इति रामनवमीनिर्णयः॥ (मातृकाव्रतमिति)-चैत्र शुक्लनवम्यांतु मातृव्रतमथाचरेदित्यादि। (भद्रकालीति) चैत्र नवम्यां शुक्लायां भद्रकालीमहाबला। योगिनीनां तुसर्वासामाधिपत्येऽभिषेचिता। तस्मात्संपूजयेत्तत्र सोपवासो जितेन्द्रियः विचित्रैर्बलिभिर्भक्त्या सर्वासु नवमीपुच्येति॥

यमपूजनमिति—यमराजं दशम्यां तु पूजयित्वा सुगन्धकैः। विगतारिर्निरातङ्क इहान्ते परम्पदम्। इति।

रुक्मिणीपूजेति—एकादश्यां ततः स्त्रीभिर्देवीपूज्या च

चैत्रागते वास्तुपूजा चैत्री गन्धर्विका चतुर्दशः आन्दोलनी
चैत्रशुक्लद्वादश्यां दमनोत्सवः—शिवभक्तादिभिस्तु च
तुर्दश्यां कार्य्यम । चैत्रस्यैव मदनद्वादशीव्रतम । भर्तृद्वादशीव्र
चैत्रशुक्लत्रयोदशी—यस्यामनङ्गव्रतम् । सा च पूर्वा मध्या
ह्नव्यापिनी । उभयदिने मध्याह्नव्यापित्वे तदव्यापित्वे च पूर्वा

रुक्मिणी । पुष्पालङ्कारधूपाद्यक्षताप्यर्पणैर्जलैः । वास्तुपूजेति—तत्रापराह्णे वास्तुरूप चरणानां वरप्रदः । अर्घ्यैर्माल्यैश्च वस्त्रैः पूज्यैरङ्गैः सुनिश्चितैरिति । आन्दोलनीय इति—चैत्रमासे शुक्लायामेकादश्यां तु वैष्णवैः । आन्दोलनीयो देवेशः सकलैर्महोत्सवैरिति ।

दमनोत्सव इति—द्वादश्यां चैत्रमासस्य शुक्लायां दमनोत्सवः । बौधायनादिभिः प्रोक्तः कर्त्तव्यः प्रतिवत्सरमिति । (पाद्मे) ऊर्जव्रतं मधौदोला श्रावणे तन्तुपूजनम् । चैत्रे च दमनारोपम् कुर्वाणो व्रजत्यधः । चतुर्दश्यामिति—स्वस्वदेवप्रतिष्ठायां मन्त्रसंग्रहणे तथा । पवित्र दमनारोपे ग्राह्या तत्तत्तिथिर्बुधैः । (निर्णयज्योतिः प्रकाशे)—चतुर्थी गणनाथस्य दुर्गाया नवमी तथा विष्णोस्तु नवमी पुण्या तथैव द्वादशी शुभा । त्रयोदशीश्वरस्यैव श्रेष्ठारण्य निवासिनः । भैरवस्यैकवीराया ज्ञेया भूताफलप्रदा । पूर्णिमासर्वदेवानां श्रेष्ठादमनकार्पणे इति—मदनेति—चैत्रे मासि सितेपक्षे द्वादश्यां नियतव्रत इति । भर्तृद्वादशीति—वसन्ते शुक्लपक्षस्य द्वादशी या भवेच्छुभा । तस्यामुपोष्य विधिवत्स श्रीकं हरिमर्चयेदिति ।

अनङ्गव्रतमिति—(हेमाद्रौ)—चैत्रोत्सवे सकललोकमनोनिवासे कामं त्रयोदशदिने च वसन्तयुक्तम् । पत्न्या सहार्च्यपुरुषप्रवरोऽथयोषित्सौभाग्यरूपसुतसौख्ययुतः सदास्यात् । मध्याह्नव्यापिनीति—मध्याह्ने पूजयेद्भक्त्या मद्यैर्गन्धैः स्रगम्बररि-

चैत्रशुक्लचतुर्दशी—सा च पूर्वा ग्राह्या । रात्रिव्यापिनी-ग्राह्येति माधवः । रात्रिव्यापिनीत्येतत्पूर्वविद्धा परमिति मयूखे । पूर्वदिने साय त्रिमुहूर्ताभावे परेति (कमलाकरः) । अस्यामेव चतुर्दश्याम् कर्पूरकुङ्कुमागुरुचन्दनादिभिर्दमनकेन च शिवपूजा कार्य्या । लिङ्गपुराणे कश्चिद्विशेषोऽप्युक्तः ।

चैत्रशुक्लपूर्णिमा—त्रिमुहूर्तसत्त्वे परा । रविमन्दयुत चैत्र्यां स्नानदानादिभिरश्वमेधजं फलम् । अस्यां सर्वदेवानां दमनकेन पूजा । निकुम्भपूजा । एषा हनुमज्जयन्तीति लोके प्रसिद्धा । कार्तिककृष्णा चतुर्दशीति उत्सवसिन्धुकारः अत्रापि कल्पभेदेन व्यवस्था । माससंज्ञक ऋक्षे गुरुचन्द्रयोगश्चेत्पूर्णिमायां तदा सा महत्पूर्विका । एषैव दमनपूर्णिमा ।

स्यादिवचने मध्यान्हस्य पूजाकालत्वाभिधानात् । पूर्वेति—शुक्ला त्रयोदशीपूर्वा परा कृष्णा त्रयोदशी । अलाभे सापि पूर्वैव पूर्वानङ्ग त्रयोदशी । मधौ शुक्लत्रयोदश्यां मदनं चन्दनात्मकम् । कृत्वा सम्पूज्य यत्नेन वीजयेद् व्यजनेनचेति । पूर्वाग्राह्येति—(स्कन्दपुराणे)—चतुर्दशी तु कर्तव्या त्रयोदश्या युताविभो । मम भक्तैर्महाबाहो भवेद्या चापराह्णिकी । रात्रिव्यापिनीति—(बौधायनः)—मधोः श्रावणमासस्य शुक्ला या तु चतुर्दशी सा रात्रिव्यापिनीग्राह्या नान्या शुक्लाकदाचनेति । शिवपूजेति—(देवीपुराणे)—चतुर्दश्यां तु कर्तव्या कर्पूरागुरुचन्दनैरित्यादि । अन्यत्रापि—मधुमासे तु संप्राप्ते शुक्लपक्षे चतुर्दशी । प्रोक्ता दमनपूजेति सिद्धिदा तु महोत्सवे इति । परेति, । भूतविद्धा न कर्तव्या दर्शपूर्णा कदाचन । वर्जयित्वामुनिश्रेष्ठ सावित्रीव्रतमुत्त-ममिति । अश्वमेधजफलमिति—मन्देवार्के गुरौ वापिवारेष्वेतेषु चैत्रिका । तत्राश्वमेधजं पुण्यं स्नानश्राद्धादिभिर्लभेत् । सर्वदेवा-

नामिति—संवत्सरकृतार्चायाः साफल्यायाखिलान्सुरान्। दमनेनार्चयेच्चैत्र्यां विशेषेणसदाशिवम्। निकुम्भपूजेति—(आदित्यपुराणे)-उपोष्य च चतुर्दश्यां पौर्णमास्यां हरिं यजेत्। चैत्रेमासिनिकुम्भश्चपिशाचैः सहितोवली। इत्यादि। एषेति—(दैवज्ञविनोदे) (हनुमदुपासनाकारः)-नवमासिगते पुत्रं सुषुवे सांजनी शुभम्। चैत्रेमासिसितपक्षे पौर्णमास्यां कुजेऽहनि। इति। कृष्णचतुर्दशीति—(उत्सवसिन्धौ)-उर्जस्य चासितपक्षे स्वात्यां भौमेकपीश्वरः। मेषलग्नेऽजनीगर्भाच्छिवः प्रादुरभूत्स्वयम्। तथा (वायुपुराणे)—अश्विनस्यासितेपक्षे—स्वात्यां भौमे च मारुतिः। मेषलग्नेऽञ्जनीगर्भात् स्वयं जातोहरः शिवः। इति शुक्लादि मासगणनया कार्तिक कृष्णपक्षः तुलार्के मेषलग्ने सायङ्काले जन्मोत्सवः। (व्रतरत्नाकरे)-आश्विनस्यासितेपक्षे भूतायां च महानिशि। भौमवारेऽञ्जनीदेवी हनुमन्तमजीजनत्। अत्रापिकल्पभेदेन व्यवस्था। महत्पूर्विकेति—भारते-माससंज्ञे यदाऋक्षेचन्द्रः सम्पूर्णमण्डलः। गुरुणायातिसंयोगं सातिथिर्महतीस्मृता इति।

महत्पूर्विकाविचारः

माससंज्ञे ऋक्षे चित्राविशाखाज्येष्ठादयः तेषु नक्षत्रेषु सम्पूर्णमण्डलश्चन्द्रः पूर्णिमायां भवति तेन तस्यान्तिथौ यद्येकस्मिन्नक्षत्रे माससमानसंज्ञके गुरुचन्द्रयोगो भवति तदा महाचैत्री महावैशाखीत्यादि भवन्तीत्यर्थः। तथा—महतीयत्र दृश्येते द्विविधचन्द्रबृहस्पती। माससंज्ञे तु नक्षत्रे सा तिथिर्महती स्मृता। भारतवचने सम्पूर्णमण्डलोपादानात् पौर्णमास्येवात्रापि प्रत्येतव्या। अतएव ज्योतिःशास्त्रे महती...... महतीस्मृता। महतियोर्दर्शनमेकत्रावस्थितयोरेव भवति नैकराशिमात्रावस्थाने। तेन—एकराशिगतौस्यातां यदा गुरुनिशाकरौ। पौर्णमास्यां तु महती सर्वपापहरा तिथिः। एकनक्षत्रावस्थितिपरं सर्वैकवाक्यत्वात्। तथा (ब्रह्माण्डपुराणे)—पौर्णमासीस्वतीतौ यद्देवौ परस्परम्। यस्मिन्काले भवेत्स्यातां तौ ज्ञायतां तेन सः। (तौ चन्द्रगुरू समौ यदाकारौ निष्ठतः) महदेकत्वं ज्ञायते इति चन्द्रमा एकभूतं च तथायंस्तथैव च। कथ्यते द्वादशमासान्तमेतस्य तिथिः स्मृता। अत्रापि माससंज्ञेषु नक्षत्रेषु—मासमेत्य चान्यतः तिथिपर च पौर्णमासीस्ते तिथिसम्पूर्णमात्रै द्वादशमासान्ते इति विशेषात्। प्रतिमासं सत्याभावात् न च चतुर्दश्यां तथा क्रियते किन्तु सतः पाक्षिक भवतीति तदर्थः। सर्वेष द्वादशानां चैत्रमेव महत्वम्। गुरुचन्द्रयोगस्य च महावर्तिनी भवती पुण्यम्। मीनराशौ तु ज्ञायते विशेषिततया तत्र गुरुदर्शनात्। महामान्यादिषु वा सम्भवात्। (महा-

ज्येष्ठ्यान्तु विशेषः)। ऐन्द्रे गुरुः शशी चैव प्राजापत्ये रविस्तथा। पूर्णिमा ज्येष्ठमासस्य महाज्येष्ठी प्रकीर्तिता। ऐन्द्रं-ज्येष्ठानक्षत्रं प्राजापत्यं रोहिणी एवं लक्षणं प्रकीर्तिता। प्रकर्षणवती कथिता फलभूयस्त्वात्। महत्त्वन्तु साधारणलक्षणादेव यत्तु पठति (वृहस्पतिः) पौर्णमास्यां सितपक्षे ज्येष्ठेमासि गुरोर्दिने। वृषादित्ये शशीचन्द्रे महाज्येष्ठी प्रकीर्तिता। (अत्रापि गुरुवारवृषादित्याभ्यां फलभूयस्त्वम्)।


।...वृषादित्यंव्याकरोति—प्राजापत्येऽथ सौम्येऽर्के ऐन्द्रे जीवनिशाकरौ। पूर्णिमा गुरुवारेण महाज्येष्ठी प्रकीर्तिता। ऐन्द्रे, शशी सुराचार्यश्चन्द्रे धातरि वा रविः। पूर्णिमा ज्येष्ठमासस्य महाज्येष्ठी प्रकीर्तिता। (सौम्य चन्द्रपदाभ्यां मृगशिरोभण्यते) धातातु—रोहिणीचन्द्रे धातरि वा रविरित्यमवक्लृप्तिदर्शनं वृषादित्यमात्रंफलभूयस्त्वप्रयोजकं मते। महत्त्वन्तु ज्येष्ठानक्षत्रे गुरुचन्द्रयोरवस्थानमात्रेणैव प्राजापत्ये रविस्त्वधेति च ततोऽपिफलातिरेकार्थं। अन्यथा महाज्येष्ठ्या बहुतरं लक्षणंस्यात्। यदपि पठन्ति—वृश्चिकस्थो यदा जीवो वृषस्थश्चयश्च रविः। पूर्णिमागुरुवारेण महाज्येष्ठी प्रकीर्तिता। (पूर्णिमासेन्दुशक्रर्क्षेतितृतीयपदं वचनान्तरे) तत्र वृश्चिकपदं ज्येष्ठापरं सर्वैकवाक्यत्वात् वृषपदं फलभूयस्त्वार्थ—यथा—मासाख्यर्क्षेचन्द्रगुरू तत्पञ्चदशके रविः पूर्णिमाज्येष्ठमासस्य महच्छब्दान्विततिथिः मासाख्यर्क्षेचन्द्र गुरुतत्पञ्चदशके रविः। पूर्णिमा गुरुवारेण महाज्येष्ठी प्रकीर्तिता। अत्र तत्पञ्चदशके रविरिति विवक्षायां ज्येष्ठानक्षत्राच्चतुर्दशत्वात् रौहिण्यास्तत्रादित्ये न स्यात्। न च तत्र फलभूयस्त्वार्थम् रौहिण्यामपि फलभूयस्त्वात्। अत्र चतुर्दशे यादित्येवा भवति तदा पञ्चदशकमविशेषवम्। ततः पञ्चदशकपर्य्यन्ते रवौ न षोडशके आर्द्रायामपीत्यर्थः। तथा, ऐन्द्रे शशी सुराचार्यौ वृषे अनन्तथवा रवौ। पूर्णिमा गुरुवारेण महाज्येष्ठी प्रकीर्तिता। अनन्तमिथुनेतेनाद्रीस्थेऽपि रवौ प्रसक्तिः। तन्निराकरणार्थं पञ्चदशकपर्य्यन्ते भवति न षोडशके इति तात्पर्य्यम् ज्येष्ठातः आर्द्रायाः षोडशकत्वात्। ननु चतुर्दशकत्व रौहिणीनक्षत्रस्यापि निवृत्तिः तस्य विधानात्। यानि तु वचनानि ऐन्द्रे मैत्रे यदा जीवस्तत्पञ्चदशके रविः। पूर्णिमा शक्र चन्द्रेण महाज्येष्ठीतिथिस्तदा। प्राजापत्येऽथ सौम्येऽर्के ऐन्द्रे शशीगुरुस्तथा मैत्रे वा पूर्णिमायुक्ता महाज्येष्ठी प्रकीर्तिता। वृश्चिकस्थो यदा जीवोनक्षत्र द्वितये भवेत। ऐन्द्रे शशी महाज्येष्ठी वृषे युग्मेथवा रवौ। ऐन्द्रे मैत्रे च गुरौ यदि महाज्येष्ठीस्यात् तदा तत्पञ्चदशकविशेषणानुराधार्थे जीवे रोहिण्यामेव रवौ तु मृगशिरसि ज्येष्ठायाञ्च गुरौ मृगशिरस्येव रवौ न रोहिण्यामितिस्यात् एतच्च प्राजापत्ये रविस्तथेति सर्वसम्मतवराहवचनं विरुद्धम्। तस्मात्तत्पञ्चदशके रविरित्यनेनैवाकुलितत्वात् मूलस्यचानुपलम्भात्। द्वादशभिर्वचनैः ऐन्द्रस्थएवगुरौ महाज्येष्ठीप्रतिपादनात् महाज्येष्ठीलक्षणस्य च भेदापत्तेः तस्य चान्यायत्वाच्चिन्त्यभिश्चालिखितत्वात् पौर्णमास्यन्तरेषु च माससंज्ञकनक्षत्रएव गुरुचन्द्रकयोर्मेलकेन महत्व दर्शनादत्रापि तथात्वस्यैव युक्तत्वादित्यनाकराणि। यदि पुनः मैत्रवचनान्याकरस्थान्येव तदा नास्ति वचनस्यातिभार इति न्यायात् सर्वं पूर्वोक्तं दूषणमदूषणमेव किन्तु गुरुवारस्तदा न योग्यः यथापरं वचनम्—मेषपृष्ठे यदा सौरिः सिंहे च गुरुचन्द्रमाः। भास्करे श्रवणामध्ये महामाघीति सा स्मृता। श्रवणामध्ये हि भास्करोमकरे भवति—

वैशाखकृत्यनिर्णयः

मेषसंक्रमणे वैशाखस्नानम् । चैत्रशुक्लैकादशीमारभ्य पौर्ण-
मासीमारभ्य वा स्नानम् । त्र्यह वा स्नायात् । (त्रयोदश्यां चतु-

स्नानमिति—(पाद्मे) तुलामकरमेषेषु प्रातः स्नानं विधीयते।
द्विष्यं ब्रह्मचर्यं च महापातकनाशनम् ॥ एकादशीमारभ्येति—
पाद्मे) मधुमासस्य शुक्लायामेकादश्यामुपोषितः । पञ्चदश्याम्
ा भो वीर मेषसंक्रमणे तु वा ॥ प्रपादानमिति—(स्कान्दे)-प्र-
ाकार्य्या च वैशाखे देवे देया गलन्तिका । (गलन्तिका सन्ततप-
द्धारमुदकपात्रम् (भाषायामभिषेकपात्रम्) उपानद्व्यजनछत्र-
सूक्ष्मवासांसि चन्दनमिति ॥ गन्धादिदानमिति—(वायुपुराणे)-
न्धमाल्यानि च तथा वैशाखे सुरभीणि च । देयानि द्विजमु-
ख्येभ्यो मधुसूदनतुष्टये ॥ कुम्भदानमिति—ददाति योहि मेषादौ

च मकरस्थादित्ये पौर्णमास्यां सिंहे चन्द्रः सम्भवति—कुम्भस्थादित्ये तत्सम्भवः
ापि भास्करे श्रवणामध्यइति विरोधात् तस्मात् पौर्णमासी व्यतिरिक्ततिथ्यन्तराभि-
यम् । (ब्रह्माण्डपुराणे)—पौर्णमासीव्यतिपातोयदृक्षेतां परस्परम् । तस्मिन्काले
नौ स्यातां तौ व्यतीपात एव सः । तौ चन्द्रबृहस्पतीयदाकाशे समौ एकनक्षत्रावस्थाने
तयोराकाशे समता । तथा—तत्रैव चन्द्रमाश्चैव देवाचार्यस्तथैव च । वसति
दशाब्दान्ते तन्महत्वं तिथेः स्मृतम् । तथान्याअपि तिथयोमहत्यः । दुर्गोत्थानस्य
मी विष्णुत्थानस्य द्वादशी वन्हिस्वापस्य षष्ठी च महत्योमाघसप्तमी (केचिन्महा-
र्मीत्युच्यते) । इति । (ब्रह्मपुराणे)—मेषराशौ यदा सौरिः सिंहे चन्द्रबृहस्पतिः ।
स्करः श्रवणर्क्षे स्यान्महामाघीति सा स्मृता । शालग्रामे महाचैत्री कृता पुंसां महा-
ता । गंगायां चैव वैशाखी ज्येष्ठी वै पुरुषोत्तमे । आषाढी वै कनखले केदारे श्रावणी
ा महाभाद्री बदर्यां च कुब्जायामेव चाश्विनी । पुष्करे कार्तिकी (रम्या) कान्य-
जे मार्गशिरी तथा । अयोध्यायां महापौषी कृतायुः सुमहाफलाः । महामाघीप्रयागे
नैमिषे फाल्गुणी तथा ॥ इति धर्मरत्ने महत्पूर्णिकाविचारः ।



दश्यां वैशाख्यां वा दिनत्रयम्)। अत्रमासे प्रपादानम्। गन्धादिदानम्। पूर्णकुम्भोपरिसक्तुपूर्णशरावं धृत्वा दानम्। अस्मिन्मासे तुलस्यर्पणेन मुक्तिः। अश्वत्थसेचनं तत्प्रदक्षिणं च कार्य्यम्। गोकण्डूयनेनसद्गतिप्राप्तिः। कान्ति व्रतम्। ज्ञानावाप्ति व्रतम्। एकभक्तव्रतम्। मासपर्यन्तं स्नात्वा उद्यापनञ्च कार्य्यम्। उद्यापनेऽशक्तश्चेत्कृसरं भोजयेत्। यदा तु वैशाखो मलमासो भवति तदा

सक्तूनम्बुघटान्वितान्। पितॄनुद्दिश्य विप्रेभ्यः सर्वपापैः प्रमुच्यते। इति। मुक्तिरिति—(पाद्मे)-तुलसी कृष्णगौराख्या तयाभ्यर्च्य मधुद्विषम्। विशेषेण तु वैशाखे नरो नारायणो भवेत्। माधवं सकलं मासं तुलस्या योऽर्चयेन्नरः। त्रिसंध्यं मधुहन्तारं नास्ति तस्य पुनर्भवः। इति। अश्वत्थसेचनमिति—योऽश्वत्थ मूलमासिञ्चेत्तोयेन बहुना सदा। कुर्य्यात् प्रदक्षिणं तं तु सर्वदेवमयम् तत इत्यादि। गोकण्डूयनेनेति—कण्डूय पृष्ठतो गां तु स्नात्वा पिप्पलतर्पणम्। कृत्वा गोविन्दमभ्यर्च्य न दुर्गतिमवाप्नुयुः। कान्तिव्रतमिति—(वामनपुराणे)-वैशाखे पुष्पलवणं वर्जयित्वा च गोप्रदः। भुक्त्वा विष्णुपदे कल्पम् स्थित्वा राजा भवेदिह। एतत्कान्तिव्रतम् नाम कान्तिसौभाग्यदायकमिति। ज्ञानावाप्तिरिति—वैशाख्यां कनकं दद्यात्त्रिरात्रोपोषितो नरः। ज्ञानावाप्तिमदं ह्येतद्व्रतम् बुद्धिविवर्द्धनम्। एकभक्तव्रतमिति-(महाभारते) निरन्तरेदेकभक्तेन वैशाखम् यो जितेन्द्रियः। नरो वा यदि वा नारी ज्ञातीनाम् श्रेष्ठताम् व्रजेदिति। उद्यापनमिति—(वामनपुराणे)-मासमेवं बहिः स्नात्वा नद्यादौ विमले जले। एकादश्यां च द्वादश्याम् पौर्णमास्यामथापि वा। उपोष्य नियतो भूत्वा कुर्य्यादुद्यापनम् बुधः। कृसरं भोजयेदिति—(वायुपुराणे) वैशाख्यां विधिना स्नात्वा भोजयेद् ब्राह्मणान् दश। कृसरं सर्वपापेभ्यो मुच्यते नात्र संशयः॥ काम्यानामिति—न कुर्य्यादधिके

[illegible] मकरगते [illegible] गङ्गाद्वारं स्ना[illegible] [illegible] कुम्भयोगः । [illegible] कुम्भस्थगुरौ मेषार्कसंक्रान्तौ कुम्भयोगः । सिंहस्थे गुरौ मेषार्कसंक्रमे अर्द्धकुम्भयोगः । अत्र हरिद्वारे गङ्गास्नानम् कार्य्यम् । वैशाखशुक्लकृष्णनवम्यां चण्डिकापूजनं ।

वैशाखशुक्लतृतीया (अक्षयतृतीया) । इयं विष्णुपूजा होम-दानादिषु पूर्वाह्णव्यापिनी ग्राह्या । गौरीव्रते कलाकाष्ठादियुक्तानु-रा कार्य्या । (यदा चतुर्थीयुता न लभ्यते तदा गौरीव्रते त्रिमुहूर्त

मासि काम्यं कर्म कदाचन । मलं वदन्ति कालज्ञा मासं कालविदोऽधिकम् । न कुर्य्यादधिके मासि कर्माकर्म कथञ्चन । मुक्त्वा नैमित्तिकं कर्म तद्दिनस्यैव कीर्त्तितम् ॥ समापयेदिति—दीपिकायाम्—नियमत्रिंशद्दिनस्याच्छुभमासस्यारम्भं समापयेत् । मलिनमासोपवासव्रतम् इति । कुम्भइति—पद्मिनीनायकेमेषे कुम्भस्थे च वृहस्पतौ । गङ्गाद्वारे भवेद्योगः कुम्भनामातदोत्तमः । सिंहस्थे च वृहस्पतौ अर्धकुम्भोऽप्यभिधायकम् ।

चण्डिकापूजनमिति—(निर्णयामृत)—वैशाखे मासि राजेन्द्र नवम्यां पक्षयोर्द्वयोः । उपवासपरो भक्त्या पूजयानस्तु चण्डिकाम् । हंसकुन्देन्दुसङ्काशस्तेजसा ध्रुवसन्निभः । विमानवरमारूढो देवलोके महीयते ॥

अक्षयतृतीयेति—(भविष्ये)—यद्यपा कृष्णादूल वैशाखे तु महातिथिः । तृतीयासाक्षयालोकगीर्वाणैरभिनन्दिता । यत्किञ्चिद्दीयते दानं स्वल्पं वा यदि वा बहु । तत्सर्वमक्षयं यस्मात्तेनेयमक्षयास्मृता । इति—पूर्वाह्णव्यापिनीति—पूर्वाह्णे तु सदा कार्य्याः शुक्लामनुयुगादयः । दैवे कर्मणि पित्र्ये च कृष्णे चैवापराह्णिकाः । (भविष्योत्तरे)—द्व शुक्ले द्व तथा कृष्णे युगाद्याः कवयो विदुः । शुक्ले पूर्वाह्णिके कार्य्यं कृष्णे चैवापराह्णिके । अन्यत्र अथो

लाभे द्वितीयाविद्धाऽपि ग्राह्या । एकादशीतृतीयेति वचनादिति रत्नाकरः) अस्याम् श्रीसहितविष्णुपूजा कार्य्या । गङ्गायां स्नात्वाऽत्रदिने यवैर्होमः । यवैर्विष्णुम् पूजयित्वा यवान्प्राशयेत । इयं च त्रेतायुगादिः । कृतयुगादिरिति केचित् । वैशाखे मलमासे सति तत्रैव युगादिः कार्य्य इति कमलाकरः । मासद्वयेऽपि कर्त्तव्यमिति

युगादि मन्वादिकर्मतिथयः पूर्वाह्णिकाः । स्युः सिते विज्ञेया अपराह्णिकाश्च बहुले । रोहिणी बुधयुक्तापि पूर्वविद्धा विवर्जिता । अस्यां कृतापि मान्धातः पुण्यं हन्ति पुराकृतम् । गौरीविनायकोपेता रोहिणी बुधसंयुता । विनापि रोहिणी योगात्पुण्यकोटिप्रदा सदा । इति । विष्णुपूजेति—(भविष्योत्तरे)-वैशाखस्य तृतीयायां श्रीसमेतं जगद्गुरुम् । नारायणं पूजयेथाः पुष्पधूपविलेपनैरिति । स्नात्वेति-गंगातोये नरः स्नात्वा मुच्यते सर्वकिल्विषैः । तस्यां कार्य्यो यवैर्होमो यवैर्विष्णुं समर्चयेत् । यवान्दद्याद् द्विजातिभ्यः प्रयतः प्राशयेद्यवानिति । त्रेतायुगादिरिति—माघे पञ्चदशी कृष्णा नभस्ये च त्रयोदशी । तृतीया माधवे शुक्ला नवम्यूर्जे युगादयः । (भविष्योत्तरे)—नवम्यां शुक्लपक्षस्य कार्तिके निरगात्कृतम् । त्रेतासिततृतीयायां वैशाखे समपद्यत । दर्शे तु माघमासस्य प्रवृत्तं द्वापरं युगम् । कलिः कृष्णत्रयोदश्यां नभस्ये मासि निर्गत इति । केचिदिति—(ब्रह्मपुराणे)-वैशाखमासि शुक्लायां तृतीयायां जनार्दनः । ब्रह्मलोकात्त्रिपथगां पृथिव्यामवतारयत् । यवानुत्पादयामास युगं चारब्धवान्कृतमिति—तत्र कल्पभेदेन व्यवस्थाप्यमिति (निर्णयामृते) न त्रैव युगादिरिति (अल्पशुद्धः) दशाहरास्तु नोत्कर्षश्चतुर्षु च युगादिषु । उपाकर्मणि चोत्सर्गे त्वेते दिष्टेऽपादिल इति । मासद्वयेऽपीति—(स्मृतिचन्द्रिकायां)—यौगादिकं मासिकं च श्राद्धं चापरपाक्षिकम् । मन्वादिकं तैर्थिकं च कुर्य्यान्मासद्वयेऽपि चेति । तथा च मरीचिः—प्रतिमासं मृताहे च श्राद्धे प्रत्यब्दवासरम् । मन्वादौ च युगादौ च तन्मासोभयोरपीति ।

स्मृतिचन्द्रिकाकारः । युगादिषु युगान्तेषु श्राद्धम् कार्य्यम् । तच्चापि-
ण्डकमनुष्ठेयम् । श्राद्धे युगादितिथिरपराह्णव्यापिनी ग्राह्य
अस्यां तृतीयायां सक्त्वादिदानेन तथा घर्मघटदानेन पुण्यप्राप्ति
अस्यां रात्रिभोजने कृते तथा श्राद्धाकरणे प्रायश्चित्तम् । श
समुद्रस्नानं प्रशस्तम् । भविष्यपाद्मवचनादत्र देशीयाः पापवि
चनार्थं वैशाखशुक्लतृतीयायाम् घृतयुक्तकृशरभोजनं कुर्वन्ति का
न्ति च अन्यदेशे सक्तुभक्षणम् । कृषीवलाश्चास्याम् कृष्य
शकुनान् पश्यन्ति । तान्दृष्ट्वा सुभिक्षदुर्भिक्षं च निर्णयन्ति । अ
वेदाध्ययननिषेधः ।

श्राद्धमिति—(ब्रह्मपुराणे)—युगाद्येषु युगान्तेषु श्राद्धमक्षय्य
ष्यत इति । प्रकरणाद्युगान्ता अपिकथ्यन्ते—(ब्रह्मपुराणे)
सूर्य्यस्यसिंहसंक्रान्त्यामन्तः कृतयुगस्यतु । अथ वृश्चिकसंक्रान्त्य
मन्तस्त्रेतायुगस्य तु । ज्ञेयस्तु वृषसंक्रान्त्यां द्वापरान्तस्तु संख्यय
तथा तु कुम्भसंक्रान्त्यामन्तः कलियुगस्य तु ॥ (आदित्यपुराणे
दिनर्क्षं रेवती पञ्चगमनचैव राशिषु । युगान्तदिवस विद्धि तत्प्रदान
मनन्तकम् । ग्रहणे विषुवे चैव सौम्येवा मिहिरो यदि । सप्तमी
शुक्लकृष्णा वा युगान्तदिवसं विदुरिति । (सौम्ये उदगयने) ।
अपिण्डकमिति—विषुवायनसंक्रान्ति मन्वादिषु युगादिषु । वि-
हाय पिण्डनिर्वापं सर्वं श्राद्धं समाचरेत् । तथा च (पुलस्त्यः) ।
अनपत्यमये श्राद्धं विषुवद्वितीये तथा । युगादिषु च सर्वासु पि-
ण्डनिर्वापणादृते । इति । अपराह्णव्यापिनीति—अपराह्णः पितॄणां
तु अपराह्णे तु पैतृकम् । अपराह्णे पितृक्रिया इत्यादिवचनैरपरा-
ह्णकालाभिधानात्कर्मणो यस्येतिवचनात् श्राद्धेऽपराह्णव्यापि
यावत्र प्राधान्यात् । गोभिलादि वचनं पूर्वाह्णव्यापिनी विषयकं
तर्पणविषयकम् । तर्पणाभिधानं च श्राद्धे । वार्नीयमप्यत्र ति-
र्विमिश्रन्दद्यात् पितृभ्यः प्रयतो मनुष्यः । श्राद्धं कृतं तेन समा-

एवंच तृतीया परशुरामजयन्ती—एषा जयन्ती प्रदोषव्यापिनी ग्राह्या। दिनद्वये तद्व्याप्तावंशतः समव्याप्तौ च परा। अन्यथा पूर्वैव।

वैशाखशुक्लसप्तमी—अस्याम् गङ्गोत्पत्तिः सा च मध्याह्नव्यापिनी ग्राह्या शिष्टाचारादिति कमलाकरः। पूर्वाह्णव्यापिनी ग्राह्येति रत्नाकरादीक्षितः दिनद्वये तद् व्याप्तौ अव्याप्तौ एकदेशव्याप्तौ वा पूर्वा। अस्यामेव कमलासप्तमीव्रतम्। निम्बसप्तमीव्रतम्। शर्करासप्तमीव्रतम्।

सहस्रं रहस्यमेतत्पितरो वदन्ति। इति। मन्वादिदानेनेति—(भविष्ये)-उदकुम्भान्सरसकान्सान्नान्सर्वरसैः सह। यवगोधूमचणकान्सक्तून्दध्योदनं तथा। ग्रैष्मिकं सर्वमेवात्र सस्यंदाने प्रशस्यते। (देवीपुराणे)—तृतीयायां तु वैशाखे रोहिण्यर्क्षे प्रपूज्य च। उदकुम्भप्रदानेन शिवलोके महीयत इति। प्रायश्चित्तमिति—(ऋग्विधाने)- रात्रौ भुङ्क्ते वत्सरे तु मन्वादिषु युगादिषु। अभिस्पृष्टिं मन्त्रं च जपेद्ध्रानपातकम्। न यस्य छाया मन्त्रं च शतवारं तदा जपेत्। युगादयो यदान्यूनाः कुरुते नैव चापि यः। इति। समुद्रस्नानमिति—(सौरपुराणे)-युगादौ तु नरः स्नात्वा विधिवल्लवणोदधौ। गोसहस्रप्रदानस्य कुरुक्षेत्रफलं हि पत्। तत्फलं लभते मर्त्यो भूमिदानस्य च ध्रुवमिति। वेदाध्ययननिषेध इति—नारदीये-युगादिषु च सर्वासु तथा मन्वन्तरादिषु। अनध्यायं प्रकुर्वीत तथा सोपपदास्वपि। इति। सितज्येष्ठे द्वितीया च आश्विने दशमीसिता। चतुर्थी द्वादशी माघे एताः सोपपदाः स्मृताः।

जयन्तीति—वैशाखस्य सितेपक्षे तृतीयायां पुनर्वसौ। निशायाः प्रथमे यामे रामाख्यः समये हरिः। स्वोच्चगैः षड्ग्रहैर्युक्ते मिथुने राहुसंस्थिते। रेणुकायास्तु योगर्भादवतीर्णो हरिः स्वयम्॥ इति। (ननु पुरोपसमुच्चयवचनस्य का गतिः तत्तुकल्पभेदेन व्यव-

वैशाखशुक्लाष्टमी—चन्दनानुलेप्य आम्रफलजलेन स्नात्वा अपराजिताख्यां देवीं मांसीवालकवारिभिः स्नापयित्वा सम्पूज्य शर्करासहितनैवेद्यं दत्त्वा नवम्यां तत्रैव ब्राह्मणान् कुमारीश्च भोजयित्वा पारणं कुर्यात्।

वैशाखशुक्लनवमी—चण्डिकापूजनम् कार्यम्।

वैशाखशुक्लदशमी—शङ्करजयन्ती।

रुपेयमिति। परेति—युक्ता तृतीया शुद्धोपोष्यादिनद्वये। निशायापूर्वयामे चेद्युक्तारान्यत्र पूर्विका। इति।

गङ्गोत्पत्तिरिति—(ब्राह्मे)-वैशाखे शुक्लसप्तम्यां जह्नुना जाह्नवी पुरा। क्रोधात्पीता पुनस्त्यक्ता कर्णरन्ध्रात्तु दक्षिणात्। तां तत्र पूजयेद्देवीं गङ्गां गगनमेखलामिति। पूर्वेति—षष्ठ्या युता सप्तमी च कर्तव्या तात सर्वदा। षष्ठी च सप्तमी यत्र तत्र संनिहितो हरिः। कमलसप्तमीति—(पाद्मे)-वसन्तामलसप्तम्यां स्नातः सन्गौर सर्षपैः। तिलपात्रे तु सौवर्णं निधाय कमलं शुभमित्यादि। निम्बसप्तमीति—(निर्णयामृते)-तृतीयां सप्तमीं वीर तच्छृणुष्वाग्रतो मम। निम्बपत्रैः स्मृता यातु पापघ्नी शोकनाशिनीति। शर्करासप्तमीति—(पद्मपुराणे)-शर्करासप्तमीं वक्ष्ये सर्वकल्मषनाशिनीम्। आयुरारोग्यमैश्वर्यं ययानन्तं प्रजायत इत्यादि॥

स्नात्वेति—(देवीपुराणे)-सहकारफलैः स्नानं वैशाखेऽष्टमीदिने। आत्मनो देवतां स्नात्वा मांसी वालकवारिभिः। लेपनं फलकर्पूरं धूप दीपं सुगन्धिकमित्यादि। (संवत्सरप्रदीपे)-देव्याः पूजां प्रकुर्वीत केतक्या चम्पकेन च। शर्कराक्षीरनैवेद्यं कन्या विप्रेषु भोजनम्। आत्मनः पारणं तद्दक्षिणां शक्तितो ददेत्। सर्वतीर्थाभिषेकं तु अनेनाप्नोति भार्गव इति। शङ्करजयन्तीति-निधिनागेभवन्ह्यब्दे ३८८९ विभवे मासि माधवे। शुक्ले तिथौ दशम्यां तु शङ्करार्योदयः स्मृतः इति (जगद्गुरुपरम्परास्तोत्रे)।

वैशाखशुक्लैकादशी—मोहिनी ।

वैशाखशुक्लद्वादशी—अस्यां मधुसूदनपूजनेन सोमलोकप्राप्तिः । वैशाखशुक्लपक्षीयहस्तनक्षत्रयुक्तद्वादश्यां मेषगे सूर्ये सिंहराशिस्थौगुरुभूमिपुत्रौ यदि स्यातां तदा व्यतिपातयोगः । अस्मिन्योगे वस्त्रादिदानेन महत्पुण्यम् ।

वैशाखशुक्लत्रयोदशी—अस्यामारभ्यं कामदेवव्रतम् । सा च पूर्वा ।

वैशाखशुक्लचतुर्दशी—नृसिंहजयन्तीति । सा प्रदोषव्यापिनी ग्राह्या ।

मोहिनीति—(कूर्म्मपुराणे)–वैशाखस्य सितेपक्षे मोहिनी नाम नामतः एकादशीव्रतं तस्यां कुरु सद्वाक्यनोदितः । इति ।

मधुसूदनपूजनेनेति—वैशाखमासे द्वादश्यां पूजयेन्मधुसूदनं। अग्निष्टोममवाप्नोति सोमलोकं च गच्छति। व्यतिपातयोग इति–पञ्चाननस्थौ गुरुभूमिपुत्रौ मेषे रविः स्याद्यदि शुक्लपक्षे । पाशाभिधाना करभेणयुक्ता तिथिर्व्यतीपात इतीहयोगः । अस्मिंस्तु गोभूमिहिरण्यवस्त्रदानेन सर्वं परिहाय पापम् । सुरत्वमिन्द्रत्वममामयत्वं मर्त्याधिपत्यं लभते मनुष्यः । इति ।

कामदेवव्रतमिति—(मदनरत्ने)– शुक्लपक्षे महाराज त्रयोदश्यामुपोषितः । पूजयेत्कामदेवं तु वैशाखात्प्रभृति प्रभो इत्यादि। पूर्वेति—शुक्ला त्रयोदशी पूर्वा परा कृष्णा त्रयोदशी ।

नृसिंहजयन्तीति—(ब्रह्मपुराणे)–शुक्लपक्षे चतुर्दश्याम् मासि माधवसंज्ञके । प्रादुर्भूतो नृपव्याघ्रस्तस्मात्तां समुपोषयेदिति । प्रदोषव्यापिनीति—(नृसिंहपुराणे)–वैशाखे शुक्लपक्षे च चतुर्दश्यां निशामुखे । मज्जन्मसम्भवं पुण्यं व्रतं पापप्रणाशनम् । वर्षे वर्षे तु कर्त्तव्यम् मम संतुष्टिकारणम् । वैशाखशुक्लपक्षस्य चतुर्दश्याम् विवस्वति । अस्तंगामिनि सर्वेषाम् पुरतः स्तम्भमध्यत

समव्याप्तौ परा उभयत्र सत्वोसत्वयोः परैव । असमव्याप्तौ अधिका ग्राह्या । स्वातिनक्षत्रशनिवारादियोगेऽतीव श्रेष्ठा । अस्यामोङ्कारेश्वरयात्रा । कालोत्तरलिङ्गव्रतञ्च ।

वैशाखपौर्णमासी—सा च उपवासादौ परा ग्राह्या । अस्याम् शृतान्नसहितोदकुम्भदानम् कार्य्यम् । कृशरं च भोजयेत् । स्वर्णतिलयुक्तद्वादशोदकुम्भदानम् । कृष्णाजिनदानञ्च

इत्यादि । तथा (टोडरानन्दे)-वैशाखस्य चतुर्दश्याम् सोमवारेऽनिलर्क्षके । अवतारो नृसिंहस्य प्रदोषसमये द्विजा इति । परेति—(व्यासः)-शुक्ला चतुर्दशी ग्राह्या परविद्धा सदा व्रते । यत्तु (कैश्चि-दुक्तम्) पूर्वदिने प्रदोषकाले चतुर्दशीसद्भावे उत्तरदिने प्रदोषकालास्पर्शेऽपि उत्तरविद्धा ग्राह्या । अनङ्गेन समायुक्ता न सोपोष्या चतुर्दशी । धनापत्यैर्वियुज्येत तस्मात्तां परिवर्जयेदिति वचनेन [पू]र्वविद्धानिषेधात्—तन्न-एतद्वचनस्य हेमाद्र्यादिग्रन्थेष्वलिखितत्वेनानाकरत्वादिति रत्नाकरः । अतीवश्रेष्ठेति—स्वातिनक्षत्रसंयोगे शनिवारे महद्व्रतम् । सिद्धियोगस्य संयोगे वणिजे करणे तथा । पुंसां सौभाग्ययोगेन लभ्यते दैवयोगत इति । ओङ्कारेश्वरयात्रेति-(काशीखण्डे)-राधशुक्लचतुर्दश्यामत्रापि येऽत्रयासि-[षुः] । तत्र यात्रां प्रकुर्वन्ति महोत्सवपुरः सरा इत्यादि । लिङ्गव्रतमेति—चतुर्दश्यां शुक्लपक्षे वैशाखस्य प्रयत्नतः । शिवं पूज्य विधानेन महास्नानकपूर्वकमित्यादि ।

परेति—(ब्रह्मवैवर्ते)-भूतविद्धा न कर्तव्या दर्शपूर्णा कदाचन [शृ]तान्नमिति—(जाबालिः)-शृतान्नमुदकुम्भं च वैशाख्यां च वि-[शे]षतः । निर्दिश्य धर्मराजाय गोदानफलमाप्नुयादिति । कृशरमिति—वैशाख्यां विविधस्नानैर्भोजयेद् ब्राह्मणान् दश । कृशरं [स]र्वशर्पणोपभुक्तं नाश्र संशय इति । द्वादशोदकुम्भदानमिति-[भ]विष्ये)-कुम्भान्सवस्त्रजलैः पूर्णान्हिरण्यान्नसमन्वितान् । वैशाख्यां ब्राह्मणेदत्वा न शोचति कृतान्तत इति । कृष्णाजिनदान-

कार्य्यम् । तिलस्नानं, तिलहोमः, तिलपात्रदानं, तिलतैलेन दीपदानं, तिलैः तर्पणं, तिलदक्षिणा च दातव्या । वैशाखस्नानोद्यापनदानानि च कार्य्याणि । अस्यामेव सप्तम्यः पञ्चम्यो वा ब्राह्मणेभ्यः क्षौद्रयुक्तांस्तिलान्दत्वा तैः स्वस्ति वाचयीत । जलस्थं जगदीश्वरमस्यां पूजयेत् । सोमव्रतञ्च कार्य्यम् । रविवारदिने श्यासमाईपूजा ।

मिति—(निर्णयामृते)–वैशाख्यां पौर्णमास्यां तु विशाखासु विशेषतः । यस्तु कृष्णाजिनं दद्यात्सखुरं शृङ्गसंयुतम् । तिलैः प्रच्छाद्यवासोभिः सर्वरत्नैरलङ्कृतम् । स समुद्रगुहातेन सशैलवनकानना । सप्तद्वीपान्विता दत्ता पृथिवी नात्र संशय इति । तिलस्नानमिति—(आदित्यपुराणे)–वैशाख्यां पौर्णमास्यां तु सृष्टाः कमलयोनिना । तिलाः कृष्णाश्च गावश्च तृप्तये सर्वदेहिनाम् । तस्मात्कार्य्यं तिलैः स्नानं तत्राग्नौ जुहुयात्तिलान् । निवेदितव्यं विधिवत्तिलपात्रंतु विष्णवे । तिलतैलेन दीपाश्च देया देवेभ्य एव च । सौदकैश्च तिलैः सार्धं कर्तव्यं पितृतर्पणम् । सतिलैर्मधुभियुक्तं ब्राह्मणेभ्यश्च तर्पणम् । दातव्या दक्षिणाश्चापि तिलैर्मधुयुतैरपि । इति । स्वस्तिवाचयीतेति—(विष्णुधर्मोत्तरे)–वैशाख्यां पौर्णमास्यां तु ब्राह्मणान्सप्तपञ्चवा । क्षौद्रयुक्ततिलैः कृष्णैर्वाचयेद्यदिचेन्नरः । प्रीयतां धर्मराजेति यद्वा मनसिवर्तते । यावज्जीवं कृतात्पापात्तत्क्षणादेव मुच्यते इति । (जाबालिः) सुवर्णतिलयुक्तैस्तु ब्राह्मणान्सप्तपञ्च च । तर्पयेदुदपात्रैस्तु ब्रह्महत्यांव्यपोहति । जलस्थमिति—(विष्णुधर्मोत्तरे)–वैशाखे पौर्णमास्यां वै जलस्थं जगदीश्वरम् । पूजयेद्वैष्णवो भक्त्या कृत्योत्साहं मुदान्वित इत्यादि । सोमव्रतमिति—(भविष्यपुराणे)–प्राच्यांसमुद्गते सोमे-मतीच्यां गते रवौ । पौर्णमास्यां तु वैशाख्यां गृह्यपार्श्वशिवाग्रतः प्रीयतां मे महादेवः सोममूर्तिर्जगत्पतिरित्यादि ।

इति वैशाखकृत्यनिर्णयः

॥ अथ ज्येष्ठकृत्यनिर्णयः ॥

अस्मिन्मासे जलरथहरिमर्चनेन तापनिवृत्तिः । पिष्टेन पद्ममूर्तिं विधाय तत्पूजनेन सूर्य्यलोकप्राप्तिः । जलधेन्वादिदानं त्रिविक्रमप्रीतिः । मासपर्य्यन्तमेकभक्तव्रतङ्कार्य्यम् । श्रीप्राप्तिव्रतं कार्य्यम् ।

ज्येष्ठकृष्णाष्टमी—अस्यां त्रिलोचनपूजा कार्य्या ।

ज्येष्ठकृष्णैकादशी—अपरा ।

तापनिवृत्तिरिति—(वामनपुराणे)-तस्माज्ज्येष्ठे सदा भूप तोयस्थंयोऽर्चयेद्धरिम् । धीततापो नरस्तिष्ठेद्यावदाभूतसंप्लवम् । इति । सूर्य्यलोकप्राप्तिरिति—(भविष्योत्तरे)-पिष्टेन पङ्कजं कृत्वा ज्येष्ठे मासि स वेदकम् । पुष्पैः सम्पूज्य गन्धाद्यैर्नानावस्त्रविभूषणैः । वर्षकोटियुगं साग्रं सूर्य्यलोके महीयत इति । त्रिविक्रमप्राप्तिरिति—(वामनपुराणे)-उदकुम्भाम्बुधेनुश्च तालवृन्तं च चन्दनम् । त्रिविक्रमस्य प्रीत्यर्थं दातव्यं ज्येष्ठमासे चेति । एकभक्तव्रतमिति—(महाभारते)-ज्येष्ठमूलान्तु वै मासमेकभक्तेन यः क्षिपेत् । ऐश्वर्य्यमतुलं श्रेष्ठं प्राप्नुयात् स न संशय इति । (पुमान् स्त्री वाभिजायत इति हेमाद्रौ पाठः) तथा च (विष्णुधर्मे)-कृष्णार्पितमना ज्येष्ठमेकभक्तेन यः क्षिपेत् । अहिंस्रः सर्वभूतेषु वासुदेवपरायणः । नमोस्तु वासुदेवायेत्यहरचाष्टशतं जपेत् । अतिरात्रस्य यज्ञस्य समग्रं फलमाप्नुयात् । इति । श्रीप्राप्तिव्रतमिति-(विष्णुधर्मोत्तरे)-वैशाख्यां समतीतायां प्रतिपत्प्रभृतिक्रमात् । पूर्वस्पूजयेद्देवं श्रीसहायं दिने दिने । इत्यादि ।

त्रिलोचनपूजेति-(भविष्योत्तरे)-ज्येष्ठमासि द्विजश्रेष्ठ कृष्णाष्टम्यां त्रिलोचनम् । यः पूजयति देवेशमीशलोकं व्रजेन्नरः ॥

अपरेति—(ब्रह्माण्डपुराणे)-अपरां समुपोष्यैव पूजयित्वा त्रिविक्रमम् । सर्वपापविनिर्मुक्तो विष्णुलोकं व्रजेन्नरः । इति ।

ज्येष्ठकृष्णत्रयोदशी—अस्याम् वटसावित्रीव्रतारम्भः। अत्र अमावास्यानुरोधेन यथा त्रिरात्रिसंपत्तिर्भवति तथा ग्राह्या।

ज्येष्ठकृष्णामावास्या—अस्याम् सावित्रीव्रतङ्कार्य्यम्। सा तु

व्रतारम्भ इति—(स्कान्दे)—ज्येष्ठेमासि सितेपक्षे द्वादश्यां रजनीमुखे। व्रतं त्रिरात्रमुद्दिश्य पौर्णमास्यान्ते उपसंहृतमिति। अशक्तौ तु त्रयोदश्यां नक्तं कुर्य्याज्जितेन्द्रियः। अयाचितं चतुर्दश्याममायां समुपोषणमिति।

सावित्रीव्रतमिति—(भविष्ये)—अमायां च तथा ज्येष्ठे वटमूले महासती। त्रिरात्रोपोषिता नारी विधिनानेन पूजयेत् इति। तथा च (पराशरः) मेषे वा वृषभे वापि सावित्रीं तां विनिर्दिशेत्। ज्येष्ठकृष्णचतुर्दश्यां सावित्रीमर्चयन्ति याः। वटमूले सोपवासा न ता वैधव्यमाप्नुयुरिति। पूर्वविद्धेति। भूतविद्धा न कर्तव्या अमावास्या च पूर्णिमा। वर्जयित्वा नरश्रेष्ठ सावित्री व्रतमुत्तमम्। (माधव इति) पूर्वविद्धैव सावित्रीव्रते पञ्चदशी तिथिः। नाड्योऽष्टादशभूतस्य स्युश्चेत् परेऽहनि। व्रतान्तराणि सर्वाणि परेऽहन्येव सर्वदा इति। (वीरसर्वस्वे) चतुर्दशीयुता ग्राह्या सावित्रीव्रतके तिथिः। यद्यष्टादशनाडीभ्योऽधिका सा स्याद् विशेषतः। भूताष्टादशनाडी-

सावित्रीव्रततिथिविचारः

माधवग्रन्थस्तु यथाश्रुतः परस्परव्याघातादबोधक एव। तथाहि। यदा तु चतुर्दश्यष्टादशनाडिका भवति तदा सावित्रीव्रतमपि तत्र परित्याज्यं। भूतो ष्टादशनाडीभिर्दूषयत्युत्तरां तिथिम् इति स्मृतेरिति माधवीयग्रन्थादष्टादशनाडी चतुर्दशीसत्त्वे सावित्रीव्रतमप्युत्तरविद्धायां कर्त्तव्यमिति प्रतीयते तत्स्वीकारे सावित्रीव्रतं पूर्वविद्धायां व्रतान्तरमुत्तरविद्धायामिति व्यवस्थाप्रतिपादकपूर्वग्रन्थ उत्तरग्रन्थश्च असंगतः स्यात् एतत्स्वीकारे मध्यमग्रन्थोऽसंगतः। एवं व्याघातादबोधकत्वमाशंक्य तत्परिहाराय ग्रन्थस्य यथाश्रुतार्थपरत्वमन्यस्य यथा कथंचित् तत्सिद्धान्तकारिकाकल्पनेन। तत्र निराकाङ्क्षायां व्यवस्थायामनेकवाक्यानुपपत्तिदोषनिरस्तमसमये भूयसां स्यात् सधर्मत्वमिति न्यायाद् व्यवस्था ग्रन्थ एव यथाश्रुतार्थक इति निश्चयमिदं यदा तु चतुर्दश्यष्टादशनाडिका भवति तदा सावित्रीव्रतमपि तत्र त्याज्यमेतन्मे किमुत व्रतान्तरमिति शेषपूरणेन कैमुतिकन्यायेन सावित्रीव्रतभिन्नव्रतविषयत्वेनैव योज्यः

पूर्वविद्धा ग्राह्या । अष्टादशघटिका यदा चतुर्दशी तदा परेति माधवः । कुर्वन्ति चैतत् पूर्णिमायां दाक्षिणात्याः ।

ज्येष्ठशुक्लप्रतिपद्——अस्याम् करवीरव्रतम् । अपराह्णव्यापिनी

भिद् पयत्युक्तरां तिथिमिति पूर्णिमायामिति——ज्येष्ठे मासि सिते पक्षे पूर्णिमायां तथा व्रतम् । घोषपुरा महाभक्त्या कथितं तन्मया द्विज । यथा अमायां तथा पूर्णिमायामपि ॥

करवीरव्रतमिति——(भविष्योत्तरे) ज्येष्ठे मासि सिते पक्षे प्रथमेऽह्नि दिनोदये । देवोद्यानभवं हृद्यम् करवीरम् समर्चयेत्

एवं सति सर्ववचनैः सर्वनिबन्धैश्च माधवस्यैक वाक्यता भवतीत्यत्रैवार्थे माधव तात्पर्यमिति बोध्यम् । पूर्वविद्धैव ...... परेऽहनि । इति माधवसंग्रहवाक्येऽपि भूतस्याष्टादश नाड्यश्चेत्स्युस्तथापि परेऽहनि —सावित्रीव्रतेऽङ्गतया विहित इष्टे पूर्वेऽह नीत्यर्थः । परशब्दस्येष्टपरत्वस्यापि विप्रतिषेधे परमितिसूत्रे महाभाष्य उक्तत्वात् । ननु वृद्धतपा तथा रम्भा सावित्री वट पैत्रिकी । कृष्णाष्टमी च भूताच कर्तव्या संमुखी तिथिरित्यादि स्कान्दादीनामुत्सर्गत्वकल्पनया भूतो ऽष्टादशनाडीभिरित्यस्यापवाद कल्पनया माधवग्रन्थस्य बोधकत्वं मुपपन्नमेव । अतएव पूर्वविद्धयोः पञ्चदश्या स्तत्र[illegible] सावित्रीव्रतं नेत्रमुहूर्तचतुर्दशीविद्धयोर्न कर्तव्यं भूतोऽष्टादश नाडीभिरिति वचनात् इति माधव इति, कालतत्त्वविवेचनादिनवीनग्रन्थाः, संगच्छन्त इति चेन्न । स्कान्दादीनां प्रतिपदवाक्यत्वेन भूतोऽष्टादशेत्यस्य सामान्यवाक्यतया [illegible] माधवेन [illegible] । न च प्रतिपदवाक्यानां माधवे नानुपन्यासाच्चानुपपत्तिरिति शंक्यम् । सावित्री [illegible]युत्तरविद्धायां स्वीकारे प्रच [illegible] विरोधे सति या [illegible] [illegible] न [illegible] प्रतिपदत्वमाचार्यस्येति [illegible] सावित्रीव्रतादिविषयमिति ग्रन्थस्य [illegible] । [illegible] हेमाद्रिमाधवादीनां [illegible] सावित्री व्रते पूर्वविद्धा [illegible] निर्णयः सिद्धः । [illegible] तिथि [illegible] [illegible] पूर्वविद्धा निषिद्धा [illegible] । इति पूर्वविद्धा [illegible] सावित्रीव्रत[illegible] । [illegible] माधव[illegible] । माधवना[illegible] [illegible] पूर्वविद्धा[illegible] [illegible] सावित्रीव्रते [illegible] [illegible] माधवमत[illegible]निर्णय [illegible] दिक् ।

॥ इति सावित्रीव्रतविचारः ॥

पूर्वा । तदभावे सायाह्नव्यापिनी ।

ज्येष्ठशुक्लद्वितीया—इयं सोपपदा । अत्रापि वेदाध्ययननिषेधः । एषा कल्कीजयन्ती ।

ज्येष्ठशुक्लतृतीया—अस्यां रम्भाव्रतम् । पतिपुत्रफलार्थिनी नारी सूर्योदये स्नात्वा सती व्रतनियमं गृहीत्वा चतसृषु दिक्षु कुण्डेषु स्थण्डिलेषु वाग्नीन्संस्थाप्य पञ्चमो भास्कर इति पञ्चाग्निमध्ये वेदिकायां रम्भास्तम्भोपशोभितां पुष्पमण्डपिकां कृत्वा तत्र सर्वशक्तिमयीं देवीमावाह्य तस्याः सम्मुखीं पूर्वाभिमुखी वोपविश्य सर्वोपचारैर्देवीं नमोन्तैर्नाममन्त्रैः सम्पूज्य सूर्यास्तमयपर्यन्तम् तिष्ठेत् । ब्राह्मणाश्च प्रणवादिभिर्नमोन्तमन्त्रैः सौभाग्यद्रव्याणि

इत्यादि । स्नानारम्भ इति—(काशीखण्डे)–ज्येष्ठे मासि सिते पक्षे प्राप्य प्रतिपदम् तिथिम । दशाश्वमेधिके स्नात्वा मुच्यते सर्वपातकैः । एवं सर्वासु तिथिषु क्रमस्नायी नरोत्तमः । आशुक्लपक्षदशमीं प्रतिजन्मांघमुत्सृजेदिति । अपराह्नव्यापिनीति–(स्कान्दे) प्रतिपत्सम्मुखी कार्य्या या भवेदपराह्निकी । तदभावे तु सायाह्नव्यापिनी परिगृह्यतामिति ।

सोपपदेति—सिताज्येष्ठद्वितीया च आश्विने दशमी सिता । चतुर्थी द्वादशी माघे एताः सोपपदाः स्मृताः इति । कल्की जयन्तीति—ज्येष्ठशुक्लद्वितीयायाम् योद्धः कल्की भविष्यति । नभस्ये च द्वितीयायाम् बलभद्रोऽभवत्तदेति ।

रम्भाव्रतमिति—(भविष्ये)–भद्रे कुरुष्व यत्नेन रम्भाख्यं व्रतमुत्तमम् । ज्येष्ठशुक्लतृतीयायाम् स्नाता नियममत्परेत्यादि । पूर्वविद्धेति–बृहत्तपा तथा रम्भा तृतीया वटपैत्रिकी । कृष्णाष्टमी च भूता च कर्तव्या सम्मुखी तिथिः । तथा च (ब्रह्मवैवर्ते) रम्भाख्यां वर्जयित्वा तु तृतीयायाम् द्विजसत्तम । अन्येषु सर्वकार्येषु गणयुक्ता प्रशस्यते ।

तेष्वग्निषु जुहुयुः । ततो द्विजदाम्पत्यं चतुर्थ्यां भोजयित्वा यथाशक्त्याचार्याय गृहदानादिकं दद्यादिति (निर्णयामृते)। सा सर्वमते पूर्वविद्धा ग्राह्या ।

ज्येष्ठशुक्लचतुर्थी—उमाजयन्ती एतस्यां पार्वतीपूजा कार्या।

ज्येष्ठशुक्लाष्टमी—अस्यां शुक्लादेवी पूज्या ।

ज्येष्ठशुक्लनवमी—अस्यां ब्राह्मणीनाम्नीमुमां सम्पूज्य ब्राह्मणीः कुमारीश्च भोजयेत् ।

ज्येष्ठशुक्लदशमी—अस्यां गङ्गावतारः । इयं दशहरा । अस्यां गङ्गाजलेस्थितो दशवारान्स्कन्दपुराणोक्त दशहरास्तोत्रपाठपूर्वकम् स्नात्वा दानादिकं कार्य्यम् । गङ्गाया अलाभे अन्यस्यामपि सरिति स्नानं कार्य्यम् । एषा कतिपययोगवती पूर्वाग्रह्या-

पार्वतीपूजेति—(ब्रह्मपुराणे)—ज्येष्ठशुक्लचतुर्थ्यां तु जाता पूर्वमुमा सती । तस्मात्सा तत्र सम्पूज्या स्त्रीभिः सौभाग्यवृद्धये । उपचारैश्च विविधैर्गीतनृत्योत्सवादिभिः । होमैः पयोभिर्वस्त्रैश्च धूपपुष्पसुगन्धिभिरिति ।

शुक्लादेवीति—(ब्रह्मपुराणे)—शुक्लाष्टम्याम् पुराजाता शुक्ला देवी महाद्युतिः । यथापदानवेन्द्राणां शुक्लपक्षे ततो यजेदिति ।

उमां सम्पूज्येति—(भविष्योत्तरे)—उपवासपरो भक्त्या नवम्याम् पूजयेदुमाम् । ब्राह्मणीत्यपि यै नाम्नी व्यक्तरूपेण रूपिणीम् । ज्येष्ठमासि नृपश्रेष्ठ कृत्वा नक्तस्य वै विधिम् । पायसं पयसोपेतं स्वयं भुञ्जीत वाग्यतः । कुमारी भोजयेच्चापि यथाशक्त्या ब्राह्मणींस्तथा ।

गङ्गावतार इति—(वाराहे)—दशमी शुक्लपक्षे तु ज्येष्ठे मासि कुजेऽहनि । अवतीर्णा यतः स्वर्गाद्धस्तर्क्षे च सरिद्वरा । हरते दश पापानि तस्माद्दशहरा स्मृता । तस्याम् स्नानं प्रकुर्वीत दानं च विशेषत इति । दशहरेति—(स्कन्दपुराणे)—ज्येष्ठस्य शुक्ल-

दशमी संवत्सरमुखी स्मृता। तस्यां स्नानं प्रकुर्वीत दानञ्चैव विशेषतः। यां कांचित्सरितं प्राप्य दद्याद्दर्भतिलोदकम्। मुच्यते दशभिः पापैः स महापातकोपमैः। दशमीज्यैष्ठशुक्लस्य संवत्सरमुखी स्मृता। हरते दशपापानि तस्माद्दशहरा स्मृता। (भविष्यपुराणे)–ज्यैष्ठशुक्लदशम्याञ्च भवेद्भौमदिनो यदि। ज्ञेया हस्तर्क्षसंयुक्ता सर्वपापहरा तिथिः। (स्कन्दपुराणे)–दशहरायां दशयोगा उक्ताः। यथा—ज्यैष्ठे मासि१ सिते पक्षे२ दशम्याम्३ बुधहस्तयोः४।५ व्यतीपातते६ गरानन्दे८ कन्याचन्द्रे९ वृषे रवौ१०। इति (अत्र वाराहपुराणे कुजवारयोगउक्तः। स्कन्दपुराणे बुधवार योग इति विरोधः स च कल्पव्यवस्थया परिहरणीयः) यथा अवतीर्णा सरिद्वरेति—अस्यां दशम्याम् गङ्गावतारतिथित्वात्कस्मिंश्चित्कल्पे भौमवारयुक्तायामवतीर्णा—कस्मिंश्चत्कल्पे बुधवारयुक्तायामित्यविरोधः। स्तोत्रपाठपूर्वकमिति—(स्कन्दपुराणे)–तस्यान्दशम्यामेतच्च स्तोत्रं गङ्गाजले स्थितः। यः पठेद्दशकृत्वस्तु दरिद्रो वापि चाक्षमः। सोऽपि तत्फलमाप्नोति गङ्गां सम्पूज्य यत्नत इति। अन्यस्यामपीति—यां कांश्चित्सरितम्······महापातकोपमैरिति। कतिपययोगवतीति—क्वचिद्वचने केवला दशमी क्वचित् हस्तर्क्षसंयुता क्वचित् हस्तर्क्षभौमवारयुक्ता। तत्रतत्रोत्तरं फलभूयस्त्वम्मन्तव्यम्। केवलाशदमीस्वल्पफला–हस्तर्क्षयुक्ता तदधिकफला। भौमवारहस्तर्क्षयुक्ता महाफलेति। कमलाकरः इति)—योगबाहुल्यादिति निर्णयसिन्धौ। पाठादेव दशत्वे सिद्धे पुनर्दशयोग इति कीर्तनं कीर्तितानाम् दशानामेव पुण्यकालत्वज्ञापनार्थम्। यत्कैश्चिदुक्तम्। दिनद्वये कतिपययोगसत्वे यत्रैव योगभूयस्त्वं तत्रैव स्नानादिकार्य्यं तच्चिन्त्यं। दशमीव्यतीपातयोर्योगान्तरनिरपेक्षयोः पुण्यकालत्वलाभेऽपि बुधवारनन्दादीनां योगान्तरनिरपेक्षाणाम् पुण्यकालत्वे मानाभावात्। अतो दिनद्वये कतिपययोगवतीदशमी सत्वे गङ्गापूजनादौ देवकर्मणि पूर्वाह्णस्य पुण्यकालत्वात्तद्व्यापिनी दशमी ग्राह्येति कौस्तुभकारः। दर्शन-

पिनी माया । (दिनद्वये पूर्वाहव्यापिनी चेत् गंगावाहुल्यवती माया) इयं न मञ्चैव गंगावाहुल्यं सैव प्राप्नोति कमलाकरः । यस्यां दशाश्वमेधदर्शनं कार्य्यम् । ज्येष्ठशुक्लदशमीदिने श्रीभगवतारामेण सेतुबन्धरामेश्वरप्रतिष्ठा कृता अतोऽस्यां विशेषेण पूजा कार्य्या ।

ज्येष्ठशुक्लैकादशी—एषा निर्जला—यस्यां निर्जलोपोषणेन द्वादशैकादशीफलं । उपोष्य विप्रेभ्यः सशर्करान् जलकुम्भान्दद्यात् । जलधेनुदानम् घृतधेनुदानम् । राघवद्वादशीव्रतम् ।

ज्येष्ठशुक्लद्वादशी—अस्याम् त्रिविक्रमपूजनम् ।

मिति—(काशीखण्डे)–लिङ्गं दशाश्वमेधेशं दृष्ट्वा दशहरा तिथौ । दशजन्मार्जितैः पापैस्त्यज्यते नात्र संशयः । इति निशाजागरणादेकं यत्तत्र विहितं तत्कृत्यप्रकरणे लेखिष्यामः । रामेश्वरप्रतिष्ठेति—(स्कान्दे)–ज्यैष्ठे मासि सिते पक्षे दशम्यां बुधहस्तयोः । गरानन्दे व्यतीपाते कन्याचन्द्रे वृषे रवौ । दशयोगे सेतुमध्ये लिङ्गरूपधरं हरम् । रामो वै स्थापयामास शिवलिङ्गमनुत्तममिति ।
द्वादशैकादशीफलमिति—(ब्रह्मवैवर्ते)–उदयादुदयं यावद्वर्जयित्वोदकं ततः । अयत्नात्समवाप्नोति द्वादश द्वादशीफलमिति । जलकुम्भानिति—ज्येष्ठे मासि नृपश्रेष्ठ या शुक्लैकादशी शुभा । निर्जलं समुपोष्यात्र जलकुम्भान् सशर्करान् । प्रदाय विप्रमुख्येभ्यो मोदते विष्णुसन्निधौ इति । जलधेनुदानमिति—(हैमाद्रौ)–जलधेनुं प्रवक्ष्यामीत्यादि । घृतधेनुदानमिति—तिलाभावे तथा याद्द घृतधेनुं यतव्रत इत्यादि । राघवद्वादशीति—ज्येष्ठे मासेऽप्येवमेव संकल्पविधिना नरः । अर्चयेत्परमं देवं पुष्पैर्नानाविधैरित्यादि ।
त्रिविक्रमपूजनमिति—(महाभारते)–अहोरात्रेण द्वादश्याम् ज्येष्ठे मासि त्रिविक्रमम् । गवामयनमाप्नोति अप्सरोभिश्च

ज्येष्ठशुक्लत्रयोदशी—यस्यां दुर्गन्धिदौर्भाग्यनाशनव्रतम् ।

ज्येष्ठशुक्लचतुर्दशी—अस्याम् सर्वस्मिन्दिने पञ्चतपाः सायं शिवप्रीतये हेमधेनुम् दद्यात् ।

ज्येष्ठशुक्लपूर्णिमा—दाक्षिणात्यानाम् सावित्री व्रतम् । अब्द साध्यं सावित्रीव्रतम् । त्रिरात्रिव्रतम् । तिलदानं छत्रोपानहादि दानञ्च । अस्यामारभ्यं पुत्रकाव्रतम् । इयमेव योगविशेषेण महा-ज्यैष्ठी इयं मन्वादिः ।

मोदतइत्यादि ।

दुर्गन्धिदौर्भाग्यनाशनमिति—(भविष्योत्तरे)—ज्येष्ठे मासि सिते पक्षे त्रयोदश्यां युधिष्ठिर । गत्वा पुण्यनदीतोये पूजयेच्छुभ-देशजम् (श्वेतार्क करवीरं नीम्बमिति शेषः) ।

हेमधेनुमिति—(मात्स्ये)—ज्येष्ठे पञ्चतपाः सायं हेमधेनुप्रदो-दिवम् । याति शुक्लचतुर्दश्याम् रुद्रव्रतमिदं स्मृतमिति ।

सावित्रीव्रतमिति—ज्येष्ठमासे तु संप्राप्ते पौर्णमास्यां पति-व्रता । स्नात्वा चैव शुचिर्भूत्वा वटं सिञ्च्य वहूदकैरित्यादि। विल्वरात्रिव्रतमिति—(स्कान्दे)—ज्येष्ठे मासे तु संप्राप्ते पौर्णमा-स्यां द्विजोत्तम । ज्येष्ठाकुजदिने कुर्य्यात्सिद्धार्थैः स्नानमुत्तमम् । श्रीवृक्षं चिन्तयेत्पश्चाद्गन्धपुष्पैश्च पूजयेत् । वत्सरं त्वेकभक्तं तु हविष्यान्नेन कारयेदिति । तिलदानमिति—(आदित्यपुराणे)—ज्येष्ठे मासि तिलान्दद्यात्पौर्णमास्यां विशेषतः । अश्वमेधस्य यत् पुण्यम् तत्प्राप्नोति न संशयः इति । तथा च (विष्णुः) ज्येष्ठी ज्येष्ठायुता चेत्तस्यां छत्रोपानत्प्रदानेन नरोनराधिपत्वमाप्नोति इति । पुत्रकाव्रतमिति—(पद्मपुराणे)—ज्येष्ठे मासि सिते पक्षे पू-र्णिमायाम् धृतव्रतः ।स्थापयेदव्रणं कुम्भं सिततण्डुलपूरितमित्या-दि। महाज्यैष्ठीति—अस्या विचारोमहावैशाख्यादिविचारे लिखितः।

इति ज्येष्ठकृत्यनिर्णयः

॥ अथ आषाढकृत्यनिर्णयः ॥

अस्मिन्मासे एकभक्तकृते धनधान्याद्यवाप्तिः । अत्र विश्वरूपधरं हरिं पूजयेत् । वामनप्रीत्यै उपानत् छत्रलवणामलकानि देयानि ।

आषाढकृष्णैकादशी—एषा योगिनीनाम्नाप्रसिद्धा । अस्याञ्च पुण्डरीकाक्षनामविष्णुपूजनम् ।

आषाढशुक्लद्वितीया—अस्यां रामरथोत्सवः । सा च पुष्ययुता केवला वा ग्राह्या ।

आषाढशुक्लषष्ठी—एषा स्कन्दषष्ठी पञ्चमीयुता ग्राह्या । अत्र पञ्चम्यामुपोष्य षष्ठ्यां स्कन्दं पूजयेत् ।

एकभक्तइति—(महाभारते)-आषाढमेकभक्तेन स्थित्वा मासमतन्द्रितः । बहुधान्यो बहुधनी बहुपुत्रश्च जायतइति। हरिं पूजयेदिति—(विष्णुधर्मोत्तरे)-ज्यैष्ठ्यां तु समतीतायाम् प्रतिपत्प्रभृतिक्रमात् । पूर्ववत्पूजयेद्देवं विश्वरूपधरं हरिमिति । वामनप्रीत्यै इति—(वामनपुराणे)-उपानद्युगलं छत्रं लवणामलकानि च । आषाढे वामनप्रीत्यै दातव्यानि तु भक्तितइति । योगिनीति—आषाढस्यासिते पक्षे योगिनीनाम नामतः । एकादशीनृपश्रेष्ठ महापातकनाशिनीत्यादि । रामरथोत्सवइति—(स्कान्दे)-आषाढसितपक्षे द्वितीया पुष्यसंयुता । तस्यां रथे समारोप्य रामं वै भद्रया सह । यात्रोत्सवं प्रवर्त्यांथ प्रीणयेच्च द्विजान्बहूनिति । केवलेति—(निर्णयामृते)-ऋक्षाभावे तिथौ कार्या यात्रासौ मम पुण्यदा इति ।

स्कन्दषष्ठीति—(वराहपुराणे)-आषाढे शुक्लषष्ठी तु तिथि कौमारिकी स्मृता । कुमारमर्पयेत्तत्र पूर्वयोगोप्य वै दिनइति । पञ्चमीयुतेति—(स्कन्दपुराणे)-कृष्णाष्टमी स्कन्दषष्ठी शिवरात्रिश्चतुर्दशी । एताः पूर्वयुताः कार्यास्तिथ्यन्ते पारणं भवेदिति ।

आषाढशुक्लसप्तमी—अस्यां विवस्वान्नाम सूर्यो जातः तं वर्तुलमण्डलस्थितं धूपदीपादिभिः सम्पूज्य नैवेद्यम् दद्यात् एषा षष्ठीयुता ग्राह्या ।

आषाढशुक्लाष्टमी—अस्यामुपोष्य हरिद्रातोयेन स्नात्वा महि पत्नीनाम्नीं देवीं हरिद्रातोयेन स्नापयित्वा पूजयेत । अत्र देवीपु रात्रे दीपमालाविधानात्प्रदोषव्यापिनी ग्राह्या ।

आषाढकृष्णशुक्लनवम्योरैन्द्रीपूजा एषा भाडलीनवमी मरुदेशे प्रसिद्धा ।

आषाढशुक्लदशमी—इयं मन्वादिः ।

आषाढशुक्लैकादशी—एषा देवशयनी अस्यां हेमादिनिर्मित भगवत्प्रतिमां शेषपर्यङ्के सुप्तां कृत्वा रात्रौ जागरणाद्युत्सवं कुर्यात स्मार्तैर्वैष्णवैश्च स्वस्वैकादशीदिने द्वादशीदिने वा शयनं कारयित

विवस्वानिति—(ब्रह्मपुराणे)-आषाढशुक्लसप्तम्यां विवस्वा नामभास्करः । जातः पूर्वं तु तस्मात्तं तत्रोपोष्य जपेत्सदेति षष्ठीयुतेति—(मदनरत्ने)-षष्ठ्यायुता चेत्सप्तमी कर्तव्या तात सर्वदा । षष्ठी च सप्तमी चैव यत्र सन्निहितोहरिरिति ।

हरिद्रातोयेनेति—(निर्णयामृते)-अष्टम्यां च तथाषाढे निशा तोयेन स्नापयेत् । स्वयंस्नात्वा च कर्पूरैश्चन्दनैस्तां विलेपयेदिति

ऐन्द्रीपूजेति—(भविष्योत्तरे)-उपवासपरोभक्त्या नवम्यां पक्षयोर्द्वयोः । आषाढे मासि राजेन्द्र प्रकुर्यान्नक्तभोजनम् । पूज येच्छ्रद्धया दुर्गामैन्द्रीं नाम्नीं तु नामतः । ऐरावतगतां शुभ्रां श्वेत रूपेणरूपिणीम् । स ऐरावतमारुह्य इन्द्रस्यानुचरोभवेदिति ।

देवशयनीति—एकादश्यां तु शुक्लायामाषाढे भगवान्हरिः । भुजङ्गशयने शेते क्षीरार्णवजले सदा । तथा (पुराणसमुच्चये) आ- षाढस्य सिते पक्षे एकादश्यामुपोषितः । स्वापयेत्प्रतिमां विष्णोः

ष्यम् । आषाढशुक्लद्वादश्यां मंत्रांगसहितां पारणां कुर्व्वीत । पारणान्ते मंत्रस्य प्रभवार्थं त्यजेत् । (मंत्रोऽनुगणः) इदं मलमासे न कार्य्यम । अन्यार्थैकादश्यां कर्कटसंक्रान्तौ पूर्णिमायां वा चातुर्मास्यव्रतारम्भं कुर्य्यात् । समाप्तिश्च कार्तिकशुक्लद्वादश्याम् । आद्यारम्भो अस्तादावाशौचादौ च न कार्य्यम । द्वितीयारम्भे तु न दोषः । (रामार्च्चनचन्द्रिकायाम) अत्रैव तप्तमुद्राधारणं लिखितं । तच्च विपाशाश्वलायनादिवचनादृग्वेदादिश्रुतीनां तु धर्म्मादिस्तुतिपरत्वात् अन्यश्रुतीनां च तथाविधानुपालम्भादुदाहृतपाद्मवचनस्य चाकरग्रन्थेषु अनुपलम्भाच्चक्रादिधारणं शूद्रविषयकमिति (निर्णयसिन्धुकारः) । चातुर्मास्यव्रते शाकं दधिपयोद्विदलं श्रावणादिमासेषु क्रमेण सन्त्यजेत् । अस्यामेव विभूतिद्वादशीव्रतम् । वासुदेवद्वादशीव्रतम् ।

शङ्खचक्रगदाधरमित्यादि । (टोडरानन्देऽपि) आषाढशुक्लैकादश्यां कुर्य्यात्स्वापमहोत्सवम् । द्वादशीदिने इति—आभाकाद्येषु मासेषु मिथुने माधवस्य च । द्वादश्यां शुक्लपक्षे च प्रस्वापावर्तनोत्सवाः इति । (रामार्चनचन्द्रिकायाम्) आषाढशुक्लद्वादश्याम् क्षीराब्धिशयनोत्सवः । कार्य्योऽन्यथात्वनावृष्टिर्भवेत्पौराणवाक्यत इति । (द्वादश्यामित्यत्र पारणाहोमात्रं विवक्षितम् । पारणाहे पूर्वरात्रे घण्टादीन्वादयेन्मुहुरिति तत्रैवोक्तेः) तथा (नृसिंहचर्य्यायाम्) यद्यपि–आषाढस्य सिते पक्षे एकादश्यामुपोषितः··· नियमं व्रती । कार्तिके शुक्लपक्षस्य एकादश्यां समाहित इत्यादिवचनैरेकादश्यामेवानुष्ठेयता गम्यते । तथापि–इयं द्वादशी देवेति प्राप्तेस्तवेयं द्वादशी कौमुद्यारभ्येति मन्त्रलिङ्गानुगृहीतत्वात् द्वादश्यामप्यनुष्ठेयता निर्धार्य्यत इत्युक्तम् । यच्च ब्रह्मपुराणादावेकादश्यामुत्थापयेदित्युक्तं तच्च एकादशीद्वादश्योरभेदापेक्षया उपवासाद्यभिप्रा-

णेति दिक् । अत्रैकादशीद्वादश्योर्देशभेदेन व्यवस्थेति (कमलाकरः)। पुष्करपुराणे तु—यस्य यस्य तु देवस्य यन्नक्षत्रं तिथिश्च या। तस्य तस्य तु देवस्य तस्मिंस्तु शयनावर्तकमिति । यद्वाद्रयां शयनादिकमुक्तं तन्मिथुनार्कएवेति (रत्नाकरदीक्षितः)। मिथुनस्थोयदाभानुरमावास्याद्वयं स्पृशेत्। द्विराषाढः सविज्ञेयः विष्णुः स्वपिति कर्कटे। इति (हेमाद्रिः) तच्च मलमासाभिप्रायेणेति—(वैष्णवदासः)।मैत्रयोगरहितायामिति—आभाकासितपक्षेषु मैत्रश्रवणरैवती।संगवे नहि भोक्तव्यं द्वादशद्वादशीहरेदितिवचनेन संगवाख्ये पारणनिषेधात्संगवोत्तरसप्तममुहूर्तादौ संगवात्प्राचीनतृतीयमुहूर्ते वा पारणं कार्य्यमिति । प्रथमपादमिति—(विष्णुधर्मे) मैत्राद्यपादे स्वपितीह विष्णुः श्रुतेश्च मध्ये परिवर्तमेति । पौष्णावसाने च सुरारिहन्ता प्रबुध्यते मासचतुष्टयेनेति । न कार्य्यम्। (कालादर्शे) अवरोहश्च हैमन्तः सर्पाणां बलिरष्टकाः। ईशानस्य बलिर्विष्णोः शयनं परिवर्तनम्। एतानि मलमासे वर्जयेत्। चातुर्मास्यव्रतमिति—आषाढस्य सितेपक्षे एकादश्यामुपोषितः। चातुर्मास्यव्रतं कुर्य्याद्यत्किञ्चिन्नियतोनरः। पूर्णिमायामिति—(निर्णयामृते) (सनत्कुमारः)—एकादश्यां तु गृण्हीयात्संक्रान्तौ कर्कटस्य वा। आषाढ्यां वा नरोभक्त्या चातुर्मास्योदितं व्रतमिति । समाप्तिश्चेति (भारते) चतुर्धा गृह्य वै चीर्णं चातुर्मास्यव्रतं नरः । कार्तिकशुक्लपक्षे तु द्वादश्यां तत्समापयेदिति । द्वितीयारम्भ इति—न शैशवं न मौढ्यञ्च शुक्रगुर्वोर्नवा तिथेः। खण्डत्वं चिन्तयेदादौ चातुर्मास्य विधौ नरः । इति (हेमाद्रौ) निषिद्धस्यास्तादेः सामान्यतः प्रतिप्रसवे गौरवाद् द्वितीयारम्भपरस्वम्। अशौचमध्येऽपि द्वितीयारम्भे न दोषः। (स्कान्दे) अशुचिर्वा शुचिर्वापि यदि स्त्री यदि वा पुमान्।—व्रतमेतन्नरः कृत्वा मुच्यते सर्वपातकैरिति । तथा च (विष्णुः) आरम्भे सूतकं न स्यादनारम्भे तु सूतकमिति । सन्त्यजेदिति—(भविष्ये) श्रावणे वर्जयेच्छाकं दधिभाद्रपदे तथा। दुग्धमाश्वयुजे मासि कार्तिके

आषाढशुक्लचतुर्दशी—अस्यां शिवपूजनेन सर्वसंपत्प्राप्तिः अत्र चतुर्दशीपूर्वविद्धा ग्राह्या ।

आषाढपूर्णिमा—चतुर्दश्यामुपोष्यास्यां हरिपूजा कार्या । अस्यां पूर्वाषाढनक्षत्रयुक्तायामन्नपानादिकं दद्यात् । एतस्यामेवाम्र कोकिलाव्रतम् । अस्य नक्तव्रतत्वात्सायान्हव्यापिनी ग्राह्येति (कमलाकरः) । यस्मिन्वर्षेऽधिकाषाढस्तस्मिन्नेव वर्षे शुद्धाषाढे व्रतङ्कार्य्यमित्याचारः । स निर्मूलइति (काशीनाथः) । अस्यामेवाम्बिका व्रतम् । अत्र शिवशयनोत्सवः । शिवशयनोत्सवे रुद्रव्रतत्वात्पूर्व-

द्विदलं त्यजेदिति । (शक्यतेऽशितुमनेनेति शाकइतिक्षीरस्वामी) वर्ज्यपदार्थानिपद्धतिप्रकरणे लेखिष्यामः। विभूतिद्वादशीव्रतमिति-(मत्स्यपुराणे) विभूतिं द्वादशीं नाम सर्वामरविभूषितम् । कार्तिके त्वथ वैशाखे मार्गशीर्षे तु फाल्गुने । आषाढे वै दशम्यां तु शुक्लायां लघुभुङ्नरइत्यादि । वासुदेवद्वादशीव्रतमिति—(वाराहपुराणे) आषाढेऽप्येवमेवं तु संकल्प्य विधिना नरः । अर्चयेत्परमं देवं गन्धपुष्पैर्विधानतः ।

वामनपूजनेनेति—आषाढे मासि द्वादश्यां वामनेति च पूजयेत् । नरमेधमवाप्नोति पुण्यं च लभते फलमिति ।

शिवपूजनेनेति—(ब्राह्मे) आषाढे मासि भूतायां शिवं सम्पूज्य मानवः । सर्वपापविनिर्मुक्तः सर्वसम्पदमाप्नुयात् । पूर्वविद्धेति— (ब्रह्मवैवर्ते) रुद्रव्रतेषु सर्वेषु कर्तव्या सम्मुखी तिथिः । अन्येषु व्रतकल्पेषु यथोद्दिष्टमुपोवसेदिति ।

हरिपूजेति—चतुर्दश्यामुपोष्याथ पौर्णमास्यां यजेद्धरिमिति । अन्नपानादिकमिति—(निर्णयामृते) (विष्णुः) आषाढ्यामाषाढयुक्तायामन्नपानादिदानेन तदेवाक्षय्यमाप्नोति । कोकिलाव्रतमिति—(भविष्ये) आषाढपूर्णिमायां तु सन्ध्याकाले ह्युपस्थिते । संकल्पयेन्मासमेकं श्रावणे प्रत्यहं ।ह्यहमित्यादि ।। अम्बिकाव्रत-

विद्धा ग्राह्या । इयं प्रदोषव्यापिनीति (कमलाकरः)। अस्यामेव भारभूतेश्वरयात्रा कार्य्या । तत्र पौर्वाह्णिकी ग्राह्या देवकार्य्यत्वात् । एतस्यां संन्यासिनां क्षौरं मासचतुष्टयं मासद्वयं वा एकत्रावस्थानं व्यासपूजा च । अत्र औदयिकीत्रिमुहूर्ता ग्राह्या अस्यामेवाचाराद् गृहस्था अपिस्वस्वगुरुं पूजयन्ति तत्राचारमेव मूलम् । केनचिदस्यामपि विष्णुशयनमुक्तम् । अस्यां गजपूजा विहिता । इयं मन्वादिः निर्णयस्तु युगादिवत् । अस्यां वायुसञ्चारोऽपि द्रष्टव्यः ।

मिति—पौर्णमास्यामाषाढस्य विधिवत्पूजयेच्छिवाम् । सोऽश्वमेधमवाप्नोति विष्णुलोके महीयतइति । शिवशयनोत्सव इति—पौर्णमास्यामुमानाथः स्वपते चर्मसंस्तरे । वैयाघ्रं च जटाभारं समुद्ग्रथ्याहिचर्म्मणा । यात्रेति—(काशीखण्डे)–उदीच्यां भारभूतेशमाषाढेशं समर्चयेत् । आषाढ्यां पञ्चदश्यां वै न पापैः परितप्यतइति । क्षौरमिति—(मेधातिथिः) आषाढ्यां पौर्णमास्यां च कारयेद्वपनं यतिः । चातुर्मास्यस्य मध्ये तु वर्जयेद्वपनं यतिः । चातुर्मास्यं द्विमासं वा सदैवैकत्र संवसेदिति । व्यासपूजेति—(यतिधर्मसमुच्चये) देवं कृष्णं मुनिं व्यासं भाष्यकारं गुरोर्गुरुम् । गुरुं देवगणाध्यक्षं दुर्गां देवीं सरस्वतीमिति । पूजयेदितिशेषः । त्रिमुहूर्तेति—त्रिमुहूर्ताधिकं ग्राह्यं पर्वक्षौरप्रणामयोरिति । विष्णुशयनमिति—(यमः) क्षीराब्धौ शेषपर्य्यङ्के आषाढ्यां सविशेद्धरिः । निद्रां त्यजति कार्तिक्यां तयोस्तं पूजयेत्सदा । इति । अत्र चापाढीकार्तिकीपदे आषाढस्येयं कार्तिकस्येयं व्युत्पत्त्यैकादशीपरे । नच वृद्धिर्यस्याचामादिरितिवृद्धसंज्ञायां छः आषाढीयमिति स्यादिति वाच्यम् । क्वचिदपवादविषयेऽप्यौत्सर्गिकप्रवृत्तिरितिन्यायेन अण्प्रत्ययेनेष्टसिद्धिरिति लक्ष्मीधरभट्टः । गजपूजेति—(हेमाद्रौ) एवमस्त्विति देवेशस्तमुवाच मतङ्गजम् । आषाढ्यां च सचन्द्रायां समभ्यर्च्य गजाधिपं । तवपूजां करिष्यन्ति दत्तोद्यं पचरस्तवेति ।

॥ अथ श्रावणकृत्यनिर्णयः ॥

अस्मिन्मासे एकभक्तकृते वाजपेययज्ञफलप्राप्तिः शिवविष्णवा-रभिषेकेण पूजने ज्ञातिवृद्धिः । श्रीधरप्रीत्यै घृतादीनि दिने दिने दातव्यानि । प्रतिपत्प्रभृतिमासपर्यन्तं धर्माप्तिव्रतञ्च कार्य्यम् । श्रावणशुक्लपक्षे अर्घश्रावणीव्रतम् ।

श्रावणकृष्णद्वितीया—एषा बृहत्तपा—अशून्यशयनद्वितीया। पूर्वविद्धाग्राह्येति केचित्। मदनरत्नाद्युदाहृतस्मृतिसंग्रहेचन्द्रोदय-व्यापिनीग्राह्या । पूर्वदिने तद्व्याप्तौ पूर्वा । दिनद्वये तत्र सत्वेऽसत्वे वा जयया तु फलाधिकमित्युक्तत्वात्परा। [श्रावणः शुक्लान्तोमाशोत्रते]

वायुसञ्चारइति—(ज्योतिःशास्त्रे) आषाढ्यां भास्करास्ते सुरपति-निलये वातिवाते सुवृष्टिः सस्यार्धं संप्रकुर्य्याद्यदिदहनदिशोमन्द-वृष्टिर्यमेन नैर्ऋत्यामन्ननाशो वरुणदिशि जलं वायुः कोणे प्रवायुः कौबेर्य्यां सस्यपूर्णा सकलवसुमति तद्वदीशानवायौ । इति ।

इत्याषाढकृत्यनिर्णयः

यज्ञफलप्राप्तिरिति—(विष्णुधर्मे)—क्षपयेच्चैकभक्तेन श्रावणं विष्णुतत्परः । वाजपेयस्य यज्ञस्य समग्रं फलमश्नुते इति। अभिषे-केणेति—(महाभारते)—श्रावणं नियतोमासमेकभक्तेन यः क्षिपेत् । यस्तत्राभिषेकेण पूजयेदज्ञातिवर्द्धन इति ॥ दिनेदिने इति—(वा-मनपुराणे)—घृतं च क्षीरकुम्भांश्च घृतपक्वफलानि च । श्रावणे श्रीधरप्रीत्यै दातव्यानि दिने दिने । धर्मावाप्तिव्रतमिति—(वि-ष्णुधर्मे)—आषाढ्यां समतीतायां प्रतिपत्प्रभृतिक्रमात् । पूजयेत्पु-वद्देवं धर्मविग्रह धारिणमित्यादि ॥

अशून्यशयनेति—चतुर्ष्वसितपक्षेषु मासेषु श्रवणादिषु । अशून्याख्यं व्रतं कुर्य्याज्जयया तु फलाधिकमिति—(संवर्तः)—द्वि-

श्रावणकृष्णतृतीया—श्रवणयुतायामस्यां गोविन्दपूजनेन तुष्टिप्राप्तिः। दिनद्वये श्रवणयुता चेदुत्तराग्राह्या।

श्रावणकृष्णचतुर्थी—एषा संकष्टचतुर्थी। सा चन्द्रोदयव्यापिनी ग्राह्या। चन्द्रोदयस्य कर्मकालत्वात्पूर्वदिन एव तद्व्याप्तौ पूर्वा। दिनद्वयेतद्व्याप्तावव्याप्तौ च परा। भाद्रकृष्णचतुर्थी संकष्टचतुर्थीति कृत्यरत्नावल्याम्।

श्रावणकृष्णपञ्चमी—एषा मरुस्थले नागपञ्चमी।

श्रावणकृष्णनवमी—उभयपक्षे श्रावणनवम्योः कुमारीपूजा।

ष्णाष्टमी बृहत्तपा सावित्री वटपैतृकी। कामत्रयोदशी रम्भा उपोष्याः पूर्वसयुता इति। चन्द्रोदयव्यापिनीति—चन्द्राय चार्घ्यो दातव्यो दध्यक्षतफलादिभिरिति चन्द्रार्घ्यविधानात्। एकभक्ते दिवानक्ते निशि चन्द्रोदये व्रते। तिथिस्तात्कालिकी ग्राह्या पारणे त्वपरातिथिरिति। परेति—जयंया तु फलाधिकमित्युक्तत्वात्। ग्वर्वदर्पौ परौ पूज्याविति दर्पतिथेः परयुतायाः पूज्यत्वादितिदिक्।

तुष्टिप्राप्तिरिति—(विष्णुधर्मोत्तरे)-तृतीयां श्रावणे कृष्णा यास्याच्छ्रवण संयुता। तस्यां सम्पूज्य गोविन्दं तुष्टिमग्र्यां च विन्दति। रम्भाख्यां वर्जयित्वेतिवचनादुत्तरा ग्राह्या।

संकष्टचतुर्थीति—(स्कान्दे)-श्रावणे बहुले पक्षे चतुर्थ्यां च विधूदये। गणेशं पूजयित्वातु चन्द्रायार्घ्यं प्रदापयेदिति।

नागपञ्चमीति—(भविष्यत्पुराणे)- पञ्चमी दयिता राजन् नागानानन्दवर्द्धिनी। पञ्चम्यां स्नपयन्तीह नागान्क्षीरेण ये नराः। तेषां कुले प्रयच्छन्ति अभयं प्राणदक्षिणाम्। इति।

कुमारीपूजेति—(भविष्योत्तरे)-श्रावणे मासिराजेन्द्र यः कुर्यान्नक्त भोजनम्। क्षीरषष्टिकभक्तेन सर्वभूतहितेरतः। उपवासरतो वापि नवम्यां पक्षयोर्द्वयोः। कौमारीति वै नाम्नी चन्द्रिकां पूजयेदित्यादि।

श्रावणकृष्णैकादशी—कामिनी ।

श्रावणशुक्लतृतीया—एषा मधुश्रवा गुर्जरदेशे प्रसिद्धा। परयुता । अस्यां स्वर्णगौरीव्रतम् । कर्णाटके मद्रमुक्तदनीवाय केचित्तज्जलीव्रतेऽपि स्वर्णगौरीव्रतमाचरन्ति

श्रावणशुक्लपञ्चमी—एषा नागपञ्चमी । सा नागपूजायां प विद्धा ग्राह्या । अस्यां द्वारस्योभयतोगोमयेन नागान्विलिख्य दधि दूर्वाङ्कुरपुष्पोपहारादिभिः संपूज्य ब्राह्मणान्भोजयेत् अस्यामेव सर्व विषापहपञ्चमीव्रतम् ।

श्रावणशुक्लसप्तमी—अस्यां पापनाशिनीव्रतम् । अव्यङ्ग

कामिनीति—श्रावणैकादशीकृष्णा कामिका नाम नामतः। अस्याः श्रवणमात्रेण वाजपेयफलं लभेदित्यादि ।

मधुश्रवेति—(दिवोदासः)-आद्या मधुश्रावणिका कज्जली हरितालिका । चतुर्थीमिश्रिता स्त्रीभिर्दिवानक्तं विधीयते। तृतीया नभसः शुक्ला मधुश्रावणिका स्मृता । भाद्रस्य कज्जली कृष्णा शुक्ला च हरितालिका । स्वर्णगौरीव्रतमिति—(स्कान्दे)- स्वर्णगौरीव्रतंनाम सर्वसंपत्करं नृणामित्यादि ।

नागपञ्चमीति—श्रावणे पञ्चमी शुक्ला संप्रोक्ता नागपञ्चमी। तां परित्यज्य पञ्चम्यश्चतुर्थी सहिताः स्मृता इति। विलिख्येति—(भविष्योत्तरे)-श्रावणे मासि पञ्चम्यां शुक्लपक्षे नराधिप । द्वारस्योभयतो लेख्या गोमयेन विषोल्वणा इत्यादि—(तत्रैव)-तथा भाद्रपदे मासि पञ्चम्यां श्रद्धयान्वित इत्यादि। सर्वविषापहेति—स्कन्दपु०)-श्रावणे मासि पञ्चम्यां शुक्लपक्षे वरानने । द्वारस्योभयतोलेख्या गोमयेन विषोल्वणा इत्यादि ।

पापनाशिनीव्रतमिति—(हेमाद्रौ)-शुक्लपक्षस्य सप्तम्यां यदर्च तु करो भवेत् । तदास्यात्सुमहापुण्या सप्तमी पापनाशिनी । तस्यां सम्पूज्य देवेशं चित्रभानुं दिवाकरम् । सप्तजन्मकृतात्पापान्मुच्यते

सप्तमीव्रतम् । अस्यां रविसंक्रमणे सूर्य्यवारेसति पद्मकोयोगः ।

श्रावणशुक्लाष्टमी—अस्यां दुर्गाव्रतम् ।

श्रावणशुक्लैकादशी—एषा पुत्रदा । अस्यामेव दामोदरद्वादशीव्रतम् । बुद्धद्वादशीव्रतम् ।

श्रावणशुक्लद्वादशी—अस्यां शाकव्रतस्य सांगतार्थं शाकदानं कृत्वा दधिव्रतारम्भः कार्य्यः । विष्णोः पवित्रारोपणम् । चतुर्दश्यां देव्याः । चतुर्दश्यामष्टम्यां पौर्णमास्यां वा शिवस्य पवित्रारोपणम् । धनदादीनां प्रतिपदादिषु विधेयम् । तत्तत्तिथिष्वसंभवे सर्वदेवानां श्रावणपौर्णमास्यां कार्य्यम् । तत्राप्यसम्भवे कार्तिक्यवधिर्गौणकालः

ात्र संशय इति । अयं च योगः प्रायः श्रावणेएव भवति । अन्य-
ासप्तमीति—(भविष्योत्तरे)-श्रावणे मासि सप्तम्यां देवाग्रन्यम्
ासिवाहनम् । शुक्लपक्षे समभ्यर्च्य पुष्पधूपादिभिः शुचिरिति ।
द्मक-इति-शुक्लपक्षे तु सप्तम्यां यदा सङ्क्रमते रविः । महाजया
दा स्याद्धि सप्तमी भास्करप्रिया । पष्ठीसप्तमी संयोगे वारश्चे दं-
मालिनः । पद्मकोनाम योगोऽयं सहस्रार्कग्रहैः समः ॥

दुर्गाव्रतमिति—(दे०पु०)-देवीव्रतं प्रवक्ष्यामि सर्वकामप्रसाध-
र । श्रावणे शुक्लपक्षेतु अष्टम्यां वायुभोजन इत्यादि ।

पुत्रदेति—(भविष्यपुराणे)-श्रावणे शुक्लपक्षे तु पुत्रदानाम
श्रुता । एकादशी चास्ति तदा कुरुध्वं तद्व्रतं जना इति ।
मोदरद्वादशीति—(निर्णयामृते)-काञ्चनं देवदेवं तु दामोदर
ामकम् । प्राग्वत्तं ब्राह्मणे दद्याद्वेदवेदाङ्गपारगे इति । बुद्ध-
दशीति—एवमेव श्रावणे मासि संकल्प्य द्वादशीव्रतं । अर्चयेत्
देवं गन्धपुष्पनिवेदनैः । बुद्धायपादौसम्पूज्येति—पवित्रा-
णमिति—(विष्णुरहस्ये)-श्रावणस्य सिते पक्षे कर्कटस्थे
ाकरे । द्वादश्याम् वासुदेवाय पवित्रारोपणम् स्मृतम् इति ।
श्याम् श्रवणे वापि पञ्चम्यामथवाद्विज । आनुकूल्येषु

श्रावणशुक्लचतुर्दशी—अस्यां शिवे पवित्रारोपः । सा च पूर्वविद्धा ग्राह्या ।

श्रावणशुक्लपूर्णिमा—यजुर्वेदिभिरस्यां श्रवणयुक्तामयुक्तायां ग्रहणसंक्रान्त्यदूषितायां पूर्वाह्णे उपाकर्म कार्य्यम् । इयं पराह्णमुहूर्त्तावच्छिन्नौदयिकीग्राह्या । औदयिकीचेद्धीनास्यात्तदा चतुर्दशीमिश्रिता ग्राह्या । दिनद्वये पूर्वाह्णव्याप्तौ तैत्तिरीयव्यतिरिक्तैः पूर्वा । तैत्तिरीयकैरौदयिकी ग्राह्या । ग्रहसंक्रान्तिदोषसत्वे श्रावणस्य शुक्लपञ्चम्यां हस्त-

कर्तव्यं पञ्चदश्यामथापि वा । देव्या इति—(म० रत्न० दे० पु०)-पवित्रं कारयेद्यस्तु तस्य पुण्यफलं शृणु इत्यादि । चतुर्दश्यामिति-(म० पु०)-पौर्णमास्यां तथाष्टम्यां शिवं सम्पूज्य यत्नतः । उपवीतं शिवे दद्याच्छिवभक्तांश्च भोजयेत् । पुनरेव च कार्तिक्यां पूज्य शम्भुं क्षमापयेदिति । धनदादीनामिति—(तत्त्वसारसंहितायाम्)-प्रतिपद्धनदस्योक्ता द्वितीया च श्रियोमता । तृतीया पार्वतीदेव्याश्चतुर्थी विघ्नहारिणः । पञ्चमी शशिनः प्रोक्ता षष्ठी प्रोक्ता गुहस्य तु । सप्तमी भास्करस्योक्ता दुर्गायाश्चाष्टमी मता । मातॄणां नवमी प्रोक्ता धर्मस्य दशमी स्मृता । एकादशी मुनीनां तु द्वादशी चक्रपाणिनः । त्रयोदशी त्वनङ्गस्य शिवस्योक्ता चतुर्दशी । पूर्णिमासी सुरश्रेष्ठ पितॄणां कथिता तिथिः । देव्यास्त्रिपुरभैरव्याः कथिता च चतुर्थिका । अन्येषामपि देवानामष्टमी नवमी स्मृतेति । श्रावणपौर्णमास्यामिति—(शिवरहस्ये)-पवि···विधानतः । श्रावण्यां प्रोष्ठपद्यां वा पवित्रारोपणं बुध इत्यादि । गौणकालइति—(दीपिकायाम्)-पवित्रारोपणं विद्याच्छ्रावणे न भवेद्यदि । कार्तिक्यवधिशुक्रास्ते कर्तव्यमिति नारद । विधिश्चकृत्यप्रकरणे लेखिष्यामः ।

अस्यामिति—(गृह्यसूत्रे)-अथातोऽध्यायोपाकर्म औषधीनां प्रादुर्भावे पौर्णमास्या श्रावणस्य पञ्चमी हस्तेनवेति । औषधीनामपामार्गादीनां उत्पत्तौ सत्यां श्रवणेन युक्तायां श्रावणस्य

शुक्लपञ्चदश्यां कुर्य्यात्। अत्र पौर्णमास्या एव प्राधान्यात् विशेषणाभावेऽपि तत्पौर्णमास्यां भवतीति—(हरिहर रेणुकौ)–अथवा औषधीप्रादुर्भावे हस्तयुक्तायां पञ्चम्यां वा कुर्य्यात्। अत्रापि हस्तयुक्ता तद्रहिता वा ग्राह्येति—(हरिहरः)–तथा च—(याज्ञवल्क्यः)–अधीत वेदोपाकर्म श्रावण्यां श्रवणेन च। हस्तेनौषधिभावेवा पञ्चम्यां श्रावणस्यत्विति। अदूषितायामिति—(हेमाद्रौ)–उपाकर्म न कुर्वन्ति क्रमात्सामर्ग्यजुर्विदः। ग्रहसंक्रान्तियुक्तेषु हस्तश्रवणपर्वसु। पूर्वाण्हे इति—(गदाधरभाष्ये प्रचेताः)–भवेदुपाकृतिः पौर्णमास्यां पूर्वाण्हएवतु। ब्राह्मणान्भोजयेत्तत्र पितॄनुद्दिश्य देवता इति। तथा च–(दीपिकायाम्)–अस्य तु पूर्वाण्हकालः स्मृतः। यस्तु अध्यायानामुपाकर्म कुर्य्यात्कालेऽपराण्हके। पूर्वाण्हेतु विसर्गः स्यादिति वेदविदोविदुरिति गोभिलवचस्तत्सामगविषयम्। तेषामपराण्हस्योक्तत्वात्। तेन वाजसनेयि-भिः पूर्वाण्हव्यापिनीग्राह्येति—षण्मुहूर्तावच्छिन्नेति—(पराशरमाधवीये) श्रावणीपौर्णमासी तु संगवात्परतोयदि। तदैवोदयिकी ग्राह्या नान्यदौदयिकी भवेदिति। कालादर्शे च–श्रावण्यां प्रौष्ठपद्यां वा प्रतिपत्षण्मुहूर्तकैः। विद्वास्याच्छन्दसां तत्रोपाकर्मोत्सर्जनं भवेदिति। पूर्वेति–श्रावणी दुर्गनवमी दूर्वा चैव हुताशनी। पूर्वविद्धैव कर्तव्या शिवरात्रिर्बलेर्दिनमिति। औदयिकीति—पर्वण्यौदयिके कुर्युः श्रावण्यां तैत्तिरीयकाः। इति विशिष्य तैत्तिरीयकोपादानादितरैः याजुषैः पूर्वा—तैत्तिरीयैरौदयिकी ग्राह्या। इति—वाजसनेयिभिरिति। संक्रान्तिर्ग्रहणं वापि पौर्णमास्यां यदा भवेत्। उपाकृतिस्तु पञ्चम्यां कार्य्यावाजसनेयिभिः। तथा (मदनरत्ने) यदिस्याच्छ्रावणं पर्व ग्रहसंक्रान्तिदूषितम्। स्यादुपाकरणं शुक्लपञ्चम्यां श्रावणस्यत्विति। (स्मृतिमहार्णवे) संक्रान्तिर्ग्रहणं वापि यदि पर्वणि जायते। तन्मासे हस्तयुक्तायां पञ्चम्यां वा तदिष्यते इति। अत्र (प्रयोगपारिजातविशेषः) अर्धरात्रादधस्ताच्चेत्संक्रान्तिर्ग्रहणं तदा। उपाकर्म न कुर्वीत परतश्चेन्नदोषकृत्। इति।

युक्तायामयुक्तायां वा वाजसनेयिभिः पूर्वाह्णे कार्य्यम् । तैत्तिरीयैः प्रौष्ठपद्यां बौधायनैः श्रावण्यां कार्य्यम् । एतच्चाग्न्यसमर्थानी—अस्मिन्कर्मणि अध्यापयतोऽपि निरग्नेः । साग्नेरपि अनध्यापयतो नाधिकारः । यत्तु लोके स्वशिष्यान् क्षत्रियादीन् पुरस्कृत्य उपाकर्म प्रवर्तते लौकिकेऽप्यग्नौ तस्याचारं विहाय मूलं न दृश्यते । यच्च निर्णयसिन्धौ लौकिकाग्नौ प्रकुर्वीत इति तच्च न कर्काचार्य्यादिसम्मतमिति । बह्वृचैः औषधीप्रादुर्भावेसति शुक्लप्रतिपदादिश्रावणमासस्य श्रवणनक्षत्रे धनिष्ठायुक्ते हस्तयुक्तायां श्रावणशुक्लपञ्चम्यां के०प० हस्तयुक्तश्रावणशुक्लतिथ्यन्तरे वा पूर्वाह्णे कार्यं । छन्दोगैः सिंहस्थेसूर्य्ये हस्तनक्षत्रे अपराह्णे कार्य्यं । दिनद्वये हस्तव्याप्तौ परदिने कार्य्यम् । अथर्ववेदिभिः श्रावण्यां प्रौष्ठपद्यां वा कार्य्यम् । ग्रहणादिदोषराहित्यम् औषधीप्रादुर्भावश्च सर्वेषां तुल्यं । यदा गौणकालेऽपि औषधीप्रादुर्भावाभावः ग्रहसंक्रान्तियोगो वा निमित्तान्तरेण केनचिदापत्तिर्वा भवति तदा वर्षर्तुर्मध्ये यदाकदाचित कार्य्यम् । न तु श्रावणसम्बन्धिनियमः । इदञ्चोपाकर्म रजोयुक्तायामपि नद्यां कार्य्यम् । अस्मिन्कर्मणि त्रिदिनादि वेधस्तु न दोषाय । प्रथमोपाकर्म्म शुक्रास्तादौ न कार्य्यम् । सति सम्भवे द्वितीयाद्यपि न कार्य्यम् । अधिमासेऽपि निषेधः । वनस्थैः अप्युत्सर्जनोपाकर्म्मकार्य्ये । खादिरगृह्यानुयायिभिरस्यामेव उत्सर्जनं कार्य्यम् । अस्यामेवापराह्णे भद्राराहित्ये सति रक्षाबन्धनं कार्य्यम् । अत्र पूर्णिमा अपराह्णव्यापिनी ग्राह्या । कर्मकालव्यापित्वात् । रक्षाबन्धनं सति सम्भवे भद्रान्ते कुर्य्यात् दिवाभद्रायां सत्यां भद्रान्ते रात्रौ वा कुर्य्यादिति—(निर्णयामृते)—प्रतिपद्युतायां तु न

तथा च (मदनरत्ने) यद्यर्धरात्रादर्वाक् तु ग्रहः संक्रम एव च। नोपाकर्म तदा कुर्य्याच्छ्रावण्यां श्रवणेऽपि चेति। प्रौष्ठपद्यामिति—अथातः स्वाध्यायोपाकर्म श्रावण्यां प्रौष्ठपद्यां वा। तथा च (मनुः) श्रावण्यां प्रौष्ठपद्यां वा उपाकृत्य यथाविधि। युक्तश्छन्दांस्यधीयीत मासान्विप्रोऽर्धपञ्चमान्। इति विकल्पाभिधायक वाक्यात् तैत्तिरीयपरत्वेऽपि पञ्चम्याम् वाजसनेयीग्रहणमनर्थकं स्यात्। अतस्तैत्तिरीयाणां तु न श्रावणपञ्चम्यनुकल्पः किन्तु भाद्रपौर्णमासीति। आषाढ्यामिति—(बौधायनगृह्यसूत्रे) श्रावण्यां पौर्णमास्यामाषाढ्यां वोपाकृत्य छन्दांस्यधीयीतेति। अतोबौधायनानां तु आषाढीपौर्णमास्यनुकल्पः। सर्वेऽपि स्वस्वगृह्योक्ताः काला अनुकल्पत्वेन व्यवस्थिता ज्ञेयाः। श्रावणे ओषधीप्रादुर्भावे मुख्याः क्रमेण श्रुतिपर्वहस्ताः ऋग्यजुःसामशाखिभिर्ग्राह्याः। श्रावणस्यामाविति—(छन्दोगपरिशिष्टे) (कात्यायनः)- न स्वेऽग्नावन्यहोमः स्यान्मुक्त्वैकां समिदाहुतिम्। स्वगर्भसंस्कृतार्थश्च यावदग्नौ प्रजायत इति। स्वेन आत्मना आहितः आधानसंस्कृतेऽग्निः स्वः तस्मिन् स्वे अग्नौ अन्यस्यसंबन्धीसंस्कारकोहोमः अन्यहोमो न स्यात् न भवेत् किं पर्य्युदस्य एकां समिदाहुतिं समिधामाहुतिः समिदाहुतिः तां मुक्त्वा वर्जयित्वा सा च समिदाहुतिः उपाकर्मणि आचार्य्यस्याग्नौ शिष्यकर्तृका भवति। तेनावसथ्याग्नावुपाकर्म भवतीति गम्यत इति (हरिहरः) निरग्निनेति—(कर्काचार्य्योजयरामश्च)-एवं हि स्मरन्ति। छन्दांसु पाकृत्याधीयीत—एवंमति अध्ययनप्रवृत्तस्यैतद्भवति। अतएवाग्निमतोऽध्यापनं भवति न-त्वनग्निमान् शक्नोत्यग्निसाध्यं कर्मकर्तुमिति। तथा च (हरिहरः) उपाकरणस्य चावसथ्याग्निसाध्यत्वात् निरग्नेर्नाधिकारः। इति। एवमकृताक्सथ्यस्याध्यापनप्रवृत्तस्य भवतीति (विश्वनाथः)। यद् चैरिति—(आश्वलायनः)-अथातोपाध्यायाकरणमोषधीनां प्रादुर्भावे श्रवणेन श्रावणस्य पञ्चम्यां हस्तेनवेति। ऋग्वेदिनां श्रवणोमुख्यः कालः अन्ये अनुकल्पाः। धनिष्ठायुक्त इति—अत्र-

णेन तु यत्कर्म तत् शाखापादसंगुणम् । संवत्सरं कृतोऽप्यागमन्त्राणा-
देव नश्यति । धनिष्ठासंयुतं कुर्याच्छ्रावणं कर्म यद्भवेत् । तत्कर्म
सफलं ज्ञेयमुपाकरणसंज्ञितम् । ग्रहणोपप्लुतं हन्ति संक्रान्तिः
शिष्यघातिनी । तथा हस्तयुत्तराषाढा उपाकर्मणि वैष्णवैः । धनिष्ठा-
मिश्रितं कार्य्यमुपाकरणसंज्ञितमिति । छन्दोगैरिति—(वीरमित्रो-
दये गर्गः)-सिंहे रवौ तु पुष्यर्क्षे पूर्वाह्णे विचरेद्बहिः । छन्दोगा
मिलिता कुर्य्युरुत्सर्गं सर्वछन्दसाम् । शुक्लपक्षे तु हस्तेन उपाकर्मा-
पराह्णिकम् । परदिने इति—(परिशिष्टे) धनिष्ठाप्रतिपद्युक्तं त्वाष्ट्र-
मृक्षसमन्वितम् । श्रावणं कर्म कुर्वीरन् ऋग्यजुः सामपाठका इति।
अथर्ववेदिभिरिति—(कौशिकगृह्ये)-अथर्ववेदविधिं व्याख्या-
स्यामः। श्रावण्यां प्रोष्ठपद्यां वोपाकृत्यार्धपञ्चमासान् अधीयीरन्निति।
सर्वेषां तुल्यमिति-संक्रान्तौ ग्रहणे चैव मृतके सूतके तथा । गण
स्नानं न कुर्वीत नारदस्य वचो यथा । अथ चेद्दोषसंयुक्ते पर्वणि
स्यादुपाक्रिया । दुःखशोकामयग्रस्ता राष्ट्रे तस्मिन्द्विजातय इति ।
यदा कदाचिदिति—(बह्वृचकारिकायाम्)-अवृष्ट्यौषधयस्तस्मि-
न्मासे न भवन्ति चेत् । तदा भाद्रपदे मासि श्रवणेन तदिष्यते।

॥ उपाकर्मकालनिर्णयस्यायंसङ्ग्रहः ॥

-यदा सूर्य्योदयमारभ्य प्रवृत्ता पौर्णमासी तदा सर्वेषां याजुषाणां पूर्वैव । यदा तु पूर्वदिने मुहूर्तादनन्तरं प्रवृत्ता द्वितीयदिने मुहूर्तद्वयादिपरिमिता भवति तदा तैत्तिरीयैरुत्तरा ग्राह्या । तद्भिन्नयाजुषैः पूर्वा । यदा द्वितीयदिने षण्मुहूर्तपरिमिता तदा सर्वेषामुत्तरा । यदा पूर्वदिने तु मुहूर्तानन्तरं प्रवृत्ता द्वितीयदिने मुहूर्तद्वयन्यूना तदा सर्वेषां याजुषाणां पूर्वा । इति । एवं सूर्य्योदयमारभ्य प्रवृत्तं श्रवणं द्वितीयदिने मुहूर्तत्रयादिच्छिन्न्यूनं तदा पूर्वदिनेऽनुष्ठानम् । यदा तु तादृशं द्वितीयदिने सम्पूर्णमुहूर्तत्रयं तदा यदा वा पूर्वदिने मुहूर्तार्धादनन्तरं प्रवृत्तं द्वितीयदिने मुहूर्तद्वयादिपरिमितं भवति तदोत्तरदिनएवानुष्ठानम । मुहूर्तद्वयान्न्यूनं चेत्पूर्वदिन एवेति । एवं हस्तनक्षत्रमपि यदा दिनद्वये सम्पूर्णापराह्णव्यापि साम्येन वैषम्येण वा तदेकदेशव्यापि दिनद्वयेऽप्यपराह्णास्पर्शित्वा तदोत्तरमेव । यदा पूर्वदिनएवापराह्णेऽपि तदा पूर्वमेवेति । कर्मकालव्याप्त्यैव निर्णय इति हेमाद्रिभिः सिद्धान्तितत्वादिति दिक् ॥

वेदोपाकृतयोगाधीजनने पक्षे सिते श्रावणे स्यादुत्सवतिनां गृहाश्रमजुषां चाथो यजुः शाखिनाम् । श्रावण्यां ग्रहसङ्गात्तु कर्मसमयं व्याप्नोति सा चेन्न वा कार्य्यातितिरिशाखिभि. परदिने पूर्वेतरैर्याजुषैरिति ।

तत्राप्यनुद्गमे तु कुर्य्यादेवतद्वार्षिकमित्याचक्षते—(वर्षेतौ भवं-वार्षिकम्)-रजो युक्तायामपीति—(कात्यायनः)-उपाकर्मणि चोत्सर्गे प्रेतस्नाने तथैव च। चन्द्रसूर्य्यग्रहे चैव रजोदोषो न विद्यत इति। वेदाश्छन्दांसि सर्वाणि ब्रह्माद्याश्च दिवौकसः। जलार्थिनोऽहि पितरो मरीचाद्यास्तथर्षयः। उपाकर्मणि चोत्सर्गे स्नानार्थं ब्रह्मवादिनः। पिपासवस्तु गच्छन्ति संहृष्टाह्यशरीरिणः। समागमस्त्वयत्रैषां तत्रान्ये बहवोमलाः। नूनंसर्वे क्षयंयान्ति किमुतैक नदी रज इति। स एव नदीनां रजोयोगमाह। द्व्यब्दयं श्रावणादि सर्वा नद्यो रजस्वलाः। तासु स्नानं न कुर्वीत वर्जयित्वा समुद्रगाः। न दोषायेति-नित्ये नैमित्तिके जप्ये होमयज्ञक्रियादिषु। उपाकर्मणि चोत्सर्गे ग्रहवेधो न विद्यते इति। शुक्रास्तादौ न कार्य्यमिति—(संग्रहे)-गुरुभार्गवयोर्मौढ्ये बाल्ये वा वार्द्धकेऽपि वा। तथाधिमाससंसर्पमलमासादिषु द्विजैः। प्रथमोपाकृतिर्न स्यात्कृतं कर्म विनाशकृदिति। शुक्रे मूढेऽप्युपाकृत्य विद्यावित्तविनाशनम्। आयुश्चयमवाप्नोति तस्मात्तत्कर्म वर्जयेत्। द्वितीयादिप्रयोगेऽपि सतिसम्भवे बोध्यः-अतएव श्रावण्यां प्रौष्ठपद्यां वा शुक्रास्तमयादीनां प्रतिबन्धस्तदानीमाषाढ्यां कार्य्यमिति (माधवः) मलमासगतहेमाद्यादिग्रन्थाश्च संगच्छन्ते—(निर्णयसिन्धौ तु)-उपाकर्मोत्सर्जनं च पवित्रदमनार्पणम्। इति दमनरोपे लिखितवचनात् शुक्रास्तादावपि कार्य्यम्। प्रथमारम्भस्तु न भवतीति—(अत्रव्यवस्था सुधीभिः कार्य्या)-निषेध इति—(ज्योतिष्पाराशरः)-उपाकर्म तथोत्सर्गः प्रसवाहोत्सवाष्टकाः। मासवृद्धौ पराः कार्य्या वर्जयित्वा तु पैतृकमिति। यत्तु दशहरासु नोत्कर्षश्चतुर्ष्वपि युगादिषु। उपाकर्म महापद्मोर्ह्यं तदिष्टं वृषादितइति ऋष्यशृङ्गवचनमनुत्कर्षविधायकं तत्सामगविषयम् तेषां सिंहार्कणवविधानात् इति। घनस्थैरपीति—(प्रयोगपारिजाते)-उपाकर्मोत्सर्जनं च घनस्थानामपीष्यते। धारणाध्ययनाङ्गत्वाद्गृहिणो ब्रह्मचारिणाम्। उत्सर्जनं च वेदानामुपाकरणकर्म च। अकृत्वा वेदजप्येन फलं नाप्नोति मानव

कार्य्यम् । इदं रक्षाबन्धनं नियतकालत्वात् भद्रावर्ज्यग्रहणादिनेऽपि कार्य्यम् होलिकावत् ग्रहसंक्रान्त्यादौ स्नाननिषेधाभावादिति—(कमलाकरः)—अस्यामेव हयग्रीवपूजा कार्या जयाव्रतञ्च । सर्वदेवानां पवित्रारोपणम् । केनचिदस्यां रक्षापोटलः प्रतिपादितः । अस्यां आश्वलायनैः श्रवणाकर्मसर्पबलिश्च देयः । कात्यायनैः सामगैश्चापि श्रवणाकर्मसर्पबलिश्च देयः । तैत्तिरीयैः सर्पबलिर्देयः । अस्मिन्कर्मद्वये प्रदोषव्यापिनी पौर्णमासी ग्राह्या । अस्तमय कालविधानात्—(दाक्षिणात्याः)—पौवति पूर्णिमोत्सवं नारलीपूर्णिमोत्सवं च ।

इति । खादिर०अनुयायिभिरिति—(हेमाद्रौ)—खादिरगृह्योक्तिः । पुष्येतूत्सर्जनं कुर्य्यादुपाकर्मदिनेऽथवेति । अपराह्ण इति—(भविष्योत्तरे)—उपाकर्मदिने प्रोक्तमृषीणां चैव तर्पणम् । ततोऽपराह्णसमये रक्षापोटलिकाम् शुभामित्यादि । भद्रारहित्येसति—(स्मृतिसंग्रहे)—भद्रायां द्वे न कर्तव्ये श्रावणीफाल्गुनी तथा । श्रावणी नृपतिं हन्ति ग्रामं दहति फाल्गुनी । प्रतिपद्युतायामिति—(मदनरत्ने)—नन्दायां दर्शने रक्षा बलिदानं दशासु च । भद्रायां गोकुलक्रीडा देशनाशाय जायते इति । हयग्रीव पूजेति—(कल्पतरौ)—श्रावण्यां श्रवणे जातः पूर्वं हयशिरा हरिः । जगाद सामवेदं तु सर्वकल्मषनाशनमित्यादि । जयाव्रतमिति—(हेमाद्रौ)—ब्रह्मणा यो विधिः शक्रे कथितोविजयावहः । जयेति पूर्णिमा तात श्रावणस्य शुभावहेत्यादि । पवित्रारोपणमिति—आषाढ्यामथवाष्टम्यां चतुर्दश्यामुमापतिम् । पवित्रैरर्चयेद्वाभ्यां श्रावण्यां चेतरान्सुरानिति । श्रवणाकर्मेति—(रेणुकारिकायाम्)—अथातः श्रवणाकर्म शास्त्रदृष्ट्या मयोच्यते । श्रावण्यामेव तत्कार्यमभावाद्गौणकालतः । वचनात्सूत्रकारस्य सकृदस्य क्रिया भवेत् । एवमेवेतरेषां स्यादावृत्तिर्वा स्मृतेर्बलात् । सकृत्करणमिच्छन्ति पाकयज्ञेषु केचन । आवृत्तिं केचिदिच्छन्ति तत्रावृत्तिः सनातनेति । सर्पबलिरिति—अहरहस्तूष्णीं बलिहरेत्सायं प्राग्घोमादाग्रहायण्या इति गृह्ये ।

॥ इति श्रावणमासकृत्यनिर्णयः ॥

॥ अथ भाद्रपदकृत्यनिर्णयः ॥

अस्मिन्मासे एकाहारी धनाढ्योभवेत्। मधुसर्पियुतपायसदानेन राजसूययज्ञफलप्राप्तिः। प्रतिपत्प्रभृतिमासपर्यन्तं धनावाप्तिव्रतम्। अगस्त्यार्घ्यदानञ्च कार्य्यम्।

भाद्रपदकृष्णतृतीया—एषा कज्जली—सा पराग्राह्या। अस्यां विशालाक्षीयात्रा कार्या। अत्र रात्रिव्यापिनी ग्राह्या। रात्रिजागरण-विधानात्। एतद्देशे तृतीययात्रापि।

भाद्रपदकृष्णचतुर्थी—एषा बहुला। सा सायान्हव्यापिनी ग्राह्या। दिनद्वये सत्वे पूर्वा।

धनाढ्यइति—(निर्णयामृते)-प्रौष्ठपद्यं तु योमासमेकाहारो भवेन्नरः। धनाढ्यः स्फीतमतुलमैश्वर्यं प्रतिपद्यन इति। यज्ञफलप्राप्तिरिति—(वा० पु०)-मासि भाद्रपदे दद्यात्पायसं मधुसर्पिषा। हृषीकेशप्रीणनार्थं लवणं सगुडौदनम्। राजसूयस्य यज्ञस्य फलं दशगुणं भवेदिति। धनावाप्तिव्रतमिति—(विष्णुधर्मे)-श्रावण्यां समतीतायां प्रतिपत्प्रभृतिक्रमात्। पूर्ववत्पूजयेद्विष्णुं देवं मङ्कर्षणंविभुमित्यादि। अर्घ्यदानमिति—(नृसिंहपुराणे)-यदागस्त्योदयप्राप्तिस्तदा सर्वसुराधिप। अगस्त्याय ददाऽर्घ्यं महापुण्यविवृद्धये इत्यादि।

कज्जलीति—भाद्रस्यकज्जलीकृष्णेत्युक्तत्वात्। परेति-आपस्तम्बः। चतुर्थी सहिता या तु सा तृतीयाफलप्रदा। अवैधव्यकरी स्त्रीणां पुत्रपौत्रप्रवर्द्धिनी इति। विशालाक्षीयात्रेति—(काशीखण्डे)-भाद्रकृष्णतृतीयामुपवासपरैर्नरैः। कृत्वा जागरणं रात्रौ विशालाक्षी समीपत इति।

बहुलेति—गौर्य्याश्चतुर्थी वत्सधेनुपूजा दुर्गार्चनं दुर्भरहोलिके च। वत्सस्यपूजा शिवरात्रिरेताः परान्विता घ्नन्ति नृपंसराष्ट्रम् इति।

भाद्रपदकृष्णषष्ठी—सा चन्द्रोदयव्यापिनी ग्राह्या। उभयत्र चन्द्रोदयव्यापित्वे पूर्वविद्धा ग्राह्या। इयमेवहलषष्ठी—सप्तमीयुता ग्राह्या। एषा हंसषष्ठीति (रत्नाकरदीक्षितः)

भाद्रपदकृष्णसप्तमी—एषा शीतला सप्तमी तत्र मध्यान्हव्यापिन्यां व्रतङ्कार्य्यम्।

भाद्रपदकृष्णाष्टमी—एषा जन्माष्टमी—जयन्ती चेति द्विधा। तत्र केवलाष्टमी जन्माष्टमी सैव कलौ मुख्या। जयन्ती योगस्य सदैवाप्राप्तत्वाज्जयन्त्यप्रधाना। सा जन्माष्टमी द्विविधा–शुद्धा, विद्धा च। सूर्य्योदयमारभ्य प्रवृत्ता शुद्धा। अर्धरात्रादर्वाक् सप्तमी

अत्र वत्सपूजायाः पृथगुपादानेन धेनुपूजाशब्देन बहुलाख्या गृह्यत इति—(कमलाकरः)।

चन्द्रषष्ठी—(निर्णयामृते)-तद्वद् भाद्रपदे मासि षष्ठ्यां पक्षे सितेतरे। चन्द्रषष्ठीव्रतं कुर्यात्पूर्वविद्धा प्रशस्यते। तथा-चन्द्रोदये यदा षष्ठी पूर्वाण्हे चापरेऽहनि। चन्द्रषष्ठ्यमिते पक्षे सैवोपोष्या प्रयत्नतइति।

शीतला सप्तमीति—(भ० पुराणे)-शीतलासप्तमी नाम व्रतं कुरु सुते शुभे। सौभाग्यारोग्यजननमवैधव्यप्रदं तथा। मध्यान्हव्यापिन्यामिति-पूजाव्रतेषु सर्वेषु मध्यान्हव्यापिनीतिथिरिति। पूर्वामाणेति—(हेमाद्रिः)।

जन्माष्टमीति—(स्कान्दे)-व्रतेनाराध्यं देवेशं देवकीसहितं हरिं। त्यक्त्वा यमपुरं घोरं याति विष्णोः परंपदम्। जन्माष्टमीव्रतं ये वै प्रकुर्वन्ति नरोत्तमाः। कारयन्त्यथवा लोका लक्ष्मीस्तेषां सदा स्थिरा। स्मरणं वासुदेवस्य मृत्युकाले भवेन्मुने। सिध्यन्ति सर्वकार्याणि कृते जन्माष्टमीव्रते इति। कंसकेशीनिपाति-न तस्मिञ्जन्मदिने मम। शतजन्मकृतात्पापान्मुच्यते नात्र संशय इति। तथा—(भविष्यपुराणे)-श्रावणे बहुले पक्षे कृष्णजन्माष्टमी

व्रतम्। न करोति नरोयस्तु भवति क्रूरराक्षसः। कृष्णजन्माष्टमीन्त्यक्त्वा योऽन्यव्रतमुपासते। नाप्नोति सुकृतं किञ्चिदिष्टापूर्तमथापि वा। वर्षे वर्षे तु या नारी कृष्णजन्माष्टमीव्रतम्। न करोति महाप्राज्ञ व्याली भवति कानने। इति—(स्कन्दपुराणे)—रटन्तीह पुराणानि भूयोभूयो महामुने। अतीतानागतन्तेन कुलमेकोत्तरं शतम्। पातितं नरके घोरे भुञ्जता कृष्णवासरे इति। जन्माष्टमीदिने प्राप्ते येन भुक्तं द्विजोत्तम। त्रैलोक्यसम्भवं पापं तेन भुक्तं द्विजोत्तम इति। जयन्ती चेति—(विष्णुरहस्ये)—अष्टमी कृष्णपक्षस्य रोहिणीऋक्षसंयुता। भवेत्प्रौष्ठपदे मासि जयन्ती नाम सा स्मृतेति। द्विधेति—(माधवीये) जयन्त्याख्यं व्रतं भिन्नं कृष्णजन्माष्टमी व्रतादिति। कलौ मुख्येति। (वन्हिपुराणे) त्रेतायां द्वापरे चैव राजन्कृतयुगे तथा। रोहिणीसहिता चेयं विद्वद्भिः समुपोषिता। अतः परं महीपाल संप्राप्ते तामसे कलौ। जन्मना वासुदेवस्य भविता व्रतमुत्तमम्। इति। (निर्णयसिन्धुकारेण) तामसा न करिष्यन्ति किन्तु धन्याएवेति व्याख्यानं कृतं तत्प्रौढिवादमात्रम्। तामसे कलौ इत्यस्यविशेषणम्-सप्तम्यन्तत्वादिति। शुद्धेति—(शैवपुराणे) शृणु वत्स प्रवक्ष्यामि अष्टमीभेदनिर्णयम्। श्रावणस्यासितेपक्षे घटीषष्ठि यदा भवेत्। तदा जन्माष्टमीख्याता सम्पूर्णा सा प्रकीर्तिताइति। विद्धेति-(माधवीये) अष्टमी शिवरात्रिश्च ह्यर्धरात्रादधोयदि। दृश्यते घटिका या सा पूर्वविद्धा प्रकीर्तिताइति। अर्धरात्रव्यापिनीति। दिवा वा यदि वा रात्रौ नास्तिचेद्रोहिणी कला। रात्रियुक्तां प्रकुर्वीत विशेषेणेन्दुसंयुतामिति। (इन्दुसंयुतांअर्धरात्रव्यापिनीमित्यर्थः) विद्धापीति (कालमाधवेभृगुः) जन्माष्टमी जयन्ती च शिवरात्रिस्तथैव च। पूर्वविद्धैव कर्तव्या तिथिभान्ते च पारणमिति। तथा च (विष्णुधर्मे) जयन्ती शिवरात्रिश्च कार्ये भद्रजयान्विते। कृत्वोपवासं तिथ्यन्ते तदा कुर्यात्तु पारणम्। (वन्हिपुराणेऽपि) सप्तमीसहिताष्टम्यां निशीथे रोहिणी यदि। भविता साष्टमी पुण्या

वेधवती विद्धा । पुनः शुद्धापि द्विधा । निशीथव्यापिनी–निशीथाव्यापिनी च । विद्धापि त्रिधा । पूर्वेद्युरेव निशीथव्यापिनी । परेद्युरेव निशीथव्यापिनी–उभयदिने निशीथव्यापिनी चेति । तत्रार्धरात्रव्यापिनी अष्टमी अस्मिन्व्रते मुख्या । दिनद्वयं निशीथे चेदष्टमी तदा बहुरात्रव्यापिनी ग्राह्या । उभयदिने निशीथव्याप्त्यभावे च परा ग्राह्या । विद्धापि पूर्वदिने परदिने वा या निशीथव्यापिनी सा ग्राह्या । निर्णायकनिशीथव्याप्तेस्तत्र सत्वात् । शुद्धा विद्धा वा याष्टमी अर्धरात्रे रोहिणीयुक्ता सा जयन्ती । सा च त्रेधा–पूर्वेद्युरेव निशीथे अष्टमीरोहिणीयोगः । परेद्युरेव निशीथे अष्टमीरोहिणीयोगः । इयं पूर्वदिने परदिने वा यत्रैवार्द्धरात्रे रोहिणीयुताष्टमी सा जयन्तीव्रते ग्राह्या । आद्यपक्षे पूर्वैव । निर्णायकनिशीथव्याप्तेस्तत्र सत्वात् द्वितीयपक्षे परा । यदा पूर्वदिने रोहिणीरहितार्धरात्रव्यापिनी तिथिः । द्वितीयदिने रोहिणीसहितार्धरात्राव्यापिनी तिथिः तदा पूर्वैवोपोष्या । कर्मकालशास्त्रस्य सर्वापेक्षया प्राबल्यस्य सर्वग्रन्थसिद्धत्वात् । अष्टम्याः प्राधान्यात् तस्याश्चपूर्वेद्युः कर्मकालव्यापित्वात् । रोहिणी तु प्राशस्त्यबोधिका बुधवारादिवत् । यस्मिन्वत्सरे अर्धरात्रे योगोनास्ति तस्मिन्नब्दे जन्माष्टमीव्रतमेव कार्य्यम् । केचिद्वैष्णवाः निशीथादन्यत्रापि अहोरात्रे अष्टमीरोहिणीयोगे जयन्तीव्रतमाहुः । तत्तु सम्प्रदायानुरोधेन नृसिंहपरिचर्य्याकर्तृप्रभृतयः सप्तमीविद्धां विहाय नवमीयुक्तोपोष्येति वदन्ति । वस्तुतस्तु नवमीयुक्तोपोषणवता उपवासद्वयं कार्य्यम् । जन्माष्टमीव्रताकरणे प्रत्यवायश्रवणादिति ।

केवलतिथ्युपवासे तिथ्यन्ते पारणं । नक्षत्रयुक्ततिथ्युपवासे

यावच्चन्द्रदिवाकरौ। अर्धरात्रे इति—(भविष्येनिर्णयामृते च) अर्धरात्रे तु रोहिण्यां यदा कृष्णाष्टमी भवेत्। तस्यामभ्यर्चनं शौरेर्हन्ति पापं त्रिजन्मजमिति। (वसिष्ठसंहितायाम्) अष्टमी रोहिणी युक्ता निशार्धे दृश्यते यदि। मुख्यकाल इति ख्यातस्तत्र जातोहरिः स्वयम्। (योगीश्वरः) रोहिणीसहिता कृष्णा मासे च श्रावणेऽष्टमी। अर्धरात्रादधश्चोर्ध्वं कलयापि यदा भवेत्। जयन्ती नाम सा प्रोक्ता सर्वपापप्रणाशिनीति। कलाया अतिसूक्ष्मत्वेन दुर्लक्ष्यत्वात् स एव (पक्षान्तरमाह) अर्धरात्रादधश्चोर्ध्वं एकार्ध-घटिकान्विता। रोहिणीचाष्टमी ग्राह्या उपवासव्रतादिषु। (एका-चार्द्धघटिकाचैकार्द्धघटिके ताभ्यामन्विता कलामपेक्ष्यार्द्धघटिका-स्थूला तामपेक्ष्यघटिकास्थूला) तत्रायमर्थः सम्पद्यते पूर्वभागा-वसाने एकाघटिका उत्तरभागादौ चैका मिलित्वा तन्निशीथशब्द-वाच्यं मुहूर्तम्। (वीरसर्वस्वे) मासि भाद्रपदे कृष्णेपक्षेऽष्टम्यां कलौ युगे। अर्द्धरात्रे च रोहिण्यां तत्र जातो जनार्दनः। पूर्वापर-द्विदण्डात्मकार्द्धरात्रमिहोच्यते। जयन्त्यां चन्द्रार्घ्यस्यावश्यकर्त-व्यत्वात्तस्य च चन्द्रोदयकालीनत्वान्निशीथे योगः प्रशस्तः। 'सोपमर्धरात्रयोगोमुख्यः अतश्चार्द्धरात्रे रोहिणीयुक्ता सा जयन्ती' अहोरात्रेइति—(वसिष्ठसंहितायां)—अहोरात्रं तयोर्योगो ह्यस-म्पूर्णो भवेद्यदि। मुहूर्तमप्यहोरात्रे योगश्चेत्तामुपोषयेदिति। विद्धां विहायेति–सर्वथा सप्तमीयुक्ता संत्याज्या सर्ववैष्णवैः। उपोष्या नवमीयुक्ता तदुक्तं पुष्करे स्फुटम्। वर्जनीया प्रयत्नेन सप्तमी संयुताष्टमी। स ऋक्षापि न कर्तव्या सशल्या सा प्रकीर्ति-ता इति। सम्प्रदायानुरोधेनेति—(निगमे)–कृष्णपक्षेऽष्टमी यत्र कृष्णपक्षे चतुर्दशी। पूर्वविद्धा तु कर्तव्या परविद्धा न कर्हिचित्। उपवासादि कार्य्येषु ह्येषधर्मः सनातनः—(नारदीये च)– कृष्णा-ष्टमी तथा रम्भा तृतीया वटपैतृकी। वृहत्तपा तथा ब्रह्मन् कर्तव्या सम्मुखीतिथिरिति। इत्यादिवचनविरोधात्।: तद्वचनम् (सम्प्रदायानुरोधेनैव)–यत्तु—(पद्मपुराणे)–अष्ठमी विद्धा नवमी–

तिथिभान्ते पारणम् । यदि तिथिनक्षत्रयोरेकतरान्तो दिने लभ्
उभयान्तस्तु रात्रौ तदा दिवैवान्यतरान्ते पारणं यदा दिवा नै
स्यान्तस्तदा निशीथादर्वागन्यतरान्ते उभयान्ते वा पारणम् ।

मृगशिरयुक्तायामष्टम्यां कालाष्टमीव्रतं । आर्द्रायुक्तायामुमाम
हेश्वरव्रतम् ।

नवम्या चाष्टमी तिथिः । अर्द्धनारीश्वरमाया उमामाहेश्वरीतिथि
अष्टमी नवमी युग्मे महोत्साहे महोत्सवः । शिवशक्त्योः शि
चेत्रे पक्षयोरुभयोरपीति । तच्च शिवशक्त्युत्सवविषयकमिति
यच्च—(स्कान्दे)-उदये चाष्टमी किञ्चिन्नवमी सकला यदि । भव
बुधसंयुक्ता प्राजापत्यर्क्षसंयुतेत्यादि—तद्दानादिविषयकम्-उपवा
साभवणादिति—(अनन्तभट्टः)-तिथ्यन्ते इति—(विष्णुरहस्ये)
कृष्णाष्टमी स्कन्दषष्ठी शिवरात्रिश्चतुर्दशी । एताः पूर्वयुताः का
र्यास्तिथ्यन्ते च पारणम्भवेदिति । तथा—(विष्णुधर्मे)-जयन्ती
शिवरात्रिश्च कार्य्ये भद्रजयान्विते । कृत्वोपवासस्तिथ्यन्ते तथा
कुर्य्याच्च पारणम्—(निगमे)-पूर्वविद्धासु तिथिषु भेषु च श्रवणं
विना । उपोष्य विधिवत्कुर्य्यात्तदन्ते च पारणमिति । तिथि-
भान्त इति—(भृगुः)-जन्माष्टमी रोहिणी च शिवरात्रिस्तथैव च ।
पूर्वविद्धैव कर्त्तव्या तिथिभान्ते च पारणम् । दिवैवेति—(ब्रह्मवै-
वर्त्ते)-सर्वेष्वुपवासेषु दिवापारणमिष्यते । अन्यथा पुण्यहानिः स्या-
दृते धारणपारणम् । अन्यनिष्पायमे रात्रौ नामसमन्त्रैजसोदिया ।
तानमे पारणं कुर्य्यात्रमोत्तमित्ररत्नं इति—(नारदीये)-तिथि
नक्षत्रसंयोगे उपवासोयदा भवेत् । पारणन्तु न कर्त्तव्यं यावन्नै-
कस्य संक्षयः । सांयोगिके व्रते प्राप्ते यद्यैकोऽपि विपुण्यते । सर्वत्र
पारणं कुर्य्याद्देवर्षे द्विजसेवितमिति । अन्यतरान्ते उभयान्तेऽपि-नि-
र्णयो पश्यन्तो सप्तमान्तमथापि वा । अर्द्धरात्रेऽपि वा कुर्य्यात्
पारणानीति । तिथ्यन्ते भान्तमध्ये वा अर्द्धे कुर्वीत

भाद्रकृष्णनवमी—एतद्देशे गोगानवमी प्रसिद्धा। अस्यां गुगासमाधिदर्शनम्।

भाद्रकृष्णैकादशी—(अजा)।

भाद्रपदकृष्णद्वादशी—अस्यां गोवत्सपूजनं।

भाद्रपदकृष्णामावास्या—(कुशग्रहणी)।

भाद्रशुक्लप्रतिपत्—अस्यां महत्तमाख्यं व्रतम्। इदमेव मौनव्रतमित्युक्तं निर्णयामृते तदसत् तन्नामकस्य व्रतान्तरत्वेन मदनरत्नादौ प्रसिद्धत्वात्। इदं व्रतं पूर्वविद्धायाम् कार्य्यम्। भाद्रशुक्लद्वितीयायां गाजवीजपूजा।

भाद्रपदशुक्लतृतीया—अस्यां काञ्चनगौरीं कृत्वा सम्पूज्य गु-

स्यात्कृष्णाष्टमी शुभा॥ युक्ता मृगशिरेणैव सातु कालाष्टमी स्मृता। तस्यां शिवपूजनं। उमामाहेश्वरव्रतमिति—(हेमाद्रौ)—नभस्ये मासि चाष्टम्यां यदार्द्रा जायते तदा। व्रतमेतद्विधातव्यमुमामाहेश्वरं भुवि इति।

अजेति—(ब्रह्मवैवर्ते)— मासि भाद्रपदे राजन्कृष्णपक्षे तु शोभना। एकादशी समाख्याता अजानाम्न्यतिपुण्यदा। इति।

कुशग्रहणमिति—(स्मृत्यर्थसारे)—नभोमासस्य दर्शे तु शुचिर्दर्भान्समाहरेत्। अयातयामास्ते दर्भा विनियोज्याः पुनःपुनः। नभः श्रावणः तेन दर्शान्तमासे जन्माष्टम्यनन्तरं दर्शो लभ्यत (इति कमलाकरः)। दर्भलक्षणं तत्रैव कुशाः काशायवादूर्वाउशीराश्च सकुन्दकाः। गोधूमाव्रीहयोमुञ्जा दशदर्भा स वल्वजा इति। (विस्तृतकुशविचारस्तु मत्कृनशतचण्डीपद्धविधानस्य तृतीयभागे द्रष्टव्यः)।

महत्तमाख्यमिति—(स्कान्दे)—मासि भाद्रपदे शुक्लपक्षे च प्रतिपत्तिथौ। नैवेद्यं तु पचेन्मौनी षोडशत्रिगुणानि चेत्यादि। पूर्वविद्धायामिति(ब्रह्मवैवर्ते)व्रतेषु सर्वेषु कर्तव्या सम्मुखी तिथिः।

डापूपनैवेद्यं दद्यात् । अस्यामेव हरितालिकाव्रतम् अत्र व्रतद्वयेऽपि तृतीया मुहूर्तमात्रसत्त्वेऽपि परैव ग्राह्या । परयुतायाः प्राशस्त्याभिधानात्पूर्वयुतायानिन्दाश्रवणाच्च । अस्यामेव हरिकालिकाव्रतम् कोटीश्वरव्रतम् हस्तगौरीव्रतम् ।

भाद्रपदशुक्लचतुर्थी—एषा वरद चतुर्थी । अस्यां सिद्धिविनायकव्रतम् । मध्यान्हव्यापिनी ग्राह्या । मध्यान्हकालस्य कर्मकालत्वात् उभयदिने मध्यान्हाव्यापित्वे परा । अस्यां रात्रौ चन्द्रदर्शनं न कार्य्यम् । चतुर्थ्यामुदितस्य पञ्चम्यां दर्शनेऽपि न दोषः ।

गुडापूप०इति—(निर्णयामृते) गुडापूपाश्च दातव्या मासि भाद्रपदे तथा । तृतीया शुक्लपक्षस्य सर्वपापहरास्मृतेति ।इयं मन्वादिः । मुहूर्तमात्रसत्त्वेऽपीति–मुहूर्तमात्रसत्त्वेऽपि दिने गौरीव्रतं परे । शुद्धाधिकायामप्येवं गणयोगप्रशंसनात् इति । आद्या मधुश्रावणिका कज्जली हरितालिका । चतुर्थीमिश्रिता स्त्रीभिर्विधानतो विधीयते । तृतीया नभसः शुक्ला मधुश्रावणिका स्मृता । भाद्रस्य कज्जली कृष्णा शुक्ला च हरितालिका इति । हरितालीतिनाम्नेदमन्वर्थमभवद्व्रतं । आलिभिर्हरितायस्मात्तस्मात्सा हरितालिकेति (आपस्तम्बः) चतुर्थीसहिता या तु सा तृतीया फलप्रदा । अवैधव्यकरी स्त्रीणां पुत्रपौत्रप्रवर्द्धिनी । द्वितीया शेषसंयुक्तां या करोति विमोहिता । सा वैधव्यमवाप्नोति प्रवदन्ति मनीषिणः । हरिकालीव्रतमिति—(भविष्ये)–शुक्ले भाद्रपदस्यैव तृतीयायां समाचरेत् । रत्नैर्धान्यैः सघैन्दैः कृत्वा हरितशाद्वलैरित्यादि । कोटीश्वरव्रतमिति । तृतीया शुक्लपक्षे तु मासि भाद्रपदे भवेत् । तस्यां व्रतं तु संग्राह्यं यावद्वर्षचतुष्टयमित्यादि । हस्तगौरीव्रतमिति—विधूतदुष्कृता पुण्या मनुष्या राज्यमवाप्स्यसि हस्तगौरीव्रतं भद्रे कुरुष्व शुचिमानसेत्यादि ।

वरदचतुर्थीति । (गोविन्दार्णवे) [illegible] गणेशं

चन्द्रदर्शनदोषशान्तये सिंहप्रसेनमिति पठेत् । इयमेव रविवारेण भौमवारेण वा योगे महाचतुर्थी इयमेव शिवाचतुर्थी ।

भक्तिपूर्वकम् । तस्मात्प्रादाद्वरं यस्मात्तस्माद्वरचतुर्थिकेति। सिद्धिविनायकव्रतमिति—(हेमाद्रौ स्कान्दे)-गजवक्त्रं तु शुक्लायां चतुर्थ्यां पूजयेन्नृप । प्रातः शुक्लतिलैः स्नात्वा मध्यान्हे पूजयेत्तथा । स्वशक्त्या गणनाथस्य स्वर्णरौप्यमय्याकृति—(स्वर्णमयीं रौप्यदन्तीं)-परेति-चतुर्थीगणनाथस्य मातृविद्धाप्रशस्यते । मध्यान्हव्यापिनी चेत्स्यात्परतश्चेत्परेऽहनि । मातृविद्धाप्रशस्तास्याच्चतुर्थी गणनायके । मध्यान्हे परतश्चेत् स्यान्नागविद्धा प्रशस्यते । चन्द्रदर्शनमिति—(हेमाद्रौ मार्कण्डेयः)-सिंहादित्ये शुक्लपक्षे चतुर्थ्यां चन्द्रदर्शनम् । मिथ्याभिदूषणं कुर्य्यात्तस्मात्पश्येन्नतं सदेति । पञ्चम्यां दर्शनेऽपि न दोष इति । चतुर्थ्यां दर्शननिषेधात् तत्रोदितस्य चन्द्रस्य पञ्चम्याम् दर्शने तु न दोषः । सिंहःप्रसेनमिति—(विष्णुपुराणे)— सिंहः प्रसेनमवधीत्सिंहो जाम्बवता हतः सुकुमारकमारोदीस्तव ह्येषस्यमन्तकः-(निर्णयामृते विशेषः)-वासुदेवोऽभिशस्तु निशाकरमरीचिषु । स्थितश्चतुर्थ्यामायायां मानुष्याणां पतश्च सः । ततश्चतुर्थ्यां चन्द्रं तु प्रयत्नाद्वीक्ष्य मानवः । पठेत्पौराणिकं वाक्यं प्राङ्मुखोदङ्मुखोऽपिवा इति। प्रयत्नात्पठेदित्यन्वयः—वाक्यं सिंहः प्रसेन मिति)-महाचतुर्थीति-भाद्रशुक्लचतुर्थी या भौमेनार्केण वा युता महती सात्र विघ्नेशमर्चित्वेष्टं लभेन्नर इति । शिवेति—(शिवा शान्ता शिखा राजन् चतुर्थी त्रिविधा स्मृता । मासि भाद्रपदे शुक्ला शिवलोके प्रपूजिता इति ।

* वेदे गणेशवर्णनम्—गणानान्त्वागणपतिंहवामहे कविंकवीनामुपश्रवस्तमम् ज्येष्ठराजम्ब्रह्मणांब्रह्मणस्पत आनः शृण्वन्नूतिभिः सीदसादनम् । (नारायणोपनिषदि)-तत्पुरुषायविद्महे महादेवाय धीमहि । तन्नोरुद्रः प्रचोदयात् । तत्पु० [illegible] वक्रतुण्डाय धीमहि । तन्नोदन्तिः प्र० । त०विद्महेचक्रतुण्डाय धीमहि । तन्नोनन्दिः प्रचोदयात् । त० विद्महे महासेनाय धीमहि तन्नः षण्मुखः प्रचोदयात् । (गणेशपुराणे द्वादशाध्याये गणेशस्थाने गुणेश इति पाठः) गुणानामीशः गुणेशः ।

भाद्रपदशुक्लपञ्चमी—एषा ऋषिपञ्चमी—इयं मध्याह्नव्यापिनी ग्राह्या । दिनद्वये मध्यान्हव्यापित्वेपूर्वा ।

भाद्रपदशुक्लषष्ठी—एषा सूर्यषष्ठी—सप्तमीयुता ग्राह्या—अस्यां स्कन्ददर्शनात् ब्रह्महत्यादिपापनिवृत्तिः । इयमेव विशाखाभौमवैधृतियुता चम्पाषष्ठी ।

भाद्रपदशुक्लसप्तमी—अस्यां मुक्ताभरणव्रतम् । फलसप्तमीव्रतम् । पुत्रसप्तमीव्रतम् । अत्र सप्तमी पूर्वविद्धा ।

ऋषिपञ्चमीति—(व्र० पु०)—नभस्यशुक्लपक्षे तु यदा भवति पञ्चमी । नद्यादिके सदा स्नात्वा कृत्वा नियममेवचेत्यादि । मध्याह्नव्यापिनीति—(हारीतः)—पूजाव्रतेषु सर्वेषु मध्याह्नव्यापिनी तिथिरिति । पूर्वेति—चतुर्थीसंयुता कार्य्या पञ्चमी परया न तु । दैवे कर्मणि पित्र्ये च शुक्लपक्षे तथासिता । प्रतिपत्पञ्चमी चैव सावित्री भूतपूर्णिमा । नवमी दशमी चैव नोपोष्याः परसंयुताइति । (ऋषिपञ्चमीकथा[illegible]विस्तारःसिद्धः) ।

सूर्यषष्ठीति—(भविष्योत्तरे)—शुक्ले भाद्रपदे षष्ठ्यां स्नानं भास्करपूजनम् । प्राशनं पञ्चगव्यस्य अश्वमेधफलप्रदमिति । सप्तमीयुतेति—(पाद्मे)—नागविद्धा न कर्त्तव्या षष्ठी चैव कदाचन । स्कन्ददर्शनादिति (व्र० पु०) । षष्ठ्यां भाद्रपदे मासि षष्ठी स्कन्ददर्शनम् । इयं [illegible] कृत्वा शिवा [illegible] शुभा [illegible] । स्नानदानादिकं सर्वं [illegible] । [illegible] दक्षिणापथवासिनः । ब्रह्महत्यादिपापैस्तु मुच्यते नात्र संशयइति । (शार्ङ्गः [illegible]) चम्पाषष्ठीति—(हेमाद्रिः)—षष्ठी भाद्रपदे शुक्ला वैधृत्या तु [illegible] । [illegible] विशाखा भौम [illegible] न [illegible] विश्रुतेति ।

मुक्ताभरणव्रतमिति—(भविष्योत्तरे)—षष्ठे भाद्रपदे मासि सप्तम्यां [illegible] । [illegible] शिवं [illegible] । [illegible] कुर्यात्[illegible]गुणविस्तारादि ।

भाद्रशुक्लाष्टमी—एषा दूर्वाष्टमी—पूर्वविद्धा ग्राह्या । ज्येष्ठादियोगे कन्यार्के अगस्त्योदये च इदं व्रतं न कार्य्यम्—शुक्ले अगस्त्योदयसम्भावनायां कृष्णाष्टम्यां व्रतङ्कार्य्यं । अनिषिद्धकालस्यालाभे निषिद्धेऽपि व्रतानुकल्पोऽनुष्ठेयः । भाद्रस्याधिमासत्वे तत्रैवेदं व्रतङ्कार्य्यम्—नतु शुद्धे । अस्यामेव 'ज्येष्ठाव्रतम्' अस्मिन्व्रते ज्येष्ठायुक्ताष्टमी ग्राह्या । दिनद्वये ज्येष्ठानक्षत्रयोगाभावे केवलाष्टम्यां व्रतङ्कार्य्यम् । नतु तद्युक्ततिथ्यन्तरेऽपि कार्य्यम् । दिनद्वयेऽपि नक्षत्रयोगे परदिने मध्यान्हादूर्ध्वं नक्षत्रसत्वे परा ग्राह्या । अन्यथा रात्रावपि नक्षत्रयोगे पूर्वा । अस्यामेवारभ्यं महालक्ष्मीव्रतम् । इदं च व्रतमष्टम्या द्वैधे यत्र ज्येष्ठायोगस्तत्रारब्धव्यं । तदसम्भवे नवमीयुक्तायां केवलाष्टम्यां वा शुक्लपक्षेऽष्टमी चैव शास्त्रात् । ज्येष्ठायोगस्य प्राशस्त्यकरत्वज्ञापनात् । अस्य प्रथमारम्भस्तु सिंहस्थे सूर्य्ये अष्टम्यां कार्य्यः । कन्यासंक्रान्त्यर्थे कृष्णाष्टम्यां समापयेत् । सा च कृष्णाष्टमी चन्द्रोदयव्यापिनी ग्राह्या । चन्द्रोदये अर्घ्यविधानात् । दिनद्वयेऽपि तत्कालव्यापित्वे पूर्वा । कृष्णपक्षे अष्टमी चैवेति सामान्यवचनात् । यदा तूत्तरदिने चन्द्रोदयोत्तरम

फलसप्तमीति—(भ० पु०) अथ भाद्रपदे मासि सितपक्षे महीपते। कृत्वोपवासे सप्तम्यां विधिवत्पूजयेद्रविमित्यादि । पुत्रसप्तमीति-मासे भाद्रपदे प्राप्ते शुक्लपक्षे सुरेश्वर । सप्तम्यामुपवासेन पुत्रप्रासिपदंव्रतमिति । पूर्वविद्धेति—(ब्र० पु०)-षष्ठी च सप्तमी तात अन्योन्यन्तु समाश्रिता। पूर्वविद्धा द्विजश्रेष्ठ कर्तव्या सप्तमीतिथिरिति ।

दूर्वाष्टमीति—पक्षे भाद्रपदस्यैव शुक्लाष्टम्यां युधिष्ठिर। दूर्वाष्टमीव्रतं पुण्यं यः करोति महाधनइति। पूर्वविद्धेति-श्रावणी…इति।

भाद्रपदशुक्लानवमी—एषा नन्दा अस्यां दुर्गापूजनं कार्यम्।

भाद्रशुक्लदशमी—दशावताराव्रतारम्भः।

भाद्रशुक्लएकादशी—एषा पद्मा—अस्याम् कटदानोत्सवः।

यः स्पर्शाद्दयति तिथिद्वयस्य चान्द्रां त्रिस्पृक्समपुनरिदं द्वयं न पेष्टम्। एतद्दोषवर्जनमुपकर्मोपाकर्मापनयोरेव प्रायेण ज्ञेयम्। अन्यस्यापीड्याष्टसाध्यत्वेन मध्ये त्यागापांगादिनि (रत्नाकरः) पुष्ययोगे प्राशस्त्यातिशय इति—(ब्रह्मा० पु०)—सप्तमी पुष्यसंयुक्ता कर्तव्या चाश्विनाष्टमी। दुर्गोत्सवः सिते पक्षे बहुले श्रीव्रते शुभा। इतिअत्रचआश्विनशुक्लाष्टम्यां दुर्गोत्सव कार्यंइत्येतावद्विवचितं सप्तमीपुष्यसंयुक्तेति बहुलाष्टम्याएव विशेषणं सिताष्टम्यां पुष्यनक्षत्रासम्भवादिति (निर्णयामृते) राधाष्टमीति—(वीरसर्वस्वे)—भाद्रे मासि सिताष्टम्यां मूलर्क्षे सिंहगेरवौ। मध्यान्हे भानुवारे च श्रीराधाजनि भारत। परविद्धैव कर्तव्या राधाजन्माष्टमी तिथिः। नापि ऋक्षेण सहिता पूर्वविद्धा कदाचनेति।

नन्देति—(निर्णयामृते)—मासि भाद्रपदे या स्यान्नवमी बहुलेतरा। सा तु नन्दा महापुण्या कीर्तिता पापनाशिनी। तस्यां यः पूजयेद्दुर्गां विधिवत्कुरुनन्दन। सोऽश्वमेधफलं विद्याद्विष्णुलोकं च गच्छति॥ इति॥

दशावताराव्रतारम्भः—भविष्ये)– दशम्यां शुक्लपक्षस्य मासे प्रौष्ठपदे शुचिः। स्नात्वा जलोदये स्वस्थः पितृदेवादितर्पणमित्यादि।

पद्मेति—(ब्र० पु०)—पद्मानामेति विख्याता नभस्यैकादशी भवेत्। हृषीकेशप्रीतयेऽस्याः कर्तव्यं व्रतमुत्तमम्। इति। कटदानोत्सवइति—(भविष्योत्तरे)—प्राप्ते भाद्रपदे मासि एकादश्यां सितेहनि। कटदाने भवेद्विष्णोर्महापातकनाशनमिति। विजयेति-एकादशी यदा शुक्ला श्रवणेन समन्विता। विजया सा तिथिः प्रोक्ता भक्तानां विजयप्रदेति॥ दशमीविद्धायामपीति—दशम्येकादशी यत्र सा नोपोष्या भवेत्तिथिः। श्रवणेन तु संयुक्ता सा

श्रवणनक्षत्रयुक्तायामस्यां विजयाव्रतम् । इदं व्रतमुत्तरदिने श्रवणयुक्तैकादश्यलाभे दशमीविद्धायामपि श्रवणयुतायां कार्य्यम् । अस्यामेव मध्यान्हे वामनावतारः ।

भाद्रशुक्लद्वादशी—अस्यां श्रवणयोगरहितायां पारणम् । अपरिहार्य्ये योगे नक्षत्रस्य मध्यमानाडीत्यजेत् । एकादश्यां श्रवण द्वादशीयोगे विष्णुशृङ्खलयोग इति (हेमाद्रिः) । श्रवणद्वादशीव्रतं निशीथानन्तरं सूर्योदयावधिद्विकलामात्रमपि त्रिस्पृग्वर्त्ते । तदा पूर्वैव । एकादश्यामेव श्रवणं न द्वादश्यां तदा पूर्वा । द्वादश्येवर्त्तयुता तदा परा । (कमलाकरस्तूपवासद्वयमाह) हेमाद्रिस्तु एका-

शुभा सर्वकामदेत्युपक्रम्य-अथ काले बहुतिथे गते सा गुर्विणी भवेत् । सुषुवे नवमे मासि पुत्रं सा वामनं हरिम् । इत्युक्त्वा—प्रातस्मर्वं समभवदेकादश्यां युधिष्ठिर । तेनेष्टा देवदेवस्य सर्वथा विजयातिथिः । एषा व्युष्टिः समाख्याता एकादश्यां मया तव । पूर्वमेव समाख्याता द्वादशीश्रवणान्विता इत्युपसंहारादेकादश्यामेवव्युष्टिःफलमिति (निर्णयसिन्धौ) । भागवते द्वादश्यां वामनोत्पत्तिरुक्ता—तत्रापि द्वादशीशब्देनैकादश्याएवाभिधानात् भविष्योत्तरभागवतयोराञ्जस्येनैव संगतिरिति (रत्नाकरदीक्षितः) ।

श्रवणयोगरहितायामिति—(स्कान्दे)-उपोष्यैकादशीं मोहात्पारणं श्रवणेयदि । करोति हन्ति तत्पुण्यं द्वादशद्वादशीभवमिति । मध्यमानाडिरिति—(विष्णुधर्मे)-श्रुतेश्च मध्ये परिवर्तमेति सुप्तिप्रबोधपरिवर्तनमेव वर्ज्यमिति । विष्णुशृङ्खलइति—(हेमाद्रौ)-द्वादशी श्रवणस्पृष्टा स्पृशेदेकादशीं यदि । स एव वैष्णवोयोगो विष्णुशृङ्खलसंज्ञितः । संस्पृश्यैकादशीं राजन्द्वादशीं यदि संस्पृशेत्-श्रवणं ज्योतिषां श्रेष्ठं ब्रह्महत्यां व्यपोहति । द्विकलामात्रमपीति—(नारदीये)-तिथिनक्षत्रयोर्योगोयोगश्चैव नराधिप । द्विकलो यदि लभ्येत सज्ञेयो ह्याष्टयामिकः इति । (एकादश्यामेवेति)—

दद्यात्। नष्टे दोरके प्रायश्चित्तं विधेयम्। अस्यामेव पालीव्रतम्। कदलीव्रतञ्च कार्य्यम्। कन्यासंक्रान्तेरर्वाक् सप्तदिनमध्येऽगस्त्यपूजनं अगस्त्यार्घ्यं च दद्यात्।

भाद्रपदशुक्लपूर्णिमा—अस्यां भर्तुरायुरभिवृद्धये सावित्री-

त्रिमुहूर्तव्यापिन्यामिति—(माधवः)—उदये त्रिमुहूर्तापि ग्राह्याऽनन्तव्रते तिथिः। (निर्णयामृते) तथा भाद्रपदस्यान्ते चतुर्दश्यां द्विजोत्तम। पौर्णमास्याः समायोगे व्रतं चानन्तकं भवेदिति। तथ मध्यान्हे भोज्यवेलायां समुत्तीर्य्य सरित्तटे। ददर्श शीला स्त्रीणां समूहं रक्तवाससां। चतुर्दश्यामर्चयन्तं भक्त्या देवं पृथक् पृथगिति। मध्यान्हेऽनन्तार्चनसंकीर्तनान्मध्यान्हव्यापिनी ग्राह्येति शङ्क्यम्। सामान्यविशेषप्रवृत्तशास्त्रान्तरविरोधे अर्थवादविधिकल्पनाया असम्भवात्। स्पष्टविरोधस्याश्रयणात्। अन्यथा स्त्रीसमूहेनैवैतद्व्रतङ्कार्य्यमिति विध्युन्नयनापत्तेः। पूर्वान्हे दैवादनुष्ठितस्यास्य व्रतस्य मध्यान्होऽपि गौणकालतयास्वीकार्य्य इत्यतदर्थवादात्सिध्येत् इति। अनन्तपूजनमिति—स्नानं कृत्वा नदीतीरे शुचिर्भूत्वा समाहितः। कृत्वा दर्भमयं शेषं फणासप्तकभूषितं। तस्याग्रतोऽदं सूत्रं कुङ्कुमाक्तं सुशोभनं। चतुर्दशग्रन्थिसमायुक्तं संस्थाप्य पूजयेदित्यादि। प्रायश्चित्तमिति—दोरे नष्टे महान्दोषः प्रभवेद्व्रतिनामिह। तस्मात्तद्दोषनाशार्थं प्रायश्चित्तं विधियत इति। पालीव्रतमिति—(भविष्योत्तरे)—मासि भाद्रपदे प्राप्ते शुक्लभूततिथौ नृप। तदा भक्त्या प्रदातव्यं वरुणायार्घ्यमुत्तमम् इति। कदलीव्रतमिति—(भविष्योत्तरे)—शुक्लपक्षे चतुर्दश्यां मासि भाद्रपदे नृप। दैपमर्घ्यं वरस्त्रीभिः कदलीनां विधीयते इति। अगस्त्यार्घ्यमिति—(पाद्मे)—आगस्त्यमाद्रदद्यादगस्त्यप्राप्यतेन सकल नरेश। सावतसमाः सप्तदशाधवास्तुरर्घ्यमप्य च वदन्ति केचिदिति।

[illegible]

व्रतङ्कार्य्यम् । लोकपालपूजा च कार्य्या । अस्यामेव वरुणव्रतारम्भः । अस्मिन्दिने कुलस्तम्भयात्रा कार्य्या । अस्यां प्रौष्ठपद्यां नान्दीमुखानुद्दिश्य पार्वणश्राद्धं कार्य्यम् । पार्वणश्राद्धेऽपरान्हव्यापिनी ग्राह्येत्युक्तत्वात्पूर्णिमात्रापरान्हव्यापिनीग्राह्या । एतच्च प्रत्यब्दमित्युक्तेरवश्यं कार्य्यम् । यस्मिन्वर्षे भाद्रपद्याः कन्यार्कयोगाभावस्तदाश्वयुज्यां कन्यार्कयुक्तायां कार्य्यमिति (प्रयोगपारिजाते) इदञ्च श्राद्धं सपिण्डकं कार्य्यम् । अस्यां पौर्णमास्यां प्रथमप्रयोगे मातृपूजापूर्वकमाभ्युदयिकं विधायावसथ्याग्नौ इन्द्रयज्ञाख्यं कर्म कार्यम् ।

पकामया । सावित्रीतिप्रसिद्धं यत्सर्वकामप्रदायकम् । तस्य तुष्टा सा देवी सावित्रीब्रह्मणः प्रियेत्यादि । लोकपालपूजेति—(निर्णयामृत)-पूर्वाभाद्रपदायोगे पौर्णमास्यां पितामहः । शक्राग्नियमरक्षोम्भो वायुवित्तेशशङ्करान् । लोकपालांस्तु रक्षार्थं त्रैलोक्यस्यार्चयेदित्यादि । वरुणव्रतारम्भइति—(हेमाद्रौ)-प्रौष्ठपद्यास्तमारभ्य सम्पूर्णशशलक्षणे । सम्पूज्य वरुणं देवं गन्धमाल्याम्बरादिति । कुलस्तम्भयात्रेति—(काशीतत्वप्रकाशिकायां)-नभःपञ्चदश्यां च कुलस्तम्भं समर्चयेत् । दुःखं रुद्रपिशाचत्वे नभस्तस्य पूजनादिति । नान्दीमुखानुद्दिश्येति—(ब्रह्मपुराणे)-नान्दीमुखानां प्रत्यब्दं श्राद्धं कन्यागते रवौ । पौर्णमास्यां तु कर्तव्यं वरवचनं यथेति ।

सपिण्डकमिति—(निर्णयप्रदीपेगार्ग्यः)-पौर्णमासीषु सर्वासु पिद्धं पिण्डपातनम् वर्जयित्वा प्रौष्ठपदीं यथादर्शस्तथैव स इति । इन्द्रयज्ञाख्यमिति—(पारस्करगृह्यसूत्रे)-प्रौष्ठपद्यामिन्द्रयज्ञः । पायसमैन्द्रं श्रपयित्वाऽपूपांश्चापूपैः स्तीर्त्वाऽऽज्यभागाविष्ट्वाज्याहुतीरीतीन्द्रायेन्द्राण्या अजायैकपदेऽहिर्बुध्न्यायप्रौष्ठपदाभ्यश्चेति ।

इति भाद्रपदमासकृत्यनिर्णयः

॥ अथ आश्विनापरपक्षकृत्यनिर्णयः ॥

विप्रायास्मिन्मासे घृतदानेन रूपभाग्भवेत् । पद्मनाभमीतये तिलादीनि देयानि । एकभक्तेन बहुपुत्रादिप्राप्तिः । अस्मिन्नेव मासे अनिरुद्धपूजनं कृत्वाऽऽरोग्यप्राप्तिकरं व्रतङ्कार्यम् । अस्मिन्मासे विष्णुपूजयन्नेकभक्ते कृते अतिरात्रयज्ञफलप्राप्तिः । आश्विनकृष्णपक्षोऽपरपक्षः स एव महालयः । तत्र षोडशपक्षदशया दिनानि

घृतदानेनेति—(यमः)-घृतमाश्वयुजेमासि नित्यं दद्याद्द्विजातये प्रीणयित्वाश्विनौ देवौ रूपभागभिजायते । तिलादीनीति—(वामनपुराणे) तिलास्तुरंगं वृषभं दधिताम्रमादिकम् । प्रीत्यर्थं पद्मनाभस्य देयमाश्वयुजे नरैरिति । एकभक्तेनेति—(भारते)-तथैवाश्वयुजं मासमेकभक्तेन यो नयेत । प्रजावान्बहुपुत्रश्च वाहनाढ्यश्च जायते इति । अनिरुद्धपूजनमिति—(विष्णुधर्मोत्तरे)-प्रौष्ठपद्यामतीतायामनिरुद्धंतु पूजयेत् । सारसैरर्चयेद्देवं जातिपुष्पैर्दिनेदिने इत्यादि । यज्ञफलप्राप्तिरिति—जपेश्चाश्वयुजं विष्णुं पूजयेन्नैकभोजनः । अतिरात्रस्य यज्ञस्य तत्फलंशुभमाप्नुयादिति ।

अपरपक्ष इति—(निर्णयामृते मनुः)-नभस्यापरः पक्षोयत्र कन्यां व्रजेद्रविः । स महालयसंज्ञः स्याद्गजच्छायाह्वयस्तथेति-(अत्र नभस्येति शुक्लप्रतिपदादि चान्द्रमासाभिप्रायेण)-तथा च (गदाधरभाष्ये) अपरपक्ष इति कृष्णपक्ष इत्युच्यते । समाचारात् समाचरति हि कृष्णपक्षे श्राद्धमिति—लिंगाच्च योऽपक्षीयते स पितर इति—अत्र यद्यपि समस्तमाससम्बन्ध्यपरपक्षस्य श्राद्धकालत्वं प्रतीयते । तथापि स्मृत्यन्तरे दर्शनात् कन्याकुम्भसम्बन्धिनो विशिष्टत्वम् । तत्रापि कन्यासम्बन्धिनः पुण्यतमत्वम् । तथा च (मनुः) अनेन विधिना श्राद्धं त्रिरब्दस्येह निर्वपेत्हेमन्तग्रीष्मवर्षासु पाञ्चयाज्ञिकमन्वहम् इति । ऋत्वपेक्षया हेमन्त ग्रीष्मवर्षास्विति यदुक्तं तद्विवेचितं । (मात्स्ये)—अनेनविधिना श्राद्धंत्रि-

रब्दस्येह निर्वपेत् । कन्याकुम्भवृषस्थेऽर्के कृष्णपक्षेषु सर्वदा । कन्यासम्बन्धिनिम्नतुपक्षेऽयं विशेषः। तस्या उभयथासङ्कीर्तनमस्ति क्वापिप्रौष्ठपदापरपक्षत्वेन क्वाप्यश्वयुक्कृष्णपक्षत्वेनेति। षोडशदिनानीति—(शाट्यायनिः)-नभसि चापरे पक्षेतिथिषोडशकन्तु यत कन्यागतान्वितं चेत् स्यात्सकालः पितृकर्मसु । इति । (तथा ब्रह्माण्डे)—कन्यागते सवितरि यान्यहानितु षोडश । क्रतुभिस्तानि तुल्यानि तेषु प्रदत्तमक्षयमिति । (कन्यागतएकदेशेऽपि) (कार्ष्णाजिनिः)-आदौ मध्येऽवसाने वा यत्र कन्यां व्रजेद्रविः । सपक्षः सकलः पूज्यः श्राद्धषोडशकंप्रति* । पञ्चदशदिवेति—कन्यागते सवितरि दिनानि दशपञ्चच पार्वणेनैव विधिना तत्र श्राद्धं वि

श्राद्धषोडशकेविचारः

*तत्रैके शुक्लप्रतिपदा सह तिथिषोडशकमाहुः तथा च (देवलः) अहः षोडशकं यत्तु शुक्लप्रतिपदासह । चन्द्रक्षयाविशेषेण सापि दर्शात्मिका स्मृता—इति (तदयुक्तं)-शुक्लप्रतिपदोदौहित्रकर्तृकमातामहश्राद्धविषयत्वात् । तथा च मातृणां नवमी यद्वद्धतानाञ्च चतुर्दशी । तद्वन्मातामहानाञ्च शुक्ले प्रथमप्रतिपन्मतेति । अन्येत्वाहुः तिथिवृद्धिविषयं श्राद्धषोडशकमिति । (तदपिन) तथासति त्रुटिवृद्ध्योः पञ्चदशसप्तदशश्राद्धसम्भवात् षोडशकविधिवाधापत्तेः ।(तथा च पठन्ति) तिथयः पञ्चदश स्युः प्रेतपक्षेतु षोडश अनुमत्यादिकं कुर्यान् पितॄणां दत्तमक्षयं नातः पञ्चदशे कुर्यान्नातः सप्तदशे तथा । ऊने तु नरकं यान्ति ह्यधिकेस्याद्धनक्षयः । इति । तस्मात्त्रुटिवृद्धयोरभावे षोडशश्राद्धविधिरिति चेत् एतदपि (नोपपद्यते) तथा सति श्राद्धषोडशकस्य कादाचित्कत्वेन नित्यत्वानुपपत्तेः । अतः प्रौष्ठपदीमारभ्य त्रुटौ प्रतिपदमभिव्याप्य वृद्धौ षष्ठिः कृत्य श्राद्धषोडशककर्तव्यम् इतिव्यवस्थापनं युक्तम् । एवंतर्हिप्रतिपदोदौहित्रविषयत्वमित्युक्तिर्विरुध्येत । मैवम् त्रुटिविषयत्वात्तया षोडश पूरणोपपत्तेः अथवा एकाहेतिथिद्वयसंभवे श्राद्धकरणात्षोडशपूरणम् । ननु च दिनानि दशपञ्चचेत्यत्र तिथिषोडशकं प्रति विरोधः उच्यते द्वादशकपालेष्टाकपालवत् षोडशदिनेषु पञ्चदशदिनानुवाद इत्यविरोधः ।

अत्र-पार्वणेनैव विधिनेत्युक्तं तत्रैकपार्वणंवा किम्वा द्विपार्वणमुत चतुःपार्वणम्वा । तथा हि एकपार्वणं (मत्स्यपुराणे) ततः प्रभृतिसंक्रान्तावुपरागादिकर्मसु । त्रिपिण्डमाचरेच्छ्राद्धमेकोद्दिष्टे मृतेऽहनि । (प्रजापतिरपि) संक्रान्तावुपरागे च वर्षोत्सवमहालये । विनिर्वपति पिण्डास्त्रीनिति प्राह प्रजापतिरिति । द्विपार्वणं तु (कात्यायनः) कर्पूसमन्वितं मुक्त्वा तथाद्यं श्राद्धषोडशम् । प्रत्याब्दिकञ्च शेषे स्युः पिण्डास्युः षडिति स्थितिरिति । चतुः पार्वणमपि (कात्यायनः) कुर्यात्द्वादशदैवत्यं प्रेतपक्षे तु सर्वदा तथा तीर्थे गयायां च एषधर्मः सनातनः । आदौ पिता ततो माता ततो मातामहस्तथा मातामहस्ततो

श्राद्धादिषु पुण्यतमानि । एवं मघास्विन्दपक्षे श्राद्धं कुर्यात्तद-शक्तौ पञ्चम्यादि तदशक्तावष्टम्यादि तदशक्तौ दशम्यादिदर्शपर्यन्तम्। तदशक्तावनिषिद्धे एकस्मिन्दिने वा कुर्यात् । इदं श्राद्धं नित्यं काम्यञ्च । प्रतिपदादिपक्षे तु चतुर्दश्यादिकं न वर्ज्यम् । पञ्चम्यादिदर्शान्तपक्षेषु चतुर्दश्यादिकं वर्ज्यम् । एकस्मिन्दिने क्रियमाणे श्राद्धे प्रतिपत् षष्ठ्येकादशी चतुर्दशी शुक्रवारो जन्मनक्षत्रं जन्मनक्षत्राद्दशमगेकोनविंशं नक्षत्रं रोहिणीमघरेवतीचैतानि वर्ज्यानि । केनचित्त्रयोदशीसप्तमीरविवारभौमवारा वर्ज्या उक्ताः । मृततिथावेव क्रियमाणे श्राद्धे नन्दादितिथिर्न वर्जनीया । द्वादश्यमावास्याष्टमीभरणीव्यतीपातेषु मृततिथ्यभावेऽपि नन्दादिदोषो नज्ञेयः । यतेरेकदण्डिनस्त्रिदण्डिनो वा तत्पक्षद्वादश्यामेव पार्वणं कुर्यात् । तत्पक्षचतुर्दश्यां शस्त्रहतस्यैकोद्दिष्टं कार्यम् । यस्यपित्रादयस्त्रयोऽपिशस्त्रहतास्तेन चतुर्दश्यां पार्वणमेवकार्यम् । चतुर्दश्यां मृतस्यापि चतुर्दश्यां श्राद्धं कुर्यात् । एवं पौर्णमासीमृतस्यापि पौर्णमास्यामेव कुर्यादिति श्राद्धकाशिकाकारः । चतुर्दशीमृतस्य पौर्णमास्यां मृतस्य द्वादश्यमावास्यादिषु कार्य्यमित्यन्ये । अत्र देशाचाराद्व्य-

दद्यात्प्रेतपक्षे तु सर्वदा । तथा (सुमन्तुः) पितृभ्यः प्रथमं दद्यान्मातृभ्यस्तदनन्तरम् । ततो मातामहेभ्यश्च तत्पत्नीभ्यस्तथैव च । गयायाञ्च तथा तीर्थे प्रेतपक्षे विशेषतः । कुर्य्यान्न द्वादशदैवत्यमेकोद्दिष्टमतः परम् । एवं वचनविप्रतिपत्तौ (व्यवस्थोच्यते) तत्रैक पार्वणचतुपार्वणयोर्यथाक्रमं क्षयाहनवमीविषयत्वेन पारिशेषाद्द्विपार्वणमेव पक्षश्राद्धे-ष्ववतिष्ठन्ते । तथा च (वृद्धयाज्ञवल्क्यः) पितापितामहश्चैव तथैव प्रपितामहः । समीहन्ते सुताः सर्वे मातृपक्षे विशेषतः । भुञ्जते विप्रकायेषु पितरोऽन्वहिताः सदा । तस्माद् विप्रान् पितॄन् विद्यात्पितृवत्तान् प्रपूजयेत् । द्विपार्वणं प्रकर्त्तव्यम् विनाश्राद्धं क्षयाहनि । पितरो यत्र पूज्यन्ते तत्र मातामहा ध्रुवम् । तथा च (पुलस्त्यः) मातुःपितरमारभ्य त्रयो मातामहाः स्मृताः । तेषां तु पितृवच्छ्राद्धं कुर्य्युर्दुहितृ सूनवः । (स्कन्दपुराणे)—पार्वणं कुरुते यस्तु केवलं पितृहेतुतः । मातामहं न कुरुते पितृहा सोऽ-
.u इति ।

घोयत। सर्वस्मिन्नपरपक्षइति–पितृगाथाः सदैवात्र गीयन्ते ब्रह्मवादिभिः। कदा नः सन्तानावग्न्यः स कश्चिद् भविता सुतः। पितृपक्षे सदा श्राद्धं पूर्णपक्षे प्रदास्यति तं प्रतीक्षामहे सर्वे सुवृष्टिमिव कर्षकाः। काम्यदायी भवेत्कश्चित्कुलेऽस्मच्छ्राद्धदोनरः। इति। (आदित्यपुराणे)–प्रावृट्ऋतौ यमः प्रेतान्पितॄंश्चापियमालयात्। विसर्जयति मानुष्ये कृत्वा शून्यं स्वकं पुरम्। क्षुधार्ताः कीर्तयन्तश्च दुष्कृतञ्च स्वयं कृतं। कांक्षन्ति पुत्रपौत्रेभ्यः पायसं मधुसंयुतम्। तस्मात्तांस्तत्र विधिना तर्पयेत्पायसेन तु। मध्वाज्यतिलमिश्रेण तथा शीतेन चाम्भसा। भिक्षामात्रेण यः प्राणान्संधारयति वा स्वयम्। श्राद्धं तेनापि कर्तव्यं तैस्तैर्द्रव्यैः सुसंचितैरिति। पञ्चम्यादीति–(ब्रह्मपुराणे)–आश्वयुक्कृष्णपक्षस्य श्राद्धं कुर्याद्दिनेदिने। त्रिभागहीनं पक्षं वा त्रिभागेंत्वर्द्धमेव वा। आश्वयुज्याश्च कृष्णायां त्रयोदश्यां मघासु च। (त्रिभागहीनमिति)–प्रतिपदादिचतुष्टयं चतुर्दशीञ्च पञ्चम्यादि दर्शान्तम्। त्रिभागमितिपक्ष तृतीयभागम्–दशम्यादि दर्शान्तम्। तत्रापि चतुर्दश्यासहदशतिथयोहीना भवन्ति। अर्द्धमिति अष्टम्यादिदर्शान्तम्। (प्राच्यास्तु)। पञ्चम्यूर्ध्वं च तत्रापि दशम्यूर्ध्वं ततोऽप्यति इति विष्णुधर्मोत्तरवाक्यैकवाक्यत्वाय त्रिभागहीनं षष्ठ्यादि त्रिभागमेकादश्यादीत्याहुः। यत्तुतैरर्धमित्यस्य तृतीयभागार्द्धं त्रयोदश्यादीत्येवं व्याख्यानंकृतम्। तत्पक्षमित्यस्यनन्वयदोषापत्तेरुपेक्ष्यं। इति। (कमलाकरः) तथा च (गौतमः)–तथापरपक्षे श्राद्धं पितृभ्योदद्यात्पञ्चम्यादि। दर्शान्तमष्टम्यादि दशम्यादि सर्वस्मिन्वा द्रव्यदेशब्राह्मणसम्भवेकालनियमः शक्तितः इति। एकस्मिन्दिन इति। (पुराणसमुच्चये)–या तिथिर्यस्य मासस्य मृताहे तु प्रवर्तते। सा तिथिः प्रेतपक्षस्य पूजनीया प्रयत्नतः इति। नित्यमिति–(कात्यायनः)–शाकेनापि नापरपक्षमतिक्रमेत्। न वर्ज्यमिति–(कार्ष्णाजिनिः)–नभस्यापरपक्षे तु श्राद्धं कार्यं दिने दिने। नैव नन्दादिवर्ज्यं स्यान्नैवनिन्द्या चतुर्दशीति। नन्वेवं प्रतिपत्प्रभृति-

प्वेकां वर्जयित्वा चतुर्दशीम् इति । (याज्ञवल्क्य) विरोध इति चेन्न । अपरपक्षे श्राद्धं कुर्वीतोर्ध्वं चतुर्थ्यापदहः सम्पयेत श्राद्धं चतुर्दशीमृइति । कात्यायनवाक्यैकवाक्यतयापञ्चम्याद्यष्टम्यादिपक्षविषयत्वेनाप्युपपत्तेः । श्राद्धषोडशकत्वापवादस्यासम्भवात् । अत एवप्रतिपदादिसर्वतिथिश्राद्धेऽपिचतुर्दशीवर्जनीयेति केचनार्वाचीनाग्रन्थाउपेक्ष्याः हेमाद्रिमाधवमदनरत्नादिविरोधादिति । (तथा च मनुः)—कृष्णपक्षे दशम्यादौ वर्जयित्वा चतुर्दशीम् । श्राद्धे प्रशस्तास्तिथयोयथैता नातथेतरा इति । वर्ज्यानीति—(गार्ग्यः)नन्दायाभार्गवदिने त्रयोदश्यां त्रिजन्मसु एषु श्राद्धं न कुर्वीत गृही पुत्रधनक्षयादिति । आद्यदशमैकोनविंशानि त्रिजन्मनक्षत्राणि नतु जन्मभंतत्पूर्वोत्तरेचेति निर्णयसिन्धुकारोक्तम् निर्मूललक्षितलक्षणाप्रसंगादुपेक्ष्यमिति (विष्णुभट्टः) (वृद्धगार्ग्यः)—प्राजापत्ये पौष्णे च पित्र्यर्क्षे भार्गवे तथा । यस्तु श्राद्धं प्रकुर्वीत तस्य पुत्रोविनश्यति । भानौ भौमे त्रयोदश्यां नन्दाभृगुमघासु च । पिण्डदानं मृदास्नानं न कुर्यात्तिलतर्पणमिति ।* मृततिथावेवेति—आषाढ्या पञ्चमे पक्षे कन्यासस्थे दिवाकरे । मृताहनि पितुर्योवै श्राद्धं दास्यति मानवः ।

तिलनिषेधविचारः

*(मरीचिः) सप्तम्यां रविवारे च गृहे जन्मदिने तथा । भृत्यपुत्रकलत्रार्थी न कुर्यात् तिलतर्पणम् । पक्षयोरुभयोराजन् सप्तम्यां निशि सन्ध्ययोः । विद्यापुत्रकलत्रार्थी तिलान् सप्तसु वर्जयेत् । विवाहे चोपनयने चौले सति यथाक्रमम् । वर्षमर्द्धं च च नैव कुर्यात्तिलतर्पणम् । (स्मृत्यर्थसारे) वृद्धौ मन्वां च जन्मासि नैव कुर्यात्तिलतर्पणमिति । (स्कान्दे काशीखण्डे)—रवौ शुक्रे त्रयोदश्यां सप्तम्यां निशि संध्ययोः । [illegible] न कुर्यात्तिलतर्पणम् ।

अयं च तर्पणे तिलप्रतिषेधो वाजसनेयीभिन्नपरः । [illegible] तिलमिश्रमिति कात्यायनीयस्य संमूले) तिलमिश्रमिश्यनेनैव तिलप्राप्तौ—[illegible] [illegible] तीति निगूढे पुनरुद्धरणं [illegible] तिलतर्पणं [illegible] हरिहरादिभिर्व्याख्यातत्वात् । [illegible] [illegible] दिनः । [illegible] तर्पणं कृत्स्नं निषिद्धेषु दिनेष्वपि । तीर्थे तिथिविशेषे च गयायां [illegible] । निषिद्धेऽपिदिने कुर्यात्तर्पणं तिलमिश्रितमिति । अत्र च तिलतर्पणे प्रतिनिधि [illegible] । यदि कुर्यात्तदा कुर्यात्[illegible] (स्मृत्यन्तरात्)

वस्था ज्ञेया। केचित्पूर्णिमायां मृतस्य पूर्णिमायां वार्षिकं कृत्वा अन्यदिने महालयः कार्यइति भणन्ति। अत्र कन्याराशिगतसूर्यः प्राशस्त्यसम्पादकः तुलाक्रान्तश्राद्धकालस्य विहितत्वात्। इदं श्राद्धं पक्वान्नेन कार्य्यं नत्वामान्नादिना एतच्च श्राद्धं मलमासे न कार्यम्। पित्रोर्मरणे प्रथमाब्दे पार्वणश्राद्धं कृताकृतम्। सन्यस्तपितृकादिना जीवत्पितृकेन गर्भिणीपतिना च पिण्डरहितङ्कार्यम्। जीवन्मातृकः सपत्नमातुरेकोद्दिष्टं कुर्यान्नपार्वणम्। यस्यानेकाः सपत्नमातरः तेन सर्वमात्रुद्देशेनैकएव पिण्डोदेयः। अर्घ्यदानन्तु पृथक्पृथक् कर्तव्यम्। गुर्वाचार्यपितृव्यमातुलश्वसुरोपाध्यायभ्रातृसखिप्रियपोषकद्रव्यदत्तपुत्रशिष्यर्त्विगादीनां सस्त्रीणां अपुत्राणां एकोद्दिष्टविधानेन श्राद्धं कुर्यात्। अपरपक्षे केनापि हेतुना श्राद्धं न स्याचदा दीपोत्सवामावास्यायां कार्य्यम्। श्राद्धाङ्गतर्पणं पक्षश्राद्धे श्राद्धानन्तरम् प्रतिदिनं कार्यम्। एकदिनपक्षे परेऽन्हि कार्यम्। माध्यन्दिनैः तद्दिने एव कार्य्यम् शिष्टसमाचारात्। अमावास्यायामपरपक्षे च मृतानां पार्वणमेव नैकोद्दिष्टमिति केचित्। स्त्रीणान्तु क्षयाहादिव्यतिरिक्तश्राद्धेषु पत्या सहैव श्राद्धं कार्यम्। यत्र च मात्रास्वामिचित्यारोहणं कृतं तत्रैकमेवपाकं कृत्वा पितृश्राद्धं पृथक् कृत्वैकबर्हिषि षट्पिण्डान् दद्यात्। विप्रपत्नीं सुवासिनीं वार्षिके भोजयेत्। एकदिनेऽनेकश्राद्धप्राप्तौ पूर्वं पितुः पश्चात् पितृव्यादीनां श्राद्धं कार्य्यम्। चतुर्दश्यां पित्रादित्रयमध्ये एकस्य द्वयोर्वा विषशस्त्राद्युपघातैर्मृतयोः पितृव्यादेर्वा तथाविधस्यैकोद्दिष्ट विधिनैव कार्यम्। पूर्वदिने निमन्त्रणासम्भवे श्राद्धदिने प्रातर्निमन्त्रणम् देयम्। जीवीतपितृकेणापि आश्विनप्रतिपदि माता-

तस्य मयस्मारं पातयन् संमुखः पितरो गुणम् । या तिथिर्यस्य मासस्य मृताहे तु प्रवर्तते । सा तिथिः पितृपक्षे तु पूजनीया प्रयत्नतः । अशक्तः पक्षमध्ये तु करोत्येकदिने यदा । निषिद्धेऽपि दिने कुर्यात् पिण्डदानं यथाविधि इति । (नागरखण्डे)—कात्यायननाम्ना केश्चिदर्वाचीनैर्लिखितानि वचनानि संगच्छन्ते प्रयत्नोपवचनसमानार्थत्वात् । एतान्यनाकराणि महानिबन्धेष्वदर्शनादिति कृत्यरत्नाकरप्रभृत्यर्वाचीनग्रन्था उपेक्ष्याः प्रयत्नोपवचनप्रामाण्यात्) । नन्दादिदोषो न ज्ञेयः—(संग्रहे)—अमापाते भरण्यां च द्वादश्यां पक्षमध्यके । तिथिवारं च नक्षत्रं योगञ्च न विचारयेत् । इति । द्वादश्यामेवेति—(वायुपुराणे)—सन्यासिनोऽप्याब्दिकादि पुत्रः कुर्याद्यथाविधि । महालये तु यच्छ्राद्धं द्वादश्यामेव तद्भवेदिति । (प्रचेताः)—दण्डग्रहणमात्रेण नैव प्रेतो भवेद्यतिः । अतस्तु तेन कर्तव्यं पार्वणं तस्य सर्वदेति । एकोद्दिष्टमिति—(वृहत्पाराशरः)—चतुर्दश्यां तु यच्छ्राद्धं सपिण्डीकरणे कृते । एकोद्दिष्टविधानेन तत्कुर्याच्छस्त्रघातिनाम् । पित्रादयस्त्रयो यस्य शस्त्रघातास्त्वनुक्रमात् । सम्भूत पार्वणं कुर्यादाब्दिकानि पृथक्पृथक् । (अनयैवैकस्मिन्द्वयोर्वैकोद्दिष्टविधिरिति विशेषाभिधानात्त्रयाणां पार्वणमेवेति पुरुषार्थचिन्तामणिकारः) शस्त्रादिहतानां चतुर्दश्यामेकोद्दिष्टमेवेत्यत्र कारणम् । (हेमाद्रौ) यदि प्रेतत्वमापन्नः कदाचित्तत्पिता भवेत् । तस्यार्थे तस्य कर्तव्यम् श्राद्धं तत्र दिने नृप । पितामहाद्यास्तत्रान्हि श्राद्धं नार्हन्ति कुत्रचित् । अथचेद् भ्रान्तितो दद्याद् ध्रियते राक्षसैस्तु तत् । ब्रह्मणो वचनाद्राजन्भूतप्रेतैश्च दानवैः । तेनैकोद्दिष्टमेवात्र कर्तव्यम् नतु पार्वणम् । पितृपक्षे चतुर्दश्यां कन्यासंस्थे दिवाकरे । एतस्मात्कारणाद्राजन्पार्वणं नैव कारयेत् । इति । (श्राद्धकाशिकाकार) इति—(सूतः)—पूर्णिमाप्रभृतिश्राद्धं तस्मात्कुर्याद्विचक्षणः । दिने दिने यज्ञफलं लभते श्राद्धतो नरः । (ब्रह्माण्डपुराणेऽपि)—श्राद्धञ्च पूर्णिमायां च कृत्वा पूर्णफलं लभेत् । प्रतिपद्धनलाभाय द्वितीयार्थाय चापरे । (पुराणसमुच्चयेऽपि)—प्रशस्ताः

पूर्णिमामुख्यास्तिथयः पोडशैवताः। यथा तिलानां तैलञ्च तुल्यं वैरेवतकृष्णयोः। पूर्णिमायाममायां च समं पुण्यफलं द्वयोः। पूर्णपक्षे नभस्यैव पूर्णिमैषां पितृप्रिया। अस्यां दत्तं पितृणां वै तृप्तिः सांवत्सरी भवेत्। सर्वान्कामानवाप्नोति अमायां च यथा यथा। पौर्णमास्यां तथा कुर्वन्श्राद्धं पितृपरायणः। पूर्वापरान्हयोरन्ते यः श्राद्धं कुरुते नरः। नभस्यस्य द्विजश्रेष्ठाः पितरस्तेन पुत्रिणः। पौर्वान्हिकी पौर्णमासी ह्यमा चैवापराह्निकोति (वृद्धयाज्ञवल्क्योऽपि) काम्यकं तिथिकर्तव्यं श्राद्धकर्म द्विजातिभिः। पूर्णिमा श्राद्धदानेन सम्पूर्णफलमश्नुते। कुर्वन्वै प्रतिपच्छ्राद्धं धनमानन्त्यमश्नुते। (वायुपुराणे) -पुष्टिं प्रजां स्मृतिं मेधामित्याद्युपक्रम्य पौर्णमास्याद्यमावास्यान्ततिथिषोडशकम्। पौर्णमास्यांमृतस्य कुत्र कार्यम्। तत्रामावस्यायामित्येके-तत्र तिथ्याश्रयाभावात्। दर्शमृतस्यैव तत्रोचितत्वात्। अतोभाद्रपद्यामेव युक्तम्। तथा च (वृद्धयाज्ञवल्क्यः) पूर्णिमायाममायां वा सदा कन्यां गते रवौ। (तथान्यत्र)-प्रौष्ठपद्याममायां च कन्यां प्राप्ते रवौ सदा। सर्वस्वेनापि कर्तव्यं श्राद्धं या इन्दुक्षोचने इति। पूर्णिमादर्शयोः क्षयाहसंज्ञकत्वात्प्रौष्ठपद्यामपरपक्षदर्शे च पार्वणं कर्तव्यमिति (श्राद्धकाशिकाकृत्) (अन्यइति)-एकपक्षान्तर्गतत्वोपाधिना षोडशसंख्यासामञ्जस्यात्। तुलाकौन्तइति। (हेमाद्रौब्राह्मवचनम्)-यावच्च कन्यातुलयोः क्रमादास्ते दिवाकरः। तावच्छ्राद्धस्य कालःस्याच्छून्यं प्रेतपुरं तथा। कन्यागते सवितरि पितरोयान्ति वै सुतान्। शून्या प्रेतपुरी सर्वा यावद्वृश्चिकदर्शनम्। ततोवृश्चिकसंप्राप्तौ निराशाः पितरोगताः। ततः स्वभवनं यान्ति शापं दत्वा सुदारुणं। इति। (अत्र यद्यप्यविशेषेण गौणः कालः प्रतीयते तथापि हेमाद्रौ यमवचनात् आश्विनशुक्लपञ्चमीपर्यन्तं कालः प्रशस्ततरः। तथा च (यमः) हंसे वर्षासु कन्यास्थे शाकेनापि गृहे वसन्। पञ्चम्योरन्तरे दद्यादुभयोरपिपक्षयोरिति। आमाद्यादिनेति—(प्रचेताः)-मृताहश्च सपिण्डश्च गयाश्राद्धं महालयम्। आपन्नोऽपि न कुर्वीत श्राद्धमामेन कर्हिचित्।

इति। मलमासे न कारयेम् इति—(नागरखण्डे)— नभोवा नभस्योवा मलमासो यदा भवेत्। ससमः पितृपक्षः स्यादन्यत्रैव तु पञ्चमः। इति। तथाच (भृगुः)—वृद्धिश्राद्धं तथा सोमसन्यासं महालयम्। राजाभिषेकं काम्यञ्च न कुर्याद् भानुलंघिते। इति। कृताकृतमिति—अश्विचेयं गयाश्राद्धं श्राद्धं चापरपक्षिकम्। प्रथमेऽब्दे न कुर्वीत कृतेपीह सपिण्डने। अन्यद्वचनम्—अश्विचेयं गयाश्राद्धं श्राद्धं चापरपक्षिकम्। प्रथमेऽब्देऽपि कुर्वीत यदि स्याद्दिकिमान्सुतः। इति। पिण्डरहितमिति—(दक्षः)—मुण्डनं पिण्डदानञ्च प्रेतकर्म च सर्वशः। न जीवत्पितृकः कुर्याद्गुर्विणीपतिरेवचेति। (अन्वष्टक्यमातृवार्षिकादौ तु वचनाद् भवति) एकएव पिण्डोदेयः इति। (स्मृतिदर्पणे)—अनेका मातरो यस्य श्राद्धे चापरपाक्षिके। अर्घ्यदानं पृथक्कुर्यात् पिण्डमेकन्तु निर्वपेत्। इति। एकोद्दिष्टविधानेनेति—आचार्यगुरुशिष्येभ्यः सखिज्ञातिभ्य एव च। तत्पत्नीभ्यश्च सर्वाभ्यस्तथैव च जलाञ्जलीन्। पिण्डांस्तेभ्यस्तदा दद्यात्कन्याभाद्रपदे नरः। तीर्थेषु चैव सर्वेषु माघमासे मघासु च। एकस्मिन्ब्राह्मणे सर्वानाचार्यादीन्प्रपूजयेत्। दश द्वादश वा पिंडान्दद्यादकरणं न तु। नैयोगिको विधिर्नूनं पक्षे वै पञ्चमे स्मृतः। तस्मिन्दत्तं हविर्नूनं पितृणामक्षयं भवेत्। (एकस्मिन्ब्राह्मण इत्यशक्तविषयम्, विप्रासम्भवविषयं वा)—(शातातपः)—अनायगर्भे ज्येष्ठस्य भ्रातुः सद्भिर्निगद्यते—ऋते सपिण्डनात्तस्य नैव पार्वणमाचरेत्। (सुमन्तुः) यस्तु मन्त्रस्य दातास्याद्यस्तु विद्यां प्रयच्छति। गुरुतावपि कुर्वीत तयोर्नैव तु पार्वणमिति। तथा (वृद्धगार्ग्यः)—मातुः सहोदरोयश्च पितुः सहोदरस्तथा। तयोश्च नैव कर्तव्यं पार्वणं पिण्डमादृते इति। (सपिण्डीकरणादृते पार्वणं न कुर्वीत)। दीपोत्सवामावास्यायामिति—येय दीपान्विता राजन् ख्याता पञ्चदशी भुवि। तस्यां दद्यान्नचेद्दत्तं पितृणां वै महालयः इति। परेन्हि इति—(नारदीये)—पक्षश्राद्धं यदा कुर्यात्तर्पणं तु दिने दिने। सकृन्महालये चैव परेऽहनि तिलोदकमिति। परया सहैवेति—

महश्राद्धं फलातिशयप्राप्तये नियमेन कार्यम् । मातामहेन संबद्धः पुत्रिकापुत्रः स मातामहस्यैव नियमेन श्राद्धं कुर्यात् । यदा पत्न्येव भर्तुः श्राद्धकर्त्री श्राद्धदिने रजस्वला भवेत्तदा पञ्चमेऽहनि सा श्राद्धं कुर्यात् । श्राद्धे साग्निकस्यैवाधिकारः । इति (कर्काचार्यः) निरग्निकस्याप्यधिकार इति (हेमाद्रिः) । अपरपक्षे भरण्यां श्राद्धम् प्रशस्तम् इदं पिण्डरहितं कार्य्यम् ।

सकृन्महालये चैव परेऽहनि तिलोदकमिति । पत्यासहैवेति—(जातुकर्ण्यः)—सपिण्डं वर्जयित्वैकं स्त्रीणां नास्ति पृथक् क्रिया । केचिदिच्छन्ति नारीणामन्यत्रापि महर्षय इति।(अन्यत्रान्वष्टकादिष्वपि) (तदुक्तम्)—अन्वाष्टक्यं तथा वृद्धिमातृश्राद्धं मृतेऽहनि । एकोद्दिष्टं तथा मुक्त्वा स्त्रीणां नान्यत्पृथग्भवेदिति—(शातातपोऽपि)—नान्दीमुखाष्टकाश्राद्धे गयायां च मृतेऽहनि । पितामह्यादिभिः सार्धं मातुः श्राद्धं पृथग्भवेदिति। तथा (कार्ष्णाजनिः)—अष्टकादिषु वृद्धौ च गयाश्राद्धे मृतेऽहनि । मातुः श्राद्धं पृथक्कुर्य्यादन्यत्र पतिना सह । अधिकामिनि—(मार्कण्डेयपुराणे)—मातुः श्राद्धं तु संप्राप्ते ब्राह्मणैः सह भोजनम् । सुवासिन्यै प्रदातव्यम्मुनिः शातातपोऽब्रवीत् । भर्तुरग्रे मृता नारी सहदाहेन वा मृता । तस्याःस्थाने नियुञ्जीत विप्रैः सह सुवासिनीमिति । श्राद्धदिन इति । (कूर्मपुराणे)—श्वोभविष्यति मे श्राद्धं पूर्वेद्युरभि पूजयेत् । असम्भवे परेद्युर्वा यथोक्तैर्लक्षणैर्युतान्निति । तथा च देवलः । श्वः कर्ता ति निश्चित्य दाता विप्रान्निमन्त्रयेत् । असम्भवे परेद्युर्वा स्तान्निमन्त्रयेदिति । (योषित्प्रसङ्गिनः पूर्वेद्यु रिति इति व्यवस्था) इति । पञ्चमेऽहनि—

करणारूपस्यात्स्यान्यभिकरणस्यारोपसंहारे साग्निकस्यैव शक्तिर्नेतरस्य–न पैतृयज्ञिणोहोमोलौकिकेऽग्नौ विनागम इति निषेधात्। अत्र च दारसंग्रहपूर्वकत्वमाधानस्याधानपूर्विका च कर्मप्रवृत्तिरित्यतोऽपिनानग्निमतोऽधिकारइति। यच्चूक्तम्। अग्न्यभावेऽपि विप्रस्य पाणावेवोपपादयेदिति तदप्यकृताधानस्याभ्युदयिकविषयम् अनग्निमतोऽपि श्राद्धेऽधिकार इत्येवं विधा प्रसिद्धिस्तु इह पूर्वपक्षस्तिष्ठतीति यदनिश्चितमूलेति नानग्निमतः श्राद्धाधिकारे प्रमाणमिति (हेमाद्रिरिति)–तदिदमनुपपन्नम्। नित्यनैमित्तिकेषु हि यथाशक्नुयात्तथा कुर्य्यादिति न्यायात्सर्वाङ्गोपसंहारायशक्तस्याप्यधिकारात्। अग्न्याभावे तु पाणौ होमविधानात्। अस्य विधानस्य चोक्तविशेषव्यवस्थायाः प्रमाणशून्यत्वात्। सन्ति चाग्नौकरणरहितानि श्राद्धानि तेष्वधिकारनिवृत्तेश्च। स्त्रीशूद्रानुपनीतानामपि श्राद्धोपदेशात्साग्निकानग्निकोभयाधिकारेण विहितं श्राद्धं सिद्धमिति(हेमाद्रिः)सकृन्महालयेदेवताः (संग्रहेउक्ताः)तातांम्बात्रितयं सपत्नजननी मातामहादित्रयं सस्त्रीस्त्रीतनयादि तात जननी स्वभ्रातरस्तत्स्त्रियः तातांम्बाभगिन्यपत्यधनयुग्जायापिता सद्गुरुः शिष्याप्तापितरोमहालयविधौ तीर्थे तथा तर्पणइति। विधवाकर्तृकश्राद्धे विशेषः (संग्रहे)–चत्वारि पार्वणानीह विधवायाः सदैवहि। स्वभर्तृश्वसुरादीनां मातापित्रोस्तथैवहि।। ततोमातामहानाञ्च श्राद्धदानमुपक्रमेत। स्वभर्तृप्रभृतित्रिभ्यः स्वपितृभ्यस्तथैव च। विधवाकारयेच्छ्राद्धं सर्वकालमतन्द्रिता। इति। (लौगाक्षिः) सर्वाभावे स्वयं पत्न्यः स्वभर्तृणाममन्त्रकम्। सपिण्डीकरणं कुर्युस्ततः पार्वणमेव च। (सुमन्तुः)–अपुत्रे प्रस्थिते कर्ता नास्ति चेच्छ्राद्धकर्मणि। तत्र पत्न्यपि कुर्वीत सापिण्ड्यं पार्वणं तथा इति। प्रशस्तमिति–भरणीप्रेतपक्षे तु महती परिकीर्तिता। अस्यां श्राद्धं कृतं येन सगयाश्राद्धकृद्भवेदिति। पिंडरहितमिति—(पुलस्त्यः)–अयनद्वितये श्राद्धे विषुवद्द्वितये तथा। भरणीषु च कुर्वीत पिंडनिर्वपणं नहि।

आश्विनकृष्णाषष्ठी—इयं भौमवारेण, रोहिणीनक्षत्रेण, व्यतिपातयोगेन च युक्ता कपिलाषष्ठी। इयं षष्ठी पूर्वदिने परदिने वा यत्रैवयोगचतुष्टयवती सैव ग्राह्या। अत्र व्रतोपवासादिभिर्ब्राह्मणं पूजयित्वा ब्राह्मणाय कपिलां दद्यात्।

आश्विनकृष्णाष्टमी—अस्यां माध्यावर्षसंज्ञं श्राद्धं आश्वलायनैः कार्यम्। इदं चाष्टकावत्सप्तम्यादि दिनत्रयेऽनुष्ठेयम्। आश्वलायनैर्नाष्टकाशब्देनेह संकल्पः कार्यः। कातीयैरष्टकां करिष्ये इति संकल्पः कार्यः। अस्यामेव महालक्ष्मीव्रतसमाप्तिः।

आश्विनकृष्णानवमी—अस्यामन्वष्टका श्राद्धं कार्यम्। तत्र चत्वारः पार्वणाः कार्याः। इदं श्राद्धं जीवत्पितृकेणापि मृतमातृकेणावश्यं कार्यम्। स्वमातरि जीवन्त्यामपि सपत्नमातॄणां श्राद्धं कार्यम् सर्वासामितिवचनात्। तन्मरणेसति तस्यास्तासां च श्राद्धं कार्यं। नवभिः श्राद्धं धामम्भवेऽनुकल्पविधिः कार्यः। इदञ्चानुपनीतेनापि कार्यं। अनेकमृतमातृकेण सर्वोद्देश्यकं श्राद्धं सहैव कार्यमिति (स्मृति-

कपिलाषष्ठीति—(वाराहपुराणे)—नभस्य कृष्णपक्षेतु रोहिणीपातभूसुतैः युक्ताषष्ठी पुराणज्ञैः कपिला परिकीर्तिता। व्रतोपवासनियमैर्भास्करं तत्र पूजयेत्। कपिलाञ्च द्विजाग्र्याय दत्वा क्रतुफलं लभेदिति। सैवग्राह्ये ति—(निर्णयामृते)—संयोगेतु चतुर्णां तु निर्दिष्टा परमेष्ठिना।

आश्वलायनैरिति—माध्यावर्षं प्रौष्ठपद्याअपरपक्षे इति। कातीयैरिति—तथा (कात्यायनः) प्रथमाष्टकापक्षाष्टम्याम्। इति—(ब्रह्माण्डपुराणे)—आषाढ्याः पञ्चमे पक्षे या च मध्याष्टमी स्मृता। त्रयोदशी गजच्छाया गयातुल्या तु पैतृक इति।

अन्वष्टकाश्राद्धमिति—अन्वष्टकासु च स्त्रीणां श्राद्धं कार्यं तथैव च। पिण्ड निर्वपणं कार्यं तस्यामपि तु सप्तम इति। चत्वारः

दर्पणकार:) प्रत्येकमिति यद्वच: । सामर्थ्यादिभिरन्वष्टक्ये मातृमाता-
महश्राद्धं धेन कार्ये । अन्वष्टकासु तेषां कर्तृविधानात् ।

पार्वणा इति । गयायां पुष्करेचैव मघायान्वष्टकासु च । पितृमुख्येन
कर्तव्यं पार्वणानां चतुष्टयम् ।।जीवत्पितृकेणापीति—(निर्णयामृते)
आन्वष्टक्यं गयाश्राद्धं सम्यां मघामृतेऽहनि । मातु: श्राद्धं सुत:
कुर्यात्पितर्यपि च जीवति । इति । अनुकल्पविधिरिति—(ऋ-
ग्विधाने)-एभिर्दुभिर्जपेन्मन्त्रं शतवारं तु तद्दिने । आन्वष्टक्यं
यदा शून्यं मन्त्रैर्णं याति सर्वयेति । अनुपनीतेनापीति—(मात्स्ये)-
अमावस्यान्वष्टकादिश्राद्धं प्रकृत्य-एभचानुपनीतोऽपि कुर्यात्सर्वेषु
पर्वसु । श्राद्धं साधारणं नाम सर्वकर्मफलप्रदं । भार्याविरहितोऽप्ये-
तत्प्रवासस्थोऽपि नित्यश: । शूद्रोऽप्यमन्त्रवत्कुर्यादनेन विधिना
बुध इति । सहैवेति—(स्मृतिदर्पणेगालव:)-अनेकामातरो यस्य
श्राद्धे चापरपक्षके । अर्घ्यदानं पृथक्कुर्यात्पिंडमेकं तु निर्वपेत् ।
इति । वहवइति—(हेमाद्रौ)-अन्वष्टकासु च स्त्रीणां श्राद्धं कार्यं
तथैव च । पिण्डनिर्वपणं कार्यं तस्यामपितुसत्तम (इतिवचसि-
श्राद्धत्वादेवप्राप्तपिण्डदानस्य पुनर्विधानं यथाजीवत्पितृकगर्भिणी

—(पुराणसमुच्चये)—सर्वासामेव मातॄणां श्राद्धं कन्यागते रवौ । नवम्यां च प्रद-
तव्यं महालयविधौ यत: । पितृमातृकुले नार्योया: काश्चिन् प्रसूता: स्त्रिय: । श्राद्धार्हमा-
तरोज्ञेयास्तासां श्राद्धं प्रदापयेत् । वृद्धौ तु मातृपूर्वं वै श्राद्धं कुर्वीत बुद्धिमान् । अन्वष्ट-
कासु सर्वासु पितृपूर्वं समाचरेत् । तमिस्रपक्षे । नवमी या पुण्या तु नभस्यके । चत्वार:
पार्वणा: कार्या: पितृपूर्वा मनीषिभि: । पितॄणां तु त्रय: पिण्डा मातृपूर्वास्तथा त्रय: । माता-
महानामप्येवं त्रयोमातामहीषु च । एवं कुर्वन् तत: श्राद्धं मातॄणाञ्च न दोषभाक् ।
भवत्येव नरोविप्रा इति ब्रह्मानुशासनम् । इति । उपप्लवे चन्द्रमसोरविश्च गयायां गम-
नागमेषु । अन्वष्टकायाञ्च महोत्सवेषु श्राद्धं क्रिया द्वादशदैवता स्यात् । (वृद्धयाज्ञवल्क्य:)
गयायाञ्च कुरुक्षेत्रे राहुग्रस्ते दिवाकरे । कुर्याद्द्वादशदैवत्यं पार्वणानां चतुष्टयमिति
ननु अन्वष्टकासु नवभि: पिंडै: श्राद्धमुदाहृतम् । पित्रादिमातृमध्यं तु ततोमातामाहा-
न्तिकम् इत्यादिवचनविहितं नव दैवत्वे विरुध्येत (मैवम्) अन्वष्टकादिति बहुत्व-
युक्तस्य त्रित्वे पर्यवसितत्वात्सा भककर्तृक नवदैवत्यमन्वष्टकात्रयविषयं भवितुमर्हति ।
नापरपक्षनवमीविषयम् । अतोद्वादशदैवत्यमपरपक्षनवमीविषयमिति । अन्यथा नवदै-
वत्ये मातॄणां पृथक्त्वेन मातामहादीनामपृथक्त्वेनार्धजरतीयापत्तेरिति) ।

आश्विनकृष्णत्रयोदशी—अस्यां मघायुतायामनिषिद्धद्रव्येण श्राद्धमावश्यकं कार्यम् । पुत्रवता पिण्डरहितङ्कार्यम । अविभक्ता-अपि अत्र श्राद्धं पृथक्पृथक्कार्यम् । करे सूर्ये मघायुता त्रयोदशी तदा गजच्छाया अस्यां श्राद्धे कृते बहुपुण्यप्राप्तिः ।

आश्विनकृष्णचतुर्दशी—अस्यां शस्त्रहतस्यैकोद्दिष्टं कार्यम । यस्यांपित्रादयस्त्रयोऽपि शस्त्रहतास्तेन पार्वणं कार्यम् । येतु शास्त्रानुज्ञात जलाग्निप्रवेशादिनामृतास्तेषां श्राद्धं न कार्यम ।

आश्विनकृष्णामावास्या-अस्यांगजच्छायायोगेश्राद्धं चातिप्र शस्तं ।

पनिरयादिनिमित्तकपिण्डदाननिषेधे प्राप्ते तदपवादार्थं तथा पृथक्पिण्डदानप्राप्त्यर्थं चेति वदन्तः प्रत्येकं ब्राह्मणभोजनपिण्डदानेऽप्याहुः) (सामवेदिभिरिति)–न योषिद्भ्यः पृथक्दद्यादवसानदिनादृते । कर्पूसमन्वितं मुक्त्वातमाद्यं श्राद्धषोडशम् । प्रत्याब्दिकञ्च शेषेषु पिण्डास्युः षडिति स्थितिरिति (छन्दोगपरिशिष्टे)। श्राद्धमावश्यकमिति—(विष्णुधर्मोत्तरे)-प्रौष्ठपद्यामतीतायां तथा कृष्णत्रयोदशी । एतांस्तु श्राद्धकालान् वै नित्यानाह प्रजापतिः । (अत्रसदेतिश्रुतेर्नित्यत्वं प्रतीयते अत्राद्यमात्रश्रुतेः) शंखोक्तः पायसः फलातिशयार्थः (शङ्खः)-प्रौष्ठपद्यामतीतायां मघायुक्तां त्रयोदशीम् । प्राप्य श्राद्धंहि कर्तव्यं मधुना पायसेनचेति । पिण्डरहितमिति—(देवीपुराणे)-भौजङ्गीतिथिमासाद्य यावचन्द्रार्कसंगमः । तत्रापि महतीपूजा कर्तव्या पितृदैवते । अत्रे पिण्डप्रदानन्तु ज्येष्ठपुत्रोविवर्जयेत । (भौजङ्गीपञ्चमी चन्द्रार्कसङ्गमोऽमावास्यापितृदैवते अत्रेमघायां)-पिण्डनिषेधेविशेषमाह (शातातपः)-पिण्डनिर्वापरहितंयस्तु श्राद्धंविधीयते । स्वधावाचनलोपोऽत्रविकिरस्तुप्रलुप्यत इति । अक्षय्यदक्षिणास्वस्तिसौमनस्यमथास्त्विति । अविभक्तामपीति—(श्राद्धचिन्तामणौ)-विभक्ता अविभक्ता वा

त्पुः श्राद्धमदैविकम् । मघासु च तथान्यत्र नाधिकारः पृथग्विनेति।
जच्छायेति—(स्मृतिः)–नभस्यापरपक्षे मघास्थिन्दुः करे रविः। यदा
दा गजच्छाया श्राद्धेपुण्यैरवाप्यत इति। करे हस्तनक्षत्रेकन्याद
मांशोपरिसपादत्रयोविंशतिदिनंयावत् अत्रदशमदिवसे मघायु
त्रयोदशीसत्वेपरदिवसे मघासत्त्वेऽपि न कुंजरच्छायायोगः। यो
ामघात्रयोदश्यां कुंजरच्छायसंज्ञितः । भवेन्मघासंस्थे च शशिन्य
करेस्थिते । इत्यत्रमघापदद्वयवैयर्थ्यापत्तेर्मघात्रयोदशीनिमि
कश्राद्ध एव कुञ्जरच्छायस्यगुणफलत्वविधानात्।

एकोद्दिष्टमिति—(मरीचिः)–समत्वमागतस्यापि पितुः शस्त्र
तस्य वै। एकोद्दिष्टं तु कर्तव्यं चतुर्दश्यां महालये। (समत्वमाग
स्यसपिण्डीकृतस्य) (मार्कण्डेयः)–युवानः पितरो यस्य मृताः
स्त्रेण वा हताः। तेन कार्यं चतुर्दश्यां तेषां तृप्तिमभीप्सिता इति।
ह्मवैवर्ते)–युवानस्तु गृहे यस्य मृतास्तेषां प्रदापयेत्। शस्त्रेण
हतायेवै तेभ्यो दद्याच्चतुर्दशीम्। (मरीचिः)–विषशस्त्रश्वापदा
तिर्य्यग्ब्राह्मणघातिनाम्। चतुर्दश्यां क्रियाकार्यायेषां मृत्युर्विग
तः। इति। नकार्यमिति—(शाकटायनः)–जलाग्निभ्यां विपन्नानां
न्यासं गृहेऽपि वा। श्राद्धं कुर्वीत तेषां वै वर्जयित्वा चतुर्दशीम्।
ति। (अतएवपतिमरणानन्तरविहिताग्निप्रवेशनमृतानां स्त्रीणा
पि चतुर्दश्यांश्राद्धनकार्यमिति फलितोऽर्थः। गजच्छाया (कुंजरच्छा
इति। (निर्णयसिन्धौयमः) हस्ते करस्थिते या तु अमावस्या
रान्विता। सा ज्ञेया कुंजरच्छाया इतिबोधायनोऽब्रवीत्। वन
तिगते सोमे छाया या प्राङ्मुखीभवेत्। गजच्छाया तु सा प्रोक्ता
स्यां श्राद्धं प्रकल्पयेत्। जीवत्पितृकेणापीति—(निर्णयप्रदीपे)
तिपद्याश्विनेशुक्ले दौहित्रस्त्वेकपार्वणम्। श्राद्धं मातामह कु
ीत्सपिता संगवे सदा। जातमात्रोऽपि दौहित्रो जीवत्स्वपि च
। प्रातः संगवयोर्मध्ये आश्विनस्य प्रतिपद्भवेत्। (यमः) स
प्रतिसंवत्सरं नरैः। मातापित्रोःपृथक्कार्यमे
मृतेऽहनि। (शङ्खः)–अमावास्यायां चयोयस्य प्रेतपक्षेऽ

दौहित्रप्रतिपत्। अस्यांजीवत्पितृकेणापिमातामहश्राद्धं नियमेन कार्यं। पराणवतिश्राद्धानि—निरग्निकोवैश्वदेवंआदौकुर्य्यात्साग्निकस्त्वंते। श्राद्धे आशौचादिनाविघ्नेसमुत्पन्ने श्राद्धकालाः। आशौचान्त्यः १ दर्शः २ कृष्णैकादशी ३ शुक्ला ४ प्रतिसांवत्सरश्राद्धम् आशौचान्त्ये मलमासेऽपि कार्य्यम्।

थवापदि। पार्वणं तस्य कर्तव्यं नैकोदिष्टं कदाचनेति। पराणवति श्राद्धानीति—अमा १२ युग ४ मनु १४ क्रान्ति १२ धृति १३ पात १३ महालयाः १६ अष्टका ४ अन्वष्टका ४ पूर्वेद्युः श्राद्धैर्नवतिरत्र पद्। वैश्वदेवमिति—(यज्ञपार्श्वपरिशिष्टे)-यदाश्राद्धं पितृभ्यस्च दातुमिच्छत्यनग्निमान्। वैश्वदेवं ततः कुर्यान्निवृत्ते श्राद्धकर्मणि। अकृत्वा पैतृकं श्राद्धं वैश्वदेवं करोति यः। अकृतं तद्भवेच्छ्राद्धं पितॄणां नोपतिष्ठते। वैश्वदेवं पुरा कृत्वा श्राद्धम् तच्छेषपाकतः। कुर्यादेवाग्निमान् विप्रो ह्येष धर्मः सनातनः। मासपक्षतिथिस्पृष्टे योपस्मिन्म्रियतेऽहनि। प्रत्यब्दे तु तथाभूतं तथाहं तस्य तं विदुः। मासश्चान्द्रएवग्राह्यः। आशौचान्त्यइति—(ऋष्यशृङ्गः)-आब्दिके चैव संप्राप्ते आशौचं जायते यदि। आशौचव्यतिक्रान्ते च तत्र श्राद्धंविधीयते। दर्शइति—(गोभिलः)-वार्षिक्यादिके श्राद्धे त्वन्तरा मृतसूतके। आशौचानतरं कुर्य्यात्तन्मासेन्दुक्षयेऽपि च। कृष्णैकादशीति—(मरीचिः)-श्राद्धविघ्ने समुत्पन्नेऽप्यविज्ञातेमृतेऽहनि। एकादश्यां तु कर्तव्यं कृष्णपक्षे

श्राद्धशब्दार्थः—(पाराशरोक्तः)-देशे काले च पात्रे च श्रद्धया विधिना च यत्। पितॄनुद्दिश्यविप्रेभ्योदत्तं श्राद्धमुदाहृतम्। प्रेतान्पितॄंश्च निर्दिश्य भोज्यं यत्प्रियमात्मनः। श्रद्धया दीयते यत्र तच्छ्राद्धं परिकीर्तितम् (यमस्मृतौश्राद्धफलं) आयुः पुत्रान्यशः स्वर्गं कीर्तिं पुष्टिं बलं श्रियम्। पशून्सौख्यं धनं धान्यं प्राप्नुयात्पितृपूजनात्। श्राद्धदत्तं (हेमाद्रौ) देवोयदि पिताजातः शुभकर्मानुयोगतः। तस्यान्नममृतं भूत्वा देवत्वेऽप्यनुगच्छति। गान्धर्वे भोगरूपेण पशुत्वे च तृणं भवेत्। श्राद्धान्नं वायुरूपेण नागत्वेऽप्यनुगच्छति। पानं भवति यक्षत्वे राक्षसत्वे तथामिषम्। दानवत्वे तथा मांसं प्रेतत्वे रुधिरम्। मानुषत्वेऽन्नपानादि नानाभोगरसोभवेदिति।

॥ वेदेषुश्राद्धप्रतिपादनम् ॥

(शतपथे)—अथ पुरस्तादुल्मुकं निदधाति सयदनिधायोल्मुकमथैतत्पितृभ्यो दद्यात् असुराराक्षसानि ह्येषामेतद्विमथीरन्तस्मात्पुरस्तादुल्मुकं निदधाति। (अथर्ववेदे) १। ३४। ये निखाता ये परोप्ता ये दग्धायेचोद्धृताः। सर्वांस्तानग्न आवह पितॄन्हविषे अत्तवे। (यजुर्वेदे) १९। ६७। येचेहपितरोयेचनेहयांश्चविद्मयांश्चनप्रविद्म। त्वं वेत्थयतितेजातवेदःस्वधाभिर्यज्ञंसुकृतञ्जुषस्व। १९।७०। उशन्तस्त्वानिधीमह्युशन्तः समिधीमहि। उशन्नुशतआवहपितॄन्हविषेअत्तवे। येअग्निदग्धायेअनग्निदग्धामध्येदिवः स्वधयामादयन्ते। त्वंतान्वेत्थयतितेजातवेदः स्वधयायज्ञंस्वधितिजुषन्ताम्। य०१९।६१ योऽग्निःकव्यवाहनःपितॄन्यक्षदृतावृधः। प्रेदुहव्यानिवोचतिदेवेभ्यश्चपितृभ्यआ। १९। ५८ आयन्तुनःपितरस्सौम्यासोऽग्निष्वात्ताःपथिभिर्देवयानैः। अस्मिन्यज्ञेस्वधया मदन्तोऽधिब्रुवन्तुतेऽवन्त्वस्मान्। अथर्ववेदे—१८। ४। ८०। ७९ स्वधापितृभ्यः पृथिवीषद्भ्यःस्वधापितृभ्योअन्तरिक्षषद्भ्यः। स्वधापितृभ्योदिविषद्भ्यः। १९-३। पुनन्तुमापितरःसौम्यासःपुनन्तुमापितामहाःपुनन्तुप्रपितामहाः। पवित्रेणशतायुषा। पुनन्तुमापितामहाःपुनन्तुप्रपितामहाः। पवित्रेणशतायुषाविश्वमायुर्व्यश्नवै। य० २। ३३। आधत्तपितरोगर्भंकुमारंपुष्करस्रजम्। यथेहपुरुषोसत्। गृह्यसूत्रे—आधत्त पितरोगर्भमितिमध्यमं पिण्डं पत्नी प्राश्नीयात्। इति।

॥ पात्राणांशुद्धिप्रकारः ॥

तत्र लेपरहितानां दारुमयाणामश्ममयानां च लेपंविनोच्छिष्टपुरुषादिस्पृष्टानां जलेन प्रक्षालनाच्छुद्धिः। सलेपानामेतेषां सलेपोच्छिष्टादिपुरुषस्पृष्टानां तक्षणात्प्रक्षलनाच्च शुद्धिः। सलेपानामेतेषां लेपं विनोच्छिष्टपुरुषादिस्पृष्टानामुष्णोदकेन प्रक्षालनाच्छुद्धिः। लेपसहितानां दारुमयाणामश्ममयानां च काकादिमुखावमृष्टानां तक्षणाच्छुद्धिः। लेपरहितानां तृणोदकेनप्रक्षालनात्। एवं मार्जारव्यतिरिक्तश्वापदमुखावमृष्टानामपिचाण्डालादिस्पर्शे विण्मूत्राद्युपहत्योस्तु सर्वत्र परित्यागएव। सलेपानां सौवर्णराजतकांस्यताम्रमयाणां यथाक्रममुष्णोदकगोशकृद्भस्माम्लैः शुद्धिः। सलेपानां सौवर्णराजतव्यतिरिक्तानां पात्राणां काकादिमुखावमृष्टानां शूद्रसंस्पृष्टानां च तक्षणात्प्रक्षालनाच्चशुद्धिः। एवं शूद्रोपभुक्तानामलेपानामपि। सौवर्णराजतानां तु दाहादुष्णोदकेन प्रक्षालनाच्चशुद्धिः। एतेषां चाण्डालादिस्पर्शे गोमूत्रे सप्तरात्रं संस्थापनाद्दाहादुष्णोदकेन प्रक्षालनाच्चशुद्धिः। नूतनानां मृण्मयानां विनालेपमुच्छिष्टपुरुषादिस्पृष्टानां जलेन प्रक्षालनम्। आज्यलिप्तानामुच्छिष्टपुरुषादिस्पृष्टानां पुनर्दाहः। सलेपानामुच्छिष्टपुरुषादिस्पृष्टानां मूत्रपुरीषाद्युपहतानां च परित्यागएव।

॥ द्रव्याणां शुद्धिप्रकारः ॥

कृष्णाजिनस्य लेपंविनोच्छिष्टस्पर्शे गोमयोदकेन प्रक्षालनम्। सलेपोच्छिष्टस्पर्शे गौरसर्षपपिष्टैर्गोमयेन मृद्दोषोणोदकेनच शुद्धिः। विण्मूत्राद्युपहतावप्येवम्। घनायाभूमेर्विण्मूत्राद्युपहतौ गोमयेनोपलेपनम्। ससुषिरायाः कर्षणम्। आर्द्रायामेध्यमृदाप्रच्छादनम्। अशुद्धायां भूमौ न्यस्तानां प्रक्षालनम्। पुरुषप्रमाणां काष्ठशिलेष्टकानां चाण्डालादि-

विशेषत । शुक्लेति—(पृथ्वीचन्द्रोदये)—तदहश्चेन्मुच्येत केन-चित्सूतकादिना । सूतकानन्तरं कुर्य्यात्पुनस्तदहरेवचेति । मल-मासेऽपीति—(श्राद्धचिन्तामणौ)—प्रतिसांवत्सरश्राद्धमाशौचात्प-तितं च यत् । मलमासेऽपि तत्कार्य्यमिति भागुरिभाषितम् । आ-शौचात्पदिनत्वेननिमित्तत्वात् ।

औरसउत्पन्नेदत्तकस्यांशनिर्णयः

(वसिष्ठः)—शुक्रशोणितसंभवः पुरुषो मातापितृनिमित्तकस्तस्य प्रदानविक्रयपरित्यागेषु मातापितरौ प्रभवतो नत्वेकंपुत्रं दद्यात् प्रतिगृह्णीयाद्वा सहिसंतानाय पूर्वेषां नतु स्त्रीपुत्रं दद्यात्प्रतिगृह्णीयाद्वाऽन्यत्रानुज्ञानाद्भर्तुः पुत्रंपरिग्रहीष्यन्बन्धूनाहूय राजनि चावे-द्य निवेशनस्य मध्ये व्याहृतिभिर्हुत्वा अदूरबान्धवं बन्धुसन्नि-कृष्टमेवप्रतिगृह्णीयात्संदेहेचोत्पन्नेदूरबान्धवम् शूद्रमिव स्थापये-द्विज्ञायते ह्येकेन बहूंस्त्रायन्तामिति तस्मिंश्चेत्प्रतिगृहीत औरसउत्पद्येत चतुर्थभागभागीस्याद्दत्तक इति । अन्यत्रानुज्ञाना-द्भर्तुरिति । इदञ्चभर्तृ सत्वे । अन्यथासाऽपिप्रतिगृह्णीयात् । दत्तक-पुत्रपरिग्रहपद्धतिश्चकृत्यप्रकरणेलेखिष्यामः ।

स्पृष्टानां प्रक्षाल्यविशोषणम् । यज्ञार्थं शूद्रादिभिराहृतानां दर्भकाष्ठादीनां पवमानानु-वाकेन प्रोक्षणाच्छुद्धिः । एकपुरुषाहारपरिमितानां व्रीहियवगोधूमादीनां विण्मूत्राद्युपहतौ परित्यागः । अधिकानां तु यावत्र उपहतिर्भवति तावतएवोत्सर्गंकृत्वाऽवशिष्टानां प्रोक्षण-खण्डनक्षालनानि कार्याणि । फलीकृतानां तण्डुलानां पाणिभ्यां निर्मलीकरणप्रोक्षण-प्रक्षालनानि । होमार्थस्य चर्वादेः केशकीटपतङ्गादिभिरुपघाते परित्यागएव । सर्पिषस्तै-लस्य चोच्छिष्टस्पर्शोदके तत्पात्रं निधायोद्धृत्योपयोजयेत् । मधुपयोदध्यादीनां तस्मा-त्पात्रादन्यस्मिन्पात्रे उद्धृत्योपयोगः कार्य्यः । एतेषां लेपसम्बन्धेपरित्यागएव । परित्याग-व्यतिरिक्ते सर्वत्र पवमानानुवाकप्रोक्षणस्य समुच्चयः । सर्पिरादीनां तद्वत्केशकीटादिभिः संसर्गे तमुद्धृत्य पर्य्यग्निकरणवस्त्रादिभिर्गालनं पवित्राभ्यां तूष्णीमुत्पवनं च कार्य्यम् । एवं काकादिभिरवघातेष्वपि । विण्मूत्राद्युपहतौ तु परित्यागएवेति ।

इति आश्विनापरपक्षकृत्यनिर्णयः

॥ प्रसङ्गाज्जननाशौचनिर्णयः ॥

जननभेदा। स्रावः पातः प्रसूतिश्च। स्रावे मातुः मासत्रयपर्य्यन्तं त्रिरात्रम् चतुर्थे चतुरात्रम्। पित्रादीनां स्नानादेव शुद्धिः। पातेमाससंख्यया गर्भिण्या आशौचम्। पित्रादीनां त्रिरात्रं। प्रसूतौ मातुः पित्रादिसपिण्डानां पूर्णमाशौचम्। विप्राणां दशाहम्। क्षत्रिये द्वादशाहम्। वैश्यानां पञ्चदशाहम्। शूद्राणां मासम्। संकरजातीनां शूद्रवत्। सर्ववर्णेषु दशाहं वा। जननाशौचे गर्भिण्या-दशाहमस्पृश्यत्वम्। कन्योत्पत्तौ मासं पुत्रोत्पत्तौ विंशतिरात्रम्

भेदाइति—(मरीचिः)—आचतुर्थाद्भवेत्स्रावः पातः पञ्चमषष्ठयोः। अत ऊर्ध्वं प्रसूतिः स्याद्दशाहं सूतकं भवेत्। स्रावे मातुस्त्रिरात्रं स्यात्सपिण्डाशौचवर्जनम्। पाते मातुर्यथामासं पित्रादीनां दिनत्रयमिति। (आशौचगङ्गाधर्य्याम्)—तृतीयमासस्य समापनात्प्राग्गर्भस्य पाते वनिता त्रिरात्रं। स्पृश्या न तुर्ये तु चतुर्दिनं स्यात्स्नानुः सपिण्डास्तु चतुर्ष्वमीषु। पंचममासे पतने स्त्रीणामस्पृश्यता तु पंचाहम्। षष्ठे तु षड्दिनं स्यादनयोर्मासोस्त्र्यहं सपिण्डानाम्। गतेषु षट्सु मासेषु स्नानं सोदके मानवाः। कुर्युरित्यूचिवान्भट्टरघुनाथाह्वयः सुधीः। मासात्सप्तमतोजनौ दशदिनं ज्ञेयं स्त्रियाः सूतकं पित्राद्येषु सपिण्डकेषु गदितं सप्ताहकं सप्तमे। मासेष्टाहमथाष्टमे नवमतः पूर्णं समत्राधिकं (समःसर्वपर्य्यायः) कन्यायास्तनयस्य वा प्रसवने स्नानं सचैलं पितुः। कर्मानधिकारइति—पुत्रस्य जन्मे सति सूतिकायाः प्रसूतितोविंशतिवासराणि। कर्माधिकारोनहि कन्यकाया जनौ तु पूर्णानि ३०, दिनानि यावत्। अधिकारइति—यावत्सूतकमस्पृश्या माता प्राक्स्नानतः पिता। अन्येषां तु सगोत्राणामस्पृश्यत्वं न सूतकं। सापत्नमातुः पितृवदितिगौडाश्चापिरे। शिशुः स्पर्शेऽपि नोदोषइत्याह (कमलाकरः)। प्रथमे पञ्चषष्ठे दशमे च दिने पिताधिकारी स्यात्। तद्विहितकृतनिवहे

कर्मानधिकारः । पितुः सपत्नमातुश्च स्नानात्प्रागस्पृश्यत्वम् । जातकर्मणि दाने वा नालछेदनात्पूर्वं पितुरधिकारः । एवं षष्ठदशमदिनेषु दाने जन्मादिपूजने चाधिकारः । जननिमित्तमस्पृश्यत्वम् मातापित्रोरेव न सर्वेषां सपिण्डानाम् । कूटस्थमारभ्य सप्तपुरुषपर्यन्तं सपिण्डाः । ततः सप्तसोदकाः । ततः सप्तसगोत्राः । आरब्धकर्मणि आशौचप्राप्तौ न दोषाय नान्दीश्राद्धे कृतेऽपि आशौचप्राप्तौ न दोषाय । पदार्थसिद्धौ आशौचत्वे कुष्माण्डीभिर्हुत्वा शुद्धिः । यथाविधिनिमंत्रणास्वीकारानन्तरमाशौचप्राप्तौ न दोषः ।

विप्राणां तत्प्रतिग्रहेऽधिकृतिः । सपिण्डा इति—कूटस्थप्रभृतिस्तु सप्तमपरो ज्ञेयः सपिण्डाह्वयस्तस्मात्सप्ततु त चतुर्दशपरास्तेसोदकाख्याः स्मृताः । ये स्युः पंचदशात्तु सोदकसगोत्रास्ते स्ववंशस्थताज्ञानं यावदतः परं तु मनुजाये गोत्रजास्तेमताः । सोदकानां त्रिरात्रेण शुद्धिः सोदकगोत्रजे । एकाहाद्गोत्रजानां तु स्नानाच्छुद्धिः प्रकीर्तिता इति । आरब्ध इति—व्रते विवाहे हवने जपे च श्राद्धे मखे चेश्वरपूजनेऽपि । आरम्भिते सूतकमेव नास्ति चेदनारम्भित एव सर्वम् । आरम्भणं स्यान्मधुपर्कएव यज्ञे विवाहे किल वृद्धिसञ्ज्ञम् । श्राद्धे च तद्ब्रतसत्रयाश्च संकल्पनं पैत्रमखे च पाकः । (पैत्रमखः श्राद्धपाकप्रोक्षणं) अकृते मधुपर्केतु ऋत्विजां स्यादशौचकम् । जपानुष्ठानकेऽप्येवमिति शास्त्रस्य निश्चयः । यज्ञे विवाहे ह्युपनीति चौले नान्दीमुखं स्वर्गदशाङ्गरामैः । दिनैश्चरेत्पूर्वमथो यदा तु नारम्भता तत्र दिनान्तरं सत् । पदार्थसिद्धाविति—सामग्रिकायाः किल सिद्धतायामाशौचकाले समुपस्थिते तु । कूष्माण्डसंज्ञैर्मनुभिश्च हुत्वा सर्पिर्द्विजाग्र्याय सवत्सधेनुम् । दत्वा परं माङ्गलिकं च सर्वमन्नादिदानं परगोत्रिहस्तात् । चेद्भोजनार्थं ऋषिणा प्रवृत्तिरन्नोदकं सर्वमपास्य विप्राः । आपान्ताः सुखान्यशोपेन शुद्धा यस्मिन्नन्ने पूर्वसंकल्पिते तु । दोषो नास्तीत्याह सूरिः

॥ अथ ग्रहणनिर्णयः ॥

पर्वप्रतिपत्सन्धौ राहुणा सूर्य्यचन्द्रमसोर्ग्रसनम् ग्रहणम् । पर्वणोरन्ते यावत्काले ग्रहणारम्भः प्रायः प्रतिपदादिमे भागे तावद्देवगते काले मोक्षः । अतः आरम्भावसानमध्यगतः कालः पुण्यतमस्तत्रादावन्ते च सचैलस्नानविधिरिति । ग्रहणारम्भः स्पर्शकालः । पर्वप्रतिपदोः सन्धिर्मध्यकालः । प्रतिपदादिमे मोक्षः । जननमरणनिमित्ताशौचसत्वेऽपि स्नानादिकं कार्य्यम् । स्नानं उदक्यापि कार्य्यम् । स्नानेन ग्रहणनिमित्तमाशौचमपि निवर्त्यम् । होमदान

सुरेज्यस्तस्माद्विप्रै भोजनीयं सुखेन । (यद्देवा देवहेडनमित्यादयो मन्त्राः कूष्माण्डीसंज्ञकाः) । निमन्त्रणमिति—(निर्णयतत्त्वे)-निमन्त्रणस्वीकरणोत्तरं चेदाशौचिनः स्युः किल भूमिदेवाः । कर्त्ता च तत्पाकविधौ निवृत्ते स्वाशौचवांश्चेन्नहि दूषणाय ।

सन्धाविति—(वृद्धगार्ग्यः)-पूर्णिमाप्रतिपत्सन्धौ राहुः सम्पूर्णमण्डलम् । ग्रसते चन्द्रमर्कं च दर्शप्रतिपदन्तरे । (ब्रह्मसिद्धान्ते)-यावान्कालः पर्वणोन्ते तावान्प्रतिपदादिमः । रवीन्दुग्रहणानेहा स पुण्यामिश्रणाद्भवेत् । अन्यत्र—ग्रहणयोग उक्तः । पदकाष्टकवोप्यथ सप्तमे वा द्विदादशे वा तमसायुतो वा राकावशेषे ग्रहणं सुधांशोर्दर्शावशेषे कमलैकबन्धोः । (हेमाद्रिः)-ग्रस्यमाने भवेत्स्नानं ग्रस्ते होमो विधीयते । मुच्यमाने भवेद्दानं मुक्तेस्नानं विधीयते । (शङ्खः)-वापीकूपतडागेषु गिरिप्रस्रवणेषु च । नद्यां नदे देवखाते सरस्यापूद्धृताम्बुनि । उष्णोदकेन वा स्नायात् ग्रहणे चन्द्रसूर्ययोः । तथा च (व्यासः)-आदित्यकिरणैः पूतं पुनः पूतं च वह्निना । अतोव्याध्यातुरः स्नायाद् ग्रहणेऽप्युष्णवारिणा । (स्नानविचारस्तु स्मृतन्यायतत्त्वग्रहीपजविधाने द्रष्टव्यः) सचैलमिति—(वृद्धवसिष्ठः) सर्वेषामेव वर्णानां सूतकं राहुदर्शने । सचैलं च भवेत्स्नानं शृतमन्नं च वर्जयेत् । (ब्रह्माण्डपुराणे)-ग्रहणं शावमाशौचं विमुक्तो मौतिक

वदे वार्चनमपि । स्नानद्वयमध्यएव कार्यम् । ग्रहणे रात्रावपि स्नानादिकं कार्यम् । तत्काले स्वापादिकं न कार्य्यम । चन्द्रग्रहणात् पूर्व यामत्रये न भुञ्जीत । सूर्य्यग्रहणात्पूर्व यामचतुष्टये न भुञ्जीत। चन्द्रस्य ग्रस्तोदये पूर्व दिवा न भुञ्जीत । दिवैवग्रासससंभावितत्वात् । सूर्यस्य यदि सायं सन्ध्यायां ग्रहणं तदा पूर्वस्मिन्नहनि उत्तरस्यां रात्रौ च न भोक्तव्यम । चन्द्रस्य ग्रहणं प्रातः सन्ध्यायां तदा पूर्वरात्रौ उत्तरस्मिश्चान्हि न भोक्तव्यम । मुक्तिं दृष्ट्वा भुञ्जीत । यश्च काम्योपवासः स ग्रहणादिने गृहस्थैर्न कार्य्यः । चन्द्रग्रस्तास्ते उत्तरदिने सन्ध्याहोमादौ न दोषः । वेधकाले ग्रहणे वा पक्वान्नं त्याज्यम् । काञ्जिकादिग्रहणकाले कुशान्तरायं कृत्वा ग्राह्यम् । ग्रहणकालस्थितजलपाने प्रायश्चित्तविधानात् जलमपि त्याज्यम । ग्रहणे श्राद्धं चावश्यमेव कार्य्यम् । तच्चामेन हेम्ना वा । रविवारे सूर्य्यग्रहणं सोमवारे सोमग्रहणं चेत्तदा चूडामणियागः । ग्रहणदिने वार्षिकश्राद्धप्राप्तौ आमेनान्नेन हेम्ना वा तद्दिनएव कार्यः। जन्मराश्यादौ यस्य ग्रहणं तेन शान्तिः कार्य्या। गर्भिणीपटं विना ग्रहणं न पश्येत् । सूर्य्यग्रहे मन्त्रारम्भणं कुर्य्यात् चन्द्रग्रहे तु न । मङ्गलकार्य्ये इन्दुग्रहे द्वादश्यादितृतीयान्तोवेधः । सूर्य्यग्रहे एकादश्यादिचतुर्थ्यन्तोवेधः । खण्डग्रहे त्र्यहं वर्जयेदिति ।

स्मृतम् । तयोः संपत्तिमात्रेण उपस्पृश्य क्रियाक्रमः । (स्पर्शस्य सपिण्डमरणवदाशौचमिति तत्वोक्त्या विमुक्तेश्च प्रसवनवदुक्त्या यथा जननमरणशौचयोः सचैलस्नानादेवनिवृत्तिस्तद्वत्तामेव च कर्माधिकारस्तथात्रापि ज्ञेयम् । इति। अशौचसत्वेऽपि इति–चन्द्रसूर्य्यग्रहे स्नायात्सूतके मृतके तथा । अस्नायी मृत्युमाप्नोति स्नायी पापं न विन्दति । सूतके मृतके चैव न दोषो राहुदर्शने।

नाचरेत्र भवेन्मुक्तिर्यावन्मुक्तिर्न दृश्यते इति। उदक्यापीति—स्नाने नैमित्तिके प्राप्ते नारी यदि रजस्वला। पात्रान्तरिततोयेन स्नानं कृत्वा व्रतं चरेत्। ग्रहणनिमित्तमिति—अशौचं जायते नृणां ग्रहणे चन्द्रसूर्य्ययोः। राहोः स्पर्शे तयोः स्नात्वा दानादौ कल्पते नरः। मध्यइति—(ब्रह्मवैवर्त्ते)-स्नानं स्यादुपरागादौ मध्ये होमः सुरार्च्चनम् इति। रात्रावपीति—(देवल:)-यथास्नानं च दानं च सूर्य्यस्य ग्रहणे दिवा। सोमस्यापि तथा रात्रौ स्नानं दानं विधीयते। स्वापादिकमिति (शिवरहस्ये) सूर्य्येन्दुग्रहणे यावत् तावत्कुर्य्याज्जपादिकम्। न स्वपेन्नच भुञ्जीत स्नात्वा भुञ्जीत मुक्तयोरिति। (वृद्धवसिष्ठः) त्रिदशाः स्पर्शसमये तृप्यन्ति पितरस्तथा। मनुष्या मध्यकाले तु मोक्षकाले तु राक्षसाः। "अत्रकेचिदाहुःस्पर्शसमये देवपितृतृप्त्यभिधानात्तत्साधनमविरोधात्सर्वं पितृदैवत्यं कर्मकार्य्यमिति" (तदयुक्तं) स्नानं स्यादुपरागादौ मध्येहोमः सुरार्च्चनमिति ब्रह्मवैवर्त्तवचनेन होमदेवार्च्चनयोर्मध्ये विधानात्। ग्रस्यमाने भवेत्स्नानं ग्रस्ते होमो विधीयते। मुच्यमाने भवेद्दानं मुक्ते स्नानं विधीयते। तस्माद्धोमदेवपूजाव्यतिरिक्तविषयमेतत् इति (हेमाद्रिः)। यामत्रये इति—(महाभारते)-अर्वाग्यामत्रयादिन्दोर्ग्रहणे भुजिमाचरेत्। चतुर्य्यामादधश्चैव राहुग्रस्ते दिवाकरे इति। तथा च (वृद्धवासिष्ठः) सूर्य्यग्रहे तु नाश्नीयात्पूर्वं यामचतुष्टयम्। चन्द्रग्रहे तु यामांस्त्रीन्बालवृद्धातुरैर्विनेति। बालवृद्धातुरविषये (मत्स्यपुराणे) विशेषः। अपरान्हे न मध्यान्हे मध्यान्हे न तु संगवे। भुञ्जीत चेत्संगवे स्यान्नपूर्वं भुजिमाचरेत्। (आतुरादिग्रहणात्पूर्वं याममात्रे भोजनं न कुर्य्यादित्यर्थः)। ग्रस्तोदयेइति—ग्रस्तोदये विधोः पूर्वं नाहर्भोजनमाचरेत्। (मार्कण्डेयः) चन्द्रस्य यदि वा भानोर्यस्मिन्नहनि भार्गव। ग्रहणं तु भवेत्तस्मिन्तत्पूर्वं भोजनं नरः। नाचरेत्सग्रहे चैव तथैवास्तमुपागते। यावत्स्यात्तोदयस्तस्य नाश्नीयात्तावदेव तु। मुक्तिं दृष्ट्वा तु भुञ्जीत स्नानं कृत्वा ततः परमिति। (स्मृत्यन्तरे) सन्ध्याकाले यदा राहुर्ग्रसते शशि-

भास्करौ। तदा दिवा न भोक्तव्यमातुरस्त्रीशिशून्विना। इति (वृद्ध-गार्ग्यः) सन्ध्याकाले यदा राहुर्ग्रसते शशिभास्करौ। तदहनैव भुञ्जीत रात्रावपि कदाचन। तथा च (विष्णुधर्मोत्तरे) अहोरात्रं न भोक्तव्यं चन्द्रसूर्य्यग्रहो यदा। मुक्तिं दृष्ट्वा तु भोक्तव्यं स्नानं कृत्वा ततः परमिति। ग्रस्तावेवास्तमानं तु रवीन्दू प्राप्नुतो यदि। परेद्युरुदये स्नात्वा शुद्धोऽभ्यवहरेन्नृपः। अत्र स्नात्वा शुद्धइत्युक्त्या-शुद्धमंडलदर्शनकालिकस्नानात्पूर्वमशुद्धिप्रतिपादनाज्जलापहरणादिकं शुद्धबिम्बोदयकालिकस्नानात्पूर्वं न कार्य्यमितिभातीति (धर्मसिन्धुकारः)। गृहस्थैर्न कार्य्यइति—(नारदः)-सङ्क्रान्त्यामुपवासं च कृष्णैकादशिवासरे। चन्द्रसूर्य्यग्रहे चैव न कुर्य्यात्पुत्रवान्गृहीति। सन्ध्याहोमादावीति—(उशनाः)-ग्रस्ते चास्तं गते त्विन्दौ ज्ञात्वा मुक्त्यवधारणम्। स्नानहोमादिकं कार्य्यं भुञ्जीतेन्दूदये पुनः। (एतदनाहिताग्निविषयम्) । सूर्य्यग्रस्तास्ते चन्द्रग्रस्तोदये आहिताग्निमान्वाधानं विधाय जलेन व्रतं कार्य्यम् न तु भोजनम्। चन्द्रग्रस्तास्ते उत्तरदिने सन्ध्याहोमादौ न दोषः। तत्राल्पकालेन शास्त्रतोनिश्चये मुक्त्यनन्तरं स्नात्वा होमादिकं कार्य्यम् (इति-धर्मसिन्धौ)। त्याज्यमिति—(मन्वर्थमुक्तावल्याम्)-अन्नं पक्वमिह त्याज्यं स्नानं सवसनं गृहे। वारितकारनालादितिलदर्भैर्नदुष्यति। (जलेत्वदोषोगाङ्गविषयइति (कमलाकरः)) सर्वेषामेव वर्णानां सूतकं राहुदर्शने। स्नात्वा कर्माणि कुर्वीत शृतमन्नं विवर्जयेत्। जलमपीति—ग्रहोपितं जलं पीत्वा पादकृच्छ्रं समाचरेदिति। (वृद्धवसिष्ठः) ग्रहणे श्राद्धमिति—सर्वस्वेनापि कर्तव्यं श्राद्धं वै राहुदर्शने। अकुर्वाणस्तु नास्तिक्यात्पङ्के गौरिव सीदति। (प्रजापतिस्मृतौ) श्राद्धकालाः—वृद्धौ क्षयेऽन्हिग्रहणे युगादौ महालये श्राद्धममासुतीर्थे सूर्य्यक्रमे पर्वसु वैधृतौ च रुचौ व्यतीपातगतिप्रकासु। द्रव्यस्य संपत्सु मुनीन्द्रसर्गे काम्येषु मन्वादिषु सद्व्रतं स्यात्। छायासु मातङ्गभवासु नित्यं श्राद्धस्य कालः स च सर्वदोक्तः। (शातातपः) आपद्यनग्नौ तीर्थे च चन्द्रसूर्य्यग्रहे तथा।

आमश्राद्धं द्विजोद्यात्कृत्रीद्यात्मदैव हि । (बौधायनः) अन्नाभावे द्विजाभावे प्रवासे पुत्रजन्मनि । हेमश्राद्धं गृहाद्वा न कुर्याच्छूद्रः सदैव हि । चूडामणिरिति (व्यासः) रविग्रहः सूर्यवारे सोमे सोम ग्रहस्तदा । चूडामणिरिति व्यासस्तदानन्तफलं भवेदिति । वारे-ष्वन्येषु यत्पुण्यं ग्रहणे चन्द्रसूर्ययोः । तत्पुण्यं कोटिगुणितं ग्रासे चूडामणौ स्मृतमिति । हेम्नेति—(गोभिलः)-दर्शे रविग्रहे पित्रोः प्रत्याब्दिकमुपस्थितम् । अन्नेनासम्भवे हेम्ना कुर्य्यादामेन वा सुतः । (आमश्राद्धंमकुर्वीत मासमंवत्सरादृते । इत्यादिवचनानि तानि ग्रहणदिनातिरिक्तविषयाणीति (निर्णयसिन्धुकारः) यथाह-तिथौ ग्रहणे सति भोक्त्रभावादुद्विजोऽप्यामेन हेम्ना वा प्रत्याब्दिकं कुर्य्यात् भोक्तृसम्भवे तु पकान्नेनैव कुर्य्यादिति (निर्णयामृतकारः) शान्तिरिति—(मात्स्ये)—यस्य राशिं समासाद्यभवेद् ग्रहणस म्भवः । स्नानं तस्य प्रवक्ष्यामि मन्त्रौषधिसमन्वितमित्यादि। पटे-विनेति—सर्वैः पटस्थितं वीक्ष्य स्वस्थं तैलाम्बुदर्पणैः । ग्रहणं गु-र्विणी जातु न पश्येत पटं विना इति । मन्त्राद्यारम्भणमिति—सूर्य्यग्रहणकालेन समोनान्यः कदाचन । न मासतिथिवारादिशो-धनं सूर्य्यपर्वणि । चन्द्रग्रहेतु या दीक्षा या दीक्षा व्रतचारिणाम् । वनस्थस्य च या दीक्षा दारिद्र्यं सतजन्मसु । इति । वेधइति—द्वादश्यादितृतीयान्तोवेधइन्दुग्रहे स्मृतः । एकादश्यादिकः सौरे चतुर्थ्यन्तः प्रकीर्तितः । ग्रस्तं खण्डग्रहे तयोरिति ।

॥ अथाश्विन–  –शुक्लप्रतिपद् ॥

अस्यां महामायाराधनम् । उदयव्यापिन्यां ⊛नवरात्रारम्भः । अमायुक्तायां प्रतिपदि न कार्य्यः । यदा पूर्वाह्णेऽगत्रं व्याप्यापरत्र

महामायेति—महतीमाया विश्वनिर्माणशक्तिर्यस्याः सा महामाया। कालिकापुराणअ०६। गर्भान्तर्ज्ञानसम्पन्नं प्रेरितं सूतिमारुतैः। उत्पन्नं ज्ञानरहितं कुरुते या निरन्तरम्। पूर्वातिपूर्वसंसद्संस्कारेण नियोज्य च। आहारादौ ततोमोहं ममत्वं ज्ञानसंशयम्। क्रोधोपरोधलोभेषु चिप्त्वा चिप्त्वा पुनःपुनः। पश्चात्कामे नियोज्याशु चिन्तायुक्तमहर्निशम्। आमोदयुक्तं व्यसनासक्तं जन्तुं करोति या। महामायेति सा प्रोक्ता तेन सा जगदीश्वरीति। उदयव्यापिन्यामिति—(नन्दिपुराणे)-शरत्काले महापूजा क्रियते या च वार्षिकी। सा कार्य्योदयगामिन्यां न तत्र तिथियुग्भवेत्। इति। (भविष्योत्तरे) प्रातरावाहयेद्देवीं प्रातरेव प्रवेशयेत्। प्रातः प्रातस्तु सम्पूज्य प्रातरेव विसर्जनम्। तथा (देवीपुराणे) भगवत्याः प्रवेशादि विसर्गान्ताश्च याः क्रियाः। तिथावुदयगामिन्यां सर्वास्ताः कारयेद्बुधः। इति। अमायुक्तायामिति—सामयासहिता

⊛॥ अथ नवरात्रविचारः ॥

नवरात्रपदं कर्मनामधेयं तत्प्रख्यन्यायात्—नवरात्रशब्दस्य गुणविधित्ववादिनापि तदन्तर्गतोरात्रिशब्दः। अहर्गणनामधेयद्विरात्रनवरात्रान्तर्गतरात्रिशब्दवत् न सावनाहोरात्रपरः स्वीकार्यः। मतस्य प्रतिपदादिनवम्यन्तत्वबोधकानेकशास्त्रदर्शनेन तिथि ह्रासवृद्ध्योर्नित्यत्वात् तावदहोरात्रसाध्यत्वासम्भवात्। अहर्गणेतु तादृशातिथिसाध्यत्वाभावात्। अतोलक्षणया रात्रिशब्दस्तिथिपरः स्वीकार्यः। तत्रापि न यत्किञ्चित्तिथ्यात्मकगुणविधिसम्भवः—नियततावत्संख्यातिथिप्रापकेन अनेन शास्त्रेण शास्त्रान्तरेण वा विरोधापत्तेः। येनैव अवश्यापेक्षणीयतिथि विशेषप्राप्तिः तेनैव तावत्संख्यतिथिविशेषप्राप्तिसम्भवे पुनस्तत्प्रापणस्याप्रवृत्तिविशेषकरत्वाच्च। अतः शास्त्रान्तरसिद्धां तच्छास्त्रसिद्धां वा तिथिगतां तत्साध्यप्रधानकर्मगतां वा संख्यां निमित्तीकृत्याहर्गणनामधेयनवरात्रशब्दवन्नामधेयत्वमेव स्वीकार्यं। अन्यथास्मिन्काले

ग्राह्या न कदाचिदिति स्मृतेः । यथोक्तमकरीयस्मात्तस्मात्तां परिवर्जयेत् । अमावास्यायुता कुर्यादि कश्चित्कदाचन राज्यनाशमवाप्नोति पशुत्वं चाभिगच्छति । मुहूर्त्तमात्रा कर्त्तव्या द्वितीयादिगुणान्विता । न दर्शकलया युक्ता प्रतिपच्चण्डिकार्च्चने । उदये द्विमुहूर्त्तापि ग्राह्या सोदयगामिनी । द्विमुहूर्त्तापि कर्त्तव्या या तिथिर्वृद्धिगामिनी । कुहूकाष्ठोपसंयुक्तां यत्नेनाप्रतिपत्तिथिम् । राज्यनाशाय सा प्रोक्ता निन्दिता चाश्वपूजने । इति । द्वितीयानिषेधवाक्यानीति—(धव-

नवरात्रं कुर्यादिति उक्तानेकधर्मोपगतनिर्देशानुवृत्तेश्च । नच रात्रिपदे तिष्यादिलक्षणाभ्युपगमोऽपि मीमांसकैस्तत्प्रख्यन्यायेन स्वीकृतनामत्वेपुद्गरासमिदादिपदेषु लक्षणास्वीकारदर्शनात् । गुणविधित्ववादिनापि निथिलक्षणास्वीकाराच्च । अस्ति च नामत्वमाहकं सामानाधिकरण्यं नवरात्रव्रतमिति । यत्रापि नवरात्रे इदं कुर्यादिति मन्त्रमीतिदेशस्तत्रापि पूर्वेद्युरमावास्यायां यदि करोति निषिद्धकर्मतामेवेत्यलं । यदप्युक्तं देवीपुराणवाक्ये सम्पूज्य नक्तं कुर्यादिति नक्तस्य विशेष्यत्वं प्रतीयते । तथापि पूजनमेव प्रधानकर्म । एकभक्तादिकन्तु ज्योतिष्टोमे पयोव्रतादिवत्कर्तृसंस्कारद्वारापूजनाङ्गमिति बोध्यम् । पूजाया एव नित्यकाम्याधिकारविधिभ्यां प्राधान्यबोधनात् । नित्यविधिस्तावत् वर्षे वर्षे विधातव्यं स्थापनञ्च विसर्जनमित्यत्र स्थापनप्रभृतिविसर्जनान्तपूजाया नित्यत्वं बोध्यते । वसन्ते वसन्ते ज्योतिषा यजेदितिवत् । तथा (कालिकापुराणे) योमोहादथवालस्याद् देवीं दुर्गां महोत्सवे । न पूजयति दुष्टात्माद्वेषाद्वाप्यथ भैरव । क्रुद्धा भगवती तस्य कामानिष्टान्निहन्ति च इति । काम्यत्वमपि—(तत्रैव)—एवमन्यैरपि सदा देव्याः काले (कार्य्यं) प्रपूजनम् । विभूतिमतुलां लब्धुं चतुर्वर्गप्रदायकमिति । नक्तादेः कर्तृसंस्कारद्वारा पूजनाङ्गत्वं चोक्तं (देवीपुराणे)—कन्यासंस्थे रवौ शुक्लामारभ्य नन्दिकाम् । अयाची ह्यथवैकाशी नक्ताशी ह्यथवा यते । इति प्रक्रम्य त्रिकालं पूजयेद्देवीं जपस्तोत्रपरायण इति अत्र त्रिकालपूजनमुक्तम् तथापि रात्रिपूजनमेव प्रधानं । आश्विने मासि मेघान्ते महिषासुरमर्दिनीं । निशासु पूजयेद्भक्त्या सोपवासादिकः क्रमात् । तथा रात्रिव्रतमिदं देवि सर्वपापप्रणाशनम् । सर्वकामप्रदं नृणां सर्वशत्रुनिबर्हणमित्यादिभ्यो विशिष्य रात्रिपूजाया एवोपवासादि विशेषवेन फलसन्धि वेन च बोधकेभ्यो देवीपुराणवचोभ्यः महानिबन्धकर्तृभिर्हेमाद्रिमाधवादिभिरपि नवरात्रव्रतस्यामुनैवाशयेन नक्तव्रतत्वं वदद्भिरुक्तवचनानां प्रामाण्यस्वीकारसूचनाच्च । न च नक्तभोजनाभिप्रायात्तेषां नक्तव्रतत्वोक्तिः उपवासादिकल्पान्तरविधिवलेन तस्य पाक्षिकत्वादुक्तदिशा तस्य अङ्गत्वाच्च । दृश्यते चाष्टमीपूजा महानिबन्धेषु रात्रिकर्तव्यताविधिः । कन्यासंस्थे रवावीषे या शुक्लातिथिरष्टमी । तस्यां रात्रौ पूजितव्या महाविभवविस्तरैरिति । अतोऽत्र रात्रिपूजाप्रधानत्वादङ्गञ्च नक्तैकभक्तादितादृशनवरात्रिसाध्यपूजा समुदायस्य च नवरात्रपदं नामधेयम् इति सिद्धम् । अतएव तिथिह्रासे द्वयोः पूजयोस्तन्त्रेणानुष्ठानमिति दिक् ।

मुहूर्तादिपरिमिता तिष्ठति तदा पूर्णत्वात्पूर्वेव ग्राह्या—धवलनिबन्धोक्त द्वितीयानिषेधवाक्यानि अत्रैव योज्यानि। सूर्योदयादनन्तरं दशघटी मध्ये तत्रासम्भवेऽभिजिन्मुहूर्ते प्रारम्भः कार्य्योनत्वपराह्णे । प्रतिपद् आद्यषोडशघटिकानिषेधचित्रावैधृतियोगनिषेधः सति सम्भवे पालनीयो नतु निषेधानुरोधेन पूर्वाह्णः कालः प्रतिपत्तिथिर्वातिक्रमणीयः। द्वितीयायुता चित्रावैधृतियुतापि चेत्सा ग्राह्या। कल-

लनिबन्धे) अमायुक्तैव सा ग्राह्या प्रतिपच्चण्डिकार्च्चने। अन्यथा करणे तावद्राज्यभङ्गः प्रजायते। तथा (नृसिंहप्रासादे) अमायुक्तैव कर्तव्या प्रतिपच्चण्डिकार्चनं। न ग्राह्या परसंयुक्ता शुद्रसन्तानकाङ्क्षिभिरिति। दशघटीमध्यइति—(विष्णुधर्मे) भास्करोदयमारभ्य यावत्तु दशनाडिकाः। प्रातः कालइति प्रोक्तः स्थापनारोपणादिषु। (देवीपुराणे) आश्विनस्य सिते पक्षे प्रतिपत्सु यथाक्रमम्। सुस्नातस्तिलतैलेन पूर्वाह्णे पूजयेच्छिवाम्। अभिजिन्मुहूर्तेइति। सम्पूर्णा प्रतिपद्देव चित्रायुक्ता यदा भवेत्। वैधृत्या चापि युक्ता स्यात्तदा माध्यन्दिने रवौ। अभिजित्तु मुहूर्ते यत्तत्र स्थापनमिष्यते इति। नत्वपराह्णइति—योयस्य विहितः कालः कर्मणस्तदुपक्रमे। विद्यमानो भवेदङ्गं नोज्झितोपक्रमेण तु। उदिते दैवतं भानौ पित्र्यं चास्तमिते रवौ। द्विमुहूर्तं त्रिरन्हश्च सा तिथिर्हव्यकव्ययोरिति। देवीपूजायाः देवकार्य्यत्वात् पूर्वाह्णएव।

(मंमहे)—आश्विने मासि मेघान्ते प्रतिपद्यातिथिर्भवेत्। तस्यां नक्तं प्रकुर्वीत रात्रौ देवीं प्रपूजयेत्। रात्रिरूपा यतो देवी दिवारूपोमहेश्वरः। रात्रिव्रतमिदं देवि सर्वपापप्रणाशनम्। सर्वकामप्रदं नृणां सर्वशत्रुनिवर्हणम्। रात्रिव्रतमिदं तस्य रात्रौ कर्तव्यनेष्यते। नक्तव्रतमिदं तस्मादन्यथा नरके गतिः। इत्यादिपूर्वोक्तवचनैरात्रिपूजाप्यभिहिता। पूर्वाह्णे पूजयेच्छिवामितिवचनेन पूर्वाह्णे पूजनम् विहितम्। त्रिकालं पूजयेद्देवीं जपस्तोत्रपरायणइतिवचनात्त्रिकालपूजा च विहिता। एवमेतेषां वचनानां परस्परविरोधे कुत्र पूजनङ्कार्य्यमितिविचारे व्यवस्था—प्रातर्मध्याह्नयोः संक्षेपपूजा अन्नादिविस्तरपूजनं रात्रौ। इति। प्रातः प्रथमपूजनम्। कलशस्थापनपूर्वकंदेवीस्थापनं पूजनञ्च ततोऽन्ये।

शस्थापनं प्रातर्मध्यान्हे प्रदोषे वा कार्य्यं नतु रात्रौ, तत्र तन्निषेधात् । अत्र चतुर्वर्णानां म्लेच्छादीनामप्यधिकारः । हेमादिनिर्मितायां प्रतिमायां यथाविभवविस्तरैः त्रिकालं द्विकालं एककालं वा स्वस्वकुलानुसारेण नवमीपर्यन्तं भगवती आराध्या । स्वस्याशक्तौ अन्यद्वारा पूजा कारयितव्या । विस्तृतपूजाकरणाशक्तौ सङ्क्षेपेण पूजा सम्पाद्या ।

षोडशनिषेधइति—आद्याः षोडशनाड्यश्च लब्ध्वा यः कुरुते नरः । कलशस्थापनं तत्र अरिष्टं जायते ध्रुवम्इति । चित्रावैधृतियोगनिषेधइति—त्वाष्ट्रवैधृतियुक्ताचेत्प्रतिपच्चण्डिकार्चने । तयोरन्ते विधातव्यं कलशारोपणं गृहे । तथा (रुद्रयामले)-वैधृतौ पुत्रनाशः स्याच्चित्रायां धननाशनम् । तस्मान्नस्थापयेत्कुम्भं चित्रायां वैधृतौ तथा । (वाजिनीराजनांगभूतकलशस्थापनविषयोऽयंनिषेधः) आरभ्य नवरात्रं स्यात्प्रतिपच्चाश्विने सिते । वाजिनीराजनं पश्चाद्धित्वा चित्रां च वैधृतिं । इत्यश्वशास्त्रीयवचनसंवादात् । आश्वयुक् शुक्लपक्षे तु स्वातीयोगे शुभेदिने । ······नवमीयावदेवहि । इति ब्राह्मवचने स्वातीयोगएव तद्विधानात् । ततोनीराजनं कर्म प्रतिपद्याश्विनेसिते प्रारभ्य नवरात्रंस्याद्धित्वा चित्रां च वैधृतिम् इतिनिर्णयशिरोमणिवचनेन स्फुटमेव तन्निषेधविषयान्तरव्यापनाच । कात्यायनेन चित्रावैधृतियोगे विशेषउक्तः । प्रतिपद्याश्विने शुक्ले भवेद्वैधृतिचित्रया । आद्यपादौ परित्यज्य प्रारभेन्नवरात्रकम् । (भविष्ये)-चित्रावैधृतिसंयुक्ता प्रतिपच्चेद्भवेन्नृप । त्याज्या सा- शास्त्रपरस्याद्यास्तुरीयांशे तु पूजनम् इति । द्वितीयायुतेति—(दुर्गोत्सवे)-भद्रान्वितापेऽप्रतिपत्तु लभ्यते विरुद्धयोगैरपि संगता मता । मैत्रपुराणे विबुधैर्विधेया आयुःश्रीराज्यादिविवृद्धिहेतुः । तन्निषेधादिति—(मात्स्ये)-न रात्रौ स्थापनं कार्यं न च कुम्भाभिषेचनमिति । अधिकार इति—(भविष्योत्तरे)-एवंचविन्ध्यवासिन्यां नवरात्रोपवासतः । एकभक्तेन नक्तेन स्वशक्त्यायाचितेन

न वा । पूजनीया जनैर्देवी स्थानेस्थाने पुरेपुरे । गृहेगृहे भक्तिपरैर्ग्रामे ग्रामे वनेवने । स्नातैः प्रमुदितैर्हृष्टैर्ब्राह्मणैः क्षत्रियैर्नृपैः । वैश्यैः शूद्रैर्भक्तियुतैः म्लेच्छैरन्यैश्च मानवैः । *स्त्रीभिश्च कुरु शार्दूल तद्विधानमिदं शृणु इति । हेमाद्रिनिर्मितायामिति—(देवीपुराणे)—हेमराजतमृद्धातुचैलचित्रार्पितापि या खड्गे शूलेऽर्चिता देवी सर्वकामफलप्रदा । तथा-मृण्मयीं प्रतिमां कृत्वा बिल्वे वा यस्तु पूजयेत् । आत्मवित्तानुसारेण सलभेन्मौक्तिकं फलमिति । (मृण्मयीप्रतिमाचेत्तत्रैव मण्डले दार्वादिमयासने स्थाप्या—सौवर्ण्यादि प्रतिमाचेत्तस्याः "पूजामण्डलकुम्भस्थेतिदेवीपुराणे कुम्भापर्य्येव पूजाविधानान्न तत्पूजनार्थं पृथगासनसम्पादनम् ।)" सा च याम्यास्याच्छुभदा दुर्गा पूर्वास्याज्जयवर्द्धिनी । पश्चिमाभिमुखीनित्यं न स्थाप्या सौम्यदिङ्मुखीति वचनेन उत्तराभिमुखम् विहाय स्थाप्या । प्रतिमालक्षणं च (मात्स्ये)—जटाजूटसमायुक्तामर्धेन्दुकृतलक्षणाम् । लोचनत्रयसंयुक्तां पद्मेन्दुसदृशाननाम् । अतसीपुष्पवर्णाभां सुप्रतिष्ठां सुलोचनां । नवयौवनसम्पन्नां सर्वाभरणभूषिताम् । सुचारुदशनां तद्वत्पीनोन्नतपयोधराम् । त्रिभङ्गस्थानसंस्थानां महिषासुरमर्दिनीम् । त्रिशूलं दक्षिणे दद्यात्खड्गं चक्रं क्रमादधः । तीक्ष्णं बाणं तथा शक्तिं वामतोऽपि निबोधत । खेटकं पूर्णचापं च पाशमङ्कुशमूर्द्धजम् । घण्टां वा परशुं वापि वामतः सन्निवेशयेत् । अधस्तान्महिषं तद्वद्विशिरस्कं प्रदर्शयेत् । शिरश्छेदोद्भवं तद्वद्दानवं खड्गपाणिनम् । हृदि शूलेन निर्भिन्नं निर्यदन्त्रविभूषितम् । रक्तरक्तीकृताङ्गं च रक्तविस्फारितेक्षणम् । वेष्टितं नागपाशेन भ्रुकुटी भीषणाननम् । सपाशवामहस्तेन धृतकेशं च दुर्गया । वमद्रुधिरसिक्तं च देव्याः सिंहं प्रदर्शयेत् । देव्यास्तु दक्षिणं पादं समं सिंहोपरिस्थितम् । किंचिदूर्ध्वं तथा वाम-

* ॥ अधिकारविचारः ॥

नतु नात्र स्त्रीशूद्राणामधिकारः संगच्छते नतरां म्लेच्छानां । (लैङ्गे)—शारदीया महापूजा चतुःकर्ममयी शुभा । इति स्नपनपूजनबलिदानहोमरूपचतुःकर्मात्मकत्वेन पूजायानिर्देशात् । तेषां च कर्मणां तत्तत्पौराणमन्त्रसाध्यत्वात् । श्रावयेच्चतुरोवर्णान्कृत्वा ब्राह्मणमग्रतइति शूद्रस्य श्रवणमात्रविधानेन पौराणमन्त्रोच्चारणे अधिकाराभावात् ।

॥ नवरात्रव्रताशक्ताधिकारिका अनुकल्पाः ॥

सप्तरात्रं तृतीयादिनवम्यन्तम् । पञ्चरात्रं पञ्चम्यादिनवम्यन्तम् । त्रिरात्रं सप्तम्यादिनवम्यन्तम् । द्विरात्रं अष्टम्यादि । एकरात्रपक्षो द्विविधः—केवलाष्टम्यां केवलनवम्यां वा । एषां पक्षाणां स्वस्वकुलानुसारेण व्यवस्था । पुत्रवताष्टम्यां उपवासो न कार्यः । इयं पूजा शुक्रास्तादावपि कार्या । मलमासे तु वचनाभावान्न भवतीति (कमलाकरः) अत्र दुर्गापाठकुमारीपूजनादीनि दिनवृद्ध्या कार्य्याणि । पूज्यकन्यालक्षणादीनि (शतचण्डीयज्ञविधानस्य द्वितीयखण्डे द्रष्टव्यानि). शारदीयपूजाकाले स्तोत्रश्रवणं चावश्यकम् । प्रारब्धे

जयेत्पूजयीत वा इति । सङ्क्षेपेणेति—(कालिकापुराणे)—सम्यक्कल्पोदितां पूजां यदि कर्तुं न शक्नुयात् । उपचारांस्तथा दातुं पञ्चैतान्वितरेत्तदा । गन्धं पुष्पं च धूपं च दीपं नैवेद्यमेव च । अभावे तोयपुष्पाभ्यां तदभावे तु भक्तितः । सङ्क्षेपपूजा कथिता तथा वस्त्रादिकं पुनरिति । अनुकल्पाः (भविष्ये) आश्विने मासि शुक्ले तु कर्तव्यं नवरात्रकम् । प्रतिपदादिक्रमेणैव यावच्च नवमी भवेत् । त्रिरात्रं वापि कर्तव्यं सप्तम्यादियथाक्रमम् । अथवा नवरात्रं तु सप्तपञ्चत्रिकादि वा एकभक्तेन नक्तेनायाचितोपोषितैः क्रमात् । सप्तरात्रमिति—(रुद्रयामले)—दुर्गोत्सवे स्मृतं देवि उपवासस्य सप्तकम् । अष्टमे दिवसे होमस्ततः किंचित्तु भक्षयेत् । पञ्चरात्रमिति—(भविष्ये)—एकभक्तस्तु पञ्चम्यां षष्ठ्यां नक्तं प्रवर्तयेत् । अयाचितस्तु सप्तम्यामष्टम्यां तु उपोषितः । नवम्यां पारणं कुर्य्यात्पञ्चरात्रमितीरितम् इति । त्रिरात्रमिति—(भविष्ये)—व्रती सम्पूजयेद्देवीं सप्तम्यादिदिनत्रयम् इति । द्विरात्रमिति—अष्टम्यां च नवम्यां च जन्ममोक्षप्रदां शिवाम् । पूजयित्वाश्विनेमासि विशोकोजायते नरः । केवलाष्टम्यामिति—(वाह्ये)—तथाष्टम्यां भद्रकाली दक्षयज्ञविनाशिनी । प्रादुर्भूता महाघोरा योगिनी को-

टिभिः सह । अतोऽर्थं पूजनीया सा तस्मिन्नहनि मानवैरिति। केवलनवम्यामिति—लब्धाभिषेका वरदा शुक्ले चाश्वयुजस्य च। तस्मात्सा तत्र सम्पूज्या नवम्यां चण्डिका बुधैरिति (पुराणान्तरे)- तस्मादियं महापुण्या नवमी पापनाशिनी । उपोष्या तु प्रयत्नेन सततं सर्वपार्थिवैः । पार्थिवग्रहणं नवरात्राशक्तमात्रोपलक्षणार्थ— पूजितव्या नवम्यां तु देवदानवराक्षसैः । गन्धर्वैरुरगैर्यक्षैः पूज्यते किन्नरैरपि। इतिभविष्योत्तरवचस्युपवासशेषिभूतायाः पूजायाः केवलनवम्यांसर्वाधिकारत्वेन विधानात्। केचित्तु कल्पत्वस्पष्ठ्यादिकल्पोऽप्यनुकल्पइत्याहु । बोधयेद्बिल्वशाखायां षष्ठ्यां देवीं फलेषु च। सप्तम्यां बिल्वशाखायां तामाहृत्य प्रपूजयेदित्यादि। तदसत्— अत्रानुकल्पद्योतक वाशब्दाद्यभावेऽनारब्धनवरात्रव्रतं कुमार्य्यामिव पत्रिकायामपि पूजाविधिप्रतीतेः इति। पुत्रवतेति— (कालिकापुराणे)-उपवासं महाष्टम्यां पुत्रवान्न समाचरेत् । यथा तथैव पूतात्मा व्रते देवीं विसर्जयेदिति । शुक्रास्तादावपीति । (धर्मप्रदीपे)-नष्टे शुक्रे तथा जीवे सिंहस्थे च बृहस्पतौ । कार्य्या चैव स्वदेव्यर्चा प्रत्यब्दे कुलधर्मत इति । दिनवृद्ध्येति—(देवीपुराणे)-यदाद्ये दिवसे कुर्य्याच्चण्डिकापूजनादिकं । द्विगुणं तु द्वितीयेऽह्नि त्रिगुणं तत्परेऽहनि । नवमीतिथिपर्य्यन्तं वृद्ध्या पूजाजपादिकं । एकोत्तरविवृद्ध्या तु नवमीं यावदेव तु । चण्डीपाठं जपेच्चैव जापयेद्वा विधानतः । (स्कान्देविशेषः) । एकैकां पूजयेत्कन्यामेकवृद्ध्या तथैव च । द्विगुणं वापि प्रत्येकं नवकं नवकं तु वा । नवभिर्लभते भूमिमैश्वर्यं द्विगुणेन तु । एकवृद्ध्या लभेत्क्षेममेकैकेन श्रियं लभेदिति । स्तोत्रश्रवणमिति । बलिप्रदाने पूजायामग्निकार्य्ये महोत्सवे। सर्वं ममैतच्चरितमुच्चार्यं श्राव्यमेव च।

॥ अथोच्चारणश्रवणविचारः ॥

मार्कण्डेयपुराणस्थदेवीवचसि सामान्यतः उच्चारणश्रवणे बलिप्रदानाद्यंगत्वेन विकल्पेन विहिते तथापि उक्तशारदपूजाकाले श्रवणमेव कार्यम् । शरत्काले महापूजा क्रियते या च वार्षिकी । तस्यां ममैतन् माहात्म्यं श्रुत्वा भक्तिसमन्वितः । सर्वबाधाविनिर्मुक्तो धनधान्यसुतान्वितः । मनुष्यो मत्प्रसादेन भविष्यति न संशय इति तत्रैव-

विशेषवचनात्। एतन्नियमबलेनैव पूर्ववाक्यस्थ चकारस्य वा शब्दार्थे व्याख्यातुमुचितत्वात्। नवैतौ सामान्यविशेषविधिभूतौ तरजपादिविषयाविति शंक्यम्। बलिप्रदान इति धर्म्मीभिः सहपाठेन समस्या च स्तोत्रपाठादेः पूजाविधेयस्य प्रतीतया तत् कालीकल्पनाभात्। चण्डी पाठः मन्त्रे चण्डीतिवत्। श्रवणञ्च ब्राह्मणेनैव कारणीयम्। प्रदत्तं वाचकं विप्रामान्यवर्णसमाहरात्। इति (भविष्योक्तेः) नारायणं नमस्कृत्य नरं चैव नरोत्तमम्। देवीं सरस्वतीं व्यासं ततो जयमुदीरयेदित्युच्चार्य्य वाचनारम्भम् कुर्यात्। अष्टादशपुराणानि रामस्य चरितं तथा। विष्णुधर्म्मादिशास्त्राणि शिवधर्माश्च भारत। कार्ष्णञ्च पञ्चमो वेदो यन्महाभारतं स्मृतम्। शैवाश्च धर्मा राजेन्द्र मानवोक्ता महीपते। जयेति नाम चैतेषां प्रवदन्ति मनीषिणः। इति (भविष्यत्पुराणे)-जयशब्दव्याख्यानात्। प्रणवं चादितो जप्त्वा स्तोत्रं वा संहिता जपेत्। अन्ते च प्रणवं दद्याद् इत्यथा विफलं भवेदिति (मत्स्य) वचनात्। प्रकरणादन्ये पि नियमास्तत्रैवोक्ता निम्नन्ते। शुद्धेनानन्यचित्तेन पठितव्यं प्रयत्नतः। न कार्य्यासक्तमनसा कार्यं स्तोत्रस्य वाचनम्। आधारे स्थापयित्वा तु पुस्तकं प्रजपेत्सुधीः। हस्तसंस्थापनादेव यस्मादल्पफलं लभेत्। स्वयं च लिखितं यच्च कृतिना लिखितं च यत्। अब्राह्मणेनापि लिखितम् स्वापि विफलं भवेत्। ऋष्यादिन्यासिकं न्यस्य पठेत् स्तोत्रं विचक्षणः। संकल्पिते स्तोत्रपाठे संख्यां कृत्वा पठेत्सुधीः। अध्यायं प्राप्य विरमेन्नतु मध्ये कदाचन। कृते विरामे मध्ये तु अध्यायादि पठेत्पुनः। इति तथा अन्यत्रापि वाचकस्तुतिव्याजेन त एवोक्ताः। त्रिपञ्चमद्रुतं शान्तम् स्पष्टाक्षरपदं तथा। कलस्वरसमायुक्तं रसभावसमन्वितं बुध्यमानः सदाहर्थम् ग्रन्थार्थम् कृत्स्नशो नृप। ब्राह्मणादिषु सर्वेषु ग्रन्थार्थम् चार्पयेन्नृप। य एव वाचयेद्राजन्स विप्रो व्यास उच्यते। इति। पूजान्ते दुर्गामन्त्रं वैदिकमागमिकं वा जपेत्। दुर्गामतो जपेन्मन्त्रमेकचित्तः समाहित इति देवीपुराणोक्तेः। ततो देवीमाहात्म्यशतानि पुनः संख्यासङ्कल्पपूर्वकं पुरुषार्थम् पाठं श्रवणं वा कुर्यात्। माहात्म्यं भगवत्यास्तु पुराणादिषु कीर्तितं। पठेच्च शृणुयाद्वापि सर्वकामसमृद्धये। इतिशास्त्रान्तरात्। सङ्कल्पतस्तोत्रपाठेर्संख्यां कृत्वा पठेत्सुधीरिति (वाराहीतन्त्रे) संकल्पितेति विशेषणेन पूजांगस्तोत्रपाठे व्यावृत्य संख्याकृत्वेत्यनेन संख्यासङ्कल्पविधानाच्च। अङ्गेषु प्रधानसंकल्पात् पृथक्संकल्पाभावात्। अतएव दीक्षियणादिषु आरम्भाभावान्नारम्भणीयेति दशमे जैमिनिनोक्तं। सन्ति च (मार्कण्डेयपुराणे) देवीस्तोत्रपाठादेः पूजाङ्गत्वबोधकशास्त्रादन्यान्यपि पुरुषार्थत्वबोधका न फलविशेषकामं प्रति सदानुष्ठेयत्वं कादाचित्कानुष्ठेयत्व नैमित्तिकानुष्ठेयत्वविधिरूपाणि शास्त्राणि। तत्राद्यं। एभिः स्तवैश्च मां नित्य स्तोष्यते यः समाहितः। तस्याहं सकलां बाधां नाशयिष्याम्यशेषतः इत्युपक्रम्योपसंहृतं। तस्मान्ममैतन्माहात्म्यं पठितव्यं समाहितैः। श्रोतव्यं च सदा भक्त्या परं स्वस्त्ययनं महदिति। द्वितीयञ्च—अष्टम्याञ्च चतुर्दश्यां नवम्यां चैकचेतसः। श्रोष्यन्ति चैव ये भक्त्या मम माहात्म्यमुत्तमम्। न तेषां दुष्कृतं किञ्चिद्दुष्कृतोत्थानचापदः। भविष्यति न दारिद्र्यं नचैवेष्टवियोजनं। शत्रुतोन भयं तस्य दस्युतोवा न राजतः। न शस्त्रानलतोयौघात्कदाचित्संभविष्यति। तृतीयमपि—शान्तिकर्मणि सर्वत्र तथा दुःस्वप्न दर्शने। ग्रहपीडासु

देवीपूजादिके सूतकादौ प्राप्ते सति स्वयमेव पूजादिकुर्य्यात् । अ-नारब्धे तु अन्येन कारयेत । रजस्वला च स्वयमुपवासादिकं कृत्वा पूजाद्यन्येन कारयेत् । शिष्टास्त्वाशौचे पूजां देवतास्पर्शादिलोकवि-

स्वयमेवेति—(विश्वरूपनिबन्धे)–आश्विनस्य सिते पक्षे प्रारब्धे नवरात्रके । शावेसूते समुत्पन्ने क्रिया कार्य्या कथं बुधैः । इति प्रश्ने—सूतके वर्त्तमानेचेत्तथोत्पन्नं यदा भवेत् । देवी पूजा प्रकर्तव्या पशुयज्ञविधानतः । सूतके पूजने प्रोक्तंदानं चैव विशेषतः । देवीमुद्दिश्य कर्तव्यं तत्र दोषोन विद्यतइति । पूर्वसंकल्पितं यत्र व्रतं मुनिधनव्रतैः । तत्कर्तव्यं नरैः शुद्धं दानार्चनविवर्जितम् इति । (रघुनन्दनभट्टाचार्य्यः) । रजस्वलेति—(मात्स्ये)–अन्तरातु रजो-

घोभासु माहात्म्यं शृणुयान्मम । उपसर्गाः प्रशमं यान्तीत्यादि । तथा अरण्ये प्रान्तरे वापि दावाग्निपरिवारितः । दस्युभिर्वा वृतः शून्ये गृहीतोवापि शत्रुभिः । सिंहव्याघ्रानुयातोवा वने वा वनहस्तिभिः । राज्ञा क्रुद्धेन चाज्ञप्तोवध्योबन्धगतोऽपि वा । आघूर्णितोवा वातेन स्थितः पोतोमहार्णवे । पतत्सु चापि शस्त्रेषु संग्रामे भृशदारुणे । सर्वबाधासु घोभासु वेदनाभ्यर्दितोऽपि वा । स्मरन्ममैतच्चरितं नरोमुच्येत संकटानुइति । संख्याविशेषफलविशेषो (वाराहीतन्त्रे) चण्डीपाठफलं देवि शृणुष्व वदतोमम । एकावृत्यादिपाठानां यथावत्कथयामि ते । संकल्प्यपूर्वम् सम्पूज्य न्यस्यांगेषु मनून्सकृत् । पाठाद्बलिप्रदानाच्च सिद्धिमाप्नोति मानवः । उपसर्गोपशान्त्यर्थम् त्रिरावृत्तं पठेन्नरः । ग्रहोपशान्तौ कर्तव्यं पञ्चावृत्तं वरानने । महाभये समुत्पन्ने सप्तावृत्तं समाचरेत् । नवावृत्या भवेच्छान्तिर्वाजपेयफलं लभेत् । राजवश्याय भूत्यै च रुद्रावृत्तमुदीरयेत् । अर्कावृत्तेः काम्यसिद्धिर्वैरिहानिश्च जायते । मन्वावृतात्पुमान्वश्यस्तथास्त्रीवश्यतामियात् । सौख्यं पञ्चदशावृत्ताच्छ्रियमाप्नोति मानवः । कलावृत्या पुत्रपौत्रधनधान्यागमं विदुः । राज्ञां भीतिविमोक्षाय वैरस्योच्चाटनाय च । कुर्यात्सप्तदशावृत्तं तथाष्टादशकं प्रिये । महारण्यविमोक्षाय विंशावृत्तं पठेत्सुधीः । पंचविंशावर्तनात्तु भवेद्बन्धविमोक्षणम् । संकटे समनुप्राप्ते दुश्चिकित्स्यामये तथा······कुर्य्याद्यत्नाच्छतावृत्तं ततः सम्पद्यते शुभं । श्रेयोवृद्धिः शतावृत्या राज्यवृद्धिस्तथा परा । मनसा चिन्तितं देवि सिद्ध्येदष्टोत्तराच्छतात् । शताश्वमेधयज्ञानां फलमाप्नोति सुव्रते । सहस्रावर्तनाल्लक्ष्मीरावृणोति स्वयं स्थिरा । भुक्त्वा मनोगतान्कामान्नरोमोक्षमवाप्नुयात् । यथाश्वमेधःक्रतूनां देवानाञ्च यथा हरिः । स्तवानामपि सर्वेषां तथा सप्तशतीस्तवः । अथवा बहुनोक्तेन किमेतेन वरानने । चण्ड्याः शतावृत्तिपाठात्सर्वाःसिद्ध्यन्ति सिद्धयः । (शतचण्ड्यादिप्रयोगविधिशतचण्डीयज्ञविधानेऽप्युक्ता ।

दिष्टत्वात् अन्येनैव कारयन्तीति (धर्मसिन्धुकाराः)। वस्तुतस्तु आशौच प्राप्ते अनुकल्पाश्रयणं कृत्वा निर्वाहः कार्य्यः। सर्वथा-सम्भवे ब्राह्मणद्वारा पूजादिकं कार्य्यम्। शारीरनियमास्तु स्वयमेव कार्य्याः। बलिदानं प्रत्यहं अन्ते वा कार्य्यम्। सात्त्विकपूजायां बलिदानं कृताकृतम्। दातुमिच्छा चेत्कुष्माण्डादिबलिर्देयः। तस्य छेदनं ब्राह्मणेन न कार्य्यम्। होमोऽपि प्रत्यहमनुष्ठेयः। देवी-योगे पूजामन्येन कारयेदिति। शारीरनियमाइति—सूतकात्प्रा-क्समारब्धमनेकाहं तु यद्व्रतम्। कायिकं तत्तु कुर्वीत नतु दानार्चनं जपम्। सूतकाहे तु यत्किंचिद्दानाद्यन्तरितं भवेत्। सूतकानन्तरे स्वन्हि तत्कर्तव्यमतन्द्रितः इति। प्रत्यहमिति—(देवीपुराणे)—बलिं च प्रत्यहं दद्यादोदनं मांसमाषवत्। त्रिकालं पूजयेद् वा जपस्तोत्रपरायणः। होमोष्टम्यां नवम्यां वा कार्य्यइतिवचनेन बलिदानमपि अष्टमीनवम्योरेवेति केचित्। (कालिकापुराणे)—देवीं तु पूजयित्वा येऽर्धरात्रेऽष्टमीषु च। घातयन्ति पशून्भक्त्या ते भवन्ति महाबलाइति। कुष्माण्डादिबलिरिति—(रुद्रयामले)—ब्राह्मणेन सदा देयं कूष्माण्डं बलिकर्मणि। श्रीफलं वा सुराधीश छेदं नैव तु कारयेत् (कालिकापुराणे)—माषान्नेन बलिर्देयो ब्राह्मणेन विजानता। (भुवनेशीतपारिजात)—अन्नं व्यञ्जनपुष्पाम्बुबलि-द्रव्यमुदाहृतम्। न दद्याद्ब्राह्मणोमद्यं तथा देव्यै कदाचन। सिंह-व्याघ्रनरान्दत्वा ब्राह्मणो नरकं व्रजेत्। इहापि स्यात्सहीनायुः सुखसौभाग्यवर्जितः। स्वगात्ररुधिरं दत्वा ब्रह्महत्यामवाप्नुयात्। मद्यं दत्वा ब्राह्मणस्तु ब्राह्मण्यादेव हीयतइति। (गुप्तवतीटीका-याम्)—वरंप्राणाःप्रगच्छन्तुब्राह्मणोनार्पयेत्सुरामिति। होमोऽपी-ति—(देवीपुराणे)—प्रातः स्नायी जितद्वन्द्वस्त्रिकालं शिवपूजकः। जपहोमसमायुक्तः कन्यका भोजयेत्सदा इति। शिवपूजकइति-शिवा च शिवश्च शिवौ तयोरित्यर्थः। सदेति समभिव्याहरेण स्तोपात्तयोः जपहोमयोः तुल्यवत्कर्तव्यतापत्तेः। तिलाज्येनाष्टा-

गृहेऽहोरात्रं दीपः संस्थाप्यः । प्रत्यहं वेदपारायणञ्च कार्य्यम् । भवानीसहस्रनामपाठोऽपि कश्चिद्विहितः । नवरात्रे काशीनिवासिनी यात्रापि कार्य्या । प्रतिपदादि क्रमेण केशसंस्कारादिकर्माणि दश-

विंशतिसंख्यया अष्टोत्तरसंख्यया वा देवीमंत्रेण होमोऽपि प्रत्यहमनुष्ठेयः । नचैवमष्टमीनवम्योर्होमविधिविरोधः । तस्य देवीमाहात्म्यगतश्लोकैः प्रतिश्लोकमनुष्ठेयमहाहोमविषयत्वादिति(अनन्तदेवाचार्य्यः) । दीपइति—(रुद्रयामले)–अखण्डदीपकं–देव्याः प्रीतये नवरात्रकं । उज्ज्वलयेदहोरात्रमेकचित्तोधृतव्रतः । इति—(मात्स्ये)–गीतादिकमप्युक्तम्-गीतवादित्रनिर्घोषं देवस्याग्रे प्रकाशयेत । घण्टाभवेदशक्तस्य सर्ववाद्यमयी यतइति । वेदपारायणमिति—(नारदीये)–वेदपारायणादीनि स्वशक्त्या कारयेद्व्रती । तद्विधिर्वौधायनोपधर्मप्रश्ने द्रष्टव्यः । भवानीसहस्रनामपाठ इति—(रुद्रयामले)–तदेवोपक्रम्यनवरात्रेऽकृताहारोदृढभक्तिर्जितेन्द्रियः । चण्डिकायतने विद्वान्शुचिः मन्मूर्तिसन्निधौ । एकाकी तु शतावृत्त पठेद्धीरश्च निर्भयः । साक्षाद्भगवती तस्मै प्रयच्छेदीप्सितं फलमिति । यात्रेति—(शिवरहस्ये)–तत्रैव विमलादुर्गातिष्ठत्यमललोचना । सर्वदुर्गहरा नित्यं स्वभक्ताभयदायिनी । तत्राश्विने शुक्लपक्षप्रतिपद्यवधि प्रिये । नवमीदिनपर्य्यन्तं पूजा कार्या प्रयत्नतः । सा सर्वार्तिहरा देवी नित्यं काशीनिवासिनी । पूजिता भक्तवरदा भवत्येव न संशय इति । केशसंस्कारद्रव्याणीति—(भविष्ये)–केशसंस्कारद्रव्याणि प्रदद्यात्प्रतिपद्दिने । पट्टडोरं द्वितीयायां केशसंचयहेतवे । दर्पणं च तृतीयायां सिन्दूरालक्तकं तथा । मधुपर्कं चतुर्थ्यान्तु तिलकं नेत्रमण्डनम् । पञ्चम्यामंगरागं च शक्त्यालङ्करणानि च । षष्ठ्यां बिल्वतरौ बोधं सायं सन्ध्यासु कारयेत् । सप्तम्यां प्रातरानीय गृहमध्ये प्रपूजयेत् । उपोषणमथाष्टम्यामाम्बयस्या च पूजनम् । नवम्यामुग्रचण्डायाः पूजां कुर्य्याद्बलिं तथा । [illegible] । सम्पूज्य प्रेषणं कु-

मीपर्य्यन्तं कार्य्याणि। नारिकेलफलादीनि च दातव्यानि । प्रतिपदादे–अष्टमीपर्य्यन्तं नवरात्रे–लोहाभिसारिकं कर्म नृपंप्रति विहितम् ।

र्दशम्यां शवरोत्सवैः । अनेन विधिना यस्तु देवीं पूजयते नरः। न्दवत्पालयेत्तं तु देवी मर्त्त्यपदस्थितम् । नारीकेलफलदीनीनि –(देवीपुराणे)–नारीकेलफलादीनि नवकं नवकं प्रिये । नाम्रमृण्मयपात्राणि सपर्यांमि तथैव च । दंशपात्राणि वस्त्राणि भक्ष्यभोज्यान्वितानि च । यदि वा तिलपात्राणि मृत्पात्राण्यथवापुनः। अथवा धान्यपात्राणि पक्वान्नभृतानि च । सौभाग्यपात्राण्यथवा कुङ्कुमादिभृतानि च । दुर्गादेवी प्रीयतां म इत्युक्त्वा विधिवद्ददेदिति ।

लोहाभिसारिकमिति—(भविष्योत्तरे)–जयाभिलाषी नृपतिः प्रतिपत्प्रभृतिक्रमात् । लोहाभिसारिकं कर्म कारयेद्यावदष्टमी । प्रागुदक्प्रवणे देशे पताकाभिरलङ्कृतं । मण्डप कारयेद्दिव्यं नवसप्तकरं वरं (नवसप्तसंयोगे षोडश) । आग्नेय्यां कारयेत्कुण्डमिपुनात्र सुशोभनं । मेखलात्रयसंयुक्तं योन्या चाश्वत्थदलाभया । राजचिह्नानि सर्वाणि शस्त्राण्यस्त्राणि यानि च । आनीय मण्डपे तानि मन्त्रैरेवाधिवासयेत् । ततस्तु ब्राह्मणः शान्तः शुक्लाम्बरधरः शुचिः । ओङ्कारपूर्वकैर्मन्त्रैस्तल्लिङ्गैर्जुहुयाद्घृतम् । लोहनामाभयत्पूर्वं दानवः सुमहाबलः । स देवैः समरे क्रुद्धैर्यद्धुधा शकलीकृतः। तदंगसम्भवं सर्वं लोहं यद्दृश्यते क्षितौ ।

(अत्रशस्त्रनिदानभूतलोहलक्षणम् विषयवाक्यिन्यासवलांकनांगं) ।

लोहलक्षणम्—कान्तं कालिस्तथा भद्रं वज्रञ्च गिरिसंज्ञकम् । शिशिरमाक्रन्तथा गात्रं मुण्डं तीक्ष्णमितिक्रमात् । लोहं दशविधं प्रोक्तं श्रेष्ठं स्यादुत्तरोत्तरम् । एकैकलक्षणंत्वेषां कथ्यते शास्त्रसम्मतम् । कान्तलोहञ्च मृदुलं लोहानामतिदुर्लभम् । दुग्धं पचत्यपि क्षिप्रं नोत्सर्पति तदन्तरे । निम्बोऽमधुरतां याति हिङ्गुगन्धञ्च मुञ्चति । यत्पात्रे न प्रसरति जले तैलबिन्दुः प्रसते। हिङ्गुगन्धं त्यजति च निजं तिक्ततां निम्बकल्कः। तप्तं दुग्धं भवति शिखराकारकं नैति भूमिं कृष्णाङ्गः स्यात्सजलचणकः कान्तलोहः स उक्तः। कालिः कालीयवर्णश्च मन्थियुक्तस्ततोवरः । भद्रंभरद्वर्णाभं स्फुलिङ्गोज्ज्वलितं तथा । वज्रं मदनराभमिव स्वर्णोद्द्योतितं । गिरिलोहं गुरुत्वं तथा सघनं तथा ।

पिण्डिः पिण्डीकृतं पिण्डं ताडिम्नाडिमहं गुरु । गोत्रं च तण्डुलाग्रं स्यादाम्यवर्णमयं विदुः । गुप्तं शाणेन शुप्तं स्यादम्लपुरुषं भवेत्पुनः । यत्र यष्टीफलाकारं दृश्यते विरलं विदुः । तीक्ष्णं दृढं भवेत्तत्र पक्वं दर्पणभं नीलतां । रक्ताभां वा प्रजेत्तनं सर्वायुधविनिर्मितं । छत्रध्वजपताकादि दृश्यते यत्र चेच्छुभम् । तैलादिवैर्वटयेच्चक्रमागम्यनेकानि नर्वनवं । पुराणानि तथा शाणैर्निस्तक्ष्य स्थापयेद्यथा । पूर्णेन्दावुपनक्षत्रे भानुवारे स्थिरोदये । स्यानुकूले दिने लोहैर्घटयेच्चक्रसमात्मनः । येन लोहेन यत्कार्यं तत्तु तेनैव कृत्स्नशः । विज्ञेन कर्मकारेण शुद्धलोहेन कारयेत् । शस्त्रं निर्माय प्रथमं वल्मीकमयमृत्तया । यवक्षारं फीटभोटं सम्भरं सैन्धवं तथा । तथैव लवणान्येव पिष्ट्वा संलिप्य रक्षयेत् । वर्षे कियत्यतिक्रान्ते शस्त्रं शाणैर्न घर्षयेत् । निर्यातकल्मषं शस्त्रं सारभागावशेषितं । पानीये पातयेत्तत्र वक्ष्यमाणेन वर्त्मना । पानीये पातमात्रेण शस्त्रधारा दृढा भवेत् । तीक्ष्णापि शीर्यतेऽत्यन्तं स्वल्पाघातेऽपि दारुवत् । तल्लोहं कोमलमपि पानीयं पानितं हि सत् । दृढं भिनत्ति पाषाणंलोहं च निजधारया । तस्मात्पानं च विषयः कथ्यते शास्त्रसम्मतः । गिरिनिर्झरपानीयं निम्नजाङ्गलकूपजं । सामुद्रं कारकं चापि गाङ्गं चोत्तरदेशजं । सिन्धोर्वा ब्रह्मपुत्रस्य शोणस्य च तथा जलं । ग्राह्यं शस्त्रार्थमेतेषामभावेऽन्यदपि कचित् । आदौ शस्त्रे दृढं लिप्त्वा पिप्पलीकुष्ठसैन्धवम् । मरीचकुष्ठधूर्तान्वा लोहस्वर्णजमाक्षिकं । रक्तचित्रस्य मूलं वा देवदारुरसश्च वा । करीरवृक्षमूलं वा कर्णिकारस्य वा रवेः । सगन्धकं पारदं वा टङ्कणं तुलसीरसैः । हिंगुपिंडं च सुस्निग्धं लेपयेन्माषमज्जनम् । शालसारभवाङ्गारनिर्धूमेऽग्नौ प्रतापयेत् । शस्त्रानुरूपपात्रे तु प्रोक्तपानीयपूरिते । पातयेद्यत्नतः शस्त्रं यथा वक्रं भवेन्नहि । पानीये पातमात्रेण स्वर्णाभं दृश्यते यदि । तदा शुभाय जानीयात् शस्त्रं चारिभयाय तु । जवाभं पाटलाभं वा ताम्राभं दृश्यते यदि । तदातितीक्ष्णधारं स्याज्जयदं सर्वदा मतम् । यदि रौप्यनिभं शस्त्रं कांस्याभं दृश्यते यदि । तदातितीक्ष्णा तद्धारा शीर्य्यते दृढघाततः । तस्माद्विविच्य लोहज्ञो यस्य लोहस्य यद्भवेत् । तत्तथैव विधातव्यं मृदौ तीक्ष्णे खरे मृदु । केचिद्वदन्ति पानीयं घृतगव्ये पुराणके । तैले वा कटुतैले वा दुग्धे च तुरगोष्ट्रजे । मृगाजदुग्धे मेषार्द्रकदलीतरुजे द्रवे । आज्यं पयोमेषशृंगमसीयुतमतः पुनः । पारावताखुशकृता खड्गे लेपं प्रकारयेत् । ततस्तैलेऽतिमथिते पादमात्रीभवद् घृते । पातयेदतितप्तं तं खड्गं सपदि शस्त्रकृत् । रम्भाक्षारे वारियुक्ते स्थापितोयोदिनोषितः । शितोऽसिः कुण्ठतां क्वापि न सयाति शिलादिषु । घृतपानान्श्रियः प्राप्तिर्वित्तं स्यात्तैलपानतः । दुग्धपानात् श्रियः प्राप्तिः शुभाप्तिः कदलीरसात् । शत्रुमारणकामश्चेच्छस्त्रं रौद्रेऽह्नि लेपयेत् । स्थावरैश्च विषैः सर्वैर्विषैश्च कृष्णसर्पजैः । ततः प्रताप्यते वन्हौ खररक्तेषु पातयत् । तेनैव भिन्द्याच्छत्रुन्तु हतः क्वापि न जीवति इति ।

अथशस्त्रस्वरूपाणि—गुरूपदिष्टमार्गेण शस्त्रसाधनमभ्यसेत् । शस्त्रसाधनमित्युक्ते राकांक्षा जनिता भृशम् । कियन्ति कानि शस्त्राणि किं स्वरूपाणि चेच्छृणु । वृन्दे चैवानुकल्पं तदसाधारणमेव च । साधारणमिति ज्ञेयं शस्त्रमन्त्रं चतुर्विधम् । त्रियुतार्यतं वृन्द मदिपायनकल्पकम् । हलाद्यसाधारणश्च साधारणमथोच्यते । सिद्धवामादि

शस्त्रान्तं षट्त्रिंशत्संख्यमेव तत् । नन्वेवं बाणधनुषोरेकत्वात् खड्गचर्मणोः । कथं षट्त्रिंशत्सिद्धिरितिचेदुच्यते मया । असिर्भद्रच्छदः खड्गं हेमं चर्म च ऋक्षराट् । इति वाक्यात्पृथक्त्वञ्च दृश्यते खड्गचर्मणोः । धनुर्गाढं जघानाशु नासां चिच्छेद पत्रिणा । इति रामायणोक्तेन पृथक्त्वं चापपत्रिणोः । अतएव महाभूपैः प्रत्यब्दं शारदोत्सवे । स्पष्टमष्टायुधार्चायां पूजनं क्रियते पृथक् । अतः षट्त्रिंशदेव स्युः शस्त्राणि भुवि नान्यथा । एतत् स्पष्टीकृतं श्रीमद्भारते शृणु तद्यथा । अयं गुणानां षट्त्रिंशत् षट्त्रिंशत् गुणसम्मितान् । जानन्नपि गुणोपेतान् कुर्वन् गुणमवाप्नुयात् । शस्त्रं षट्त्रिंशकं प्रोक्ताः षट्त्रिंशत्तत्वजं विदुः । कुर्वंस्तु साधनोपेतं गुणीस्यादर्थ ईदृशः । जनिसूत्रेण तेषां विवृतं हट्टभास्करे । यथा शस्त्राण्यजायन्त षट्त्रिंशत्तत्वसंहतेः । पञ्चभ्योजन्म पञ्चानां सप्तभ्योऽजनि सप्तकम् । चतुर्विंशतितोजातश्चतुर्विंशतिकोगणः । अस्याथः कथ्यते स्पष्टं बोधनायाल्पमेधसां । शुद्धविद्यादितो मायादितोऽथम् प्राकृतादितः । वाङ्मता शुद्धविद्यात ईश्वराद्धनुरप्यभून् । सदाशिवाच्छरः शम्भोः पाशः शक्तेस्तथांकुशः । मायातः समभूत्खड्गो विद्यातः फलकं पुनः । पुरुषाच्च गदा जाता कलातः शल्यमेव च । रागाच्च छुरिका जाता नियतेः कुन्तएव हि । कालदण्डोऽथ प्रकृतेर्नभ्र चक्रमहङ्कृतेः । आकाशात्पट्टिशोवायोर्मुद्गरोऽग्नेः क्षुरप्रकं । जलात्कुठारोभमेस्तु परशुः कर्तरीश्रुतेः । वाचोमूषलमेवाभूच्चक्षुषष्टङ्क एव च । जिह्वातोऽजनि खट्वाङ्गं मुशुण्डिघ्राणतोऽजनि । मुखाद्भूद्भिन्दिपालाहस्ताच्छूलमजायत । पादाद्भल्लोऽथ शवला पायोश्च समजायत । यमधार उपस्थाच्च शब्दाच्च परिघोऽभवन् स्पर्शाच्छक्तिः समुद्भूद्रूपादृष्टिरजायत । रसाच्छतघ्नी गन्धाश्च कवचं समभूत्पुनः । बुद्धेर्घण्टा तु मनसः शङ्ख इत्थं तदुद्भवः । शस्त्राणाञ्च समुत्पत्तिर्वयमित्येवमूचिम । आहुश्च केचित्पञ्चभ्यः सप्तभ्यश्चेति केचन । केचिद्वा शङ्खघण्टानां शस्त्रत्वं न विदन्तिहि । अतस्तन्मुखमुद्रायै युक्तिरप्युच्यते मया । हुंकारेणैव तं भस्म सा चकाराम्बिका तदा । इति वाक्येन वाचश्च शस्त्रत्वमुपपादितम् । घण्टानादेन तान्सर्वानम्बिका चोपबृंहयत् । अनेनापि च घण्टायाः शस्त्रत्वं रिपुनाशकृत् । गदारिभ्यां गणनया कम्बोः शस्त्रत्वमीरितम् । शस्त्राणां वारकतया साधनत्वाच्च सम्मतः कवचस्यापि शस्त्रत्वं इति सर्वं निरूपितम् । एवमुद्दिश्य शस्त्राणि तत्स्वरूपमथोच्यते ।

वाक्स्वरूपम्—मन्त्रसंस्कारजनिता सिद्धा वागुवागुदीरिता । मंत्रः समुदितोमन्त्रसमये च विशेषतः ।

धनुःस्वरूपम्—धनुश्चतुर्विधं वंशशृङ्गधात्वन्यदारुजं । तन्मध्ये वंशजं श्रेष्ठं तस्य लक्षणमुच्यते । माघमासस्य या शुक्ला पंचमी गुरुसंयुता । तत्र क्षात्रः क्षितौ गर्तम् निखनेत्पुंप्रमाणतः । वीराङ्गं सुन्दराङ्गं वा कण्टकं वंशकन्दलम् । पृथं समूलमानीय वनयागादिपूर्वकम् । तत्र गर्ते समारोप्य सिन्दूरैः परिलेपयेत् । प्रत्यहं तोयसेकाद्यैर्यत्नतोवर्द्धयेदमुं । नाक्रमेयुर्दिवारात्रौ यथा तं पशुपक्षिणः । तथा विधेया संरक्षा कण्टकावरणादिभिः । वर्षद्वयमतिक्रान्ते तृतीयाद्वान्तरे शुभे । भाद्रे मासि सिते पक्षे पुष्ययुक्ते रवेर्दिने । शनौ हस्तयुते वापि वंशं छित्वा समाहरेत् । तत्र सर्पफणाकारं चक्रग्रन्थियुगान्वितम् । कीटापविद्धं निस्सारं स्वस्सारं दूरतस्त्यजेत् । सन्सारमाहरेन्मृ-

लान् त्यक्त्वा पर्वचतुष्टयम् । निम्भारमममान्निकृत्त मनश्योक्तप्रमाणतः गृहीत्वा तं द्विधा भित्वा रचयेद्धनुरुत्तमम् । निस्तक्ष्य गर्भतोर्थशा दशाङ्गुलप्रपूरं । उभयत्र क्रमाच्छिन्नं सप्तपञ्चाङ्गुलैः पृथु । सत्वगधनुर्विरथयेरुच्यतेऽथ सदा कृतिः ।

नैमिकश्चार्धनैमिश्च ऋजुकस्तृणकस्तथा । मत्स्योदरश्च पञ्चैते चापाकाराः प्रकीर्तिताः । ऋज्वमं समयकं यन्नानिर्ताक्ष्यं सुदर्शनम् । अङ्गेन च दैर्घ्यस्य नामितं नैमिकं धनुः । तदर्द्धेन तथावक्रं धनुः स्यादर्द्धनैमिकम् । गद्धवेदृकऋजुपर्वाङ्गम् ज्ञेयं तदृजुकं धनुः । उन्नतं शाङ्गयांश्चैव मध्ये च तृणकं विदुः । मत्स्योदरं तु विज्ञेयमीषद्वक्रन्तु यद्भवेत् । अटनी कर्णिकाशङ्खः स्कन्दः कोट्यन्तरेस्थितः । पल्लवोलस्तको मध्ये पडङ्गं धनुरुच्यते । अटनी वर्तुला तीक्ष्णा सुचम्पककलिप्रभा । मूले शङ्खावर्तनिभवलयाभ्यां सुशोभिता । त्र्यङ्गुला चापकोटिस्था कनिष्ठाङ्गुलिवत्पृथुः । तत्पार्श्वे कर्णिका ज्ञेया शङ्खः स्यात्तदनन्तरम् । स्कन्दस्ततः पल्लवश्च मध्यं यत्लस्तकस्थलम् । तदन्तलेस्तकं कार्यं द्वादशाङ्गुलसस्मितम् । सप्ताङ्गुलं मुष्टिमितं षडङ्गुलमथापि वा । धनुश्चतुर्हस्तमितं चापोनववितस्तियुक् । कोदण्डश्च ललाटान्तः कार्मुकं बाहुसम्मितम् । निर्ग्रन्थ्युभं पञ्चपर्वं षड्ग्रन्थि पृथुमध्यमम् । कार्यं विषमपर्वं समपर्वं न कुत्रचित् । त्रिपर्विकं श्रियं दत्ते पञ्चपर्वधनप्रदम् । जयदं सप्तपर्वैव नवपर्वसुखप्रदम् । पर्वैकादशसंयुक्तं धनुः स्यात्सर्वसिद्धिदम् । ऊर्ध्वमेकादशान्नैव पर्वस्येति केचन । धनुः कार्यमिति प्राहुर्धनुर्वेदविदोबुधाः । गुणोऽपि द्विविधोज्ञेयः प्राणिजोवृक्षजस्तथा । प्राणिजः प्राणितन्तूत्थस्त्रिधा ग्राह्यादिभेदतः । मृगस्नायुभवा ग्राह्या वैष्णवोगव्यतन्तुजः । महिषस्नायुजः शैवः पट्टजोऽपि क्वचिन्मतः । ग्रीष्मे वर्षासु हेमन्ते गृहीत्वादौ मृगादितः । अन्त्राणि नन्तुरूपाणि कर्तव्यद्धनुरूपतः । वृक्षजोऽपि द्विधाज्ञेयः सारजस्त्वग्ज इत्यपि । अर्कपूर्वादिसारोत्थः सारजः परिकीर्तितः । वंशादीनां त्वगुद्भूतस्त्वग्जः संपरिकीर्तितः । ग्रीष्मे शरदि चानीय मूर्वास्थूलदलानि च । निस्तक्ष्य सारसूक्ष्मांशै स्त्रिगुणं रचयेद्गुणम् । नातिस्थूलं नातिकृशं वंशवीर्यानुरूपतः । तत्राधः पाशिका कार्या पट्टगुच्छप्रशोभिता । ऊर्ध्वं चापि तथा पाशी सुवेणिगुच्छमण्डिता । विभज्यैकादश वर्धं धनुर्गर्भप्रमाणतः । त्यक्त्वैकभागं दशभिर्भागैः सा सिञ्जिनी मता । गुणन्तु प्रान्तयोर्मध्ये पट्टसूत्रेण वेष्टयेत् । मसृणं मार्जयेद् वीरो गुणं गुणवतां वरः । प्रसंगतस्तद्वक्ष्यामि ब्रुवे गोधादिलक्षणम् । ज्याघृष्टिवारिणी गोधाङ्गुलित्राङ्गुष्ठमूलगा । गोधापि धातुजा शृङ्गदारुजैकादशाङ्गुला । मत्स्याकारास्तिरश्या च पत्रगुच्छायुतात्मका । कूर्परान्मणिबन्धान्तं बन्धनीया प्रकोष्ठके । मसृणा तैजसी सूक्ष्मा गुणाघातप्रतारिणी । शृङ्गं तु सैरिभं श्रेष्ठं दान्तो दन्तेषु दन्तिनां । दक्षाङ्गुष्ठेऽङ्गुलित्राणं धातुजं सूत्रजं तु वा । ग्रन्थिपाणिसमायुक्तं स्वचन्न चलेद्यथा । शार्ङ्गं तु महिषादीनां शृङ्गजं मानतो लघु । वितस्ति सप्तमानं स्यात् काञ्चनादि विचित्रितम् । तद्वद्गुणं सुगुष्टं चाप च सदावक्रतया स्थितम् । क्षुद्रकांश्चाथ नाराचांस्तेन विध्यन्ति धन्विनः । दारुजं धनुराकारं कुर्यान् वंशकधनुः । तदर्थमार्द्रं सुस्निग्धं गृह्णीयाद्दारुनिर्व्रणम् । चापेऽलम्बर्णस्वप्रच स्वरूपमपि च धर्मणः । कार्ये च बदरं श्रेष्ठं शालोवंशस्तथा स्मृतः । हस्तिभग्नद्रुमार्थं च

विशुरन्धास्तथैव च । आरामदेवतावेश्मतापसाश्रमसम्भवाः । श्मसानसम्भवा ये च नैः कुर्यान् कथञ्चन । धनुर्धनुष्मतां श्रेष्ठमिति तत्वविशेविदुः । धनुषोदेवता (कामो रुद्रो) बाणचापकृत् । अटन्यो (वन्हिवरुणौ) लस्तकस्य च (भास्करः) गुणस्य देवता साक्षाद्देवो (यज्ञिगुणात्मकः) कर्पणी देवता (शेषो) गोधाया (धरणी) मता । प्रसंगाद्धनुषं कृत्यम् कथितम् सर्वसम्मतम् ।

शरस्वरूपम्—स्यादस्थिसारस्त्वकसारः सर्वसारस्त्रिधा शरः । द्रुमादिजोऽस्थिसारः स्यात्वकसारः शरवेणुजः । लोहश्रृंगास्थिदन्तोत्थः सर्वसारः प्रकीर्तितः । च शन्तिमौ गौणशरौ मध्यमस्तु प्रशस्यते । तत्रापि शरजः श्रेष्ठस्तस्य लक्षणमुच्यते । सुवर्णः सरलः सूक्ष्मो द्विचत्वारिंशदङ्गुलः । चित्राङ्गः पुङ्खरक्षामफलशोभितविग्रहः । परिणाहः श्रेष्ठशरे द्व्यङ्गुलः स्यात्तु मध्यमे । पर्वाङ्गुलः कनिष्ठे च भवेदङ्गुलिमात्रकः । मूले पुङ्खोविधातव्यो मल्लिकोरकसन्निभः । गुणग्रहणकार्यार्थम् मुखे छिद्रसमन्वितः । अंगुलित्रयविस्तारो मध्यस्थूलोरुमस्तकः । लोहपाषाणदन्तास्थिखुरश्रृङ्गतृणोद्भवः । काष्ठोत्थश्चेति निर्दिष्टः पुङ्खोऽष्टविधो बुधैः । मुखं कर्णम् तथा स्कन्धौ गात्रं पत्रासनं तथा । जङ्घा पुङ्खं विशेषे च सप्ताङ्गान्युपकल्पयेत् । पुङ्खादनन्तरं जङ्घा पुंखे निश्चलकारिणी । ततः पत्रासनं ज्ञेयमष्टांगुलिमितं पुनः । पत्रपक्षावबन्धनीयाः पट्टसूत्रेण निश्चलम् । क्रौञ्चहंसमयूराणां चक्रश्वेतगरुत्मतां । भरद्वाजस्य चिल्लस्य गृहक्ककच्छपत्रजाः । गृध्राणां कुररानाञ्च श्वेतकुक्कुटयोरपि । पक्षाः प्रशस्ताः सुदृढाः शराणां बाणकर्मणि । त्रिधाराः पंचधारा वा सप्तधारा यदृच्छया । कर्तव्या विशिखे पक्षाः स्वधारासमा दृढाः । ऊर्ध्वम् स्यात्त्र्यङ्गुलोत्साहं मध्ये सार्धाङ्गुलोमतं । मूलतो एकाङ्गुलोत्सेधः पक्षाणां मानमीरितम् । ततः पत्रासनं ज्ञेयं चित्रितं स्वङ्गुलाष्टकम् । ततोऽष्टाङ्गुलसमानं स्यात्स्कन्धगात्रं प्रमाणतः । शेषः पुनर्विचित्रः स्यान्स्कन्ध इत्येव पत्रिणः । फलं चापे योजनीयमदृढमूलं शितात्मकम् । विविधाकारसंस्थानं शुद्धलोहात्मकम् । क्षुरधारस्य समाभयोत्सनावत्पक्वमसन्निभम् । अर्धानिशरदाकारं कुक्कुटनखकण्टकम् । सूचिमुखं शलाकाभं गोदन्ताभं त्रिशूलवत् । हयारिमल्लिकाकुन्दचम्पकादिसनिभम् । वत्साधमृगचन्द्राभं चक्राभं शफरोपमम् । केतकीगर्भदलवच्चम्पकुड्मलसन्निभम् । मुद्गरवेणुशलाकारं स्वेच्छारूपं मनोरमम् । योजयेद्वज्रलेपेन शरपक्षानुसारतः । फला ह्युत्तरे पक्षे पश्चाद्युत्तरे फले । शरेन याति साम्येन तस्मात्तत्रानुगं फलम् । सर्वे सर्वे विशालकर्मसाकारं फलं तथा । चित्रकर्म च नैव लक्ष्यन्तेऽचराः शराः । शरस्य देवता वायुः पुङ्खस्य सपनात्मजः । फलस्य देवः पर्जन्योऽग्रागोऽर्थ नैरृतिः । मूर्धर्चर्मणा कुर्यात्पट्टकांचनचारुणा । शरपूरणयोग्यान्नगसमेन सूत्रेण संयुतम् । विविधरचितमूर्धास्यं पट्टगुच्छावलंकृतम् । स्कन्धतः पृष्ठतोऽपि निबन्धद्दृढरश्मिना । एतादृशाः शराः सन्ति विभक्तिप्रमिताः शिताः । वक्ष्येऽहमादं समिता वास्यां स्वती सुनीरजा । नाराचशरसंघातभेदाद्बाणास्त्रिधा मताः । कल्पनाशरास्तूणीरावाः शरसंस्थिताः शराः । नाराचशरसंयुक्ताः सङ्गामा इति कीर्तिताः । यत्र पुनर्मृगयाया वै देशेषु कर्मसु । चर्मे स्थूलः सुमन्थवेः चर्मांसपूरं शिरं विदुः । सर्व सर्वमत हरे

तत्र श्रेष्ठतमं युधे । दूरपाते स्त्रियो योज्या लक्ष्यभेदे नपुंसकम् । दृढस्फोटे पुमान्योज्यो धनुर्वेदविशारदैः । लक्ष्यानुरूपं हि फलं कार्यमित्येव केचन । वदन्ति तन्मुखे सम्यग्येन विध्येत यद्यदा । यो बालरजनीनाथकलाकारमुखः खगः । छिन्द्याच्छिरः शरं तद्वत्कार्मुकं करिणः करम् । करच्छेदं भुजच्छेदं पादच्छेदं च शक्तितः । छेदयेत् क्षुरप्रेण कारयेद् दृढमुष्टिना । भल्लेन हृदयं भेद्यं मांसमात्रमथापि वा । लोहं भिन्द्यात्काकतुण्डः शितो वज्रमुखः खगः । कोपावकीमुखः काष्ठं भेदास्यः पट्टमस्थि च । चर्मसूचीमुखो भिन्द्यात् तथा शल्यकपत्रकः । विभिन्द्यात् करिणां कुम्भं तथा खड्गमुखः खगः । उष्ट्रीचर्म दंष्ट्रास्यः खर्जूरीकण्टकस्तथा । नागदंष्ट्रामुखो हन्याद्वालुकापरिपूरितम् । आर्द्रचर्म समूहं च (छिन्द्यादुत्पल पत्रकः)पलाशिकश्च कङ्कास्यो शृङ्गास्यः शरपत्रकः । सूचीकास्यः पन्नगुच्छः करवीरमुखस्तथा । मिश्रितं प्रतिकायं च भिन्द्याच्च निशितः खगः । एवं लक्ष्यानुरूपेण फलं कार्यमिषोर्मुखे । शरस्य विषयं सर्वमत्रमाहुर्विपश्चितः । धनुषो बलबोधाय इत्युपायः परिदर्श्यते । ज्यामध्यभागं संश्लिष्य बाणं संधार्य च स्थिरं । शक्यं तत्र गुणैः बद्ध्वा पाषाणैः परिपूरयेत् । यावत्कर्णान्तमायाति शरस्याभिमुखं शरः । शरयन्त्रस्थाः पाषाणा यावत्तुलया धृताः । तावत्पलप्रमाणस्तु तावन्मानं भवेद्धनुः । धनुःशतं शलाकाख्यं ज्याघातं शतपञ्चकम् । वामे शतत्रयं चापि दक्षिणे द्विशताधिकम् । उभौ चापौ करस्थौ च भाण्याक्ष्य क्रियते भ्रमः । संग्रामे कार्मुकबलं तथा समरार्तं दृढं । दृढस्फोटे महाशस्त्रेण विकर्षे च शताधिकम् । द्विशतस्फलकेन कर्णान्तं संप्रकीर्तितम् । धनुः प्राणानुसारि स्याद् गुणस्तदनुसारतः । बाणः क्वापि प्रयोगोऽपि त्रयाणां फलसाधनम् । शलाकाभ्याससिद्ध्यर्थं शलाकापि निरूप्यते । चतुरस्राः शलाकाः स्युर्दृढाः पुंखसनालिताः । शरवत्पञ्चमुष्ट्यादिमितभेदा वस्त्रवेष्टिताः । ताभिः समभ्यसेन्नित्यं यावद्दृष्टिः स्थिरा भवेत् । इति ।

पाशस्वरूपम्—पाशो हस्तद्वयमितस्त्रिगुणः कार्पासनिर्मितः । अङ्गुल्या पाशकं कुर्याद्भुवि स्थूलं प्रकल्पयेत् । देवताऽत्र संमुद्दिष्टो (गणेशो) विघ्ननाशनः इति ।

अङ्कुशस्वरूपम्—अङ्कुशं हस्तमात्रेण दण्डेन परिकल्पयेत् । मूर्ध्नि त्र्यङ्गुलमात्रं [illegible] । द्वादशाङ्गुलमानेन तीक्ष्णाङ्कुरारकेन च । [illegible] अङ्कुशस्याधिदेवोऽसौ (पवनः) परिकीर्तितः इति ।

खड्गस्वरूपम्—तीक्ष्णधारोऽतिकठिनो [illegible] मातिभिन्ना शिखा । पञ्चाशदङ्गुलो [illegible] उत्तमः परिकीर्तितः । चत्वारिंशदङ्गुलको मध्यमः परिकीर्तितः । [illegible] कोऽधमः [illegible] । [illegible] मध्यमः । [illegible] अधमः [illegible] । [illegible] । [illegible] । [illegible] । [illegible] । [illegible] । [illegible] । [illegible] ।

त्रयोदशाष्टरसांगुलत्रयविस्तृतम् । नानापुष्पलतापत्रैश्चित्रितम् सुमनोरमम् । तदूर्ध्वरेखाः कार्याः चतुरष्टाष्टकान्विताः । तेषु ष्टाष्टकोष्ठेषु ततः सिंहाभिवेशयेत् । मध्ये दुर्गाभिरामुष्टिसुवर्णाया दृढा । कथनात् छालिकाम्भोजनाभिमात्रांगुली मता । मध्ये तु दर्शिता कार्या धूम्रवर्णोज्ज्वलकथना । पताकाश्रुगया गुप्त्या योजयेच्चरणपद्मम् । वैडूर्यमयैः शीलैः मनोभिः पंचभिश्चिभिः । दृढ् मस्य देवता साक्षात् (कालिका) परिकीर्तिता । एतद्गुणमनघ्नस्य सहस्रं मनुसाहसम् । दोषोऽप कथ्यते तस्य येन स्यात्योमंत्रतिः । कार्य बहुविशालादिसम्पूर्णत्वपेक्षिणाम् । कन्यादानां दुरिषकानां शरदानां दशैव च । कार्याचा सहितःसत्त्वगः समरे भंगदायकः । चतुर्दिलोहजोदरयः कुण्ठधारः कर्कशिनः । स्तुतिकः कनिष्ठकान्तायथा दोषमयः स्मृतः इति ।

फलकस्वरूपम्—फलकं त्रिविधं दीर्घं चतुरस्रं च वर्तुलम् । षोडशांगुलविस्तारं त्रिंशद्गुणदीर्घकम् । दीर्घकार्यं दृढं बहुलगुणकाष्ठादिनिर्मितम् । फलकं चतुरस्रं शताहोदरसमयं दृढम् । वर्तुलं तु विधातव्यं त्रिंशदंगुलविस्तरम् । मध्ये त्रिवलयं तेषां वृत्तं चन्द्रराजेन तु । दिक्षु चतुःसिद्धेशार्थं तत्र विम्बचतुष्टयम् । मध्ये तिर्यग्विधातव्यं दृढकुम्भं शनैश्चरं । मूलं पञ्चांगुलायामं कदलीकोषमभिमम् । पञ्चांगुलोन्नतं कुम्भं मध्ये त्र्यंगुलचम्पकम् । कुम्भचम्पकयोर्मध्ये कण्ठमंगुलमेककम् । तदग्रे पल्लवं दिग्भिर्द्वन्द्वं केतकमभिमम् । दशपञ्चांगुलायामं तीक्ष्णाग्रं त्र्यभिसंयुतम् । दशांगुलाक्षमिभिर्विद्धं चतुर्भिरथ चतुर्दिशम् । सधा धार्यं यथा भिन्द्याद्रिपुदक्षकरं बलात् । अधः शल्यं हस्तमात्रं तीक्ष्णाग्रं केतकोपमम् । पार्श्वयोरपि तन्मूले द्वादशांगुलपल्लवौ । विधातव्यौ सुतीक्ष्णाग्रौ वामदक्षिणतः पृथक् । फलकदण्डनिबन्धार्थं मूले पाशं प्रकल्पयेत् । शनैश्चराधः पाशाभ्यां बद्धं दृढपृष्ठले । उपरिष्टाच्छक्षाणाद्द्वादशांगुलतो न्तरे । दृढमूलं भूतनायकं कुशाग्रं निवेशयेत् । तत्राधिष्ठातृ देवी स्यां (दुर्गा) दुर्गतिकारिणी । भूतनाथो (गणेशानः) शल्ये कालानलो (हरः) । शनैश्चरे भवन्त्येव (रविचन्द्रहुताशनाः) यद्वा दारुमयं कुर्याद्विधिवत् लोहयन्त्रितम् । मध्योदरगतोभद्रकरबन्धविनिर्गतम् । चर्माणि दृढ गवचर्मोत्थं वर्तुलं केऽपि कुर्वते । पृष्ठोन्नतं चतुर्विम्बैस्तैजसैर्हरिभिर्वृतं । बाह्ये चन्द्रराजेनाढ्यं मध्यमं चान्यचर्मजम् । गर्भमध्येऽपि कवचं गर्भबन्धं प्रकल्पयेत् यथा निश्चलमादध्याद्वामहस्ततलोदरे इति ।

गदास्वरूपम्—गदा च द्विविधा प्रोक्ता तैजसी लौहजेति च । घटिता योधहस्तस्य चतुःपञ्चाशदंगुलैः । अथवाष्टाधिकैश्चत्वारिंशदंगुलकैर्मता । निर्मिता तीक्ष्णशिखरा गुप्ता धाराभिरष्टभिः । मुष्ट्यां तु दृढया बद्धा चतुरंगुलमात्रया । स्वबाहुबलयोग्येन गौरवेण गुरुर्मता । सत्ये सिंहबलाः सर्वे त्रेतायां तु गजा इव । द्वापरे व्याघ्रसमाश्च कलौ वृषबला मताः । तस्मात्तस्य तूर्या शैर्गदा कार्या कलौ युगे । विशेषाम्भुलौहलोहेन शोधितेन बलीयसा । (संकर्षणो)ऽधिदेवः स्यात् शरच्चन्द्रसमद्युतिः (कालभैरवाराहाः) वसन्त्यस्याः शिरआदिषु । इति

शल्यस्वरूपम्—शल्यं तु नवहस्तैर्वा सप्तभिर्वाथपञ्चभिः । चतुर्भिर्दृढमूलाग्रं सप्तभिर्वाथपञ्चभिः ॥ पर्वभिः संयुतं तीक्ष्णलोहजं मल्लचाग्रजम् । अधः श्री फलवत्

स्थूलं शंकुमल्लोहनिर्मितम् । अभिनीतनयी देवी उमामावाभिदेवते । इति ।

छुरिकास्वरूपम्—छुरिका कर्त्तिकाकारा हस्तमात्रामहोत्तमा । एकधारा स्थूलपृष्ठा तीक्ष्णाग्रा दृढमुष्टियुक् । शाम्या स्वर्णगुणोपेता सदार्थैर्निन्दिता मता । अस्मिन्नधिदेवोऽस्याः सर्वसौभाग्यदायकः । इति ।

दण्डस्वरूपम्—दण्डो लोहमयोदीर्घः पूर्णमाणोऽतिवर्तुलः । हस्तदण्डनिभकायः स्थूललोहयुगाग्रयुक् । तन्मध्ये धरार्गायुगल् वद्धस्निग्धवपुर्दृढः । देवता कथिता ह्यस्य भगवन्ती (धनेश्वरी) इति ।

कुन्तस्वरूपम्—कुन्तस्तु त्रिविधः प्रोक्त उत्तमोमध्यमोऽधमः । नवभिः सप्तभिर्हस्तैः पञ्चभिश्चैव ते मिताः । तृतीयभागप्रमितं वंशामध्ये नियोजयेत् । दृढदारुमयं चापि सारांशं रचयेत्तथा । उभयोर्हस्तमानेन कुर्याल्लोहमये मुखे । अधोमुखन्तु स्थूलाग्रमूर्द्ध तीक्ष्णमुखं मतम् । अभिन्नय समायुक्तं (चन्द्रसूर्याग्न्यधिष्ठितम्) (कुमारो देवता) ह्यत्र सर्वसेनाधिनायकः । इति ।

वज्रस्वरूपम्—वज्रः हस्तद्वयमितं मध्ये मुष्ट्या प्रकल्पितं । उभयत्र शिखा कार्या कदलीकोपसन्निभा । अस्त्रिभिर्बहुभिर्युक्तं द्विविधं तत्तु पूर्ववत् । (वासवो) देवता ह्यस्य सर्वत्र शुभकारकः । इति ।

पट्टिशस्वरूपम्—पट्टिशं तीक्ष्णलोहोत्थं स्वहस्तत्रितयान्वितम् । इक्षुपत्रनिभं तीक्ष्णं द्विधारं दृढसारवत् । हस्तवेष्टनकं मूले रम्भापुष्पफलोपमम् । वलयत्रितयं युक्तं हस्ते धर्तुं तदन्तरे । कुर्यात्तिर्यग्देहदण्डं चतुरंगुलमानतः । (चामुण्डा) देवता चात्र कथिता भयनाशिनी । इति ।

मुद्गरस्वरूपम्—मुद्गरः सार्धहस्ताढ्यो दण्डाकारः सुमुष्टियुक् । तीक्ष्णलोहमयैः कर्णैस्तीक्ष्णधारैस्तथाष्टभिः । उपरिष्टात्कृतः शीर्षः पद्मकोरकसन्निभः । मध्ये वलयचिन्हाढ्योगुरुर्वीर्यानुरूपतः । अस्याधिदेवता देवो (रेवतीरमणो) मतः इति ।

शरभस्वरूपम्—शरभं तु शराकारं हस्तमात्रायतं शितं । मूले मुष्टियुतं कुर्यादेकधारं सुलोहजम् । (भैरवी) देवता चात्र वसन्ती पूज्यते भटैः इति ।

कुठारस्वरूपम्—कुठारोतैक्ष्णलोही स्याद्द्वादशांगुलदैर्घ्यभाक् । तीयग्धारा मूलपाशा काष्ठदण्डेन मण्डिता । स्वबाहुभ्यां प्रहर्तव्या तीर्यग्दक्षिणवामतः । अस्यास्तु देवता प्रोक्ता (कराली) यमकर्कशा इति ।

परशुस्वरूपम्—परशुस्तीक्ष्णधारः स्याच्चन्द्राकारो नतोन्नतः । दारुदण्डेन संयुक्तः षोडशाङ्गुलविस्तृतः । पाणिपल्लवयोर्मध्ये कण्ठः पन्नगवेष्टितः । देवता (विकराली) च कथितास्य समासतः इति ।

कर्तरीस्वरूपम्—कर्तरीखड्गवत्तीक्ष्णा मुष्ट्यादिपरिशोभिता । वक्राद्विधारा सुदृढा एकधाराथवा ह्यृजुः । तद्भेदा धूपकाद्याश्च कर्तर्याद्याः प्रकीर्तिताः । अस्यास्तु देवता पूज्या (बलाका) विघ्नधारिका । इति ।

मूषलस्वरूपम्—मूषलं तीक्ष्णशिखरं सद्माक्रमतो पृथु । मूले मुष्टियुतं लौहदण्डहस्तत्रयान्वितम् । सार्द्धहस्तद्वयमितम् के प्रकुर्वन्ति योधिनः । देवता (रुद्र) नामास्य

कथितातिभयङ्करी । इति ।

टङ्कस्वरूपम्—टङ्कस्तु लोहघटितो हस्तमात्रः शिताग्रकः । मूलपाशो द्विहस्तेन दारुदण्डेन संयुतः । अस्यापि वीर्यदातृत्वा (त्पशाची) देवता मता । इति ।

खट्वाङ्गस्वरूपम्—खट्वांगं लोहजं ज्ञेयं दृढं डमरुसन्निभम् । मध्ये करमिता मुष्टिः कल्पनीयास्य शिल्पिभिः । (त्र्यम्बको) देवता ह्यत्र सर्वापत्तिनिवारणः ।

भुशुण्डीस्वरूपम्—भुशुण्डीमुण्डलोहात्था पुंप्रमाणसमन्विता । नारिकेलफलाकारा हस्तमात्रमिताग्रका । मध्य हस्तमिता मौढहस्तद्वयमितोदरा । मूले वितस्तिमात्रेण खड्गवन्मुष्टिसंयुता इति ।

भिन्दिपालस्वरूपम्—भिन्दिपालः पञ्चहस्तस्त्रिहस्तो मुद्गराकृतिः । अग्रे चत्वारि तीक्ष्णाग्रैरायसैः कण्टकैश्चिताः । (घर्घरा) देवता ह्यत्र कथितातिविभीषणा इति ।

चक्रस्वरूपम्—तीक्ष्णं लोहमयं चक्रं तीक्ष्णधारं सुवर्तुलम् । नेमिस्त्र्यंगुलविस्तारा हस्तैक शून्यमन्तरा । तन्मध्ये तुन्दवलयं द्वादशांगुलवर्तुलम् । अरैः षोडशभियुक्तं द्विपड्भिरथवाष्टभिः । गिरिलोहेन घटितमस्त्रं चक्रं विनिर्मितम् । एतस्य देवता (सूर्यः) सर्वसन्तापनाशन इति ।

शूलस्वरूपम्—शूलं तु लोहजं तीक्ष्णं शिखरं सुषिसंयुतम् । स्थूलमूलं क्रमाच्छीर्णं स्वर्णादिपरिलाञ्छितम् । पुंप्रमाणं प्रविख्यातं चतुर्हस्तमितं तु वा । कर्तव्यं विधिवद्वीरैः (शङ्करोऽ) स्याधिदैवतम् इति ।

भल्लस्वरूपम्—भल्लदण्डः सप्तहस्तः पञ्चहस्तमितोऽपि वा । दृढवंशमयः शुद्धोविव्रणः सरलः क्रमात् । मुखे फलं विधातव्यं तीक्ष्णलोहमयं दृढम् । सार्द्धद्विहस्तप्रमितं सार्द्धहस्तमितं तु वा । मध्ये शिरामयं तत्र मूलेऽष्टांगुलविस्तृतम् । क्रमात्कृशं च शिखरं तीक्ष्णमिक्षुदलं यथा । (नन्दीश्वरो) देवतास्य सर्वानन्दविवर्द्धन इति ।

शवलास्वरूपम्—शवला लोहघटिता पुंप्रमाणा दृढायता । मध्ये निवद्धमुष्टिः स्यात् दर्पहादिदामभिः । ऊर्ध्वमिक्षुदलाकारा ग्रन्थिता कर्णिशेखरा । चतुर्द्धारामर्था चाथ तीक्ष्णधाराप्रशोभिनी । (भ्रुकुटी) देवता ह्यस्याः कथिता शास्त्रसम्मता इति ।

यमधारास्वरूपम्—यमधाराफलं तीक्ष्णं केतकीकोषसन्निभम् । धाराद्वययुतं मूले लोहपट्टशलाकया । मध्ये मुष्टियुगं कार्यं धर्तुमुष्टिमितं ततः । अस्य दोषगुणाज्ञया पक्षवद्योधपुङ्गवैः । (महाकालो) देवताऽस्य दूरादरिनिवारण इति ।

परिघस्वरूपम्—परिघो लोहघटितस्त्रिहस्तः स्थूलकोटियुक् । वेणुदण्डनिभो मध्ये मुष्टियुक्तो दृढायतः । देवता (वीरभद्रो) ऽस्य सर्वभद्रविधायक इति ।

शक्तिस्वरूपम्—चतुर्हस्तमिता शक्तिर्वर्तुला यष्टिका मता । शूलवत्तीक्ष्णशिखरा त्रिहस्तं दधतीत्वधः । मूले चामरपुच्छाढ्या युक्ता त्वेणरश्मिना । (कार्तिकेयो)ऽधिदेवोऽस्याः शक्तिर्हेतिः प्रकीर्तिता इति ।

ऋष्टिस्वरूपम्—ऋष्टिर्विल्वफलाकारा विततामितशः शिखा । अयः शलाकापिता क्षिप्यते रज्जुबन्धनैः । (कालरुद्रो) ऽधिदेवोऽस्य सर्वविघ्ननिवारणः इति ।

शतघ्नीस्वरूपम्—शतघ्नी लोहनलीका दृष्टनालायता दृढा । षट्पुच्छं घनामूलं

[illegible] । (वर्मो) [illegible] इति ।

कवचस्वरूपम्—चतुर्विधं हि कवचं [illegible] स्यात् । लौहं कार्पा-
सं [illegible] निर्मितम् । [illegible] । [illegible]
[illegible] । [illegible] । कार्यं [illegible]
[illegible] । [illegible] ।
[illegible] । [illegible]
[illegible] वा दृढं च ।
[illegible] । [illegible]
[illegible] गर्भं कृत्वा विधानतः । [illegible]
[illegible] । [illegible] परितः परिवेष्टयेत् ।
[illegible] कुर्यात् यथा [illegible] । [illegible]
[illegible] । [illegible]
[illegible] । [illegible] यथा [illegible]
[illegible] । [illegible]
नम् । [illegible] च । वैदूर्यं [illegible] रत्नानां पञ्चकम् सह
[illegible] । [illegible] । [illegible] रचयेद्-
गुणम् । [illegible] । [illegible] फलगुर-
सम् । पादत्राणं विधानज्ञं पट्टिकाभिर्युतं तथा । [illegible] पादान्त-
स्तमम् । लोहजालमयं पादाकटिपर्यन्तमावृतम् । एवम् [illegible] कुर्वन्ति कवचं कोऽपि
योधिनः । [illegible] निवारयेत् । [illegible] सन्धौ [illegible]
[illegible] । [illegible] तथा । सर्वमिदं तथा चर्ममयं
कथितं पुनः । इत्थं निगदितं सर्वं कवचस्य निरूपणं । (सुमेद)देवता चास्य सर्वसत्व-
समन्वित इति ।

नलिकास्वरूपम्—अस्ति शस्त्रान्तरं किञ्चिन्नलिका नाम भूभुजां । यन्त्रेण कल्पिता पूर्वं भोजेनाथ प्रकाशिता । पालिता मुण्डलोहेन वङ्गलोहेन वा कृता । पञ्चतालादितस्तद्वदेकविंशावधि क्रमात् । मिताविषमतालेन वेणुदण्डोपमा दृढा । अमान्तश्च क्रमात्क्षीणा मुखे धुस्तूरसन्निभा । मूले छिद्रेण सहिता वन्हिद्वाराय कर्णिका । मध्ये तद्वन्हिरन्ध्रान्तं सुस्निग्धसुषिरान्विता । वन्हिरन्ध्रान्तरं पश्चादारभ्य चतुरङ्गुलैः । तासां या हस्तवाह्या सा घाररूपेण दारुणा । सम्बद्धा मूलतस्तीर्यक् दारुहस्तेन शोभिता । तन्मध्ये लोहयन्त्रास्थवन्हिधात्रीं च बिभ्रती । मूले दुर्गन्धसहिता तदग्रे मक्षिकान्विता । मक्षिकालक्ष्ययोगेन समा दृष्टिर्हि जायते । स्कन्धवाह्या च या तासां शकटेनोह्यते च या । न तस्या दृष्टिरन्ध्रादि सा निधेयानुमानतः । तद्गर्भे पूरयेत्क्षार-गन्धकाङ्गारचूर्णकैः । शलाकया लोहजया रुध्यमाना चतुर्गुणैः । तत्रैव गुलिकान्यस्य सीसकादिविनिर्मिता । आग्नेयचूर्णैस्तैरग्निरन्ध्रं सीघ्र्यकप्रपूरयेत् । लोहयन्त्राग्ररज्जुस्थवन्हिना दीपिता सती । परिक्षिपति सा दूरं गुलिका लक्ष्यभेदिनी । अन्यास्ति

नलिका लौही हस्तमात्रायताऽदृढा । बाह्यतः परिणाहेन प्रमिताष्टादशाङ्गुला । चतुरङ्गुलमानेन मध्यरन्ध्रेण संयुता । पृष्ठतोगुच्छवद्बन्धा त्रिघ्नलोहशलाकया । तन्तुना लोहजातेन खचिता चातिनिश्चला । पश्चाद्‌तिकृशं स्निग्धं वन्हिरन्ध्रञ्च बिभ्रती । आग्नेयचूर्णपूर्णा सा पृष्ठतोज्वलिता सती । स्वयं याती ज्वलत्येव मथ्नाति रिपुवाहिनीं । भागैकं गन्धकस्य स्याद्‌द्विभागं क्षारमुत्तमम् । चतुर्भागं तथाङ्गारमेतदाग्नेयमादिमम् । पञ्चभागं गन्धकस्य क्षारं सप्तांङ्घ्रिसम्मितम् । अङ्गारन्तु चतुर्भागमेतदाग्नेयमुत्तमम् । एतेहि द्विविधे चूर्णे गुलिका नलिकासु च । नियोजनीये सुदृढं लोहदण्डाग्रघातनैः । षड्भागं गन्धकं तस्माद्‌ यवक्षारं चतुर्गुणम् । अङ्गारमष्टभागं च श्लक्ष्णचूर्णं तदर्द्धकम् । एतत्तु क्षिप्तनलिकायोग्यमाग्नेयचूर्णकम । एभिः प्रज्वलिता याति गर्जनं नलिका हि सा । सार्द्धत्रिभागं गन्धः स्यादंगारोवेदभागयुक् । चतुर्विंशतिभागेन यवक्षारेण संयुतम् । एतच्चूर्णमपि क्षिप्रं योज्यं तत्र तथा दृढं । दीप्ता सा नलिका तेन रिपुं याति मनोजवा । द्विविधां नलिकां तान्तु प्राहुराधुनिका भटाः । यन्त्रायुधमिति स्वैरं युद्धे चाप्युपयोगिनीं । तस्यान्तु विद्यमानायां षट्‌त्रशत्त्वं न सेत्स्यति । तस्मात्सप्तत्रिंशदिति शस्त्राणां गणनास्तु यः । मैवं चैषाधुनाख्याता पृथिव्यां भोजराजतः । यस्मात्प्राचां मता नैषा न शस्त्रे गणिता तत इति ।

घण्टास्वरूपम्—घण्टा कांस्यमयी सूक्ष्मा विवृताष्टाङ्गुलानना । उत्तमाद्द्विगुणा नीचात्र्यङ्गुलाजिह्वयान्विता । सा यथोक्तप्रमाणास्यान्मूले पाशीसमन्विता । पाण्डीलोहेन चाग्रेण रचनीयेति केचन । रज्वा तत्पाशियुतया बन्धनीया तथा भटैः । (नैरृते) देवता ह्यस्या सर्वस्याकर्षणक्षम इति ।

शङ्खस्वरूपम्—शङ्खः सुरन्ध्रपृथुलो विशालो मधुरस्वनः । अच्छिद्रो दक्षिणावर्तो वामावर्तोऽथवा मतः । विधातव्यो भटवरैर्वैरिवर्गभयावहः । शंखस्य देवता (सोमो) दुग्धार्णवसमुद्भवः । हिण्डीरद्रवपिण्डपाण्डरतनुः सत्पुण्डरीकोल्लसत्कोपस्निग्धवपुर्वृहत्कुहरो दीर्घप्रणाल्यान्वितः । शंखः शंखलुसंतनोति नृपतेः शत्रुक्षयं दक्षिणावर्तोभर्तृसुखं करोति कुरुते शब्दाभिषेकोत्सवम् । एकावर्तोयशोघ्नः समरमयकृदावर्तयुग्मस्तथैव । त्र्यावर्तो वीर्यदायी मृतिमपिचतुरावर्तिशंखस्तनोति । आयुः सौख्यं जयं च प्रबलमपि तथा पञ्चसप्ताद्दरिद्राः । कुर्वन्ति प्राणपीडां मृतुवसुदशमावर्तिशंखाः क्रमेण । इत्थं निगदिताश्चात्र लक्षणं शस्त्रसंहतेः । एवमुक्तस्वरूपेण घटनीयानि तान्यपि । धनुः शरश्च वाग्घंटा शंखः पाशांकुशौ पुनः । कवचं फलकं चेति नवज्ञेयानि सर्वतः । आकर्षकं द्रावकं च रक्षकं क्षेपकं तथा । खड्गः कुठारो परशुः क्षुरप्रं पट्टिशस्तथा । कर्तरी चेति षड् वीरैर्घातनीयायुधान्यपि । भुशुण्डी भिन्दिपालश्च मुद्गरः परिघोगदा । पट्टिशश्च मुसलं टङ्कः खट्वाङ्गमित्यपि । आयुधानि दशैतानि शत्रुघोथ कराणि च । अष्टिमकं शतघ्नी च शक्तिश्चेति चतुष्टयं । बाहुप्राबल्यवद्वीरैः क्षेपणीयं महामृधे । शल्यञ्च छुरिका कुन्तः शवला शूलभल्लके । यमधारा इमे; सप्त शत्रूणां मर्मभेदिनः । सन्ये शस्त्रं क्षत्रियाणामस्त्रं यन्त्रमयं स्थितम् । प्रयोगसंहारभेदात्मन्त्रकं द्विविधं हि तत् । इति ।

स्वातीयुता प्रतिपदमारभ्य नवमीपर्यन्तमश्वपूजा कार्या। स्वातीयोगाभावे यस्यान्तिथौ स्वातीयोगः प्रातर्भवेत् तामारभ्य नवमीपर्यन्तमश्वपूजा विधेया। कल्हारसूर्यवल्लीदर्शनं चाश्वानां न कारयेत्।

तस्याभिसारणाद्राज्ञो विजयः समुदाहृतः। शस्त्रास्त्रमंत्रैर्होतव्यं पायसं घृतसंयुतं। हुतशेषं तुरङ्गाणां राजान्नमुपहारयेत्। लोहाभिसारिकं कर्म तेनैतदृषिभिः स्मृतम्। धृतपल्ययनानश्वान्गजांश्च समलंकृतान्। भ्रामयेन्नगरे नित्यं नन्दिघोषपुरःसरान्। प्रत्यहं नृपतिः स्नात्वा सम्पूज्य पितृदेवताः। पूजयेद्राजचिन्हानि फलमाल्यविलेपनैः। पूजामंत्राः आमन्त्रणमंत्राः शस्त्रसाधनमंत्राश्च नवरात्रादिस्तवके लेखिष्यामः। शस्त्राणां साधनं प्रयोगसंहारभेदाः मत्तखेलनं अभ्यासक्रिया शस्त्रमन्त्रोद्धारः रणजययोगाः यन्त्राणि शस्त्ररचा शस्त्रमोचनमस्मकुट्टनादयः दृष्टिसाधनं व्यूहरचना विमानादिरचनाप्रकारश्चाप्रसंगात् ग्रन्थविस्मृतिभयाच्चेह न प्रपञ्च्यते। इत्यलम्।

प्रतिपदमारभ्येति—(देवीपुराणे)–आश्वयुक्शुक्लप्रतिपत्स्वातीयोगे शुभे दिने। पूर्वमुच्चैः श्रवानाम प्रथमं श्रियमाहरत्। तस्मात्तद्दैवतैरस्तथपूज्योऽसौ श्रद्धया सदा। पूजनीयाश्च तुरगा नवमीं यावदेव हि। शान्तिं स्वस्त्ययनं कार्यं तदा तेषां दिनेदिने। धान्यं भल्लातकं कुष्ठं वचां सिद्धार्थकांस्तथा। सूत्रेण ग्रन्थिं तेषां तु बन्धयेत्। पापव्यैर्वारुणैः सौरैः शाक्रमंत्रैश्च वैष्णवैः। वैश्वदेवैस्तथाग्नेयैर्होमः कार्यो दिनेदिने। तुरंगारक्षणीयास्तु पुरुषैः शस्त्रपाणिभिः। न च ताड्याः पर्वणि त्यैर्दिवसत्रयं तथा: कथञ्चन। अत्र तुरंगपूजायाः उच्चैः श्रवपूजानः पृथग्विधानात् प्रतिमायामुच्चैः श्रवसं रैवन्तनामकं देवं च सम्पूज्य प्रत्यश्वपूजनं कर्तव्यमिति प्रतीयते। यामव्यैरित्यादिमन्त्रवचनेभ्यः प्रत्येकं कपिञ्जलाधिकरणन्यायेन मंत्रेषु त्रित्वं लभ्यमहर्नि (अनन्तदेवः)। यस्यान्तिथाविति–आश्वयुक्शुक्लपक्षे तु स्वातीयोगे शुभेदिने

प्रत्यक्षाश्वपूजनात्पूर्वं प्रतिमादौ उच्चैःश्रवपूजां विधाय रैवन्तपूजनं कार्य्यम्। कदाचिदेतासु स्त्रीकर्तव्यप्रसक्तौ तदा रैवन्तपूजा न विधेया। अश्वशालायां सार्वरात्रिकाः प्रदीपास्तथा मर्कटाश्च रक्षणीयाः।

इतिब्राह्मवचनात् (अश्वशास्त्रे)–वाजिनीराजनं पश्चाद्विस्था चिन्नां च वैधृतिम्। (गोविन्दार्णवे)–तृतीयापञ्चम्योरपि विधिः। स्वात्स्यादित्ये तृतीयादौ सप्ताहं चाश्विने सिते। रक्षां कृत्वा हयानां तु शान्त्या नीराजयेत्ततः इति। अत्र पञ्चम्योक्तकालेषु दैवात्तदनारम्भे गौणकालत्वेनाष्टमी ; द्वादशीपूर्णमास्योर्विहिता—(भूपालवल्लभे)–कार्तिके मासि पूर्णायामष्टम्यां द्वादशीदिने। आश्विने शुक्लपञ्चम्यां हयनीराजनं स्मृतम्। (दर्शनमितिहयशारीरे)–सौगन्धिकपुष्पसूर्य्यवल्लीदर्शनं तुरगाणां न कारयेत्। दृष्ट्वा पुष्पद्वय

(शालिहोत्रोक्तं) राजयोग्यमुख्याश्वलक्षणम्॥

अर्कपत्रसवर्णस्य दन्ताह्यविरलाः समा। लाक्षारससमाः जिह्वा स्तनौ चोत्तरतालु च। मणिवैडूर्य्यवर्णे च नेत्रे यस्य नखास्तथा। सु शुक्रवाहनो वाहो विषये यस्य तिष्ठति। कौरव्य पृथिवी तस्य चतुरन्ता स सागरा। आज्ञा विनिर्जिता ।तष्ठेद्यस्याश्वस्तादृशो भवेत्। समासे विजयी चैव सर्वकामार्थदः सदा। शुक्लपक्षसवर्णश्च यस्य रक्तं भवेच्छिरः। स्निग्ध सर्वसमं चाक्षि नान्यवर्णेन चावृतम्। तेन राष्ट्रं च कोशश्च कोष्ठागारं च वर्द्धते। गौरोमणिनिभश्चैव श्वेताश्वस्ताम्रतालुकः। बलं कोशोऽथ मित्राणि प्रजा तेनैव वर्द्धते। श्वेताश्वस्तालुरक्तश्च मध्वक्षोलोहितैः सटैः। आवर्तशुद्धं तं वाहं राजा वेश्मनि वासयेत्। तेन राष्ट्रं च कोशश्च कोष्ठागारं च वर्द्धते। कृष्णमेघप्रभो वाजी मेघदुन्दुभिनिःस्वनः। कृष्णसर्पइवोदग्रः शुभसत्वगतिश्च यः। एतेनानुप्रयातस्य चक्रं न प्रतिहन्यते। शङ्खश्वेतोभवेद्वाजी शङ्खघोषसमस्वनः। सशीघ्रं हंसवद्गच्छेन्नात्यर्थं विनतोन्नतः। तेन राष्ट्रं च कोशश्च कोष्ठागारं च वर्द्धते। अरिष्टवर्णोविनतस्ताम्रोष्ठस्ताम्रतालुकः। पराभूताश्च तिष्ठन्ति शत्रवः कामदोहि सः। पुष्करं पृथिवो माला चन्द्रोवै लाङ्गुलं गदा। धनुः शङ्खः पताका वा ललाटे यस्य दृश्यते। सर्वशुक्लानि कौरव्य तस्य पार्थिवलक्षणम्। श्वेतपादश्च तुरगः श्वेतजिह्वश्च लोहितः। आनन्दं तं विजानीयात्परराष्ट्रप्रमर्दनं। वक्रं वा यदि वा वज्रमायतं वा धनुर्भवेत्। वर्णान्यत्वेन कौरव्य तस्य पार्थिवलक्षणं। एतद्विलक्षणं राजा येषु चाश्वेषु लक्षयेत्। तेषामास्तरणे लेपं शिरस्थानानुलेपनं। ...माल्यामगंधाश्च भोजनाग्रं तथैव च। देयं नित्यं सदाश्वेभ्यः कर्तव्याश्च प्रदक्षिणाः। ...रंगाः पूजिताः सम्यग्यस्य तिष्ठन्ति वेश्मनि। वर्द्धते पुत्रपौत्रैश्च मित्रैः शत्रूञ्जयन्त्यथ ...नि।

आश्विनशुक्लद्वितीया—अस्यां दानस्यानन्तफलम् ।

आश्विनशुक्लचतुर्थी—कृष्णनवम्यां प्रबोधितायादेव्या अस्यामभ्यङ्गसंस्कारैः केशान्विशोधयेत् ।

आश्विनशुक्लपञ्चमी—अस्यां शान्तिपञ्चमीव्रतम्—तत्र शची-

वाहा न लभन्ते शुभां गतिम् । तस्मात्सौगन्धिकं पुष्पं सूर्य्यवल्ली च वर्जयेदिति । (सौगन्धिकंतुकल्हारमित्यमरः) स्थलकमलमिति यावत् सूर्य्यवल्ली हुरहुरेति प्रसिद्धा । रैवन्तपूजनमिति—(सारसिन्धौ)—कुङ्कुमागुरुकर्पूरचन्दनाद्यनुलेपनैः । पशुपुष्पार्घधूपैश्च दधिमोदकपायसैः । ये पूजयन्ति रैवन्तं तेषां श्रीरनपायिनी इति । न विधेयेति—अभूद्वै पूर्वभूपस्य पत्न्या रैवन्तपूजने सूनु नाशस्ततोनारी न नियोज्या तदर्च्चने इति । (वाजिनीराजनविधिश्च नवरात्रादिस्तवके लेखिष्यामः) । मर्कटाश्चेति—(विष्णुधर्मोत्तरे)—तुरंगार्थं तथा धार्य्याः प्रदीपाः सार्वरात्रिकाः । कुक्कुटांश्चारणांश्चैव मर्कटांश्च विशेषतः । धारयेदश्वशालासु सवत्सां धेनुमेव च । अजाश्च धार्य्या यत्नेन तुरगाणां हितैषिणा इति । श्यामरक्तमुखभेदेन वानरमर्कटभेदोऽत्र ज्ञेय इति (अनन्तदेवः) । मन्दुरान्ते सदा धार्य्यो रक्तवर्णो महाकपिः । सर्वामयविनाशाय वाजिनां च विवृद्धये इति । (वाजिशालातुमन्दुरा) । अन्यच्चविशेषो—(ग्रन्थान्तरे)—गोगजाश्वाविशालासु तत्पुरीषस्य निष्क्रमम् । अस्तं गते न कुर्वीत देवदेवे दिवाकर इति ।

(वरुणादिग्रहगृहीतानां विमोक्षोपायः शालिहोत्रादिग्रन्थेष्ववलोकनीयः) ।

अनन्तफलमिति—(स्कन्दपुराणे)—आश्विने मासि यैः पुण्या द्वितीया शुक्लपक्षगा । दानं प्रदत्तमेतस्यामनन्तफलमश्नुत इति ।

केशान्विशोधयेदिति—(देवीपुराणे)—कन्यायां कृष्णपक्षे तु पूजयित्वार्द्रभेऽम्बिका । नवम्यां बोधयेद्देवीं गीतवादित्रनिःस्वनैः । कुर्य्याच्छुक्लचतुर्थ्यां तु देव्याःकेशविशोधनम् ।

सहितं कुशमयं नागं घृतक्षीरसलिलैः स्नापयित्वा सम्पूज्य क्षीरमिक्त गोधूमान्नं नैवेद्यं दद्यात्। अत्रैव प्रशोधितकेशायादेव्याः पूर्वाह्णे स्नानं कार्य्यम्। अस्यामेवोपाङ्गललिताव्रतम्। अस्मिन्व्रते पञ्चमी अपराह्णव्यापिनी ग्राह्या। दिनद्वये तथात्वे पूर्वा ग्राह्या युग्मवाक्यात्। अत्रैवापराह्णव्याप्तौ परैवेति काशीनाथः। पूर्वविद्धायां सन्ध्यागर्जिते परा ग्राह्या।

आश्विनशुक्लेमूलनक्षत्रे—पुस्तकेपु सरस्वतीमावाहयेत्। ततोऽध्यापनादि न कुर्यात्। अस्मिन्नक्षत्रं पूर्वविद्धं ग्राह्यं। सामा-

कुशमयं नागमिति—(भविष्योत्तरे)-तथा चाश्वयुजे मासि पञ्चम्यां कुरुनन्दन। कृत्वा कुशमयं नागमिन्द्राण्या सह पूजयेत्। घृतोदकाभ्यां पयसा स्नापयित्वा विशांपते। गोधूमैः पायसासिक्तैर्भक्ष्यैश्च विविधैस्तथा। पूजयेत्कुशशांद्दूलं तस्य शेषादयो नृप। नागाः प्रीता भवन्तीह शान्तिमाप्नोति वै विभो। इति। स्नानमिति—(देवीपुराणे)-प्रातरेव तु पञ्चम्यां स्नापयेत्सलिलैः शुभैरिति। उपाङ्गललिताव्रतमिति—(स्कान्दे)-विधानं तस्य वक्ष्येऽहं तच्छृणुष्व तपोधन। शुक्लपक्षस्य पञ्चम्यामाषे मासि चरेद्व्रतम्। गर्जितं संध्ययोस्त्याज्यं दिनवृद्धिक्षयौ तथा इत्यादि। अपराह्णव्यापिनीति—विनिर्वर्त्याह्निकं कर्म शुचिरागविवर्जितः। चत्वारिंशत्तथाष्टौ कल्पितानि विधानतः। इत्याद्युक्त्यामण्डपनिर्माणाद्युक्त्या। अपराह्णस्यैव कर्मकालत्वात्।

सरस्वतीमावाहयेदिति—(संग्रहे)-आश्विनस्य सिते पक्षे मेधाकामः सरस्वतीम्। मूलेनावाहयेद्देवीं पूर्वापाढासु पूजयेत्। उत्तरासु बलिं दद्यात्श्रवणेन विसर्जयेदिति। नकुर्य्यादिति—(रुद्रयामले)-मूलऋक्षे सुराधीश पूजनीया सरस्वती। पूजयेत्प्रत्यहं देव यावद्वैष्णवऋक्षकम्। नाध्यापयेन्न च लिखेन्नाधीयीत कदाचन। पुस्तके स्थापिते देव विद्याकामोद्विजोत्तमेति।

न्यनिर्णयानुसरणादाचाराच्च । श्रवणाद्यपादे विसर्जनमितिशिष्टाः।

आश्विनशुक्लषष्ठी—अस्यां ज्येष्ठर्क्षयुतायां केवलायां वा बिल्वशाखानिमन्त्रणं पत्रिकान्तरनिमन्त्रणं वा सायान्हे कार्यम । षष्ठ्यभावे तु पूर्वेद्यु स्तस्मिन्नेव काले निमन्त्रणं कार्य्यम । पत्रीप्रवेशनं-

---

श्रवणाद्यपादइति—(ब्रह्माण्डपुराणे)–आदिभागे निशायां तु श्रवणस्य यदा भवेत् । संप्रेषणं तदा देव्या दशम्यां च महोत्सवः।

ज्येष्ठर्क्षयुतायामिति—(देवीपुराणे)–ज्येष्ठानक्षत्रयुक्तायां कुर्य्याद्बिल्वाभिमंत्रणम् । इति । केवलायामिति—(देवलः)–तिथि नक्षत्रयोर्योगे द्वयोरेवानुपालनम् । योगाभावे तिथिर्ग्राह्या देव्याः पूजनकर्मणि इति । तथा च (विद्यापतिः) । तिथि शरीरं देवस्य तिथौ नक्षत्रमाश्रितम् । तस्मात्तिथिं प्रशंसन्ति नक्षत्रं न तिथिं विनेति । शाखानिमन्त्रणमिति—(हेमाद्रौ)–रावणस्य वधार्थाय रामस्यानुग्रहाय च । अकाले ब्रह्मणाबोधोदेव्यास्त्वयि पुराकृतः। अहमप्याश्रितः षष्ठ्यां सायान्हे बोधयाम्यतः।श्रीशैलशिखरेजातः श्रीफलश्रीनिकेतन। नेतव्योऽसि मया गच्छ पूज्यो दुर्गास्वरूपत इति। पत्रिकान्तरमिति—(दुर्गाभक्तितरङ्गिण्यां)–रम्भाकचीहरिद्राचजयन्तीबिल्वदाडिमौ । अशोकोदानवृक्षश्च धान्यादिनवपत्रिका इति। सायान्हइति—(भविष्ये)–षष्ठ्यां बिल्वतरौ बोधं सायं सन्ध्यासु कारयेदिति । पूर्वेद्युरिति—(ब्रह्माण्डपुराणे)–पत्रीप्रवेशात्पूर्वेद्युः सायान्हे बिल्ववासिनीम् । चण्डीमामन्त्रयेद्विद्वान्न पष्ठी पुरस्क्रिया । इति । (मात्स्ये)–ज्येष्ठावाप्यथवा षष्ठी सायङ्काले न चेद्भवेत् । सायमेव तथापि स्याद्बिल्वशाखाभिमंत्रणम् । सन्निकृष्टं तु यत्पूर्वं पत्रिकादिवसस्य तु। तद्दिने चरणं कृत्वा परे शाखां प्रवेशयेदिति । रात्रौ न कार्य्यामिति–पत्रीविसर्जनं रात्रौ प्रवेशं वा करोति यः । तस्य राज्यविनाशः स्याद्राजा च विकलोभवेत ।ऋक्षयोगानुरोधेन रात्रौ पत्रीप्रवेशनम् । विसर्गं वा चरेद्यस्तु सराष्ट्रः सविनश्यति इति । वृद्धिक्षयवशादिति—

रात्रौ न विधेयम् । तिथिवृद्धिक्षयवशात्त्र्यहसाध्यमपि पत्रिकापूजनं चतुरहव्याप्यपि द्व्यहव्याप्यपि च कार्य्यम् ।

आश्विनशुक्लसप्तमी—अस्यां मूलयुक्तायां केवलायां वा पूर्वाह्णे पत्रीप्रवेशः । उभयत्र सप्तमीलाभे परा ग्राह्या । सप्तम्यादितिथय उदयगामिन्या एव ग्राह्याः । पत्रिकां देव्युत्तरभागे स्थापयित्वा देवीमावाह्य पूजयेत् । एवमेवाष्टमीनवमीदिनेष्वपि पूजा कार्य्या । देव्यागृहं दक्षिणायनेऽपि कर्तव्यम् ।

(भविष्ये)—व्रती पूजयेद्देवीं सप्तम्यादिदिनत्रये । द्वाभ्यां चतुरहोभिर्वाह्नि सवृद्धिवशात्तिथेरिति ।

केवलायामिति—(हेमाद्रौ)—मूलाभावे तु सप्तम्यां केवलायां प्रवेशयेत् । युग्माभ्यां नवबिल्वस्य फलाभ्यां शाखिकां तथा । तथैव प्रतिमां देव्याः स्नात्वाभ्युदये प्रवेशयेदिति । पूर्वाह्ण इति—(तिथितत्त्वे)—पूर्वाह्णे नवपत्रिका शुभकरा संग्रामघोरावहा । सायाह्ने वधबन्धनादिकलहं सर्वक्षतं सर्वदा । सप्तम्यामस्तगायां यदि विशति गृहे पत्रिका श्रीफलाढ्या राज्ञः ससाङ्गराज्यं जनसुखमखिलं हन्ति मूलानुरोधात् । तस्मात्सूर्योदयस्था नरपति शुभदा सप्तमी प्राप्य देवीं भूपालो वेशयेत्ता सकलजनहिता राज्यमर्थं विहायेति । उदयगामिन्य इति—(देवीपुराणे)—युगाद्यावर्षवृद्धिश्च सप्तमी पार्वतीप्रिया । रवेरुदयमीक्षन्ते न तत्र तिथियुग्मतेति । तथा (नन्दिपुराणे)—भगवत्यादिप्रवेशादिविसर्गान्तास्च याः क्रियाः । तिथावुदयगामिन्यां सर्वास्ताः कारयेद्बुध इति । पत्रिकापूजनं च नास्थापितदेवी प्रतिमासमाप एव कार्य्यम् । प्रतिमापूजनमपि सप्तम्यामेवत्युक्तपक्षे प्रतिमायाश्चापि पत्रिकयेव सह प्रवेशादिविसर्जनान्तं कार्य्यमिति (दुर्गाभक्तितरङ्गिण्याम्) । दक्षिणायनेऽपीति—(कल्पतरौ)—महिषासुरहन्त्र्याश्च प्रतिष्ठा दक्षिणायनेऽपि । अन्यस्यापि तत्रैव । यस्य देवस्य यः कालः प्रतिष्ठाश्चमरोपणे ।

आश्विनशुक्लाष्टमी—(महाष्टमी)–सा चौदयिकीनवमीयुता ग्राह्या। सप्तमीयुक्ता तु सतिसम्भवे सर्वथा वर्जनीया यदा तु प्रथमदिनेऽष्टमीविद्धा नवमीक्षयवशात्परं सूर्य्योदयं नानुवर्त्तते तदा सप्तमीविद्धाप्यष्टमी स्वीकार्य्या। एवं पूर्वदिने सम्पूर्णाष्टमी परदिने च नवमीविद्धा तदापि पूर्वाष्टम्येव ग्राह्या। अत्र भौमवारयोगोऽतिप्रशस्तः। अस्यां पुत्रवता उपवासो न कार्य्यः। आयुधादीनि चास्यां पूज्यानि।

गर्त्तापूरशिलान्यासे शुभदस्तस्य पूजित इति।

नवमीयुतेति—नाष्टमी सप्तमीयुक्ता सप्तमी नाष्टमीयुता। नवम्या सह कार्य्या स्यादष्टमी सर्वदा बुधैरिति। नवमीसंयुता कार्य्या सदा दुर्गाष्टमी बुधैः। सप्तमीसंयुता हन्ति पूर्वपुण्यं पुराकृतं। तथा (स्कान्दे)—नवम्या सह संयुतामष्टमीं कारयेद्बुधः। दुर्गादेवी तथा पूज्या पूर्वविद्धां न कारयेत्। (स्मृतिसमुच्चयेऽपि)—शरन्महाष्टमी पूज्या नवमीसहिता सदा। सप्तमीसंयुता नित्यं शोकसन्तापकारिणी। जम्भेन सप्तमीयुक्ता पूजिता तु महाष्टमी। इन्द्रेणनिहतो जम्भस्तदा दानवपुङ्गवः। तस्मात्सर्वप्रयत्नेन सप्तमीमिश्रिताष्टमी। वर्जनीया प्रयत्नेन मनुजैः शुभकाङ्क्षिभिः। सप्तमीशल्यसंविद्धा वर्जनीया सदाष्टमीति। सप्तमी स्वल्पसंविद्धा वर्जनीया सदाष्टमी। स्तोकापि सा तिथिः पुण्या यस्यां सूर्य्योदयो भवेत्। सप्तमी विद्धापीति—(स्मृतिसंग्रहे)–यदा सूर्य्योदये न स्यान्नवमी चापरेऽहनि। तदाष्टमी प्रकुर्वीत सप्तमीसहितां नृप। अहं भद्रा च भद्रा च नावयोरन्तरं क्वचित्। तस्माद्वै सततं विद्धा कार्य्या दुर्गाष्टमीतिथिरिति। भौमवारयोग इति—अष्टम्यामुदिते सूर्य्ये दिनान्ते नवमी भवेत्। कुजवारो भवेत्तत्र पूजनीया प्रयत्नत इति। पुत्रवतेति—उपवासं महाष्टम्यां पुत्रवान् समाचरेत्। यथातथा पूतात्मा व्रती देवीं प्रपूजयेदिति। आयुधादीनीति—(विष्णुधर्म्मोत्तरे)–आश्विने शुक्लपक्षस्य अष्टम्यां प्रयतः शुचिः।

इयं मूलनक्षत्रेणयुक्ता महानवमी—पूर्वाषाढनक्षत्रेणयुतापीति (निर्णयामृतकारः)। एषा बलिदानं विहाय पूजादौ अष्टमीविद्धा ग्राह्या, वेधश्च मुहूर्तत्रयात्मकोज्ञेयः। त्रिमुहूर्तयोगाभावे परैव ग्राह्या। नवमीप्रयुक्तमहाबलिदानं तु दशमीविद्धायां कार्य्यम्। उदयव्यापिन्यां नवम्यां बलिं दद्यादिति (निर्णयामृतकारः)। नवमीप्रयुक्तबलिदानं नवम्यामेव कार्य्यम् नतु दशम्याम्।

तत्रैवायुधचर्म्मादि छत्रं वस्त्रं च पूजयेत्। राजलिङ्गानि सर्वाणि तथा शस्त्राणि पूजयेत्। रात्रौ जागरणं कुर्य्यात्तत्रैव वसुधाधिप। उपोषितो द्वितीयेऽन्हि पूजयेत्पुनरेव ताम्। आयुधाद्यं च सकलं पूजयेद्वसुधाधिप इति।

मूलनक्षत्रेणयुक्तेति-अश्विनशुक्लपक्षे या अष्टमीमूलसंयुक्ता। सा महानवमी प्रोक्ता त्रैलोक्येऽपि सुदुर्लभा। कन्यागते सवितरि शुक्लपक्षेऽष्टमी तु या। मूलनक्षत्रसंयुक्ता सा महानवमी स्मृता। अष्टम्यां च नवम्यां च जगन्मातरमम्बिकां। पूजयित्वाश्विने मासि विशोकोजायते नरः। (निर्णयामृतकारः) इति-मूलाभावे तु कर्तव्या अष्टमीतोयसंयुता। विश्वयुक्तापि कर्तव्या अष्टमीनवमीयुता। (रूपनारायणीये)-मूले प्रपूजयेद्देवीं तथा सलिलदैवते। वैश्वदेवे तु नक्षत्रे पूजिता दुःखदा भवेदिति। बलिदानंविहायेति-बलिदाने कृतेऽष्टम्यां पुत्रभङ्गोभवेन्नृप, इति। अष्टमीविद्धेति-श्रावणी दुर्गनवमी दूर्वा चैव हुताशनी। पूर्वविद्धा प्रकर्तव्या शिवरात्रिर्बलेर्दिनमिति। त्रिमुहूर्तात्मकइति—(दीपिकायां)-त्रिमुहूर्तगा तु सकला सायमिति। तथा च (माधवः)-सायं तूतरया तदन्न्यूनया नतु विद्ध्यत इति। दशमीविद्धायामिति—(देवीपुराणे)-सूर्य्योदये परं रिक्ता पूर्णास्यादपरा यदि। बलिदानं प्रकर्तव्यं यत्र देशः शुभावहः। बलिदानेकृतेऽष्टम्यां राष्ट्रभङ्गोभवेन्नृप। * नतु दशम्यामिति—(भविष्ये)-दशम्यां बलिदानं तु दीयते यत्र मानवैः। तद्राष्ट्रं नाशमायाति मरकोपद्रवैः किलेति।

॥ अथ विष्णुभट्टकृतो विचारः प्रदर्श्यते ॥

अयं निषेधोऽन्यस्यां विहितस्यैव बलेनैतु वक्ष्यमाणाष्टम्यां विहितत्वबले यत्र सप्तमीविद्धानिषेधवाक्यानि द्वितीयदिने पूजोपवासयोग्याष्टमी सत्त्वएव प्रवर्तन्ते । द्वितीयदिने उपवासादियोग्याष्टम्यलाभे तु सप्तमीयुता कार्या कर्मकालव्याप्तिशास्त्रस्य तत्रैव प्रवृत्तेः । महाष्टम्याश्विने मासि शुक्ला कल्याणकारिणी । नवम्यातु युता कार्या मूलेन तु विशेषतः । अहं भद्रा च भद्राहं नावयोरन्तरं क्वचित् । सर्वसिद्धिं प्रदास्यामि भद्राया अर्चिता ह्यहं । भद्रायां भद्रकालीञ्च मध्ये स्यादर्चनक्रिया । तस्मात् वै सप्तमीविद्धा कार्या दुर्गाष्टमी बुधैः । विष्टिं त्यक्त्वा महाष्टम्यां मम पूजां करोति यः । तस्य पूजाफलं न स्यात् तेनाहमवमानिता । — इति — निर्णयामृताद्युदाहृत विश्वरूपनिबन्धादिवचनेभ्यश्च यदा सार्धत्रयमुहूर्ता सप्तमी द्वितीयदिने मुहूर्तद्वयमष्टमी तृतीयदिने मुहूर्ताधम् नवमी तदा त्रिकालं पूजयेद्देवीमिति वचनात् । पूजायाः कालत्रयसाध्यत्वादुपवासस्य चाहोरात्रसाध्यत्वात्तत्र मुख्यतिथ्यभावे, साकल्यबोधकवचनापादिततिथिमत्ताया अवश्यमपेक्ष्यत्वात् । द्विमुहूर्तापि कर्तव्या या तिथिर्वृद्धिगामिनी — इत्यादिभिश्च द्वावेव द्विमुहूर्तायाः साकल्यप्रतिपादनात्क्षयगामिन्यां तिथौ द्विमुहूर्तायां साकल्याभावेन पूर्वत्र कर्मणो यस्य यः कालः इत्यस्य प्रवृत्तेः । उत्तरास्तिथयो यत्र क्षयं यान्ति नराधिप । पूर्वाष्टमी तदा कुर्यादन्यथा त्वशुभं भवेत् । इति दुर्गोत्सववाक्येन पूर्वस्या एव विधानात् सप्तम्यामुदिते सूर्ये परतश्चाष्टमी भवेत् । तत्र दुर्गोत्सवं कुर्यान्न कुर्यादपरेऽहनि । यदाष्टम्यान्तु संप्राप्य अस्तं याति दिवाकरः । तत्र दुर्गोत्सवं कुर्यान्नकुर्यादपरेऽहनि । दुर्भिक्षं तत्र जानीयात् नवम्यां यत्र पूज्यते । इत्यादिनिर्णयामृतमदनरत्नाद्युदाहृतवचनैर्नवमीयुक्ताया निषेधाच्च पूर्वैव । नचैवं याष्टमी सप्तमीविद्धा सति तिथिक्षयवशात् द्वितीयदिने न वर्द्धते तद्विषयत्वात् पूर्वविद्धाविधायकवचनानां — तदुक्तम् (स्मृतिसंग्रहे) — यदा सूर्योदये न स्यादष्टमी चापरेऽहनि । तदाष्टमीं न कुर्वीत सप्तम्या सहितां नृप इति । द्वितीयदिनेऽष्टम्यभाव एव पूर्वविद्धावचनानां प्रवृत्तिरिति निर्णयामृतविरोध इति वाच्यम् । प्रकृते द्वितीयदिने चाष्टमी स्वीकारे कर्मकालव्याप्तिशास्त्रविरोधान्नवमीयुक्तानिषेधवाक्यानां निर्विषयत्वापत्तेश्च । न चाश्विनकृष्णनवम्यां विहितादेवीप्रबोधस्तदङ्गत्वेन कृष्णाष्टम्यां क्रियमाणदेवीपूजा विषया एतानीति निर्णयामृत उक्तत्वान्न निर्विषयत्वमिति शङ्क्यम् । महाष्टमी प्रकरणपठितश्लोकानामन्यथासिद्धवचनं चिता प्रकरणविरोधेन कृष्णाष्टमीविषयता सम्भवात् संग्रहवाक्यस्य नवमीयुक्तानिषेधकवाक्याविरोधेनैव विद्धानधिकाष्टम्यां चरितार्थत्वात् तृतीयदिने नवम्यभावे पूर्वविद्धाविधायकानीमानीति मदनरत्नादिविरोधापत्तेश्च । अतस्तथैव लौकिक वाक्यं स्मृतिबाधं परित्यजेत् — इति बजवापवाक्यात् प्रवृत्तिर्निर्णयामृत उपेक्ष्यं एव । यदा द्वादशघटिका सप्तमी द्वितीयदिने वृद्धिर्द्वयोस्तु परस्मै तिथौ यदा । स्पर्शो रसः सार्द्ध मिरुताः नाडिकाः । इति ज्योतिर्विदाभरणोक्तेः सप्तघटिकाष्टमी नवमी च सूर्योदये सप्तमा तदा शुक्लपक्षे हरीया दिवयतः । मूलेनापि हि संयुक्ता सदा स्याच्चाष्टमी बुधैः । लेशमात्रेण सप्तम्या अपि स्याद्दूषिता इति निर्णयामृताद्युदाहृतरूपनारायणादिवचनविशेषैश्च सप्तमीविद्धानिषेधात् ।

अष्टमीनवम्योः सन्धौ पूजा—साष्टमीनवम्योः पृथक्त्वे दिवारात्रौ वाष्टम्यन्तनाडीनवम्याद्यनाड्योः कार्य्येति काशीनाथः। यदि शुद्धाधिकाष्टमी तदा पूर्वेद्यु रष्टमीपूजा परेद्यु: सन्धिपूजेति।

सन्धौ पूजेति—(कालिकापुराणे)-अष्टमीनवमीसन्धौ तृतीया खलु कथ्यते। तत्र पूज्याहं पुत्र योगिनीगणसंयुतेति। काल-

शरन्महाष्टमी पूज्या नवमीसंयुता सदा इति पूर्वोदाहृतेन नवमी च यत्र देव्या मूर्तिर्दैत्यविनाशनी। अत एव हि पूज्या स्यादष्टमी नवमीयुता इत्यादि दुर्गोत्सवादि-विशेषवचनैरपि नवमी युताया एव पूज्यत्वप्रतिपादनात्पूज्यतिथेरेव साकल्यबोधकवच-नापादितमपि सत्वमादायैव कर्मकालशास्त्रप्रवृत्तिर्हेमाद्रिमाधवादिसंमतेति प्रतिपादनात् प्रकृते उत्तरदिनएव। तत्प्रवृत्तिरिति नवमीयुतैवाष्टमी ग्राह्या। एवं सप्तमीविद्धाष्टमी द्वितीयदिने मुहूर्तद्वयात्किंचिदधिका तृतीयदिने नवमीनास्ति द्वितीयदिनएव। मूलनक्षत्रे तत्रापि आश्वयुक्शुक्लपक्षे तु या अष्टमी मूलसंयुता। सा महानवमी प्रोक्ता त्रैलोक्ये तु सुदुर्लभा इत्युदाहृतवाक्यैर्मूलयुतायामेव पूजादिविधानात्। उदिते दैवतं भानौ पित्र्यं चास्तमिते रवौ। द्विमुहूर्तस्त्रिमुहूर्तश्च सा तिथिर्हव्यकव्ययोः इत्यनेनौदयिक्यास्तिथेर्द्वि-मुहूर्ताया अपि साकल्यप्रतिपादनाद्द्वितीयैव ग्राह्या। नचैवं द्वितीयदिनेऽष्टमीलाभेऽपि यत्र तृतीयसूर्योदये नवमी नास्ति तदा सप्तमीविद्धैव ग्राह्या। "यदा सूर्योदये नस्या-न्नवमी चापरेऽहनि। इत्यादि स्मृतिसंग्रहवाक्यादितिमदनरत्नविरोध इति वाच्यम्। निर्णयामृतेष्टमीत्येवपाठेन नवमीतिपाठस्यैवाभावात्। भवतु नाम नवमीतिपाठस्तथापि यत्र द्वितीयदिने मुहूर्तद्वयान्न्यूनाष्टमी तत्र स्तोकापि सा तिथिरित्यादिना प्रसक्तौ सप्त मीविद्धानेनचरितार्थत्वात्। साकल्यबोधकवचनविषयीभूतनवमीयुक्ताष्टमीस्थले तत्प्रवृत्ते रसम्भवात्। अन्यथा द्वादशघटिका सप्तमीद्वितीयदिने मूलयुक्तमुहूर्तत्रयाष्टम्यामपि नवम्यसम्भवे सप्तमी विद्धाग्रहणापत्तौ पूर्वोक्तानेकवचननिर्णयामृतादिग्रन्थविरोधापत्ते स्तस्मात्प्रकृतविषय उपेक्ष्य एव मदनरत्नः। एतेन मदनरत्नपृष्ठानुयायिनः कालतत्व-विवेचनकृत्यरत्नावलीस्मृतिकौस्तुभनिर्णयसिन्धुमयूखादयः सर्वे नवीनग्रन्था अप्ययुक्ता एव। यत्तु निशायां पूजिता देवी वैष्णवी पापनाशिनी। तस्मात्सर्वप्रयत्नेन अष्टम्यां निशि पूजयेत्। इति निर्णयामृते भविष्ये रात्रौ पूजोक्ता तदर्धयामिनी शेषे विजयार्थं नृपोत्तमः। पश्चान्द लक्षणोपेतं गन्धधूपस्रगर्चितम्। विधिवत्कालिकालीति जप्त्वा खड्गेन घातयेत् इति देवीपुराणे राज्ञोधंरात्रे बलिदानमष्टम्यामुक्तं तत्तत्कालव्यापि-न्यामेव कार्यम्। कर्मव्यापिशास्त्रं सर्वेभ्यः प्रबलमितिहेमाद्रिमाधवादिभिः सिद्धान्ति-तत्वात्। अतः कर्मकालव्यापिशास्त्रं बाधित्वा नवमीयुतामेव रात्रावमल्यामष्टम्यां नवमी पूजया सहतन्त्रेणाष्टमी पूजोचितेति कालतत्वविवेचनस्मृतिकौस्तुभादयः उपेक्ष्या इति। अत्रसुधिभिर्विचार्यव्यवस्थाकार्येत्यलम्।

नवम्यां पूर्ववत्पूजां विधाय होमः कार्य्यः—केचिद्धोमस्याष्टमीकृत्यत्वेनैव प्रतीतेस्तत्रैव होमः कार्य्य इत्याहुः । वस्तुतस्तु अष्टमीहोमवचनानि लोहाभिसारकर्मपराणि । अपरे अरुणोदयविधमानाष्टम्यां होममुपक्रम्य नवम्यां तत्समाप्तिकार्य्या । तदसत्वे तु नव-

---

विशेषेण फलमाह तन्त्रं—(मात्स्ये)–अष्टमीनवमीयोगो रात्रियोगे विशिष्यते । अर्धरात्रे दशगुणं संध्यायां त्रिगुणं भवेत् । अष्टम्यन्तनाडीनि । (कामरूपीयनिबन्धे)–अष्टम्याः शेषदण्डश्च नवम्याः पूर्व एव च । तत्र या क्रियते पूजा विज्ञेया सा महाफलेति । होम इति—(कालिकापुराणे)–नवम्यां बलिदानं वै प्रकर्तव्यं यथाविधि । जपं होमं च विधिवत्कुर्य्यात्तत्र विभूतय इति । अष्टमीकृत्यत्वेनेति—(राजमार्तण्डे)–अष्टम्यां रात्रियोगे कृतनियमविधिर्ज्ञमतिष्ठाम् इति । तथा च (धौम्यः)–शुम्भासुरवधार्थाय रक्तबीजो महासुरः । अष्टम्यां निहतो देव्या रात्रौ चैवारुणोदये । ततः प्रभृति विन्ध्याद्रौ स्थिता पूजा प्रकीर्तिता । शस्त्रार्थमन्त्रैर्होतव्यं पायसं घृतसंयुतमिति । लोहाभिसारकर्मपराणीति लोहाभिसारकं कर्म कारयेद्यावदष्टमीम् इति । भविष्योक्तवाक्येऽष्टमीपर्यन्तमेव तस्य होमविधानात् इति । अष्टम्यां होममुपक्रम्येति द्विविधवाक्यवशादिति (निर्णयसिन्धौ) शिष्टसमाचारादिति (पुरुषार्थचिन्तामणौ) अत्र (रत्नाकरदीक्षितः)–अष्टमी नवमी वचनान्यष्टरात्रनवरात्रपक्षयोर्व्यवस्थया होमविधायकानि । यत्तु (निर्णयसिन्धौ) समुच्चयपक्ष एव युक्त इति तदेतन्न परास्तम् । यदपि (रुद्रयामले) विकल्पउक्तस्तन्निर्मूलमिति प्रौढिवादमात्रम् यामलस्यैव मूलत्वात् अथ तस्यैव निर्मूलत्वाभिप्रायस्तत्र तन्त्राणामपि वेदमूलकतया नारदपञ्चरात्रादिपूक्तत्वात् । दुर्गाभक्तितरङ्गिण्यादिगौडग्रन्थेषु नवम्यामेव नवरात्रसम्बन्धिहोमविधानम् इति । यथाकुलाचार व्यवस्थेति (अनन्तदेवः) । (होमविधिर्होममन्त्राश्च नवरात्रादिस्तबके मत्कृतशतचण्डीयज्ञविधानस्य तृतीयखण्डे वा द्रष्टव्याः ।

म्यामेव तदुपक्रमसमाप्तिकार्य्येत्याहुः।

अथविसर्जनकालनिर्णयः—तत्र। दशम्यांकार्य्यम्—दिनद्वये दशमीसत्वे पूर्वदशम्यां श्रवणान्त्यभागयोगे तत्रैव विसर्जनं कार्य्यम् तत्र तद्योगाभावे तु परदशम्यामेव तत्कार्य्यम्। परत्र दशम्यभावे पूर्वदशम्यां नक्षत्रयोगे सत्यसति वा कार्य्यम्। नक्षत्रयोगानुरोधेन क्रियमाणं विसर्जनं अपराण्हेऽपि भवति अन्यथा प्रातरेव। मृदादि-प्रतिमासत्वे स्रोतसि तत्प्रवहणं कार्य्यम्।

नवरात्रपारणानिर्णयः—तत्र द्विविधवचनानि—कानिचिन्नवमीपार-

दशम्यामिति—(कालिकापुराणे)-निहते रावणे वीरे नवम्यां सकलैः सुरैः। विशेषपूजां दुर्गायाश्चक्रे लोकपितामहः। ततः सम्प्रेषिता देवी दशम्यां शारदोत्सवैरिति (रुद्रयामले)-दशम्यामभिषेकं च कृत्वा मूर्तिं विसर्जयेदिति। श्रवणान्त्यभागइति—(धवलनिबन्धे)-अन्त्यपादोदिवाभागे श्रवणस्य यदा भवेत्। सम्प्रेषणं तदा देव्या दशम्यां तु पुनर्दिवा इति। तथा (राजमार्तण्डे) निर्माल्यं तु श्रवणदशमी वासरान्ते तु जह्यात्। निर्माल्य त्यागेन देवीविसर्जनमुपलक्ष्यतइति (कौस्तुभकारः)। (कृत्यार्णवेऽपि)—नक्षत्रं श्रवणं तिथिं च दशमीं सम्प्राप्य संप्रेषयेदिति। प्रातरेवेति—(रूपनारायणीये)-दशम्यां प्रातः सम्प्रेषयेदिति। (गच्छ देवी परं स्थानं स्वस्थाने देवि चण्डिके। व्रजस्रोतो जले वृद्ध्यै तिष्ठ गेहे च भूतय इति)।

नवमीपारणाविधायकानीति—(ब्र० पुराणे)-आश्विने शुक्लपक्षे तु नवरात्रमुपोषितः। नवम्यां पारणं कुर्य्याद्दशमीसहिता न चेत्। तथा (रुद्रयामले) नवम्यां पारिता देवि कुलवृद्धिं प्रयच्छति। दशम्यां पारिता देवि कुलनाशं करोति हि। तस्मात्तु पारणं कार्य्यम् नवम्यां विबुधाधिप। अष्टम्यां जागरंचैव नवम्यां पारणं तथा। दशम्यां च विसर्गः स्यादभिषेकश्च माधव। नवम्यां च विशालाक्षी

णाविधायकानि दशमीनिषेधकानि । कानिचिद्दशमीपारणाविधायकानि नवमीनिषेधकानि । तत्र यथाकुलाचारं व्यवस्था ज्ञेया । घस्यामेव नवम्यां भद्रकालीव्रतम् । रथनवमीव्रतं शौर्य्यव्रतञ्च ।

कुर्य्याद्धोमादिकाः क्रियाः। पारणं च प्रकुर्वीत देवीपूजनपूर्वकमिति। दशमी निषेधकानीति—(रुद्रयामले) दशम्या मिश्रिता यत्र पारणे नवमी भवेत् । सप्तजन्मकृतं पुण्यं तत्क्षणादेव नश्यति । दशम्यां ······विपुधाधिपइति । दशमीपारणाविधायकानीति । नतः प्रातः पूजयित्वा दशम्यां विधिपूर्वकम् । सम्प्रेषणं तु कर्तव्यं गीतवादित्रनिःस्वनैः । यद्दिने विसर्जनं तत्रैव नियमस्यागस्योचितत्वात् विसर्जनोत्तरं तद्दिन एव पारणंकार्यमिति यद्वः । प्रतिपदादिपूर्णान्तं वृद्धिभेदेन पूजयेत् इति धौम्यवचसि पूर्णापदवाच्यायां दशम्यां पूजारूपव्रतान्ते श्रवणात् व्रतान्ते पारणोचित्यादिति (देवीपुराणे च) । उत्तरेण नवम्यां तु बलिना पूजयेच्छिवाम् । श्रवणेन दशम्यां तु प्रणिपत्य विसर्जयेदिति । भद्रकालीव्रतमिति—(विष्णुधर्मोत्तरे) पूर्वोत्तरे तु दिग्भागे शिववास्तुमनोहरे। भद्रकाली गृहं कुर्य्याच्चित्रवस्त्रैरलङ्कृतम् । इत्यादि । रथनवमीव्रतमिति—(भविष्यपुराणे) कृतवैवारवयुजे मासि शुक्लपक्षे नराधिप । नवम्यामुपवासं तु दुर्गादेवीं प्रपूजयेत् इत्युपक्रम्य वस्त्रादिशोभितं नवरथं कृत्वेत्यादि । शौर्य्यव्रतमिति—(ब्रह्मपुराणे) मासि चाश्वयुजे शुद्धां नवमीं समुपोषितः । सप्तम्यां कृतसङ्कल्पः स्थित्वाष्टम्यां निरोदनः । नवम्यां प्राशयेत्पिष्टं प्रथमं भक्तितोनृप । ब्राह्मणान्भोजयेद्भक्त्या देवीं चैव तु पूजयेदित्यदि ।

॥ द्विविधवचने कौस्तुभोक्ता व्यवस्था प्रदर्श्यते ॥

प्रथमदिने स्वल्पाष्टमीयुक्ता नवमी द्वितीयदिने पारणापर्य्याप्तनवमीयुक्ता दशमी तद्द्वितीयदिने च पूर्वोक्तविसर्जनाहृतापादकनक्षत्रयोगवती दशमी तदोक्तनिर्णयानुसारेण अष्टमीनवम्युपोषसयोः पूर्वदिने सिद्धत्वादवशिष्टनवम्यां पारणं निर्विवादम् । संगच्छन्ते च तदभिप्रायेण नवमीविधेयादशमीनिषेधा । अष्टमीदशमीमध्यदिनपारणा-



आश्विनशुक्लदशमी—(विजयादशमी)—अस्यामपराह्णव्यापिन्यामपराजितापूजनम्-शमीपूजनं-सीमोल्लङ्घनं च कार्यम्। दिनद्वयेऽप्यपराह्णव्याप्तौ पूर्वा। दिनद्वयेप्रदोषव्याप्तौ परा। अपराह्णव्याप्तेराधिक्यात्। उभयत्रैकदेशस्पर्शे पूर्वा। परस्यामेवापराह्णे श्रवण- प्राप्तौ तदा परा। अस्यामेव विजयमुहूर्तव्यापिन्यां देशा- न्तरयात्रार्थिभिर्यात्रा विधेया। एकादशीयुते उक्तमुहूर्तेऽपि प्रस्थानं न विधेयम्। अस्याम् खञ्जरीट दर्शनं कार्यम्। शम्या अलाभे अश्मन्तकपूजा कार्या। राज्ञां पट्टाभिषेके तु एषा औदयिकी ग्राह्या। एषा बुद्धजयन्ती।

अपराह्णव्यापिन्यामिति—(स्कान्दे)—दशम्यां तु जनैः सम्यक् पूजनीयाऽपराजिता। ऐशानीं दिशमाश्रित्य अपराह्णे प्रयत्नतः इति। (भविष्ये) शमीं स लक्षणोपेतामीशानाशाप्रतिष्ठिताम्। सम्प्रार्थ्य तां च सम्पूज्य वत्सरे स सुखी भवेदिति। सीमोल्लङ्घ-

कर्तव्यतावेदकवचांसि च। संगच्छते च दशमीमिश्रितनवमीनिषेधोऽप्यत्रैव नवम्यां भोजनसमाप्त्यभिप्रायेण। यदा तु अवशिष्टनवमीदिने एव दशमीनक्षत्रयोगाद्विना विसर्जनादिना तदापि विसर्जनोत्तरं पारणं निर्विवादम्। यदा तु पूर्वदिने स्नानमात्रेयरहिता षष्टिदण्डात्मिका अष्टमी परदिने अष्टमीशेषसंयुक्ता नवमी तद्द्वितीयदिने नवमीशेषसंयुक्ता शुद्धा वा दशमी तदा परदिने दशम्याः सत्त्वे पि नवमीयुक्तदशम्यामेव विसर्जनपारणे विधेये। नवमीपूजायाः सन्धिपूजायाश्च पूर्वदिन एव परसिद्धत्वात्॥ यदा तु प्रथमदिने अष्टमीद्वितीयसूर्योदयात्पूर्वं मुहूर्तद्वयादिपरिमा- णा स्वल्पा वा परदिने च नवमीषष्टिदण्डात्मिका तद्द्वितीयदिने नवमीशेषसंयुक्ता दशमी तत्रापि तत्परदिने दशमीसत्त्वे पि नवमीयुक्तदशम्यामेव विसर्जनपारणे। उक्त- योः तिथिमूलस्य कृत्यानर्हत्वात्। यदा तु तिस्रोपि तिथयस्तत्तद्दिने तत्तत्कृत्याद्याः तत्र पौर्वाह्णवचनद्वैधाद्दाक्षिणात्यानां नवम्यामेव पारणाचारदर्शनात्प्राच्यानां तु दश- म्यामेवदर्शनात् यथाचारमेव व्यवस्थेति॥

इति नवरात्रकृत्यनिर्णयः

नमिति—अलङ्कृतामृविनभृत्यवर्गः—परिष्कृताश्वतुरङ्गनागः। धादिध्वनादप्रतिनादिताशः सुमङ्गलाचारपरम्पराशी। (पुराणसमुच्चये) राजा निर्गत्य भवनात्पुरोहितपुरोगमः। प्रास्थानिकं विधिं कृत्वा प्रविष्टे त्पूर्वतोदिशि। गत्वा नगरसीमान्तं वास्तुपूजां समारभेत्। सम्पूज्य वाथ दिक्पालान्पूजयेत्पथिदेवताः। मन्त्रैर्वैदिकपौराणैः पूजयेच्चशमीतरुम्। अमङ्गल······शमींशुभाम्। ततः कृताशीः पूर्वस्यां दिशि विष्णुक्रमान्क्रमेत्। रिपोः प्रतिकृतिं कृत्वा ध्यात्वा च मनसाऽथ तम्। शरेण स्वर्णपुङ्खेन विध्येद्धृदयमेणि। दिशां विजयमन्त्राश्च पठितव्याः पुरोधसा। पूर्वमेवविधि कुर्य्याद्दक्षिणादिदिशास्वपि। पूज्यान्द्विजांश्च सम्पूज्य सांवत्सर पुरोहितौ। गजवाजिपदातीनां प्रेक्षाकौतुकमाचरेत्। जयमङ्गलशब्देन ततः स्वभवनं विशेत् नीराज्यमानः पुण्याभिर्गणिकाभिः सुमङ्गलम्। य एवं कुरुते राजा वर्षवर्षेसुमङ्गलम्। आयुरारोग्यमैश्वर्य्यं विजयं च स गच्छति। नाधयोव्याधयस्तस्य भवन्ति न पराजयः श्रियं पुण्यमवाप्नोति विजयं च सदा भुवि। इति। सीमोल्लङ्घनं शमीपूजनात्पूर्वं पश्चाद्वा कार्य्यमिति (काशीनाथः)। पूर्वेति—(पुराणसमुच्चये)-या पूर्णा नवमीयुक्ता तस्यां पूज्याऽपराजिता। क्षेमार्थं विजयार्थं च प्रसिद्धविधिना नरैः। नवमीशेषसंयुक्ता दशम्यामपराजिता। ददाति विजयं देवी पूजिताजयवर्द्धिनी। आश्विने शुक्लपक्षे तु दशम्यां पूजयेन्नरः। एकादश्यां न कुर्वीत पूजनं चापराजितमिति। प्रदोषव्यासाविति—(रत्नकोशे नारदः)-ईषत्सन्ध्यामतिक्रान्तः किञ्चिदुद्भिन्नतारकः। विजयो नाम कालोऽयं सर्वकार्य्यार्थसाधकः। इति। श्रवणयोगवतीति—अथ विजयदशम्यां पूर्वभाजिप्रयत्नात्क्षितिपतिरपराह्ने पूजयेदीशकोणे। निखिलभुवनवन्द्यां चण्डिकामिष्टसिद्ध्यै श्रवणभसहिता चेत्प्राक्परा वा प्रशस्ता। श्रवणर्क्षे तु पूर्णायां काकुत्स्थः प्रस्थितोयतः उल्लङ्घयेयुः सीमानं तद्दिनर्क्षे ततोनरा इति। मूलेनावाहनं देव्याः पूर्वाषाढासु पूजनम्। उत्तरासु बलिंदद्याच्छ्र-

यस्यां वर्तमानयोकानेराधिपतेः—श्री १०८ गङ्गासिंहबहादुरस्य जन्मोत्सवः—स च उदयव्यापिन्यां कार्य्यः। जन्मर्क्षयोगश्रवणेनापराजिता इति। यात्राविधेयेति—(ज्योतिर्निबन्धेभृगुः)—आश्विनस्य सिते पक्षे दशम्यां सर्वराशिषु। सायङ्काले शुभायात्रा दिवा वा विजयेक्षणे। (सर्वराशिष्वित्यत्र सर्वयवनाचन्द्राद्यनुकूल्याभावेऽपि यात्रा कार्या। अस्मिन्न च श्लोके सापमिति विजयमुहूर्ताभिप्रायम्)। आश्वयुक्शुक्लदशमी विजयाख्याखिले शुभा। प्रयाणे तु विशेषेण किं पुनः श्रवणान्विता इति। एकादश्यांयुगइति—(स्कान्दे)—दशमीं यः समुल्लङ्घ्य प्रस्थानं कुरुते नरः। तस्य संवत्सरे राज्ये न कोऽपि विजयो भवेदिति। खञ्जरीटदर्शनमिति—(ज्योतिषे)—कृत्वा नीराजनं राजा बलवृद्ध्यै यथाक्रमम्। शोभनं खञ्जनं पश्येज्जलगोष्ठस्य सन्निधौ। दर्शनफलं (तिथितत्त्वे) अब्जेषु गोषु गजवाजिमहोरगेषु राज्यप्रदः कुशलदः शुचिशाद्वलेषु। भस्मास्थिकेश नखलोमतुषेषु दृष्टो दुःखं ददातिबहुशः खलु खञ्जरीटः। अन्यच्च (तत्रैव) वित्तं ब्रह्मणि कार्य्यसिद्धिरतुला शक्रे हुताशे भयं याम्यामग्निभयं सुरद्विपि कलिर्लाभः समुद्रालये। वायव्ये वरवस्त्रगन्धमनिलं दिव्यांगनाचोत्तरे ऐशान्यां मरणं ध्रुवं निगदितं दिग्लक्षणं खञ्जने। नमनमन्त्रः—त्वं योगयुक्तोऽपि मुनिपुत्रस्त्वमदर्शनतामेषि शिखोद्गमेन। संदृश्यसे प्रावृषि निर्गतायां त्वं खञ्जनाश्चर्य नमोनमस्ते। अशुभदृष्टप्रतीकारः—(वाराहे) अशुभमपि विलोक्य खञ्जनं द्विजगुरुसाधुसुरार्चने रतः। न नृपतिरशुभं समाप्नुयात् यदि न दिनानि सप्त मांसभुक् इति।

उदयव्यापिन्यामिति—(कृत्यतत्त्वार्णवे)—युगाद्यावर्षवृद्धिश्च सप्तमी पार्वती प्रिया। रवेरुदयमीक्षन्ते न तत्र तिथियुग्मतेति—(बौधायनमार्कण्डेयौ)—यस्मिन्नुदेति सविता तल्लक्षदिनं स्मृतमिति। जन्मर्क्षयोगवतीति—(बृहद्राजमार्तण्डे)—घस्रद्वये जन्मतिथिर्यदि स्यात्कुर्य्यात्तदा जन्मभसंयुता च। असंगता तेन

तीथेस्तस्यामेव पूर्वाह्णे नक्षत्रनाम कार्यः। अयं च शुद्धमासएव विधेयोनत्वधिकमासे। अस्मिन् तिलोद्वर्तनपूर्वकं स्नात्वा मार्कण्डेयादीनसंपूज्य षष्ठीं च पूजयेत्। ततोदेवतानामभिः तिलहोमश्च कार्यः। हस्ते ग्रन्थिबन्धनं अञ्जल्यर्धमितपयःपानमपि कुत्रचिद्विहितम्। जन्मतिथौ शनिवारकुजवारयोगे सति शान्ति कृत्वा

दिनक्षयेऽपि पूज्या परा या भवतीह यत्नादिनि। जन्मर्क्षयुताया महस्वम्—(तिथितत्त्वे)–जन्मर्क्षयुक्ता यदि जन्ममासे यस्य ध्रुवं जन्मतिथिर्भवेच्च। भवन्ति संवत्सरमेव तावत् नैकज्यसम्मानसुखानि तस्य। पूर्वाह्णे इति—(बृहस्पतिः)–नक्षत्रे खण्डिते येन प्राप्तः कालश्च कर्मणः। नक्षत्रं कर्मण्यत्रैव तिथिकर्म तथैव चेति। जन्मर्क्षद्वये निर्णयमाह—(वृद्धगार्ग्यः)–एकमासे द्विजन्मर्क्षे प्रथमे जन्म माचरेत्। तस्मिन्नक्षत्रे तु कर्तव्योजन्मदिनमहोत्सवइति। तिलोद्वर्तनपूर्वकमिति—(ब्रह्मपुराणे)–तिलोद्वर्ती तिलस्नायी तिलहोमी तिलप्रदः। तिलभुक्तिलवापी च षट्तिली नावसीदति। मार्कण्डेयादीनिति—(व्यवहारनिर्णये)–नवाम्बरधरोभूत्वा पूजयेच्च चिरायुषम्। मार्कण्डेयं नरोभक्त्या पूजयेत्प्रयतस्तथा। ततो दीर्घायुषं व्यासं रामं द्रौणिं कृपं बलिम्। प्रह्लादं हनुमन्तं च विभीषणमथार्चयेत्। स्वनक्षत्रं जन्मतिथिं प्राप्य संपूजयेन्नरः। षष्ठीं च दधिभक्तेन वर्षेवर्षे पुनःपुनः। देवतानामभिरिति—(एकैकां देवतां राम समुद्दिश्य यथाविधि। चतुर्थ्यन्तेन धर्मज्ञ नाम्ना च प्रणवादिना। स्वनक्षत्रं च पितरौ तथा देवः प्रजापतिः। प्रतिसंवत्सरं चैव कर्तव्यश्च महोत्सवः। गुडदुग्धतिलान्दद्याज्जन्मग्रन्थेश्च वर्धनम्। जन्म ग्रन्थिबन्धनं नाम गुग्गुलादिपञ्चद्रव्यगर्भपोट्टलिकाया हस्ते बन्धनम्। द्रव्याणि-गुग्गुलं निम्बसिद्धार्थ दूर्वागोरोचनायुतम्। सम्पूज्य भानुविघ्नेशौ महर्षि प्रार्थयेदिदम्। चिरजीवी यथा त्वं भो भविष्यामि तथा मुने। रूपवान्वित्तवांश्चैव श्रियायुक्तश्च सर्वदा। मार्कण्डेय महाभाग सप्तकल्पान्त-

पूजनङ्कार्य्यम् । आचारात् शस्त्रपूजा पट्टाभिषेकश्च कार्य्यः । न
केशादीनां छेदनादिकं च तद्दिने न कार्य्यम् कटिसूत्रबन्धनं च
पनीतस्य कार्य्यम् । जन्मर्क्षातिक्रमे तिथ्यादिकं तथा शान्त्युदकप्र
च बौधायनोक्तं कार्य्यम् । (शान्त्युदकविधानं पूजास्तत्रैकेलेखिष्याम
(गर्गमतेऽयमनुष्ठानक्रमः)—जन्मदिनात्पूर्वदिने रात्रौ कौतुकबन्धन
नन्तरं शान्त्युदकं जन्मदिने पूर्वाह्णे मृत्युञ्जयहोमोऽपराह्णे ग्रहश
न्तिरनन्तरं नक्षत्रदेवतापूजातद्दैवत्योहोमः अनन्तरमायुष्यहोमोऽ
न्तरं दिगीशपूजा ब्राह्मणादिपूजनम् सुवर्णकटिसूत्रधारणं नव्यवस्
धारणं पिनाकिदेवत्योहोमश्चेति । नृसिंहादिवचनैः सौरमानेन
ब्दपूर्तेः सिद्धावपि सर्वदेशीयाः शिष्टाः चान्द्रमानेनाब्दान्ते जन
दिनेऽब्दपूर्तिकृत्यमाचरन्ति—पूर्वजन्मदिनाद्रात्रौ इत्यत्र जन्मदिन

जीवन । आयुरिष्टार्थसिद्ध्यर्थमस्माकं वरदोभवेति । शान्तिंकुर
ति—क्रूरान्तकुजपौर्चारे यस्य जन्मतिथिर्भवेत् । अनृक्षयोगसंप्रा
विघ्नस्तस्य पदे पदे । तस्य सर्वौषधीस्नानं ग्रहविप्रसुरार्चनम् । सं
रारयोर्दिने मुक्त्वा देयानृक्षेतु काञ्चनम् । जन्मन्यृक्षे यदि स्यात
चारौ भौमशनैश्चरौ । मासः सकलमपोनाम मनोदुःखप्रदायक इ
नकार्य्यमिति—मुण्डनं नखकेशानां मैथुनाध्वगमौ तथा । आमि
कलहं हिंसां वर्षवृद्धौ विवर्जयेदिति । कटिसूत्रबन्धनमिति*—
(सापर्णीये)—आबध्य कटिसूत्रं च वासः संगृह्य नूतनम् । दूर्वा
ङ्कुरैरथाज्येन चरुणा वा पिनाकिने । आयुष्यं होमं कृत्वा
तर्पयेत्पितृदेवताः इति । गर्गमतइति—(गर्गः)—पूर्वजन्मदिनाद्रात्रौ
कृत्वा कौतुकबन्धनम् । कृत्वा शान्त्युदकं चैव प्राशयेचाभिषेच

*ब्रह्मपुराणोक्तमृत्युञ्जयदेवताकदूर्वाहोमस्यापि कटिसूत्रबन्धनाङ्गस्य उप
तिथ्यान्तरं तत्त्वेन गृहस्थब्राह्मणं प्रतिवक्तुमनुचितत्वात् । यत्किञ्चित्कुरुते कर्मवैदि
वाथ तान्त्रिकम् । कटिबन्धनसंयुक्तं तत्सर्वं निष्फलं भवेत् । रौप्यं कार्पासकं हैमं पट्टसू
क्तं तथा । वर्जयेत्कर्मकालेषु कांचीं विप्रो विशेषत इति (कौस्तुभे) ।

पादानादिति । (अन्येषां संस्काराणां निर्णयोमत्कृतसंस्कारबोधिन्यां द्रष्टव्यः) ।

आश्विनशुक्लएकादशी—(पाशाङ्कुशा)—अस्यामेव पुत्रप्राप्तिव्रतम् पद्मनाभद्वादशीव्रतञ्च । उपवासजागरणादिकं कृत्वा द्वादश्यादिषु विष्णुपूजा कार्य्या । दाक्षिणात्यैरस्यां कार्तिकस्नानारम्भः कार्य्यः ।

यत् ग्रहशान्तिं समाप्यैव नक्षत्राधिपपूजनमिति । सर्वैश्च जन्मदिवसे स्नातैर्मङ्गलपाणिभिः । गुरुदेवाग्निविप्राश्च पूजनीयाः प्रयत्नत इति ॥ सौरेणेति—नृसिंहाद्युक्ताः श्लोकाः । सौरेणाब्दान्तजन्मर्क्षे शिशुं संस्नाप्य शास्त्रतः । आबध्य हेमसूत्रं तु रक्षार्थं चानुकूलके । नवक्षौमवरादीनि यथार्हं धारयेत्तदा । यस्मिन्दिने सवितरि मघनक्षत्रदिनं भवेत् । प्रत्यब्दान्ते च नक्षत्र विधिं वक्ष्ये नृणां परम् । येनायुर्वर्द्धते नित्यं बलं तेजः सुखं सदा । अब्देन सौरेण शिशोः स्वसमान्ते बालं तु संस्नाप्य च जन्मधिष्ण्ये । कृत्वायुषो वृद्धिकरं च कर्म सं धारयेच्छान्तिसुवर्णसूत्रमिति ।

पाशाङ्कुशेति—(पाद्मे)-शुक्लपक्षे चाश्वयुजि भवेदेकादशी तथा । पाशाङ्कुशेति विख्याता सर्वपापहरापरा इति । पुत्रप्राप्तिव्रतमिति—(भविष्योत्तरे)-एकादश्यां चाश्वयुजे स्नात्वोपोष्यार्चयेद्धरिम् । -णां रात्रौ पूजयेद्यस्तस्य पापयाहिकामित्यादि । द्वादशीव्रतमिति—(हेमाद्रौ)-यदाश्वयुजे मासि द्वादशी सितपक्षिणीम् । संकल्प्याभ्यर्चयेद्देवं पद्मनाभं सनातनमित्यादि । जागरणादिकमिति—(निर्णयामृतग्रन्थे)-सोपवासस्य कर्तव्य एकादश्यां प्रजागरः । द्वादश्यां वासुदेवस्य संनिधावस्य सर्वदा । पात्रीजागरणं कर्तव्यस्त्वेकादश्यां तु वैष्णवैः उपवासश्चतुर्दश्यां पौर्णमास्यां हरिप्रियैः । स्नानारम्भ इति—(पाद्मे)-आश्विनस्य तु मासस्य या शुक्लैकादशी भवेत् । कार्त्तिकस्य व्रतानीह तस्यां वै प्रारभेत्सुधीः । (आगमार्चने)-प्रारभ्यैकादशीं शुक्लामाश्विनस्य तु मानवः । अतः

आश्विनशुक्लद्वादशी—एकादश्यां पद्मनाभं देवं सम्पू... द्वादश्यां ब्राह्मणाय दद्यात् ।

आश्विनशुक्लपूर्णिमा (कौमुदी) अस्यां कोजागरव्रतं कार्य्यम् अस्मिन्व्रते पूर्णिमा प्रदोषनिशीथोभयव्यापिनी ग्राह्या यदा तु पूर्वे... द्यु निशीथव्याप्तिः परेद्यु न प्रदोषव्याप्तिस्तदा पूर्वा । अत्र लक्ष्मी... न्द्रयोः पूजनं जागरणं तत्क्रीडा च विहिता । अस्यामेवाश्विनीनक्षत्र... युक्तायां घृतपूर्णम् सुवर्णपात्रं दद्यात् । अस्मिन्दानकर्मणि पौर्वा... ह्णिकी पौर्णमासी ग्राह्या । अस्यां गजनीराजनं च कार्य्यम् अत्रैव निकुम्भं पूजयित्वा ब्राह्मणान्भोजयेत् । अस्यामेवाश्वलायनै... राश्वयुजीकर्म कार्य्यम् । तच्च पर्वद्वैधे विकृतित्वात् खण्डपर्वणि कार्य्यम् । तत्र तिथिः पूर्वाह्णव्यापिनी ग्राह्या दैवकर्मत्वात् तच्च... ग्रयणं त्रेधा, व्रीह्याग्रयणं, यवाग्रयणं, श्यामाकाग्रयणमिति । अस्यामेवाश्वयुज्यां पृषातकाख्यं कर्म कात्यायनैः कार्य्यम् । त... च्चावश्यं भवति ।

स्नानं प्रकुर्वीत यावत् कार्तिकभास्करइति ।

पद्मनाभमिति—(वाराहपुराणे)—तद्वदाश्वयुजेमासि द्वादशी शुक्लपक्षतः । संकल्प्याभ्यर्चयेद्देवं पद्मनाभं सनातनम् । पद्मनाभाय पादौ तु कटिं वै पद्मयोनये । उदरं सर्वदेवाय पुष्कराक्षाय वै उरः । अव्ययाय तथा पाणिं प्राग्वदस्त्राणि पूजयेत् प्रभवाय शिरः पूज्य प्राग्वदग्रे घटं न्यसेत् । तस्मिन्सौवर्णकं देवं पद्मनाभं तु विन्यसेत् । एवमेव तु सम्पूज्य गन्धपुष्पादिभिः क्रमात् । प्रभातायां तु शर्वर्यां ब्राह्मणाय निवेदयेदिति ।

कोजागरव्रतमिति—(भारते)—पूर्णिमा चाश्विने मासी कौमुदी परिकीर्तिता । कौमुद्यां पूजयेल्लक्ष्मीमिन्द्रमैरावतस्थितम् । निशि जागरणं कृत्वा परेद्युरन्यं चरेत् इति । निशीथे वरदा लक्ष्मी कोजागर्तीति भाषिणी । तस्मै वित्तं प्रयच्छामि अक्षैः क्रीडां करोति यः । नारिकेलैश्चिपिटकैः (चिपिटकाःपृथुकाः) । पितृन्देवा...

न्समर्चयेत् । बन्धूंश्च प्रीणयेत्तेन स्वयं तदशनो भवेत् । इति । अत्र निशिथ इति कथनान्निशीथव्यापिनी ग्राह्या—(सनत्कुमारसंहितायां)-प्रदोषव्यापिनी या सा ऽत्र पूर्णाविशिष्यते । एवं लक्ष्मीव्रतं कृत्वा न दरिद्रो न दुःखभाक् । इति । पूर्वेति-नरकादिवत्योगं तु रात्रियोगोऽधिशिष्यत इति । दत्वादिति—(निर्णयामृतविष्णुः)-आश्वयुजामश्विनीगतेन चन्द्रमसा घृतपूर्णताम्रभाजनं सुवर्णयुतं विप्राय दत्वा दीप्ताग्निर्भवति । भोजयेदिति—(ब्रह्मपु०)-आश्वयुज्यां पौर्णमास्यां निकुम्भो वालुकार्णवात् । आयाति सैन्यसार्द्धं कृत्वा युद्धं सुदारुणम् । तस्मात्तत्र नरैर्मार्गः स्वगेहस्य समीपतः । शोभितव्यः प्रयत्नेन भूषितव्यश्च मण्डनैः । पुष्पार्घफलधूपाद्यैः सर्षपप्रकरैस्तथा । वेश्मानि भूषितव्यानि नानारङ्ग विशेषतः । सुस्नातैरनुलिप्तैश्च नरैर्भाव्यं सबालकैः । दिवा तत्र न भोक्तव्यं मनुष्यैश्च विवेकिभिः । स्त्रीवृद्धमूर्खबालैश्च भोक्तव्यम् पूजितैः सुरैः । पूजयश्च सफलैः पत्रैस्तथा द्वारोर्ध्वभित्तयः । द्वारोपान्ते प्रदीप्तश्च सम्पूज्योह्यव्यवाहनः । यवाक्षतघृतोपेतैः तन्दुलैश्च सुतर्पितः । सम्पूजितव्यः पूर्णेन्दुः पयसा पायसेन च । रुद्रः स भार्य्यः स्कन्दश्च तथा नन्दीश्वरो मुनिः । गोमद्भिः सुरभिः पूज्या छागवद्भिर्हुताशनः । उरभ्रवद्भिर्वरुणो गजवद्भिर्विनायकः । पूज्यः साश्वश्च रेवन्तो यथा विभवविस्तरैः । ततः पूज्यो निकुम्भश्च सामिषैस्तिलतन्दुलैः । सुगन्धिभिर्घृतोपेतैः कृशरायैश्च भूरिभिः । ब्राह्मणान्भोजयित्वा तु भोक्तव्यं मांसवर्जितम् । इत्यादि । गजनीराजनमिति—(गोपथब्राह्मणे)-अथाश्वयुजे मासि पौर्णमास्यां पराह्णे हस्तिनीराजनं कुर्यादित्यादि । त्रेवेति—(परिशिष्टे)-श्यामाकैर्व्रीहिभिश्चैव यवैश्चान्योन्यकालतः । प्राग्यष्टुं युज्यतेऽवश्यं नह्याग्रायणस्य इति । पृपातकाख्यमिति—(पारस्करगृह्यसूत्रे)-आश्वयुज्यां पृषातका पायसमैन्द्रं श्रपयित्वा दधिमधुघृतमिश्रं जुहोतीन्द्रायेन्द्राण्या अश्विभ्यामाश्वयुज्यै पौर्णमास्यै शरदेचेति । इत्यादि ।

इति आश्विनमासकृत्यनिर्णयः ।

॥ अथ कार्तिकमासकृत्यनिर्णयः ॥

आश्विनशुक्लैकादशीमारभ्य पौर्णमासीं वारभ्य नाडीद्वयावशिष्टायां रात्रौ तीर्थजलाशये गत्वा प्रत्यहं मासपर्यन्तं स्नानं । कुरुक्षेत्रादितीर्थेषु अस्य फलविशेषः । इदं च स्नानं काशीस्थपञ्चनदेऽतिप्रशस्तम् । मासस्नानाशक्तो त्र्यहं वा स्नायात् । अस्मिन्मासे तुलसीमंजरीभिर्हरेरर्चनमुक्तिः । रोपणपालनस्पर्शैः पापक्षयः ।

तुलामकरमेषेषु प्रातः स्नायी सदा भवेत् । हविष्यं ब्रह्मचर्य्यं च महापातकनाशनम् इति । नाडीद्वयावशिष्टायामिति—(पाद्मे) नाडीद्वयावशिष्टायां रात्र्यां गच्छेज्जलाशयम् । इति । फलविशेष इति—कुरुक्षेत्रे कोटिगुणो गङ्गायामपि तत्समः । ततोऽधिकः पुष्करे स्यात् द्वारवत्यां च भार्गव । पुण्याः पुण्यर्क्षे सप्तैव मुनयो मथुराधिका । दुर्लभः कार्तिको विप्र मथुरायां नृणामिह । यत्रार्चितः स्वकं रूपं भक्तेभ्यः संप्रयच्छति इति । पञ्चनदेऽपीति—(काशीखण्डे)—शतं समास्तपस्तप्त्वा कृते यत्प्राप्यते फलम् । तत्कार्तिके पञ्चनदे सकृत्स्नानेन लभ्यते । कार्तिके बिन्दुतीर्थे यो ब्रह्मचर्यपरायणः । स्नास्यत्यनुदिनं भानुजातस्य भीः कुतः । इत्यादि । त्र्यहमिति—वाराणस्यां पञ्चनदे त्र्यहस्नातस्तु कार्तिके । अन्यो न पुण्यवपुषः पुण्यभाजोऽतिनिर्मला इति । उदयात्पूर्वं सन्ध्यां समाप्य कार्तिकस्नानं कार्य्यमिति (निर्णयसिन्धौ) । नत्वेवं ग्रन्थान्तरे दृश्यत इति (धर्मसिन्धौ) पापक्षयइति—(पाद्मे)—तुलसीकाननं राजन्गृहे यस्यावतिष्ठति । तद्गृहं तीर्थरूपं तु न यान्ति यमकिङ्कराः । रोपणात्पालनात्स्पर्शान्नृणां पापहरा तथा । तुलसी हरते पापं वाङ्मनःकायसम्भवं । तुलसीमंजरीभिर्यः कुर्य्याद्धरिहरार्चनं । न स गर्भगृहं याति मुक्तिभागी न संशयः । तुलसीविपिनच्छाया यत्र यत्र भवेन्नृप तत्र श्राद्धं प्रकुर्वीत पितॄणां दत्तमक्षयम् । तुलसीदललक्षेण कार्तिके योऽर्चयेद्धरिम् ।

तुलसीच्छायायां श्राद्धकरणात्पितृतृप्तिः । एवं धात्रीफलैः पत्रैश्च पूजनादिकृते महत्फलप्राप्तिः । अरुणोदये जागरणाद् गोसहस्रदानसमफलप्राप्तिः । अस्मिन्मासेयत्यादिभिर्मासोपवासः कार्य्यः । अस्मिन्मासे पलाण्ड्वादीनि वर्ज्याणि । विशेषतः सप्तम्यां धात्रीफलानतिलांश्च वर्जयेत् । तथैवाष्टम्यां नालिकेरं रविवारे धात्रीफलं च वर्जयेत् । भोजनादिवर्जनव्रते तत्समाप्तौ शास्त्रोक्तानि दानानि दातव्यानि । मासपर्य्यन्तमाकाशदीपदानान्महल्लक्ष्मीप्राप्तिः । पुष्करमेन स्नानकालेऽभिलापाष्टकं पठनीयम् ।

पत्रे पत्रे मुनिश्रेष्ठ मौक्तिकं लभते फलमिति । महत्फलप्राप्तिरिति—धात्रीछायासु यः कुर्य्यात्पिण्डदानं नृपोत्तम । तृप्तिं प्रयान्ति पितरस्तस्य ये नरके स्थिताः । मूर्ध्नि पाणौ मुखे चैव देहे च नृपसत्तम । धत्ते धात्रीफलं यस्तु स च ज्ञेयो हरिः स्वयमित्यादि । (स्कान्दे) कार्तिके मासि विप्रेन्द्र धात्रीवृक्षोपशोभिते । वरं दामोदरं विष्णुं चित्रान्नैस्तोषयेद्विभुम् । मूलेन पायसेनाथ होमं कुर्य्याद्विचक्षणः । ब्राह्मणान्भोजयेद्भक्त्या स्वयं भुञ्जीत बन्धुभिरिति । जागरणादिति—(पाद्मे)—जागरं कार्तिके मासि यः कुर्य्यादरुणोदये । दामोदराग्रे सेनानीर्गोसहस्रफलं लभेदिति । विष्णोः शिवस्य वा कुर्य्याद्दालये हरिजागरं । शिवविष्णुगृहाभावे सर्वदेवालयेष्वपि । इति । (पाद्मे) पुष्पविशेषार्चनफलम् । केतकीपुष्पेणैकेन पूजितो गरुडध्वजः । समासहस्रं सुप्रीतो जायते गरुडध्वजः । कार्तिके नार्चितो यैस्तु कमलैः कमलेक्षणः । जन्मकोटिषु विप्रेन्द्र न तेषां कमला गृहे । विहाय सर्वपुष्पाणि मुनिपुष्पेण केशवं । कार्तिके योऽर्चयेद्भक्त्या वाजिमेधफलं लभेदित्यादि । यत्यादिभिरिति—(पाद्मे)—वानप्रस्थोयतिर्वापि नारी वा विधवा मुने । मासोपवासं कुर्वीत गुरोर्विप्राज्ञया यतः । आश्विनस्यामले पक्षे एकादश्यामुपोषितः । व्रतमेतत्तु गृह्णीयाद्यावत्त्रिंशद्दिनानि तु । (तत्रैव) न गृहस्थश्चरेद्व्रतमिति ।

(काशीखण्डे) एकान्तरव्रतं कुर्यात्त्रिरात्रव्रतमेव वा। पञ्चरात्रं सप्तरात्रं संप्रासे कार्तिके व्रती। पक्षव्रतं वा कुर्वीत मासोपोषणमेव वा नोर्जोवन्ध्योविधातव्यो व्रतिना केनचित्कचित्। शाकाहारं पयाहारं फलाहारमथापि वा। चरेद्यवान्नाहारं वा संप्रासे कार्तिके व्रती। इति। कृच्छ्रं वा ह्यतिकृच्छ्रं च प्राजापत्यमथापि वा। संप्रासे कार्तिके मासि कुर्याच्छक्त्यातिपुण्यवान्। इति।

(पादकृच्छ्रादीनां लक्षणं। तथा वर्ज्यपदार्थाश्च विषयबोधिन्याम्।)

दीपदानादिति—(वामनपुराणे)—राजतं कांचनं दीपं मणिमुक्ताफलादिकं। दामोदरस्य प्रीत्यर्थं प्रदद्यात्कार्तिके नरः। आकाशदीपउक्तः (पुष्करपुराणे) तुलायां तिलतैलेन सायङ्काले समागते। आकाशदीपं यो दद्यान्मासमेकं हरिं प्रति। महतीं श्रियमाप्नोति रूपसौभाग्यसम्पदमिति—(हेमाद्र्युक्तदीपदानविधिश्च विषयबोधिन्यामवलोकनीयः) पठनीयमिति—(काशीखण्डे)—वैशाखे कार्तिके माघे विशेषनियमैर्युतः। यः पठेत्स्नानसमये लभते सकलं फलम्। कार्तिकस्य तु मासस्य प्रसादादहमव्ययः तव पुत्रत्वमेष्यामि इत्यादि।

॥ प्रसंगादेतेषाम् लक्षणानि ॥

एकभक्तेन नक्तेन तथैवायाचितेन च। उपवासेन चैकेन पादकृच्छ्र उदाहृतः। (प्राजापत्यं)—त्र्यहं प्रातस्त्र्यहं सायं त्र्यहमद्यादयाचितम्। त्र्यहं परञ्च नाश्नीयात् प्राजापत्यं चरन् द्विजः। (कृच्छ्रसान्तपनं) गोमूत्रं गोमयं क्षीरं दधिसर्पिः कुशोदकम्। एकरात्रोपवासश्च कृच्छ्रं सान्तपनं स्मृतम्। (अतिकृच्छ्रं) एकैकं ग्रासमश्नीयात्त्र्यहाणि त्रीणि पूर्ववत्। त्र्यहं चोपवसेदन्त्यमतिकृच्छ्रं चरन् द्विजः। (तप्तकृच्छ्रं) तप्तकृच्छ्रं चरन्विप्रो जलक्षीरघृतानिलान्। प्रतित्र्यहं पिबेदुष्णान् सकृत्स्नायी समाहितः। (पराकव्रतं) यतात्मनोऽप्रमत्तस्य द्वादशाहमभोजनम्। पराकोनाम कृच्छ्रोयं सर्वपापापनोदनः। (चान्द्रायण०) एकैकं ह्रासयेत् पिण्डं कृष्णे शुक्ले च वर्द्धयेत्। उपस्पृशंस्त्रिषवणमेतच्चान्द्रायणं व्रतम्। (यति चान्द्रायण०) अष्टावष्टौसमश्नीयात् पिण्डान्मध्यन्दिने स्थिते। नियतात्मा हविष्याशी यतिचान्द्रायणं चरन्। (शिशुचान्द्रायणमन्यत्) चतुरः प्रातरश्नीयात् पिण्डान्विप्रः समाहितः। चतुरोऽस्तमिते सूर्ये शिशुचान्द्रायणं स्मृतम्। (चन्द्रलोकप्राप्तिफलकं) यथा कथंचित् पिण्डानां तिस्रोऽशीति (२४०) समाहितः। मासेनाश्नन्हविष्यस्य चन्द्रस्यैति सलोकतां। (महासान्तपनव्रतं) पृथक्सान्तपनद्रव्यैः षडहः सोपवासकः। सप्ताहेन तु कृच्छ्रोयम्महासान्तपनः स्मृतः। (पर्णकृच्छ्रं) पर्णो-

दुम्बरराजीव बिल्वपत्रकुशोदकैः। प्रत्येकम्प्रत्यहम्पीतैः पर्णकृच्छ्र उदाहृतः। (कृच्छ्राति-कृच्छ्रव्रतं)—कृच्छ्रातिकृच्छ्रः पयसा दिवसानेकविंशतिम्। (सौम्यकृच्छ्रव्रतम्)—पिण्याकाचामतक्राम्बुसक्तूनां प्रतिवासरम्। एकरात्रोपवासश्च कृच्छ्रः सौम्योऽयमुच्यते। (तुलापुरुष०)—एषां त्रिरात्रमभ्यासादेकैकस्य यथाक्रमम्। तुलापुरुष इत्येष ज्ञेयः पञ्चदशाहिकः। (वैदिककृच्छ्रं)—त्र्यहं तु दधिना भुङ्क्ते त्र्यहं भुङ्क्ते च सर्पिषा। क्षीरेण तु त्र्यहं भुङ्क्ते वायुभक्षो दिनत्रयम्। त्रिपलं दधिक्षीरेण पलमेकन्तु सर्पिषा। एतदेव व्रतं पुण्यं वैदिकं कृच्छ्रमुच्यते। (नक्तव्रतं)—निशायां भोजनं चैव तज्ज्ञेयं नक्तमेव तु। (पादोनव्रतं) त्र्यहं निरशनं पादः पादश्चायाचितं त्र्यहम् सायं त्र्यहं तथा पादः पादः प्रातस्तथा त्र्यम् प्रातः सायं दिनार्द्धं च पादोनं साम वर्जितम्। (पादकृच्छ्रं) सायं प्रातस्त्वहोरात्रं पादं कृच्छ्रस्य तं विदुः। (अर्धकृच्छ्रं) सायं प्रातस्तथैवैकं दिनद्वयमयाचितम्। दिनद्वयञ्च नाश्नीयात्कृच्छ्रार्धं तद्विधीयत इति। (अघमर्षणव्रतम्) त्र्यहं त्रिषवणस्नायी स्नाने स्नानेऽघमर्षणम्। निमग्नस्त्रिपठेदप्सु न भुञ्जीत दिनत्रयम् वीरासनञ्च तिष्ठेत गान्दद्यात्पयस्विनीम्। अघमर्षणमित्येतद् व्रतं सर्वाघनाशनम्। (शीतकृच्छ्रं) त्र्यहमुष्णं पिबेत्तोयं त्र्यहमुष्णं घृतं पिबेत्। त्र्यहमुष्णं पयः पीत्वा वायुभक्षस्त्र्यहं भवेत्। तप्तकृच्छ्रं विजानीयाच्छीतैः शीतमुदाहृतम्। (वारुणकृच्छ्रं) त्रिदिनोदकसिद्धांस्तु समश्नीयात्प्रयत्नतः। सक्तून् हि सोदकान्मासं कृच्छ्रं वारुणमुच्यते। (यावकव्रतं) गोपुरीषयवाश्नस्तु मासं नित्यं समाहितः। व्रतन्तु यावकं कुर्यात् सर्वपापापनुत्तये इति। (उद्दालकव्रतं)—पतितसावित्रीक उद्दालकव्रतं चरेत्। द्वौ मासौ यावकेन वर्तयेत् मासम्पयसा अर्द्धमासं आमिक्षया अष्टरात्रं घृतेन षड्रात्रमयाचितेन त्रिरात्रमब्भक्षोऽहोरात्रमुपवसेदिति।

वर्ज्यपदार्थाः—(पाद्मे)—पलाण्डुं लशुनं हिंगु छत्राकं गृञ्जनं तथा। नालिकां मूलकं शिग्रुं वर्जयेत् कार्तिके व्रती। अलाबुं चापि वृन्ताकं कूष्माण्डं वृहतीफलं। कलिङ्गं च कपित्थं च वर्जयेद्वैष्णवो व्रती। रजस्वलां त्यजेत् म्लेच्छ पतितव्रात्यकैः सह। द्विषद्भिः वेदबाह्यैश्च न वदेत्कार्तिके व्रती। (अन्यत्र) द्विःपाचितं च दग्धान्नं नैवाद्याद्वैष्णवो व्रती। [illegible] मूलकं तथा। श्रीफलञ्च कलिङ्गं च फलं धात्रीभवं तथा। नारिकेलं तथालाबु पटोलं बदरीफलम्। [illegible] शाकं शाकं तु जम्बीरं तथा। शाकान्येतानि [illegible] [illegible]। धात्रीफलं रवौ नित्यं वर्जयेत् सर्वदा गृही इति (स्कान्दे) कार्तिके [illegible]। तिलादि [illegible] द्विदलं [illegible]। माषमुद्गमसूरांश्च चणकांश्च कुलित्थकान्। [illegible] सर्वाण्येतानि वर्जयेदिति। [illegible] मूलं [illegible] (कार्तिकमाहात्म्ये) [illegible] प्रयत्नतः। [illegible] [illegible] मधुयागं [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] कार्तिके व्रती। [illegible] कार्तिके। [illegible] [illegible] [illegible]। कार्तिके [illegible]

सुवर्णटां सतिलां मौनीं सहिरण्यां प्रदापयेत्। कार्तिके लवणं त्यक्तं येन व्रतभृता सदा। त्यक्तः सर्वेरसास्तेन तत्त्यागी गां प्रदापयेत्। भूशय्यां कार्तिके कुर्वन्नेभुवं संस्पृशेद् व्रती। पर्य्यङ्कं भूशयो दद्यात् सतूलं सोपधानकम्। इति।

॥ हेमाद्युक्तदीपदानविधिः ॥

पूर्णेऽश्वयुजे मासि पौर्णमास्यां समाहितः। प्रथमे च निशारम्भे मनोवाक्काय संयतः। नमः पितृभ्यः प्रेतेभ्यो नमो धर्माय विष्णवे। नमो यमाय रुद्राय कान्तारपतये नमः। दद्यादनेन मंत्रेण दीपं श्रद्धासमन्वितः। यः कार्तिकं समग्रं तु वर्द्धन्ते तस्य सम्पदः। दिवाकरेऽस्ताचलमौलिमूले गृहाददूरे पुरुषप्रमाणम्। यूपाकृतिं यज्ञियवृक्ष-दारुमारोप्य भूमावथ तस्य मूर्ध्नि। यवांगुलच्छिद्रयुतास्तु तत्र द्विहस्तदीर्घाश्च सुपट्टिकास्तु। कृत्वा चतस्रोऽष्टदलाकृतीस्तु याभिर्भवेदष्टदिशानुसारी॥ (अष्टयवैर्मितमंगुलं यवांगुलं) तत्कर्णिकायां तु महाप्रकाशो दीपः प्रदेयो दलगास्तथाष्टौ। स्वदिङ्मुखः दीपवरास्तु तैलघृतादियुक्तास्तु यथोपलब्धं। अनंगलग्नं त्वथ वस्त्रखण्डं नवं सुरक्तं त्वथवा सुशुक्लम्। धन्यं प्रयोज्यं च सुखं च हृद्यं स्निग्धं सुशोभं सुसमं समंरतम्। तच्चालिपिष्टोपरि संनिधेयं यथा न नश्येन्न च कम्पते वा। मध्ये प्रकुर्यात्त्रिगुणप्रमाणं मध्ये हि तस्याप्यथ दीपराज्यः। दलेषु शोभाढ्यमतीव कुर्यान्मनोरथानामुपलब्धये च। घंटाप्रकं लम्बितपुष्पदामं सुवस्त्रशोभान्वितमत्र पश्चात्। संयोज्य भूमिस्थितं गोमयेन सचन्दनाक्तेन जलेन लिप्त्वा। अनेकवर्णैरथ मण्डले तु कृत्वाष्टपत्रं कमलप्रमाणम्। फलानि मूलानि तथाक्षतानि लाजाद्धिक्षीरमथान्नपानं। नानाविधं भक्ष्यविशेषणं च स नृत्यगीतं मधुरं च वाद्यम्। निवेद्य धर्माय हराय भूमौ दामोदरायाप्यथ धर्मयज्ञे। प्रजापतिभ्यस्त्वथ सपितृभ्यः प्रेतेभ्यएवाथ तपस्थितेभ्यः। नैर्ऋत्यकोणादथ दक्षिणान्तं धर्मादिभ्यः प्रेतपर्य्यन्तिकेभ्यः। ततोजलं शीतलमानयित्वा सर्पिः समध्वक्तमतीवगृह्यम्। आपूर्य चाष्टौ कलशाञ्जलेन नैर्ऋत्यकोणादथ सन्निधाय। हेमादिपात्रं तिलहेमपूर्णं दद्यात्पिधानं च सदक्षिणं च। गोभूहिरण्यं रजतं च वस्त्रं फलानि मूलानि यवांश्च धान्यम्। गृहं रथं शयनं वाहनं च यद्वापि किंचिद्हृदये मनोज्ञं। निवेदयेत् ब्राह्मणसत्तमेभ्यो नैर्ऋत्यकोणादथ संस्थितेभ्यः। एकैकशः भोजनं चापि कुर्यात्स्वशक्तिमन्दीं स्ववर्णं विचार्य। दीपान्समभ्रानथवर्जयित्वा सर्वं नयेयुस्त्वथ विप्रमुख्याः। प्रदक्षिणीकृत्य वनांगनां (वनांगनावनदेवता दीपस्तम्भमूर्तिः) तु ततोभवेत्संयतनक्तभोजी। (इतीदमीदृग्व्यवहारयुक्तं निशागमे प्रत्यहमेव कुर्य्यात्) मासं समग्रं परया च भक्त्या समाप्यते कार्तिकपौर्णमास्यां। दिनत्रयं दीपमहोत्सवं वा एकोऽथवा दीपवरश्च देयः। यथाश्वयुज्यादिसमग्रमासं निशागते प्रत्यहमेव भक्त्या। नमोऽस्तु कान्तारकदेवताभ्य इत्येवमुक्त्वा स्वगृहस्य शान्त्यै। नार्य्यानरेणाथ सुमंगलेन भक्त्यायुतेनाथ निशासु भोज्यम्। संध्याश्रये दीपवराश्च देया राज्यागमे कार्तिकपौर्णमास्याम्। नदीतटे चैत्र गृहांतरे वाप्यथैकलिङ्गे त्वथ चैत्यवृक्षे। सहस्रमष्टाधिकमत्र तैलपक्वस्य पात्रे सुशुभे शतं वा। देवे तदर्धैरथवा तदर्धं प्रमाणपरिमाणस्वयं पूरणीयाः। हस्तान्तवर्तीयाश्च चतुरस्रीव ममाप्य वस्त्रं स्वयं सूत्रवर्तिं। प्रज्वालयेत्तां च निरुध्य धीमान् स्त्रीणामलं वार्युतः

दुंस्वरराजीव विल्वपत्रकुशोदकैः। प्रत्येकम्प्रत्यहम्पीतैः पर्णकृच्छ्र उदाहृतः। (कृच्छ्रातिकृच्छ्रव्रतं)—कृच्छ्रातिकृच्छ्रः पयसा दिवसानेकविंशतिम्। (सौम्यकृच्छ्रव्रतम्)—पिण्याकाचामतक्राम्बुसक्तूनां प्रतिवासरम्। एकरात्रोपवासश्च कृच्छ्रः सौम्योऽयमुच्यते। (तुलापुरुष०)—एषां त्रिरात्रमभ्यासादेकैकस्य यथाक्रमम्। तुलापुरुष इत्येष ज्ञेयः पञ्चदशाहिकः। (वैदिककृच्छ्र)—त्र्यहं तु दधिना भुङ्क्ते त्र्यहं भुङ्क्ते च सर्पिषा। क्षीरेण तु त्र्यहं भुङ्क्ते वायुभक्षो दिनत्रयम्। त्रिपलं दधिक्षीरेण पलमेकन्तु सर्पिषा। एतदेव व्रतं पुण्यं वैदिकं कृच्छ्रमुच्यते। (नक्तव्रतं)—निशायां भोजनं चैव तज्ज्ञेयं नक्तमेव तु। (पादोनव्रतं) त्र्यहं निरशनं पादः पादश्चायाचितं त्र्यहम् सायं त्र्यहं तथा पादः पादः प्रातस्तथा त्र्यम् प्रातः सायं दिनार्द्धं च पादोनं साम वर्जितम्। (पादकृच्छ्र) सायं प्रातस्त्वहोरात्रं पादं कृच्छ्रस्य तं विदुः। (अर्धकृच्छ्र) सायं प्रातस्तथैवैकं दिनद्वयमयाचितम्। दिनद्वयं च नाश्नीयात्कृच्छ्रार्धं तद् विधीयत इति। (अघमर्षणव्रतम्) त्र्यहं त्रिषवणस्नायी स्नाने स्नाने ऽघमर्षणम्। निमग्नस्त्रिःपठेदप्सु न भुञ्जीत दिनत्रयम् वीरासनञ्च तिष्ठेत गान्दद्याच्च पयस्विनीम्। अघमर्षणमित्येतद् व्रतं सर्वाघनाशनम्। (शीतकृच्छ्र) त्र्यहमुष्णं पिबेत्तोयं त्र्यहमुष्णं घृतं पिबेत्। त्र्यहमुष्णं पयः पीत्वा वायुभक्षस्त्र्यहं भवेत्। तप्तकृच्छ्रं विजानीयाच्छीतैः शीतमुदाहृतम्। (वारुणकृच्छ्र) विधिनोदकसिद्धांस्तु समश्नीयात्प्रयत्नतः। सक्तून् हि सोदकान्मासं कृच्छ्रं वारुणमुच्यते। (यावकव्रतं) गोपुरीषाद्यवान्नस्तु मासं नित्यं समाहितः। व्रतन्तु यावकं कुर्यात् सर्वपापापनुत्तये इति। (उद्दालकव्रतं)—पतितसावित्रीकउद्दालकव्रतं चरेत्। द्वौ मासौ यावकेन वर्जयेत् मासम्पयसा अर्द्धमासं मार्क्षिकेणाष्टरात्रं घृतेन षड्रात्रमयाचितेन त्रिरात्रमब्भक्षोऽह रात्रमुपवसेदिति।

वर्ज्यपदार्थाः—(पाद्मे)—पलाण्डुं लशुनं हिंगु छत्राकं गृञ्जनं तथा। नालिकां मूलकं शिग्रुं वर्जयेत् कार्तिके व्रती। अलाबुं वार्ताकं कूष्माण्डं बृहतीफलं। कलिंगं च कपित्थं च वर्जयेद् वैष्णवोव्रती। रजस्वलां त्यजेत् म्लेच्छ पतितावर्तकैः सह। द्विजविट् वेदबाह्यैश्च न वदेत्कार्तिकव्रती। (अन्यत्र) द्विः याचितं च दग्धान्नं नैवाश्नीयाद्वैष्णवोव्रती। कूष्माण्डबृहती छत्राकं मूलकं तथा। श्रीफलञ्च कलिंगं च फलं धात्रीभवं तथा। नारिकेलं तथालाबुं पटोलं बदरीफलम्। चर्मवृन्ताकजं शाकं शाकं तुलसिजं तथा। शाकान्येतानि वर्ज्यानि कार्तिके क्रमात्प्रतिपदादिषु। धात्रीफलं रवौ तद्वद्वर्जयेन्मेवदा गृही इति (स्कान्दे) कार्तिके [illegible]। निष्पावान् वर्जयेत्स्नेहं द्विदलं बहुबीजकं। माषमुद्गममसूरांश्च चणकांश्च कुलित्थकान्। निष्पावांश्च [illegible] द्विदलं स्मृतम्। नूतनान्यपि जीर्णानि सर्वाण्येतानि वर्जयेदिति। (काशीखण्डे) पत्रभोजी भवेदूर्जे कार्यत्यागं प्रयत्नतः। कांस्ये नियमं दद्यात् कांस्यं सर्पिः प्रपूरितम्। ऊर्जे न भक्षयेन्मौनमति क्षौद्राणि व्रतं। मधुत्यागे घृतं दद्यात्पायसं सशर्करं। अभ्यङ्गं व्यवहारं च तैलमूर्द्धं विवर्जयेत्। तैलत्यागं [illegible] दद्यात् [illegible] च न कांचनात्। बहुलं कांस्यभोजी यः स भूमिस्पर्शासि [illegible]। [illegible] कार्तिके व्रती। कृष्णभूपाल्यजेयुर्नरोऽपि कार्तिके। नियमं मन्त्रमोमानां दद्याद्वै कार्तिके व्रती। [illegible] रत्नानि समार्चाणि त्रिरात्रमस्तुपुनान्यपि। कार्तिके मौनभोजी यः [illegible] ।

सुवर्णां सतिलां मौर्नी सहिरण्यां प्रदापयेत्। कार्तिके लवणं त्यक्तं येन व्रतभृता सदा। त्यक्तः सर्वरसास्तेन तत्त्यागी गां प्रदापयेत्। भूशय्यां कार्तिके कुर्वन् भुवं संस्पृशेद् व्रती। पर्य्यङ्कं भूशयो दद्यात् सतूलं सोपधानकम्। इति।

॥ हेमाद्र्युक्तदीपदानविधिः ॥

पूर्णआश्वयुजे मासि पौर्णमास्यां समाहितः। प्रथमे च निशारम्भे मनोवाक्काय संयतः। नमः पितृभ्यः प्रेतेभ्यो नमो धर्माय विष्णवे। नमो यमाय रुद्राय कान्तारपतये नमः। दद्यादनेन मंत्रेण दीपं श्रद्धासमन्वितः। यः कार्तिकं समग्रं तु वर्द्धन्ते तस्य सम्पदः। दिवाकरेऽस्ताचलमौलिमूले गृहाददूरे पुरुषप्रमाणम्। यूपाकृतिं यज्ञियवृक्ष-दारुमारोप्य भूमावथ तस्य मूर्ध्नि। यवांगुलच्छिद्रयुतास्तु तत्र द्विहस्तदीर्घाश्च सुपट्टिकास्तु। कृत्वा चतस्रोऽष्टदलाकृतीस्तु याभिर्भवेदष्टदिशानुसारी॥ (अष्टयवैर्मितमङ्गुलं यवाङ्गुलं) तत्कर्णिकायां तु महाप्रकाशो दीपः प्रदेयोदलगास्तथाष्टौ। स्वदिङ्मुखः दीपवरास्तु तैलघृतादियुक्त स्तु यथोपलब्धं। अनंगलग्नं त्वथवाखण्डं नवं सुरक्तं त्वथवा सुशुक्लम्। धन्यं प्रयोज्यं च सुखं च हृद्यं स्निग्धं सुशोभं सुसमं समंस्तम्। तच्चालिपिष्टोपरि संनिधेयं यथा न नश्येन्न च कम्पते वा। सर्वं प्रकुर्यात्त्रिगुणप्रमाणं मध्ये द्विदस्याप्यथ दीपराज्यः। दलेषु शोभाढ्यमतीव कुर्यान्मनोरथानामुपलब्धये च। घंटाष्टकं लम्बितपुष्पदाम सुवस्त्रशोभान्वितमत्र पश्चात्। संयोज्य भूमिस्त्वथ गोमयेन संचन्दनाक्तेन जलेन लिप्त्वा। अनेकवर्णैरथ मण्डले तु कृत्वाष्टपत्रं कमलप्रमाणम्। फलानि मूलानि तथाक्षतानि लाजादधिक्षीरमथान्नपानं। नानाविधं भक्ष्यविशेषणं च स नृत्यगीतं मधुरं च वाद्यम्। निवेद्य धर्माय हराय भूमौ दामोदरायाप्यथ धर्मयज्ञे। प्रजापतिभ्यस्त्वथ सत्पितृभ्यः प्रेतेभ्य एवाथ तपस्थितेभ्यः। नैरृत्यकोणादथ दक्षिणान्तं धर्मादिभ्यः प्रेतपर्य्यन्तिकेभ्यः। ततो जलं शीतलमानयित्वा सर्पिः समभ्यक्तमतीवगृह्यम्। आपूर्य चाष्टौ कलशाञ्जलेन नैरृत्यकोणादथ सन्निधाय। हेमादिपात्रं तिलहेमपूर्णं दद्यात्पिधानं च सदक्षिणं च। गोभूहिरण्यं रजतं च वस्त्रं फलानि मूलानि यथाश्च धान्यम्। गृहं रथं शयनं वाहनं च यद्वापि किंचिद्धृदये मनोज्ञम्। निवेदयेत् ब्राह्मणसत्तमेभ्यो नैरृत्यकोणाद्य संस्थितेभ्यः। एकैकशः प्रीणनं चाथ कुर्यात्स्वशक्तितः स्वधनं विचार्य। दीपान्समस्तानथ वर्जयित्वा सर्वं नयेयुस्त्वथ विप्रमुख्याः। प्रदक्षिणीकृत्य वनांगनां (वनांगनावनदेवताःदीपस्तम्भमूर्तिः) तु ततो भवेत्संयतवाक्‌भोजी। (इतीदमीदृग्व्यवहारयुक्तं निशागमे प्रत्यहमेव कुर्य्यात्) मासं समग्रं परया च भक्त्या समाप्यते कार्तिकपौर्णमास्यां। दिनत्रयं दीपमहोत्सवं वा एकोऽथवा दीपवरश्च देयः। यथाप्रयुज्यादिसमग्रमासं निशागते प्रत्यहमेव भक्त्या। नमोस्तु कान्तारकदेवताभ्य इत्येवमुक्त्वा स्वगृहस्य शान्त्यै। नारीनरेणाथ सुमंगलेन भक्त्यायुतेनाथ निशासु भोज्यम्। संध्यात्रये दीपवराश्च देया रात्र्यागमे कार्तिकपौर्णमास्याम्। नदीतटे चैव गृहांतरे वाप्यथैकलिङ्गे त्वथ चैत्यवृक्षे। सहस्रसंख्याधिकमत्र तैलपलस्य पात्रे सुशुभे धृतं वा। देवे तदर्धैरथवा तदर्धं प्रमाण्यरिक्तालवर्यं पूरणीयाः। हस्तान्तरं दीपमनुदैर्घ्य प्रमाप्य वस्त्रं त्वथ सूत्रवर्ति। प्रज्वालयेत्तां च निरूप्य धीमान् कौशंमङ्गलं परं पुनः

कार्त्तिककृष्णचतुर्थी—इयं चतुर्थी करकाभिधा। एषा चन्द्रोदयव्यापिनी ग्राह्या। उभयत्र तद्व्याप्तावव्याप्तौ च संकष्टचतुर्थीवन्निर्णयः। अत्र स्त्रीणामेवाधिकारः तासामेव फलश्रुतेः। अस्यामेव दशरथपूजनाद् दुर्गापूजनाच्च सौख्यवृद्धिः। दशरथपूजने प्रदोषव्यापिनी ग्राह्येति विष्णुभट्टः।

कार्त्तिककृष्णसप्तमी—अस्यां पुत्रवत्या अहोईव्रतङ्कार्य्यम्। मार्गशीर्षाष्टम्यामनघाव्रतम्।

कार्त्तिककृष्णाष्टमी—अस्यामष्टम्यां मथुरामण्डलवासिभिः राधाकुण्डे स्नानं कार्य्यम्। अत्राष्टमी अरुणोदयव्यापिनी सूर्योदयव्यापिनी वा ग्राह्या स्नानकालव्यापित्वात्। अस्यां दाम्पत्याष्टमी-

करकाभिधेति—(वामनपुराणे)-शृणु देवि वरारोहे वक्ष्यामि त्वां महेश्वरी। पतिविघ्नहरीं श्रेष्ठां करकाख्यां चतुर्थिकामित्यादि। चन्द्रोदयव्यापिनीति—वृथैवार्घ्यस्त्वया दत्तो विना चन्द्रोदयं शुभे इतिवचनात्। सौख्यवृद्धिरिति—(संवत्सरप्रदीपे) आश्विने कृष्णपक्षस्य चतुर्थ्यां सन्नियोगतः। मृन्मयोऽत्रस्थितः पूज्यो राजा दशरथः स्त्रिया दुर्गा च तत्र सम्पूज्या सर्वसौख्यविवृद्धयइति। अनघाव्रतमिति—(भविष्योत्तरे) कृष्णाष्टम्यां मार्गशीर्षे दाम्पत्यं दर्भनिर्मितम्। अनघं चान्यथाचैव बहुपुत्रैः समन्विताम्। स्थापयित्वा शुभेदेशेगोमयेनानुलेपितेइत्यादि। अनघाव्रतमेवाहोईव्रतमन्यद्वेति विचारयन्तु विज्ञाः।

दाम्पत्याष्टमीव्रतमिति-(भविष्यपुराणे)-कार्त्तिके मासि विप्रेन्द्र पुत्रकामोनरोमुने। अष्टम्यां कृष्णपक्षस्य पूजयेद्विधिवद्द्विजः।

प्रयुञ्ज। देवीमहावर्त्तिरतीववंशा पुण्या च या सा भुवनप्रकाशा। एतन्न कुर्य्यादथ यस्तु मन्दस्तस्यान्धकारस्य कुतः प्रशान्तिः। अयं हि दीपः कल्पवृक्षश्चिन्तामणिर्भद्रकरोऽथरेणुः। अनेन दीपेन मनोरथानां संप्राप्तिरस्तीति न संशयोऽत्र। एतानि चोक्त्वाथ कश्चिद्वचांसि दामोदरस्यान्तरितो बभूव॥ इति दीपदानविधिः॥

मतद्वाय्यम् ।•एषा राधाजयन्तीति धर्मसिन्धुकारः । भाद्रशुक्लाष्टमी राधाजयन्तीति सिद्धान्तः ।

कार्तिककृष्णैकादशी—(रमा)

• कार्तिककृष्णद्वादशी—एषा गोवत्सद्वादशी—सा च प्रदोपव्यापिनी ग्राह्या । दिनद्वये प्रदोषसत्त्वे पूर्वा । अत्र गोपूजनं विधेयम् । तद्दिने तैलपक्वं स्थालीपक्वं गव्यं च वर्जयेत् । भाद्रद्वादशी गोवत्सद्वादशीति केचित् । इमामेव द्वादशीमारभ्य पञ्चदिनपर्यन्तं नीराजनविधिश्च कार्य्यः ।

उमयासहितं देवं कृत्वा दर्भमयं विभुमिति ।

रमेति—कार्तिके कृष्णपक्षे तु रमानाम सुशोभना । एकादशी समाख्याता महापापहरा परा इति ।

गोवत्सद्वादशीति—(भविष्ये)-सवत्सा कार्तिके मासि कृष्णपक्षे युधिष्ठिर । द्वादश्यां भक्तियुक्तैस्तैर्नन्दिनी नामनामत इत्यादि । प्रदोषव्यापिनीति-नरो वा यदि वा नारी नक्तं संकल्प्य चेतसीतिवचनात् । गोपूजनमिति—ऊर्ज्जे सिते द्विदशगेऽन्हि च गां सवत्सां याः पूजयन्ति चरुकैः कुसुमैश्च हृद्यैः । ताः सर्वकामसुखभागविभूतिभाजो मर्त्ये वसन्ति सुचिरं नृपजीववत्साइति । वर्जयेदिति—(हेमाद्रौ) तद्दिने तैलपक्वं च स्थालीपक्वं युधिष्ठिर । गोक्षीरं गोघृतंचैव दधितक्रं च वर्जयेत् । माषान्नं कामतोऽश्नीयाद्भाश्री विगतमत्सरः । भूमौ स्वपेद्ब्रह्मचारी शृणुयात्पुण्यमाप्नुयादिति । (अत्रगोक्षीरसमभिव्याहाराद्दधितक्रे अपि गोसम्बन्धिनी वर्ज्ये इति लभ्यते-गोमूत्रं गोमयं क्षीरं दधिसर्पिः कुशोदकम् । इतिसान्तपनविधौ गोमूत्रसमभिव्याहारात्क्षीरे गोसम्बन्धवत् इति) नीराजनेति—(आग्नेये) कार्तिकः खलुमासो वै सर्वदेवमयोमहान् । कृष्णपक्षे विशेषेण तत्र पञ्चदिनानि तु । पुण्यानि तेषु यद्दत्तमक्षयं सर्वकामिकम् । आश्विने कृष्णपक्षे तु द्वादश्यादिषु पञ्चसु । तीर्थ-

कार्तिककृष्णत्रयोदशी——अस्यां निशामुखे गृहाद्बहिर्यमाय दीपं दद्यात् । अत्र त्रयोदशी प्रदोषव्यापिनी ग्राह्या । दिनद्वये तद्व्याप्तावव्याप्तौ वा परा । इमामेवारभ्य गोत्रिरात्रिव्रतम् । अत्र त्रयोदश्यौदयिकी-ग्राह्या कृष्णपक्षत्वात् । दिनद्वयेऽप्युदयव्यापित्वे पूर्वा पूर्णत्वादितिरत्नाकरः ।

कार्तिककृष्णचतुर्दशी——(प्रेतचतुर्दशी) महाचतुर्दशी— अभ्यङ्गे एषा चन्द्रोदयव्यापिनीग्राह्या—दिनद्वये चन्द्रोदये अरुणोदये

पूर्वः सर्वरात्रौ नृणां नीराजनोविधिः । नीराजयेयुर्देवांश्च विप्रांश्चैव तुरङ्गमान् । ज्येष्ठाज्ज्येष्ठांस्तदन्यांश्च मातृमुख्याश्च योषितः । (आश्विनग्रहणंमुख्यचान्द्राभिप्रायेण) ।

गृहाद्बहिरिति—(स्कन्दपुराणे) कार्तिकस्यासिते पक्षे त्रयोदश्यां निशामुखे । यमदीपं बहिर्दद्यादपमृत्युर्विनश्यति । तत्रैव दीपमंत्रः—मृत्युना पाशहस्ताभ्यां कालेन श्यामया सह । त्रयोदश्यां दीपदानात्सूर्यजः प्रीयतां मम इति । गोत्रिरात्रिव्रतमिति—(स्कान्दे) कृष्णपक्षे त्रयोदश्यां मासि चाश्वयुजे तथा । दीपोत्सवसमीपे तु व्रतमेतत्समाचरेत् । प्रातः स्नात्वा त्रयोदश्यां कृत्वा वै दन्तधावनम् । त्रिरात्रं नियमं कुर्याद्गोविन्दे भक्तिभावतः । गोविन्द जगतीनाथ गोवर्द्धनधरानघ । गोत्रिरात्रं करिष्यामि शरणं मे भयाच्युत । इति ।

चन्द्रोदयव्यापिनीति—(मदनरत्ने) कार्तिके कृष्णपक्षे तु चतुर्दश्यां विधूदये । अवश्यमेव कर्तव्यं स्नानं नरकभीरुभिरिति । पूर्वेति —(निर्णयामृतकारः) पूर्वविद्धचतुर्दश्यां कार्तिकस्य सितेतरे । पक्षे प्रत्यूषसमये स्नानं कुर्यात्प्रयत्नतः । त्रयोदशी यदाप्रातः क्षयंयाति चतुर्दशी । रात्रिशेषेऽप्यमावास्या तदाभ्यङ्गं त्रयोदशीति ॥ अरुणोदय

(अथर्ववेदे) यमवर्णनम्—१८।२।१३ यो ममार प्रथमो मर्त्यानां यः प्रेयाय प्रथमो लोकमेतम् । वैवस्वतं संगमनं जनानां यमं राजानं हविषा सपर्यत (ऋग्वेदे) १०।१४।१। वैवस्वतं संगमनं जनानां यमं राजानं हविषा दुवस्य ।

सूर्योदये वा सत्वे पूर्वा । चतुर्दशी चतुर्थ्यामारुणोदयचन्द्रोदयसूर्योदयानामुत्तरोत्तरस्यव्याप्यत्वादुगुरुत्वम । विभूतिकामैः सुगन्धितैलेन स्नानं कार्य्यं । अस्मिन्दिने जीवत्पितृकेणापि तर्पणं कार्य्यम । प्रदोपे दीपदानम् । नरकोद्देशेन चतुर्वर्तियुक्तदीपदानञ्च विधेयम् । तत्पञ्चदिनानिदीपं दद्यात् । लांगलोद्धृतलोष्ठयुतापामार्गतुम्बीचक्रमर्दानां स्नानमध्ये शाखाभ्रमणं त्रिवारं कार्य्यम । अस्यां शैवविप्रभोजनम् मापपत्रभोजनञ्च विहितम् । अस्तसमये उल्कादानञ्च कार्य्यम । इयं भौमवारयुक्ताचित्राख्या ।

इति—(भविष्ये) अरुणोदयतोऽन्यत्र रिक्तायां स्नाति योनरः । तस्याब्दिकभवोधर्मोनश्यत्येव न संशयइति । सुगन्धितैलेनेति—चतुर्दशीयाश्वयुजस्य कृष्णा स्यात्स्वातियुक्ता च भवेत्प्रभाते । स्नानं समभ्यर्च्य नरैश्च कार्य्यं सुगन्धितैलेन विभूतिकामैरिति । जीवत्पितृकेणापीति—(पाद्मे) या काचित्सरितं प्राप्य कृष्णपक्षे चतुर्दशी । यमुनायां विशेषेण नियतस्तर्पयेद्यमम् । जीवत्पितापि कुर्वीत तर्पणं यमभीष्मयोरिति । प्रदोपे दीपदानमिति—(दिवोदासीये) अमावास्याचतुर्दश्योः प्रदोपे दीपदानतः । यममार्गान्धकारेभ्यो मुच्यते कार्तिके नरः । ततः प्रदोषसमये दीपान्दत्वा मनोरमान् । ब्रह्मविष्णुशिवादीनां भवनेषु मठेषु च । चाक रोद्यानवापीषु प्रतोली निष्कुलेषु च । मन्दुरासु विविक्तासु हस्तिशालासु चैवहि । इति । चतुर्वर्तियुक्तेति—दत्तोदीपश्चतुर्दश्यां नरकप्रीतये मया । चतुर्वर्तिसमायुक्तः सर्वपापापनुत्तयइति । भ्रमणमिति—(ब्र०पुराणे) तैले लक्ष्मीर्जले गङ्गा दीपावल्याश्चतुर्दशीम् । प्रातः स्नानं च यः कुर्य्याद्यमलोकं न पश्यति । सितालोष्टसमायुक्तं सकण्टकदलान्वितम् । हरपापमपामार्ग भ्राम्यमाणः पुनः पुनः । अपामार्गमथोतुम्बी प्रपन्नाटमथापरम् । भ्रामयेत्स्नानमध्ये तु नरकस्य क्षयाय वै । विहितमिति । मापपत्रस्य शाकेन भुक्त्वा तत्र दिने नरः ।

कार्तिककृष्णामावस्या—(सुखरात्रिः सुखसुप्तिका दीपावली

प्रेतचतुर्दशीकाले सर्वपापैः प्रमुच्यते । नक्तं प्रेतचतुर्दश्यां यः कुर्या च्छिवचतुष्टये । न तत्क्रतुशतेनापि प्राप्यते पुण्यमीदृशम् । कुमार्यो वटुकाः पूज्यास्तथा शैवास्तपोधनाः । राजसूयफलं तेन प्राप्य नात्र संशय इति । उल्कादानमिति—(ज्योतिर्निबन्धे) तुलासं सहस्रांशौ प्रदोषे भूतदर्शयोः । उल्काहस्ता नराः कुर्युः पितृण मार्गदर्शनमिति । चित्राख्येति—(पुष्करपुराणे) कार्तिके भौमवारेण चित्राकृष्णा चतुर्दशी । तस्यां भूतेशमभ्यर्च्य गच्छेच्छिवपुरं न इति ।

शास्त्रदृष्ट्या दीपावल्या यन्महत्त्वं तत्तु सर्वोपरि वर्तत एव । साम्प्रतिकैर्यदि विज्ञा दृष्ट्याऽपि समवलोक्यते चेन्महोत्सवस्यास्य समयः सर्वथा तत्कालावश्यकतानुकूलो विद्यते । चातुर्मास्ये हि सततप्रस्तुतसलिलसम्प्लुतेषु सदनेषु मशकादीनां प्राचुर्य दुर्गन्धप्रसारश्च सुलभ इति शरदि तेषां शुद्ध्यर्थं विशेषशुद्धिसम्पन्नोऽयं महोत्सव महता समारोहेण प्रवृत्यते । दारिद्र्यसूचकं सर्वं मलादिकं शरीरात् गृहाच्च दूरीकृत्य स्वच्छतापक्षपातिनीं लक्ष्मीं सानन्दं सर्वे भारतीयाः सहर्षं तद्दिने सेवन्ते । इत्यपि श्रूयते एतन्महोत्सवानन्तरं दुष्टकीटाः पृथ्वीगर्भान्तर्गता भवन्ति यत्र तत्र च विलीयन्ते । दीपार्चिषा दुष्टकीटानां दूरीकरणमपि घुणाक्षरन्यायेन भवत्येवेत्यलं बहुना । तदनन्तरमेव द्वितीयदिने व्यापारसम्मेलनं वणिजः कुर्वन्ति । विपण्यां नवीनश्च धान्यागमः ।

(भविष्योत्तरे) अमावास्याकृत्यम्—एवं प्रभातसमयेऽमावास्यायां नराधिप । स्नात्वा देवान्पितॄन्भक्त्या संपूज्याथ प्रणम्य च । कृत्वा तु पार्वणं श्राद्धं दधिक्षीरघृतादिभिः । भक्ष्यैर्नानाविधैः सम्यग्भोजयित्वा क्षमापयेत् । ततोऽपराह्णसमये घोषयेन्नगरे नृपः । अद्य राज्यं बलेर्लोका यथेष्टं चेष्टतामिति । लोकश्चापि पुरे हृष्टः सुधाधवलिताजिरे । पुष्पचन्दनमालाभिरर्चिते च गृहे गृहे । द्यूतपानरतोद्रिक्तनरनारी मनोहरे । नृत्यवादित्रसंघुष्टे संप्रज्वलितदीपके । अन्योन्यप्रीतिसंहृष्टे दत्ततालनके जने । ताम्बूलहृष्टवदने कुङ्कुमक्षोदचर्चिते । दुकूलपट्टनेपथ्यस्वर्णमाणिक्यभूषिते । अद्भुतोद्भटशृङ्गारप्रदर्शितकुतूहले । युवतीजनसङ्कीर्णे वस्त्रोज्ज्वलविहारिणि । दीपमालाकुले रम्ये विध्वस्तध्वान्तबन्धने । प्रदोषे दोषरहिते शस्ते बन्दिजनैर्युते । यात्राविहारसंचारे जयजीवेति वादिभिः । ततोत्रोपसर्गरहिते राजचौरभयोज्झिते । मित्रस्वजनसम्बन्धिसुहृत्प्रेमाभिरक्षिते । महताऽर्धरात्रसमये स्वयं राजा व्रजेत्पुरम् । अवलोकयितुं रम्यं पद्भ्यामेव शनैः शनैः । महता तूर्यघोषेण ज्वलद्भिर्हस्तदीपकैः । हट्टशोभां तु संपश्यन्कृतरक्षः स्वकैर्नरैः । दृष्ट्वा महदाश्चर्यमृद्धिं चैवात्मनः शुभाम् । बलिराज्यप्रमोदं च ततः स्वगृहमाव्रजेदिति ।

मस्यां लक्ष्मीपूजनादिकं नववस्त्रधारणादिकं अभ्यङ्गमदीपश्राद्धञ्च कुर्य्यात् । दाक्षिणात्यैः केदारगौरीव्रतङ्कार्य्यम् । अत्र कौमुदीमहोत्सवः कार्य्यः । प्रत्यूषसमये नारीभिर्गृहादलक्ष्मीनिष्कासनं कार्य्यम् शिष्ट-

लक्ष्मीपूजनादिकमिति—(ब्र०पु०)-अमावास्यायां देवास्तु कार्तिके मासि केशवात् । अभयं प्राप्य सुसास्तु सुखं क्षीरोदसानुपु । लक्ष्मीर्दैत्यभयान्मुक्ता सुखसुप्ताम्बुजोदरे । अतोऽर्थं विधिवत् कार्य्या मनुष्यैः सुखसुप्तिका । दिवारात्रौ न भोक्तव्यं ऋते बाला-तुराजनात् । प्रदोषसमये लक्ष्मीं पूजयित्वा यथाक्रमम् । दीपवृक्षा-स्तथा कार्य्याः शक्त्या देवगृहेषु च । चतुष्पथे श्मसाने च नदी-पर्वतवेश्मसु । वृक्षमूलेषु गोष्ठेषु चत्वरेषु गृहेषु च । वस्त्रैः पुष्पैः शोभितव्याः क्रयविक्रयभूमयः । दीपमालापरिक्षिप्ते प्रदोषे तद-नन्तरम् । ब्राह्मणान्भोजयित्वा तु संभोज्य च बुभुक्षितान् । अलङ्कृतेन भोक्तव्यं नववस्त्रोपशोभिना । स्निग्धैर्मुग्धैर्विदग्धैश्च बान्धवैर्निवृतैः सहेति । श्रिया सार्धं जगद्योनिः शेते विष्णुः सुखान्वितः । तस्यां रात्रौ जनानां तु अतोऽर्थं सुखसुप्तिका । (मात्स्ये) दीपैर्नीराजनादत्र सैषा दीपावली स्मृतेति । अभ्यङ्ग मिति—प्रत्यूषश्चाभ्युदयदर्शे कृत्वाभ्यङ्गादिमङ्गलम् । भक्त्या सम्पू-जयेद्दीमलक्ष्मीविनिवृत्तय इति । (कश्यपसंहितायाम्)—दीपा-वलीदर्शप्रक्रम्य-इन्दुक्षयेऽपि संक्रान्तौ रवौ पात दिनक्षये तत्राभ्य-ङ्गो न दोषाय प्रातः पापापनुत्तयइति । केदारगौरीव्रतमिति— (पाद्मे) आश्विनस्यासिते पक्षे अमावास्या यदा भवेत् । तस्यां व्रतमिदं कार्य्यं यथोक्तं शम्भुना पुरेत्यादि । दीपश्राद्धमिति— कार्तिके मास्यमावास्या तस्यां दीपप्रदीपनम् । शालायां ब्राह्मणः कुर्य्यात्सगच्छेत्परमम्पदमिति । कौमुदीमहोत्सवइति—कौमुद-न्ति जना यस्मान्नाना भावेन परस्परम् । हृष्टास्तुष्टा सुखायत्तास्तेनेयं कौमुदी स्मृता । अलक्ष्मीनिष्कासनमिति—एवं गते निशीथे तु जने निद्रार्धलोचने । तावन्नगरनारीभिः शूर्पडिण्डिमवादनैः ।

प्रेतचतुर्दशीकाले सर्वपापैः प्रमुच्यते । नक्तं प्रेतचतुर्दश्यां यः कुर्या-
च्छिवचतुष्टये । न तत्क्रतुशतेनापि प्राप्यते पुण्यमीदृशम् । कुमार्यो
वटुकाःपूज्यास्तथा शैवास्तपोधनाः । राजसूयफलं तेन प्राप्यते
नात्र संशयइति । उल्कादानमिति—(ज्योतिर्निबन्धे) तुलासंस्थे
सहस्रांशौ प्रदोषे भूतदर्शयोः । उल्काहस्ता नराः कुर्युः पितॄणां
मार्गदर्शनमिति । चित्राख्येति—(पुष्कर(पु)राणे) कार्तिके भौमवारेण
चित्राकृष्णा चतुर्दशी । तस्यां भूतेशमभ्यर्च्य गच्छेच्छिवपुरं नरः
इति ।

शास्त्रदृष्ट्या दीपावल्यायन्महत्त्वं तत्तु सर्वोपरिवर्ततएव । साम्प्रतिकैर्दिविज्ञा-
दृष्ट्याऽपि समवलोक्यते चेन्महोत्सवस्यास्य समयः सर्वथा तत्कालावश्यकतानुकूलो
विद्यते । चातुर्मास्ये हि सततप्रस्रुतसलिलसम्प्लुतेषु सदनेषु मशकादीनां प्राचुर्यं
दुर्गन्धप्रसारश्च सुलभ इति शरदि तेषां शुद्ध्यर्थं विशेषशुद्धिसम्भोऽयं महोत्सवो
महता समारोहेण प्रवृत्यते । दारिद्र्यसूचकं सर्वं मलादिकं शरीरात् गृहाच्च दूरीकृत्य
स्वच्छतापक्षपातिनीं लक्ष्मीं सानन्दं सर्वे भारतीयाः सहर्षं तद्दिने सेवन्ते । इत्यपि श्रूयते
एतन्महोत्सवानन्तरं दुष्टकीटाः पृथ्वीगर्भान्तर्गता भवन्ति यत्र तत्र च विशीर्यन्ते ।
दीपार्चिषा दुष्टकीटानां दूरीकरणमपि घुणाक्षरन्यायेन भवन्त्येवेत्यलं बहुना । तदनन्तरमेव
द्वितीयदिने व्यापारसम्मेलनं वणिजः कुर्वन्ति । विपण्यां नवीनश्च धान्यागमः ।

(भविष्योत्तरे) अमावास्याकृत्यम्—एवं प्रभातसमयेऽमावास्यायां नराधिप ।
स्नात्वा देवान्पितॄन्भक्त्या संपूज्याथ प्रणम्य च । कृत्वा तु पार्वणं श्राद्धं दधिक्षीरघृता-
दिभिः । भक्ष्यैर्नानाविधैः सम्यग्भोजयित्वा क्षमापयेत् । ततोऽपराह्णसमये घोषयेन्नगरे
नृपः । अद्य राज्यं बलेर्लोकोयथेष्टं चेष्टतामिति । लोकश्चापि पुरे हृष्टः सुधाधवलितालिरे ।
पुष्पचन्दनमालाभिरर्चिते च गृहे गृहे । सुरापानरतोद्दिप्तनरनारी मनोहरे । सुगन्धाधि-
संतुष्टे संप्रज्वलितदीपके । अन्योन्यदत्तनिर्मुक्ते दत्तताडनके जने । ताम्बूलपूर्णवक्त्रे
कुङ्कुमक्षोदचर्चिते । दुकूलपट्टनेपथ्यस्वर्णमाणिक्यभूषिते । मत्तनाट्यदहुङ्कारप्रघोषित-
कुतूहले । युवतीजनसङ्कीर्णे वध्वोन्मत्तविहारिणि । दीपमालाकुले रम्ये विश्वस्तजन-
सम्पदे । प्रदोषे दीपदानं तु कर्तव्यं बलिमन्दिरे । यात्राविहारसंचारे अपरागेति चाब्धिके ।
सूर्योदयेऽहनि ... राजनीरसयोस्मिते । मित्रस्वजनसम्बन्धिसमृद्धैर्माल्यभूषिते । ततो
र्द्धरात्रसमये स्वयं राजा व्रजेत्पुरम् । अवलोकयितुं रम्यं पद्भ्यामेव शनैः शनैः । अहत
सूर्यदर्शनं अवनिद्रितैर्दीपकैः । दृष्ट्वाऽऽहर्ष्यं तु संगच्छमहाशक्तः स्वकैर्नरैः । महाऽनु-
महोत्सवे ... चैवान्नवस्त्र दुग्धम् । नगरान्तःप्रदेशे च नराः स्वगृहमागतेति ।

अस्यां लक्ष्मीपूजनादिकं नववस्त्रधारणादिकं अभ्यङ्गप्रदीपश्राद्धञ्च कुर्य्यात्। दाक्षिणात्यैः केदारगौरीव्रतङ्कार्य्यम्। अत्र कौमुदीमहोत्सवः कार्य्यः। प्रत्यूषसमये नारीभिर्गृहादलक्ष्मीनिष्कासनं कार्य्यम् शिष्ट-

लक्ष्मीपूजनादिकमिति—(ब्र०पु०)-अमावास्यायां देवास्तु कार्तिके मासि केशवात्। अभयं प्राप्य सुप्तास्तु सुखं क्षीरोदसानुषु। लक्ष्मीर्दैत्यभयान्मुक्ता सुखसुप्ताम्बुजोदरे। अतोऽर्थे विधिवत् कार्य्या मनुष्यैः सुखसुप्तिका। दिवारात्रौ न भोक्तव्यं ऋते बालातुराज्जनात्। प्रदोषसमये लक्ष्मीं पूजयित्वा यथाक्रमम्। दीपवृक्षास्तथा कार्य्याः शक्त्या देवगृहेषु च। चतुष्पथे श्मसाने च नदीपर्वतवेश्मसु। वृक्षमूलेषु गोष्ठेषु चत्वरेषु गृहेषु च। वस्त्रैः पुष्पैः शोभितव्याः क्रयविक्रयभूमयः। दीपमालापरिक्षिप्ते प्रदोषे तदनन्तरम्। ब्राह्मणान्भोजयित्वा तु संभोज्य च बुभुक्षितान्। अलङ्कृतेन भोक्तव्यं नववस्त्रोपशोभिना। स्निग्धैर्मुग्धैर्विदग्धैश्च बान्धवैर्निभृतैः सहेति। त्रिधा माघं जगद्योनिः शेते विष्णुः सुखान्वितः। तस्यां रात्रौ जनानां तु अतोऽर्थं सुखसुप्तिका। (मात्स्ये) दीपैर्नीराजनादत्र सैषा दीपावली स्मृतेति। अभ्यङ्गमिति—प्रत्यूषआश्वयुग्दर्शेकृत्वाभ्यङ्गादिमङ्गलम्। भक्त्या सम्पूजयेद्देवीमलक्ष्मीविनिवृत्तय इति। (कश्यपसंहितायाम्)—दीपावलीदर्शं प्रक्रम्य-इन्दुक्षयेऽपि संक्रान्तौ रवौ पाते दिनक्षये। तत्राभ्यङ्गो न दोषाय प्रातः पापापनुत्तयइति। केदारगौरीव्रतमिति—(पाद्मे) आश्विनस्यासिते पक्षे अमावास्या यदा भवेत्। तस्यां व्रतमिदं कार्य्यं यथोक्तं शम्भुना पुरेत्यादि। दीपश्राद्धमिति—कार्तिके मास्यमावास्या तस्यां दीपप्रदीपनम्। शालायां ब्राह्मणः कुर्य्यात्सगच्छेत्परमम्पदमिति। कौमुदीमहोत्सवइति—कौमुदनिरजना यस्मात्नानाभावेन परस्परम्। हृष्टास्तुष्टा सुखायत्तास्तेनया कौमुदी स्मृता। अलक्ष्मीनिष्कासनमिति—एवं गते निशीथे तु जने निद्रान्धलोचने। तावन्नगरनारीभिः शूर्पडिण्डिमवादनैः।

कार्तिककृष्णामावस्या—(सुखरात्रिः सुखसुप्तिका, दीपावली)

प्रेतचतुर्दशीकाले सर्वपापैः प्रमुच्यते । नक्तं प्रेतचतुर्दश्यां यः कुर्याच्छिवचतुष्टये । न तत्क्रतुशतेनापि प्राप्यते पुण्यमीदृशम् । कुमार्यो वटुकाःपूज्यास्तथा शैवास्तपोधनाः । राजसूयफलं तेन प्राप्यते नात्र संशयइति । उल्कादानमिति—(ज्योतिर्निबन्धे) तुलासंस्थे सहस्रांशौ प्रदोषे भूतदर्शयोः । उल्काहस्ता नराः कुर्युः पितॄणां मार्गदर्शनमिति । चित्राख्येति—(पुष्करपुराणे) कार्तिके भौमवारेण चित्राकृष्णा चतुर्दशी । तस्यां भूतेशमभ्यर्च्य गच्छेच्छिवपुरं नर इति ।

शास्त्रदृष्ट्या दीपावल्यायन्महत्त्वं तत्तु सर्वोपरिपरिचितमेव । साम्प्रतिकैर्यदि विज्ञानदृष्ट्याऽपि समवलोक्यते चेन्महोत्सवस्यास्य समयः सर्वथा तत्कालावश्यकतानुकूलो विद्यते । चातुर्मास्ये हि सततप्रस्तुतसलिलसम्प्लुतेषु सदनेषु मशकादीनां प्राचुर्यं दुर्गन्धप्रसारश्च सुलभ इति शरदि तेषां शुद्ध्यर्थं विशेषशुद्धिसम्पन्नोऽयं महोत्सवो महता समारोहेण प्रवृत्यते । दारिद्र्यसूचकं सर्वं मलादिकं शरीरात् गृहाच्च दूरीकृत्य स्वच्छतापक्षपातिनीं लक्ष्मीं सानन्दं सर्वे भारतीयाः सहर्षं तद्दिने सेवन्ते । इत्यपि श्रूयते एतन्महोत्सवानन्तरं दुष्टकीटाः पृथ्वीगर्भान्तर्गता भवन्ति यत्र तत्र च विलीयन्ते । दीपार्चिषा दुष्टकीटानां दूरीकरणमपि घुणाक्षरन्यायेन भवत्येवेत्यलं बहुना । तदनन्तरमेव द्वितीयदिने व्यापारसम्मेलनं वणिजः कुर्वन्ति । विपण्यां नवीनश्च धान्यागमः ।

(भविष्योत्तरे) अमावास्याकृत्यम्—एवं प्रभातसमयेऽमावास्यायां नराधिप । स्नात्वा देवान्पितॄन्भक्त्या संपूज्याथ प्रणम्य च । कृत्वा तु पार्वणं श्राद्धं दधिक्षीरघृतादिभिः । भक्ष्यैर्नानाविधैः सम्यग्भोजयित्वा क्षमापयेत् । ततोऽपराह्णसमये घोषयेन्नगरे नृपः । अद्य राज्यं बलेर्लोका यथेष्टं चेष्टतामिति । लोकश्चापि पुरे हृष्टः सुधाधवलिताजिरे । वृक्षचन्दनमालाभिरर्चिते च गृहे गृहे । द्यूतपानरतोद्रिक्तनरनारी मनोहरे । नृत्यवादित्रसंघुष्टे संप्रज्वलितदीपके । अन्योन्यप्रीतिसंहृष्टे दत्ततालनके जने । ताम्बूलहृष्टवदने कुङ्कुमक्षोदचर्चिते । दुकूलपट्टनेपथ्यस्वर्णमाणिक्यभूषिते । अद्भुतोद्भटशृङ्गारप्रदर्शितकुतूहले । युवतीजनसङ्कीर्णे वस्त्रोज्ज्वलविहारिणि । दीपमालाकुले रम्ये विध्वस्तध्वान्तबन्धने । प्रदोषे दोषरहिते शस्ते बन्दिजनैर्युते । यात्राविहारसंचारे जयजीवेति वादिभिः । क्षुद्रोपसर्गरहिते राजचौरभयोज्झिते । मित्रस्वजनसम्बन्धिसुहृत्प्रेमाभिरञ्जिते । ततोऽर्धरात्रसमये स्वयं राजा व्रजेत्पुरम् । अवलोकयितुं रम्यं पद्भ्यामेव शनैः शनैः । महता तूर्यघोषेण ज्वलद्भिर्हस्तदीपकैः । हट्टशोभां तु संपश्यन्कृतरक्षः स्वकैर्नरैः । महद्राज्यप्यमृद्धिं चैवात्मनः शुभाम् । बलिराज्यप्रमोदं च ततः स्वगृहमाव्रजेदिति ।

यां लक्ष्मीपूजनादिकं नववस्त्रधारणादिकं अभ्यङ्गमदीपश्राद्धञ्च र्यत्। दाक्षिणात्यैः केदारगौरीव्रतङ्कार्य्यम् । अत्र कौमुदीमहोत्सवः र्यः । प्रत्यूषसमये नारीभिर्गृहादलक्ष्मीनिष्कासनं कार्य्यम् शिष्ट-

लक्ष्मीपूजनादिकमिति—(ब्र०पु०)—अमावास्यायां देवासु र्तिके मासि केशवात्। अभयं प्राप्य सुसास्तु सुखं क्षीरोदसानुषु। लीर्दैत्यभयान्मुक्ता सुखसुप्ताम्बुजोदरे । अतोऽर्थं विधिवत् र्यां मनुष्यैः सुखसुप्तिका । दिवारात्रौ न भोक्तव्यं ऋते बाला- ज्ञनात् । प्रदोषसमये लक्ष्मीं पूजयित्वा यथाक्रमम् । दीपवृक्षा- श्च कार्य्याः शक्त्या देवगृहेषु च । चतुष्पथे श्मसाने च नदी- र्तवेश्मसु । वृक्षमूलेषु गोष्ठेषु चत्वरेषु गृहेषु च । वस्त्रैः पुष्पैः भितव्याः क्रयविक्रयभूमयः । दीपमालापरिक्षिप्ते प्रदोषे तद- नरम् । ब्राह्मणान्भोजयित्वा तु संभोज्य च बुभुक्षितान् । हङ्कृतेन भोक्तव्यं नववस्त्रोपशोभिना । स्निग्धैर्मुग्धैर्विदग्धैश्च न्धवैर्निवृतैः सहेति । श्रिया सार्धं जगद्योनिः शेते विष्णुः ज्ञान्वितः । तस्यां रात्रौ जनानां तु अतोऽर्थं सुखसुप्तिका । रत्स्ये) दीपैर्नीराजनादत्र सैषा दीपावली स्मृतेति । अभ्यङ्ग ति—प्रत्यूषश्चाभ्युदर्शेऽपि चाभ्यङ्गादिमङ्गलम् । भक्त्या सम्पृ- श्चेद्दीमलक्ष्मीविनिवृत्तय इति । (कश्यपसंहितायाम्)—दीपा- लीदर्शे प्रक्रम्य—इन्दुक्षयेऽपि संक्रान्तौ रवौ पाते दिनक्षये। तत्राभ्य- न दोषाय प्रातः पापापनुत्तयइति । केदारगौरीव्रतमिति— (घे) आश्विनस्यासिते पक्षे अमावास्या यदा भवेत् । तस्यां मिदं कार्य्यं यथोक्तं शम्भुना पुरेत्यादि । दीपश्राद्धमिति— र्तिके मास्यमावास्या तस्यां दीपप्रदीपनम् । शालायां ब्राह्मणाः र्योत्सगच्छेत्परमम्पदमिति । कौमुदीमहोत्सवइति—कौमुद- जना यस्मात्नानाभावेन परस्परम्। हृष्टास्तुष्टा सुखापन्नास्तेनपा मुदी स्मृता । अलक्ष्मीनिष्कासनमिति—एवं गते निशीथे तु ने निद्रार्धलोचने । तावन्नगरनारीभिः शूर्पडिण्डिमवादनैः ।

समाचारात् शस्त्रपूजा पट्टाभिषेकश्च कार्य्यः। दीपदानेऽमावस्या प्रदोषव्यापिनी ग्राह्या । तस्य कर्मकालत्वात् । दिनद्वये प्रदोषव्याप्तौ परा। उभयदिने प्रदोषव्याप्त्यभावेऽर्धरात्रव्यापिनी ग्राह्या । लक्ष्म्यागमनकालत्वाभिधानात् । प्रदोषार्धरात्रव्यापिनी मुख्या । एकैकव्याप्तौ परैव । प्रदोषमुख्यत्वादर्धरात्रेऽनुष्ठेयाभावाच्च । यदा पूर्वेद्युरेव प्रदोषव्यापिन्यमावास्या । श्राद्धयोग्या च द्वितीयदिने तदा पूर्वेद्युरेव प्रदोषे लक्ष्मीं सम्पूज्य दीपदानं कार्यम् । श्राद्धं तु परदिनेऽपराह्णे । इति ।

कार्तिकशुक्लप्रतिपद्—अस्यां बलिपूजनं दीपोत्सवः ।

निष्कास्यते प्रहृष्टाभिरलक्ष्मीः स्वगृहाङ्गणात् । परेति—(तिथितत्त्वे)–दण्डैकरजनीयोगे दर्शः स्यात्तु परेऽहनि। तदा विहाय पूर्वेद्युः परेऽह्नि सुखरात्रिका । अर्धरात्रव्यापिनीति—(ब्राह्मे)–अर्धरात्रे भ्रमत्येव लक्ष्मीराश्रयितुं गृहात् । अतः स्वलङ्कृता लिप्ता दीपैर्जाग्रज्जनोत्सवाः । सुधाधवलिताः कार्याः पुष्पमालोपशोभिता इति। परदिनइति अपराह्णे प्रकर्तव्यं श्राद्धं पितृपरायणैः। प्रदोषसमये राजन्कर्तव्या दीपमालिका । अयं क्रमः सम्पूर्णतिथ्यभिप्रायेण । अतोद्वितीयदिनेपराह्णे श्राद्धंकार्य्यम् इति ।

बलिपूजनमिति—(स्कन्दपुराणे)–कृत्वैतत्सर्वमेवेह रात्रौ दैत्यपतेर्बलेः । पूजां कृत्वा नृपः साक्षाद्भूमौ मण्डलके शुभे । बलिमालिख्य दैत्येन्द्रं वर्णकैः पञ्चरङ्गकैः । सर्वाभरणसम्पूर्णं विन्ध्यावल्या सहान्वितम् । कूष्माण्ड बाणजम्भोरुमयदानवसंवृतम् । सम्पूर्णहृष्टवदनं किरीटोत्करसंकुलम् । द्विभुजं दैत्यराजानं कारयित्वा नृपः स्वयम् । गृहस्य मध्ये शालायां विशालायां ततोऽर्चयेत् । लाक्षैश्चापि गृहस्यान्तः शय्यायां शुक्लतण्डुलैः । संस्थाप्य बलिराजानं फलैः पुष्पैश्च पूजयेत् । बलिमुद्दिश्य दीयन्ते दानानि कुरुनन्दन । यानि तान्यक्षयान्याहुर्मयैवं संप्रदर्शितम् ।

गोवर्द्धनपूजा । मार्गपालीबन्धनं । वष्टिकाकर्षणं । तैलाभ्यङ्गः । द्विजादीनां नूतनवस्त्रैः पूजनं । द्यूतादिकं । नारीकर्तृकनीराजनं

पदस्था दीयते दानं स्वल्पं वा यदि वा बहु । तदक्षयं भवेत्सर्वं विष्णोः प्रीतिकरं परमिति । दीपोत्सव इति—बलिराज्ये दीपदानात्सदा लक्ष्मीः स्थिरा भवेत् । दीपैर्नीराजनादत्र सैषा दीपावलिः स्मृता । बलिराज्यं समासाद्य यैर्न दीपावलिः कृता । तेषां गृहे कथं दीपाः प्रज्वलिष्यन्ति केशव । गोवर्द्धनपूजेति—(पाद्मे) ततोबलेर्गृहद्वारि स्थाप्यो गोमयमूर्त्तिमान् । मुने श्रीबालगोपालः स्थाप्योगोवर्द्धनो महान् इति । मार्गपालीबन्धनमिति—(स्कन्दपुराणे) ततोऽपराण्हसमये पूर्वस्यां दिशि भारत । मार्गपालीं प्रबध्नीयात्तुंगस्तम्भे च पादपे । कुशकाशमयीं दिव्यां लम्बकैर्बहुभिर्लताम् । कृते होमे द्विजेन्द्रैस्तु बध्नीयान्मार्गपालिकाम् । नमस्कारं ततः कुर्य्यान्मन्त्रेणानेन सुव्रत । मार्गपालि नमस्तेस्तु सर्वलोकसुखप्रदे । विधेयैः पुत्रदाराद्यैः पुनरेहि व्रतस्य मे । नीराजनं च तत्रैव कार्य्यं राष्ट्रजयप्रदम् । मार्गपालीतलेनेत्थं यान्ति गावो गजावृषाः । राजानोराजपुत्राश्च ब्राह्मणाः शूद्रजातयः । मार्गपालीं समुल्लङ्घ्य नीरुजः स्युः सुखान्विता इति । वष्टिकाकर्षणमिति—(आदित्यपुराणे) कुशकाशमयीं कुर्य्याद्वष्टिकां सुदृढां नवाम् । तामेकतोराजपुत्रा हीनवर्णास्तथान्यतः । गृहीत्वा कर्षयेयुस्तां यथासारं मुहुर्मुहुः । जयेऽत्र हीनजातीनां जयोराज्ञस्तु वासरम् । जयचिन्हमिदं राजा विदधीत प्रयत्नत इति । तैलाभ्यङ्ग इति—(वृद्धवसिष्ठः) वत्सरादौ वसन्तादौ बलिराज्ये तथैव च । तैलाभ्यङ्गमकुर्वाणो नरकं प्रतिपद्यते । पूजनमिति—नवैर्वस्त्रैश्च सम्पूज्या द्विजसम्बन्धिबान्धवाः । इति । द्यूतादिकमिति—(आदित्यपुराणे)—तस्माद्द्यूतं प्रकर्त्तव्यं प्रभाते तत्र मानवैः । तस्मिन्द्यूते जयो यस्य तस्य संवत्सरं शुभम् । पराजये विरुद्धं तु लब्धनाशस्ततो भवेत् । श्रोतव्यं गीतवाद्यादिस्वनुलिप्तैः स्वलङ्कृतैः । विशेषभवनं स्वीयं प्रशस्तै-

मङ्गलमालिकाचैत्येयमादीनि विहितानि। प्रतिपद्बलिपूजनं पूर्वविद्धा। गोक्रीडनं पूर्वयुता ग्राह्या। दिनद्वये सायाह्नव्याप्तित्वे परा। असत्वे पूर्वा। चन्द्रोदयदर्शनसम्भावनायामपि पूर्वा। मार्गपाली-बन्धने वष्टिकाकर्षणे तैलाभ्यङ्गे च पूर्वा ग्राह्या। द्यूते उत्तरा।

गान्धर्वैः सह। तस्यां निशायां कर्त्तव्यं शय्यास्थानं सुशोभनं। दयिताभिश्च सहितैर्नेया सा च भवेन्निशा इत्यादि। अन्यदपि—(भविष्ये)—ततः प्रबुद्धे सकले जने ग्रामसमहोत्सवे। माल्यदीपकहस्ते च स्नेहनिर्भरवत्सले। वेश्याविलासिनी सार्धस्वस्तिमङ्गलचारिणी गृहाद्गृहं व्रजति च पादाभ्यङ्गप्रदायिनी। पिष्टकोद्वर्तनपरे गुरुशुश्रूषणाकुले।

पूर्वयुतेति—(देवलः)—या कुहूः प्रतिपन्मिश्रा तत्र गाः पूजयेन्नृप। पूजने त्रीणि वर्धन्ते प्रजा गावो महीपतिः। प्रतिपद्दर्शयोगे पूजनं तु गवां मतम्। परविद्धेषु यः कुर्यात्पुत्रदारधनक्षयः। इति। परेति—(निर्णयामृते)—वर्धमानतिथौ नन्दा यदि सार्धत्रियामिका द्वितीया वृद्धिगामित्वादुत्तरा तत्र चोच्यते। (तत्र क्रीडनादौ स्मृत्यन्तरेऽपि)—त्रियामगा दर्शतिथिर्भवेच्चेत्सार्धत्रियामा प्रतिपद्विवृद्धौ दीपोत्सवे तौ मुनिभिः प्रदिष्टे अतोऽन्यथा पूर्वयुते विधेये इति। (अत्र दीपोत्सवपदेन गोपूजनादिकमेव गृह्यते कालानुग्रहात्) चन्द्रोदयसम्भावनायामिति—(देवलः)—गवां क्रीडादिने यत्र रात्रौ दृश्येत चन्द्रमाः। सोमो राजा पशून्हन्ति सुरभीः पूजकांस्तथा।

प्रभातसमये राज्ञा तोषणीयास्ततो जनाः। सुवासिनीभ्यो देयानि वस्त्राण्याभरणानि च। सद्भावेनैव संतोष्या दानेन च तथा द्विजाः। वस्त्रैस्ताम्बूलदानैश्च पुष्पकर्पूरकुंकुमैः। भोजयेत्पूजयेद्यत्नैरन्तःपुरविलासिनीः। पदातिजनसंघातान्प्रैवेयैः कञ्चुकैः शुभैः। स्वनामाङ्कैः स्वयं राजा तोषयेत्स्वजनान्पृथक्। तथा गणाधिपत्यांश्च तथा महाभटान्भटान्। वृषभान्महिषांश्च युध्यमानान्परैः सह। गजानश्वांश्च योधांश्च पदातीन्समलङ्कृतान्। मञ्चारूढः स्वयं पश्येन्नर्तकचारणान्। युद्धापयेत्त्रासयेच्च गोमहिष्यादिकं ततः। वृषान्कर्षापयेद्गोभिरुक्तिप्रत्युक्तिवादिभिरिति।

नारीनीराजनमङ्गलमालिकात्मकं कार्य्यद्वयं तु मुहूर्तमात्रायामुत्तरस्यामेव कार्य्यं ।

कार्तिकशुक्लद्वितीया—(यमद्वितीया-भ्रातृद्वितीया)—अस्यां यमुनास्नानं कृत्वा यमं पूजयेत्तर्पयेच्च । भगिनीभिर्भ्रातरो भोज-

---

इति । उत्तरस्यामेवेति—(ब्रह्मपुराणे)—कार्तिके शुक्लपक्षे तु विधानद्वितयं भवेत् । नारीनीराजनं प्रातः सायं मङ्गलमालिका । अथचेत्प्रतिपत्स्वल्पा नारीनीराजनं भवेत् । द्वितीयायां तदा कुर्य्यात्सायं मङ्गलमालिकाम् । लभ्यते यदि वा प्रातः प्रतिपद्घटिकाद्वयम् । तस्यां नीराजनं कार्यं सायं मङ्गलमालिकेति । आश्विनान्ते यदा दर्शे नारीनीराजनं भवेत् । नारीणां तत्र वैधव्यं देशदुर्भिक्षमेव च । कार्तिके शुक्लपक्षादौ अमा च घटिकाद्वयम् । देशभङ्गभयान्नैव कुर्य्यान्मङ्गलमालिकाम् ।

यमद्वितीयेति—कार्तिके शुक्लपक्षे तु द्वितीयायां युधिष्ठिर । यमो यमुनया पूर्वं भोजितः स्वगृहे स्वयम् । अतो यमद्वितीया सा प्रोक्ता लोके युधिष्ठिर इत्यादि । यमुनास्नानमिति—(स्कान्दे)—ऊर्जे शुक्लद्वितीयायामपराह्णेऽर्चयेद्यमम् । स्नानं कृत्वा भानुजायां यमलोकं न पश्यति । ऊर्जशुक्लद्वितीयायां पूजितस्तर्पितो यमः । महिषासनसमारूढो दण्डमुद्गरधारिभिः । वेष्टितः किङ्करैर्हृष्टैस्तस्मै यच्छति वाञ्छितम् । कार्तिके शुक्लपक्षे तु द्वितीयायां तु नारद । यमो यमुनया पूर्वं भोजितः स्वगृहेऽर्चितः—द्वितीयायां महोत्सर्गे नारकीयास्तु तर्पिताः । पापेभ्यो विमुक्तास्ते मुक्ताः सर्वविबन्धनात् । तेषां महोत्सवो वृत्तो यमराष्ट्रे सुखावहः । अतो यमद्वितीयेयं त्रिषु लोकेषु विश्रुता । अस्यां निजगृहे विप्र न भोक्तव्यं ततो बुधैः । स्नेहेन भगिनीहस्ताद्भोक्तव्यं पुष्टिवर्द्धनम् । दानानि च प्रदेयानि भगिनीभ्यो विधानतः । स्वर्णालङ्कारवस्त्राद्यैः पूज्याः सत्कारभोजनैः । सर्वा भगिन्यः सम्पूज्या अभावे प्रतिपन्नकाः । (पितृव्यादिपुत्र्यः अन्याश्च या भगिनीत्वेन प्रतिपन्नाः) यमं च चित्रगुप्तं च यमदूतांश्च पूजयेत् । अर्घ्यश्चात्र प्रदातव्यो यमाय सहजद्वयैरिति ।

नीयाः। भ्रातृभिश्च भगिन्यो वस्त्रालङ्कारादिभिः सत्कार्य्याः। मध्यान्हस्य भोजनकालत्वाद् भोजने मध्यान्हव्यापिनी ग्राह्या। दिनद्वये तद्व्याप्तावव्याप्तौ च युग्माग्नीतिवचनादुत्तरा ग्राह्या।

कार्तिकशुक्लचतुर्थी—अस्यां नागव्रतङ्कार्य्यम्—तच्च मध्यान्हव्यापिन्यां।

कार्तिकशुक्लपञ्चमी—अत्र जयापञ्चमीव्रतङ्कार्य्यम्। तत्र सामान्यपञ्चमीनिर्णयः।

कार्तिकशुक्लषष्ठी—अस्यां भौमयुतायां वन्हिं सम्पूज्य वन्हिमहोत्सवं कुर्य्यात्। अत्र षण्मुन्योरितिवचनात् उत्तरा ग्राह्या।

कार्तिकशुक्लाष्टमी (गोपाष्टमी)—अस्यां गोपूजन गोप्रदक्षिणा गवानुगमनैरिष्टकामावाप्तिः।

(मदनरत्ने)-तिथौ युगाह्वयायां तु समुपोष्य यथाविधि। शङ्खपालादिनागानां शेषस्य च महात्मनः पूजा कार्य्या पुष्पगन्धक्षीराप्यायनपूर्वकम्। इति। मध्यान्हव्यापिन्यामिति—(स्कन्दपुराणे)-युगं मध्यदिने यत्र तत्रोपोष्य फणीश्वरान्। क्षीरेणाप्याय्य पञ्चम्यां कारयेत्प्रयतो नरः। विषाणि तस्य नश्यन्ति न तं हिंसन्ति पन्नगाः॥ इति।

जयापञ्चमीव्रतमिति—(भविष्योत्तरे)-माहात्म्यमपि वक्ष्यामि पञ्चम्यास्तव भारत। जयेति या च विख्याता व्रतिनां जयदायिनी। यस्यां जयजयाशब्दं कुर्वन्ति व्रतिनो बुधाः। परिपूर्णं व्रतं यस्यां सा ज्ञेया जयपञ्चमीति।

वन्हिमहोत्सवमिति—(मत्स्यपुराणे)-वृश्चिकार्के शुक्लषष्ठी भौमवारेऽप्युपस्थितिः। महाषष्ठीति सा प्रोक्ता सर्वपापहरा तिथिः। तस्यां स्वपिति वै वन्हिः पूर्वत्रोपोष्य वै दिने। षष्ठ्यां वन्हिं समभ्यर्च्य कुर्य्याद्वन्हिमहोत्सवमिति।

गोपाष्टमीति—कार्तिके याष्टमी शुक्ला ज्ञेया गोपाष्टमी

कार्तिकशुक्लनवमी—इयं युगादिः अतोऽत्रापि अपिण्डं श्राद्धं कार्य्यं। इयं पूर्वाह्णव्यापिनी ग्राह्या। शुक्लपक्षस्थत्वात्। एषैवाक्षय-नवमी—अस्यां गोदानादिकं कार्य्यम्। आचारादत्र कुष्माण्डदानमपि कार्य्यम्। [धाराहे] अस्यां मधुराप्रदक्षिणाप्रोक्ता। तद्विधिप्रयोगौ मधुरासेतौ द्रष्टव्यौ। अत्रैव त्रिपुष्करात्रारम्भं कृत्वा तुलसीविवाहः।

कार्तिकशुक्लदशमी—अस्यां [सार्वभौमव्रतम्]।

कार्तिकशुक्लैकादशी—अस्यां पञ्चदिनात्मकं भीष्मपञ्चकव्रतमारम्भणीयम्। दशम्यविद्धैकादशीमारभ्य पञ्चदिनात्मकं व्रतं चतुर्दश्यविद्धपूर्णिमायां समापनीयम्। तिथिद्वयवशेन नैवं घटेत चेद्विद्धायामप्यारम्भणीयम्। प्रधानव्रतानुरोधेनागामितिथिगुणस्य परविद्धत्वादेरनादरणीयत्वात्। एवमविद्धैकादश्यामारभ्य परविद्ध

बुधैः। तत्र कुर्य्याद्गवां पूजां गोग्रासं गोप्रदक्षिणं। गवानुगमनं कार्य्यं सर्वान्कामानभीप्सितेति।

पूर्वाह्णव्यापिनीति—शुक्ले पौर्वाह्णिके ज्ञेये इति। अक्षयनवमीति—(देवीपुराणे)-शुक्लपक्षे नवम्यां यः कार्तिकस्य समाहितः। स्नायादक्षय्यमस्कुर्य्याद्वयं लभते फलमिति। तुलसीविवाह-इति—(पद्मपुराणे)-कार्तिके शुक्लनवमीमवाप्य विजितेन्द्रियः। हरिं विधाय सौवर्णं तुलस्यासहितं विभुम्। पूजयेद्विधिवद्भक्त्या व्रती तत्र दिनत्रयम्। एवं यथोक्तविधिना कुर्य्याद्वैवाहिको विधिरिति।

सार्वभौमव्रतमिति—कार्तिकस्य तु मासस्य दशमी शुक्लपक्षगा। तस्यां नक्ताशनोनक्ते दिक्षु शुद्धबलिं हरेदित्यादि।

भीष्मपञ्चकव्रतमिति—(देवीपुराणे)-एकादश्यां तु गृह्णीयाद् व्रतं पञ्चदिनात्मकं। प्रातः स्नात्वा विधानेन मध्यान्हे च तथा

पूर्णमास्यां समापने यदि तिथिवृद्धिवशेन षड्दिनापत्तिस्तदा पूर्वपौर्णमास्यामपि समाप्तिः । उपक्रमसमाप्त्योरङ्गत्वाविशेषेऽपि मुख्यैवेति न्यायेनोपक्रमधर्मस्यैव बलवत्त्वात् । अस्यां शिवविष्णुमंत्राणां दीक्षा विहिता । अस्यामेव रात्रौ देवोत्थापनमिति बहवः द्वादश्यां कार्य्यमिति रामार्चनचन्द्रिकानुयायिनः । अत्र देशकुलाचारतो व्यवस्था । नवम्यादिदिनत्रये एकादश्यादिपूर्णिमान्ते वा वैवाहिकनक्षत्रे दिने तुलसीविवाहः शुभः । अथवा देशपरिपाट्या प्रबोधोत्सवदिन एव कार्य्यः । अस्यामेवैकादश्यां सौवर्णं योगेश्वर

व्रती । नद्यां निर्झरगर्ते वा समालभ्य च गोमयं । यवव्रीहितिलैः सम्यक्पितॄन्संतर्पयेत्क्रमात् ।। .... जुहुयाच्च घृताभ्यक्तनिलव्रीहियवान्व्रती । षडक्षरेण मंत्रेण स्वाहाकारान्वितेन च । उपास्य पश्चिमां संध्यां प्रणम्य गरुडध्वजं । जपित्वा पूर्ववन्मंत्रं क्षितिशायी भवेन्नरः । सर्वमेतद्विधानं च कार्य्यं पञ्चदिनेष्वपि । (पाद्मे) स्नात्वा मौनं नरः कृत्वा धौतवासा दृढव्रतः । भीष्माघोदकदानं च अर्घ्यं चैव प्रयत्नतइत्यादि । दीक्षेति—(नारदः)—कार्तिके तु कृता दीक्षा नृणां जन्मविमोचनीति । बहवइति—(ब्राह्मे)—एकादश्यां तु शुक्लायां कार्तिके मासि केशवम् । प्रसुप्तं बोधयेद्रात्रौ श्रद्धाभक्तिसमन्वित इति । कार्तिके शुक्लपक्षस्य द्वादश्यां रजनीमुखे । सुप्तोत्थितं जगन्नाथे स्नात्वा शुक्लाम्बरः शुचिरित्यादि । तुलसीविवाहइति—(विष्णुयामले)—आदावेवाथ तुलसीं वने वा स्वगृहेऽपि वा । मासत्रयेण संवर्ध्य ततोयजनमारभेत् । सौम्यायने प्रकर्तव्यं गुरुशुक्रोदये तथा । अथवा कार्तिके मासि भीष्मपञ्चदिनेषु वा । वैवाहिकेषु ऋक्षेषु पूर्णिमायां विशेषतः । मण्डपं कारयेत्तत्र कुण्डवेदी विवाहवित् । ब्राह्मणांश्च शुचीन् स्नातान्वेदवेदांगपारगान् । ब्राह्मणं देशिकं चैव चतुरश्च तथार्त्विजः । ग्रहयज्ञं पुरः कृत्वा मातॄणां यजनं तथा । कृत्वा

योगनिद्रास्थितं सम्पूज्य द्वादश्यां ब्राह्मणाय दद्यात् । सोमवारोत्तरभाद्रपदयोगे एषा महापुण्या । देवमुत्थाप्य यद् द्रव्यवर्जनं कार्तिके कृतं तद् द्रव्यं शास्त्रानुसरिद्रव्यान्तरं च ब्राह्मणेभ्यो दत्वा व्रतसम्पूर्णतां नयेत् । नक्षत्रयोगप्रयुक्तपारणानिषेधनिर्णयस्तु शयन्यादि बद्बोध्यः । चतुर्मास्य व्रतसमाप्तिरप्यत्रैवेति केचित् । कार्तिकमासव्रतोद्यापनं चातुर्मास्यव्रतोद्यापनं च चतुर्दश्यां पूर्णिमायां वा इत्यपरे ।

कार्तिकशुक्लचतुर्दशी । (वैकुण्ठचतुर्दशी)—कृतोपवासजागरणेन अरुणोदयव्यापिन्यामस्यां विश्वेशमभ्यर्च्य शैवान् भोजयित्वा पारणं कार्य्यं । विश्वेश्वरयात्रा च कार्य्या । विष्णुपूजने चेयं रात्रिव्यापिनीग्राह्या । दिनद्वये तद्व्याप्तौ निशीथप्रदोषमयव्या-

---

नांदीमुखं श्राद्धं सौवर्णं स्थापयेद्धरिं । कृत्वा च रौप्यां तुलसीं लग्नेत्वस्तमिते रवौ । संपूज्यालङ्कृतां तां च प्रदद्याद्विधिना हरेरिति । महापुण्येति—(वाराहपुराणे)–एकादशी सोमयुता कार्तिके मासि भामिनि । उत्तराभाद्रसंयोगे अनन्ता सा प्रकीर्तिता । तस्यां यत्क्रियते भद्रे सर्वमानन्त्यमश्नुते इति । द्रव्यवर्जनमिति—चतुरोवार्षिकान् मासान् नियमं यस्य यत्कृतम् । कथयित्वा द्विजेभ्यस्तद्दद्याद्भक्त्या सदक्षिणमिति । चातुर्मास्यव्रतसमाप्तिरिति—(भारते)–चतुर्थो गृह्य वै चीर्णं चातुर्मास्यव्रतं नरः । कार्तिके शुक्लपक्षे तु द्वादश्यां तत्समापयेदिति ।

भोजयित्वेति—(शिवरहस्ये)–ततोरुणोदये जाते स्नात्वा स्नात्वा च भस्मना । समाप्य संध्यां विश्वेशं समभ्यर्च्य यथाविधि । मद्भक्तान् भोजयामासुश्च पयो मुमुक्षुः स्वतइति । विश्वेश्वरयात्रेति—(काशीखण्डे)–कार्तिकस्य चतुर्दश्यां विश्वेशं योविलोकयेत् । स्नात्वा चोत्तरवाहिन्यां न तस्य पुनरागतिरिति । विष्णुपूजनेइति—(भविष्ये)–कार्तिकस्य सिते पक्षे चतुर्दश्यां

पिनी ग्राह्या । कार्तिकव्रतोद्यापनांगोपवासे तु परविद्धा ग्राह्या । प्रधानभूतव्रतसमाप्तेः परविद्धपूर्णिमास्यामनुष्ठेया अनुरोधेनांगोपवासनिर्णयस्योचितत्वात् । अस्यामेव चतुर्दश्यां ब्रह्मकूर्चव्रतम् । पाषाणचतुर्दशीव्रतञ्च कार्य्यम् ।

कार्तिकशुक्लपूर्णिमा—अस्यां काम्यवृषोत्सर्गः । अस्यामेव लक्षप्रदक्षिणाव्रतोद्यापनम् । लक्षनमस्कारव्रतोद्यापनम् । तुलसीलक्षपूजोद्यापनादीनि च विधेयानि । लक्षवर्तिव्रतरुद्रलक्षवर्तिव्रतधारणापारणाव्रतमासोपवासव्रतानामुद्यापनञ्च कार्य्यम् । इयं मन्वादिः

नराधिप । सोपवासस्तु सम्पूज्य हरिं रात्रौ जितेन्द्रियः । ब्रह्मकूर्चव्रतमिति—(भविष्योत्तरे)-कार्तिकस्य सिते पक्षे चतुर्दश्यां नराधिप । सोपवासः पञ्चगव्यं पिबेद्रात्रौ जितेन्द्रिय इति । (विस्तृतपञ्चगव्यविधिर्मत्कृतशतचण्डीयज्ञविधानस्य प्रायश्चित्तप्रकरणे अवलोकनीयः) पाषाणचतुर्दशीव्रतमिति—(देवीपुराणे)-कार्तिके शुक्लपक्षे तु या पाषाणचतुर्दशी । तस्यामाराधयेद्गौरीं नक्तं पाषाणभक्षकइत्यादि ।

वृषोत्सर्गइति—*(ब्राह्मे)-अथ चैत्र्यां वृषोत्सर्गः कार्तिक्यां वा प्रयत्नतः । कर्तव्यस्त्वथ रेवत्यां त्रिभिर्वर्णैर्द्विजातिभिः । (कात्यायनः)-अथ वृषोत्सर्गगोयज्ञेन व्याख्यातः कार्तिक्यां पौर्णमास्यां रेवत्यांवाश्वयुजस्येति—पौर्णमास्यामेव कर्तव्यइति (कर्काचार्य्यः) तथा (मात्स्ये) कार्तिक्यामाश्वयुज्यां वा माघ्यापाढयोरथापि वा । फाल्गुन्यां वाथ चैत्र्यां वा वैशाख्यां वा तथैव च । वैधृतौ वा व्यतीपाते मन्वादिषु युगादिषु । दिनच्छिद्रेऽर्कसंक्रान्तौ क्रान्ति-

---

*वृषलक्षणमाह—(हरिहरः) लोहितो यस्तु वर्णेन मुखे पुच्छे च पाण्डुरः । श्वेतः खुरविषाणाभ्यां स वृषोनील उच्यते । चरणाश्च मुखं यस्य तथा श्वेतानि गोपतेः । लाक्षारससवर्णश्च तं नीलमिति निर्दिशेत् । (तथान्यत्रापि)-भूमौ कर्षति लाङ्गूलं प्रलम्बं स्थूलवालधिः । पुरस्तादुन्नतो नीलो वृषभः स प्रशस्यते । (अन्यत्र)-श्वेतोदरः कृष्णपृष्ठो ब्राह्मणस्य प्रशस्यते । स्निग्धवर्णोऽथ रक्तश्च क्षत्रियस्य प्रशस्यते । काञ्च

नक्षत्रयोगेनेयं महत्पदवाच्या । तन्निर्णयस्तु महाज्येष्ठीविचारोक्तो द्रष्टव्यः । अत्रैव सायङ्काले त्रिपुरोत्सवः कार्य्यः । अस्मिन्दिने कार्तिकेय दर्शनम् क्षीरसागरदानञ्च अस्यामेव संतानव्रतम्, राशिव्रतम्, कृत्तिकाव्रतम्, सौभाग्यव्रतम् । अत्र मनोरथपूर्णिमाव्रतमारम्भणीयम् । गोपद्मव्रतञ्च कार्य्यम् । विशाखास्थे भानौ कृत्तिकासु सोमश्चेत्तदा पद्मकयोगः । अस्मिन्योगे पुष्करतीर्थे गोदानस्य महत्पुण्यम् ।

साम्ये तथैव च इति । पद्मकयोगइति—(पाद्मे) विशाखासु यदा भानुः कृत्तिकासु च चन्द्रमाः सयोगःपद्मकोनाम पुष्करेष्वेति दुर्लभः । पद्मकेपुष्करं प्राप्य कपिला यः प्रयच्छति । सहित्वा सर्वपापानि वैष्णवं लभतेपदमिति ।

राभश्च वैश्यस्य कृष्णः शूद्रस्य शस्यते । यस्य प्रागायते शृंगे भूमुखाभिमुखे सदा । सर्वेषामेव वर्णानां स च सर्वार्थसाधकः । रक्तशृंगाग्रनयनः श्वेतवर्णो भवेद्यदि । शफैः प्रवालसदृशैर्नास्ति धन्यतरस्ततः अतसीपुष्पवर्णश्च तथा धन्यतरः स्मृतः । श्वेतं च जठरं यस्य भवेत्पृष्ठं च गोपतेः वृषभश्च समुद्रः स सततं कुलवर्द्धनः(कात्यायनः) रक्तवर्णं द्विवर्णं वा वृषभं च समुत्सृजेत् । योवा यूथं छादयति यं वा यूथं च छादयेत् । (प्रसिद्धागाथा)—एष्टव्या बहवः पुत्राः यद्येकोऽपि गयां व्रजेत् । यजेत चाश्वमेधेन नीलं वा वृषमुत्सृजेत् । इति—तथा (वाराहे)—मुक्त्वा च नीलकंठं तु कौमुद्याः समुपागम इति । (महाभारते)—नीलषण्डप्रमोक्षेण अमावास्यायां तिलोदकैः । वर्षासु दीपकैश्चैव पितॄणामनृणी भवेदिति । नीलवृषस्य लाङ्गूलं तोयमभ्युद्धरेद्यदि । षष्टिवर्षसहस्राणि पितरस्तेन तर्पिता इति । लक्षप्रदक्षिणा प्रतोद्यापनम्—(विष्णुधर्मोत्तरे)—संकल्प्य कुर्य्यान्नियतः कार्तिक्यां तु जितेन्द्रियः । लक्षं समाप्य पश्चात्तु कुर्य्यादुद्यापनं व्रती इत्यादि । लक्षनमस्कारव्रतोद्यापनमिति—(ब्रह्माण्डे)—आषाढस्य सिते पक्षे एकादश्यां समाहितः । संकल्प्य तत्रदेवस्यपुरतश्चकृताञ्जलिः । ममलक्षनमस्कारव्रतस्य········ कार्तिके मासि संप्राप्ते पौर्णमास्यां ततः परं । संस्थाप्य कलशं पूर्णं सवस्त्रं सपिधानकमिति । त्रिधेयाक्षीति—(भविष्ये)—अथ राजन्प्रवक्ष्यामि लक्षधातुल्मीव्रतम् । विष्णुप्रीतिकरं नृणां विष्णुभक्तिविवर्धनम् । कार्तिके मासि कुर्वीत माघे वारम्भणं तथा । दिने दिने सहस्रं तु अर्पयेत्तुलसीदलं । एवं मासत्रयं कुर्य्यात्तेन उद्यापनं चरेदिति (स्कान्दे)— लक्षपूजां प्रकम्य—श्रीकामो बिल्वपत्रैश्च शान्तिकामश्च दूर्वया । आयुःकामेन कर्तव्यं चम्पकैः पूजनं हरेः विद्याकामेन कर्तव्यमनसोपात्रिभिस्तथा । विष्णोः

प्रसादकामेन तुलसीभिः समाहितं। पुत्रकामेन कर्तव्यं वार्हतं पूजनं शुभम्। दुःख प्रशमनार्थाय शस्यधान्यैः प्रपूजयेत्। रंगवल्ल्यादिभिश्चैव देवस्याग्रे विनिर्मितैः पद्मादिभिः स्वस्तिकाद्यैश्चाद्यैः पूजयेद्विभुम्। एवं हि सर्वपुष्पैश्च सर्वकामार्थसिद्धये लक्षपूजां प्रकुर्य्याच्च सुप्रसन्नो हरिर्भवेत्। उद्यापनं ततः कार्य्यं मण्डपं तत्र कारये दित्यादि। व्रतानामुद्यापनम्—(वायुपुराणे)—लक्षवर्तिव्रतस्यास्य विधानं कीदृशं वद इत्युपक्रम्य—कालोहि कार्तिको मासो वैशाखोमाघ एव च। सहस्रगुणितं धत्ते व्रतमेनद्धि कार्तिकइति। रुद्रलक्षवर्तिव्र०। कर्पासतन्तुभिःकार्य्या रुद्रवर्तिः शिवप्रिया लक्षसंख्या च कर्तव्या गव्याज्येन परिप्लुतेत्यादि। धारणापारणाव्रत०—(भविष्ये)—चातुर्मास्ये तथा चाद्ये मासि कौन्तेय सुव्रत। पुण्याहं कारयेत्पूर्वमेकादश्यां सुशोभने। पञ्चारमंकल्प्य राजेन्द्र सद्ारभ्य व्रतं चरेत्। आद्यो मासि तथा चान्ते चातुर्मास्ये प्यथापि वा। एकस्मिन्धारणं कार्य्यं पारणं च तथापरे। उपवासो धारणं स्यात्पारणं भोजनं भवेदित्यादि। मासोपवासव्रत—एवं मासोपवासं तु कृत्वाभ्यर्च्य जनार्दनम्। भोजयित्वा द्विजांश्चैव विष्णुलोके महीयत इत्यादि। त्रिपुरोत्सव इति—(भविष्ये)—पौर्णमास्यां तु संध्यायां कर्तव्यस्त्रिपुरोत्सवः। दद्यादनेन मन्त्रेण सुदीपाश्च सुरालयः। इत्यादि कार्तिकेयदर्शनमिति। (काशीखण्डे)—कार्तिक्यां कृतिकायोगे यः कुर्य्यात्स्वामिदर्शनम्। सप्तजन्मभवेद्विप्रो धनाढ्योवेदपारगइति। क्षीरसागरदानम्—(निर्णयामृते)—पौर्णमास्यां तु सम्पूज्यो भक्त्या दामोदरः सदा। ततश्चन्द्रोदये पूज्यास्तापस्यः क्षान्तिकास्तु षट्।······ब्राह्मणायाथ योग्याय दद्यात्तं क्षीरसागरमिति। सन्तानव्रतमिति—(हेमाद्रौ)—कार्तिक्यामुपवासी यः कन्यां दद्यात्स्वलङ्कृताम्। स्वकीयां परकीयां वा नदीसंगमके शुभे। एतत्संतानकं नाम व्रतं संततिदायकमिति। राशिव्रतमिति—(भविष्ये)—कार्तिक्यां नक्तमुद्गाद्रदारीन्वस्त्रविभूषितान्। पौर्णमास्यां पौर्णमास्यां कौन्तेय बहुदक्षिणाम्। एतद्राशिव्रतं नाम महोपद्रवनाशनम्। सर्वाशापूरकं तद्वत्सौमलोकप्रदायकम्। कृत्तिकाव्रतम्—(तत्रैव)—कार्तिक्यां पौर्णमास्यां तु गृह्णीयात्कृत्तिकाव्रतम् षट् समारभ्य व्रतं तावदिदं संचिन्त्य चेतसीत्यादि। मनोरथपूर्णिमाव्रतमिति—(भविष्योत्तरे)—कार्तिक्यां तु समारभ्य सम्पूर्णे शशाङ्कलक्षणम्। पूजयेदुदये राजन्सदा सत्यसनो भवेदित्यादि।······जनाभिरामश्च शशाङ्कवत्स्यात् धनाधिपालश्च तथैव लक्ष्म्या शक्रेण तुल्यश्च तथैव शान्त्या मानुष्यमासाद्य भवेत्सराजेति। सौभाग्यव्रतमिति—(विष्णुधर्मे)—कार्तिके पौर्णमास्यां तु पूर्णे शिशिरदीधितिम् पद्मे पौष्करात्रे तु कृत्तिकायां तु पूजयेत्।······सौभाग्यदं रूपविवर्द्धनं च लावण्यदं स्त्रीरतिभोगदं च कार्यं प्रयत्नेन नरेन्द्र पुंसा कार्य्यं तथा स्त्रीभिरनिन्द्यमन्येति। गोपद्मव्रतम्—(नारदे)—कृष्णोक्तिः—तथापि शीघ्रं भगिनी व्रतेकं दिममाचर। गोपद्मेति च विख्यातं सर्वत्रेषु विश्रुतमित्यादि।

इति कार्तिकमासकृत्यनिर्णयः

॥ अथ मार्गशीर्षकृत्यनिर्णयः ॥

अस्मिन्मासे एकभक्त कृते व्याधिभिर्विमुच्य वाजपेययज्ञफलभाक्स्यात् । अस्मिन्नेवमासे केशवप्रीत्यै खरोष्ट्रादिदानं कार्य्यम् । लावण्यावाप्तिव्रतम् । सदसस्पतिमंत्रस्यास्मिन्मासे अयुतसंख्याकजपे कृते मेधावी स्यात् ।

मार्गशीर्षकृष्णाष्टमी (भैरवजयन्ती)※–सेयं प्रदोषव्यापिनी ग्राह्या । उभयदिने प्रदोषव्याप्तौ तदेकस्पर्शे वा परा। मध्यान्हव्या-

एकभक्तकृतइति—मार्गशीर्षे तु यो मासमेकभक्तं न संक्षिपेत् भोजयेत्तु द्विजान् शक्त्या मुच्यते व्याधिकिल्विषात् । कृषिभागी बहुधनोबहुधान्यश्च जायतइति—(कल्पद्रुमे)–वाजपेयस्य यज्ञस्य तत्फलमाप्नुयादिति । खरोष्ट्रदानमिति—(वामनपुराणे)–खरोष्ट्राश्वतरीगावः शकटानिहाजाविकम् दातव्यं केशवप्रीत्यै मासि मार्गशिरे नरैरिति । लावण्यावाप्तिव्रतमिति—(विष्णुधर्मोत्तरे)–कार्तिक्यां समतीतायां प्रतिपत्प्रभृतिक्रमात् । षष्ठे वा यदि वार्षीयां प्रद्युम्नं पूजयेत्प्रभुरित्यादि । मेधावीति—(ऋग्विधाने)–सदसस्पतिमेकर्चं मेधाकामोजपेद्बुधः । अयुतं चैव सिद्धिश्च मार्गशीर्षे न संशयः । इति ।

भैरवजयन्तीति—(शिवरहस्ये)–कालाष्टमी तु विज्ञेया कार्ति-

※अथभैरवाष्टमीविचारः ।

अत्र चैकैवाष्टमी मुख्यगौणचान्द्रमानाभ्यां कार्तिकमार्गशीर्षासिताष्टमीत्वेन पुराणयोरुक्ता । पूजोपवासजागरणानां त्रयाणामपि फलसम्बन्धावगमात्प्राधान्यं । अतएवाष्टम्या दिनद्वयगामित्वे प्रधानकालव्याप्तिलाभात्पूर्वैव ग्राह्या । कृष्णपक्षेऽष्टमी चैव कृष्णपक्षे चतुर्दशी पूर्वविद्धाप्रकर्तव्येति शास्त्रात् । कर्मसु सर्वेषु कर्तव्या सम्मुखी-विधिरिति वचनाच । यत्तु (शिवरहस्ये)–नित्ययात्रादिकं कृत्वा मध्यान्हे संस्थिते रवौ । कृत्तिवासेश्वरं प्रापुर्विल्वपत्रादिसाधनाः । इति प्रक्रम्य—तत्रोग्ररूपधृग्भगवान् श्रीकालभैरवः । आविरासीत्तदालोकान्भीषयन्नखिलानपि इति । मध्यान्हभैरवप्रादुर्भावश्रवणान्मध्यान्हव्यापिनी परा ग्राह्येति वदसन्—पूर्वार्धगतनित्ययात्रासम्बन्धित्वेनमध्यान्हा-

पिनीग्राह्येति निर्णयसिन्धुकारोक्तिः रात्रिव्यापिनीग्राह्येति नन्दपण्डितोक्तिः उपेक्षणीया—कृष्णापक्षेत्यादिवचनविरोधादिति विष्णुभट्टः । यत्तु निर्णयसिन्धौ मार्गशीर्षकृष्णाष्टमी कालाष्टमीत्युक्तं तद्भ्रमात् । कालाष्टमी भाद्रकृष्णाष्टमीति हेमाद्र्युक्तेः । अस्यां

कस्यासिताष्टमी । तस्यामुपोषणं कार्य्यं तथा जागरणं निशि । इति । (कालाष्टमीभैरवाष्टमी) भैरवस्य तु कर्त्तव्या पूजायामचतुष्टये । कार्य्यं शिवकथालापैर्निशि जागरणं सदा । जागरं चोपवासं च कृत्वा कालाष्टमीदिने । प्रयतः पापविनिर्मुक्तः शैवोभवति शोभनेइति । तथा—(काशीखण्डे)-मार्गशीर्षासिताष्टम्यां कालभैरवसन्निधौ । उपोष्य जागरं कुर्वन्महापापैः प्रमुच्यतइति । हेमाद्र्युक्तेरिति—(हेमाद्रौ) वामनपुराणवचनम्-नभस्ये मासि

नुयादात् । अस्तिच (काशीखंडे) सचलमादौ संस्नाप्य चक्रपुष्करिणीजले । संतर्प्य देवान्सपितॄन्ब्राह्मणांश्च तथार्थिनः । इति माध्यान्हिकमणिकर्णिकास्नानोपक्रमा या एव नित्ययात्रायाः । ततः पुनर्दण्डपाणिमित्येषा पञ्चतैर्थिका । दैनन्दिनी विधातव्या महाफलमभीप्सुभिरित्यन्तेन ग्रन्थेन विधानात् अस्तु चोत्तरार्धगतक्रियान्वयोमध्यान्हस्य तथापि मध्यान्हेऽन्यैरपि कृत्तिवासेश्वरेगन्तव्यमिति विधिकल्पनं पुराकल्पबलेन स्यात् । ततश्च (भैरवजयन्त्याःकथंनिर्णयः) नच तदेति सर्वनाम्ना मध्यान्हपरामर्श इत्यपि शंक्यम् अव्यवहितस्य प्रसीदेशेत्यभिवन्दनस्य परामर्शसम्भवे सहर्थव्यवहितमध्यान्हपरामर्शायोगात् तत्परामर्शेऽपि नैतदर्थवादबलेन मध्यान्हविषयविध्युन्नयनं सम्भवति । सामान्यविधिविरोधे मध्यान्हे भोज्यवेलायामिति वाक्यशेषाणामनन्तव्रते मध्यान्हकल्पनासम्भवसिद्धये । माधवोक्तन्यायस्यप्रकृतेऽपि तुल्यत्वात् । द्विविधसामान्यशास्त्रविरोधस्येहापि दर्शितत्वात् । विशेषप्रवृत्तकर्मकालशास्त्रविरोधस्येहाधिक्याच्च । उक्तौ हि रात्रौ पूजाजागरणविधी । सन्ति च (शिवरहस्ये) भैरवप्रादुर्भावान्ते तदुपोद्बलकानि वचांसि । एतस्मिन्नन्तरे देवाः सूर्योऽप्यस्तं गतः शिवे । ततः सन्ध्यादिकं कृत्वा शिवपूजा परा वसुः । ततः काशीपालनार्थं भैरवः स्थापितो मया । कृत्तिवासेश्वरश्चैव दक्षिणादिशि सादरं । ततः सायं विष्णुमुख्याः कृत्वा पूजां मम प्रिये । भैरवाभ्यर्चनार्थाय मुख्यभैरवसन्निधौ । ततस्ते भैरवं देवमुपचारैश्च षोडशैः सम्पूज्यार्घ्यप्रदानानि चक्रुर्भक्तिसमन्विताः । उपोषणस्यांगभूतमर्घ्यदानमिहस्थितं । तथा जागरणं रात्रौ पूजा यामचतुष्टये । इति । अत्रास्तोत्तरमेवक्षेत्रपालस्य सत्प्रयुक्तं सायंपूजनं तदेवेति स्पष्टं प्रतीयते इति न मध्यान्हादरः प्रामाणिक इति प्रदोषव्याप्त्यैव ग्राह्या इति सिद्धम् ।

कालोदके स्नात्वा भैरवदर्शनं कार्य्यम् । पूजान्ते त्र्यर्घ्या देयाः । उपवासो जागरश्च कार्य्यः । अस्यामनघाव्रतमपि कार्य्यम् । मार्गशीर्षकृष्णैकादशी (उत्पत्तिः) । मार्गशीर्षकृष्णामावस्या (गौरीतपोव्रतम्) । मार्गशीर्षशुक्लप्रतिपद् (धन्यव्रतम्) । मार्गशीर्षशुक्लद्वितीया (पितृपूजनम्) । मार्गशीर्षशुक्लतृतीया (रम्भाव्रतम्) ।

नभा मा कृष्णाष्टमी शुभा । युक्ता मृगशिरेणैव सा तु कालाष्टमी स्मृता । तस्यां शिवपूजनं कार्य्यम् । स्नात्वेति—(काशीखण्डे)— तीर्थे कालोदके स्नात्वा कृत्वा तर्पणतत्परः । विलोक्य कालराजं च निरयादुद्धरेत्पितॄनिति । त्र्यर्घ्या इति—(शिवरहस्ये)— उपोषणस्याङ्गभूतमर्घ्यदानमिति स्मृतमिति । अनघाव्रतमिति— (भविष्योत्तरे)— कृष्णाष्टम्यां मार्गशीर्षे दाम्पत्यं दर्भनिर्मितम् । अनघं चानघां चैव बहुपुत्रैः समन्वितम् । स्थापयित्वा शुभे देशे गोमयेनानुलेपिते इत्यादि ।

उत्पत्तिरिति—मार्गशीर्षासिते पक्षे उत्पत्तिर्नाम नामतः । तस्या उपोषणमात्रेण धर्मो ज्ञो जायते ध्रुवमित्यादि ।

गौरीतपोव्रतमिति—गौरीमोक्षार्थमेवादौ त्वाभिर्यत् क्रियते तपः । गौरीतप इति ख्यातं तस्माद्व्रतमुत्तमम् । तस्मात्स्त्रिया तपोभिश्च तोषणीया शिवप्रिया । आदौ मार्गशिरे मासि अमावास्यादिने शुभे । गृह्णीयान्नियमं तत्र दन्तधावनपूर्वकमित्यादि ।

धन्यव्रतमिति—(वाराहपुराणे)—अथातः संप्रवक्ष्यामि धन्यव्रतमुत्तमम् । येन सद्यो भवेद्धन्यो ह्यधन्योऽपि हि यो भवेत् । मार्गशीर्षे सिते पक्षे प्रतिपत्तिथिर्भवेत् । तस्यां नक्तं प्रकुर्वीत रात्रौ विष्णुं च पूजयेदित्यादि ।

पितृपूजनमिति—(लिङ्गपुराणे)—वृश्चिके च द्वितीयायां शुक्लायां पितृपूजनम् । येन कुर्यान्न नश्यन्ति भ्रातरः सप्तजन्मगा इति ।

रम्भाव्रतमिति—(भविष्योत्तरे)—रम्भातृतीयां वक्ष्यामि सर्वपापप्रणाशिनीम् । सुखसौभाग्यफलदां सर्वोपद्रवनिवारिणीम् ।

मार्गशीर्षशुक्लचतुर्थी — अस्यां कृच्छ्रचतुर्थीव्रतम् — अपरा वरचतुर्थी । सर्वार्थसाधकमब्दचतुष्टयसाध्यं व्रतम् ।

मार्गशीर्षशुक्लपञ्चमी — अस्यां नागपूजा दाक्षिणात्यानां प्रसिद्धा । नागपूजायां षष्ठीयुता ग्राह्या । पञ्चमी नागपूजायां कार्य्या षष्ठीसमन्वितेति वचनात् ।

मार्गशीर्षशुक्लषष्ठी (स्कन्दषष्ठी) — अस्यां स्कन्दस्तारकं हतवानितस्तत्र स्कन्दं सम्पूजयेत् । रविवारभौमवारशततारकव्रतानां

-सर्वदुःखहरां पुण्यां पुत्रपौत्रप्रदां तथा । सपत्नीदर्पदलिनीं रूपैश्वर्य-करीं शुभाम् । शंकरेण पुरा ख्याता पार्वत्यै प्रियकाम्यया । तामिमां शृणु भूपाल भूतानां परमहितम् । मार्गशीर्षे शुभे मासि तृतीयायां नराधिप । शुक्लायां प्रातरुत्थाय दन्तधावनपूर्वकमित्यादि ।

कृच्छ्रचतुर्थीव्रतमिति — (स्कन्दपुराणे) मार्गशीर्षे शुभे मासि सितपक्षेषु षण्मुख । चतुर्थ्यां नियमं गृह्य विघ्नेशं पूज्य यत्नतः । इत्यादि । वरचतुर्थीति — (स्कान्दे) चातुर्थ्यां मार्गशीर्षे तु शुक्लपक्षे नृपोत्तम । आरभ्य प्रतिमासं च चतुर्थ्यां गणनायकम् । सम्पूज्य विधिना कुर्य्यादेकभक्तं समाहितः । अक्षारलवणं ह्येवं पूर्णे संवत्सरे ततः । द्वितीये वत्सरे चाथ नक्तं प्रतिचतुर्थिकम् । कुर्य्याद् गणेशमभ्यर्च्य तृतीयेऽयाचितं तथा । एवमेव प्रकुर्वीत चतुर्थे स्यादुपोषणम् । ततश्चतुर्थे सम्पूर्णे तदुद्यापनमाचरेत् । इदं वर-चतुर्थ्याख्यं व्रतं सर्वार्थसाधकमिति ।

नागपूजेति — (स्कान्दे) शुक्ला मार्गशिरे पुण्या श्रावणे या च पञ्चमी । स्नानदानैर्बहुफला नागलोकप्रदायिनीति ।

स्कन्दषष्ठीति — (भविष्योत्तरे) येयं मार्गशिरे मासि षष्ठी भरतसत्तम । पुण्या पापहरा धन्या शिवा शान्ता हरप्रिया । निहत्य तारकं षष्ठ्यां गुहस्तारकराजवत् । रराज दयितो राजन् कार्तिके यस्य सा तिथिः । स्नानदानादिकं सर्वं अस्यामक्षयमुच्यते

योगवती चम्पाभिधा। अस्यां विश्वेश्वरदर्शनं कार्य्यम्। इयं च अधिकयोगवती पूर्वापरा वा ग्राह्या। योगाभावे पराग्राह्या। षष्ठी तु सौरा शस्ता।

मार्गशीर्षशुक्लसप्तमी—(नन्दासप्तमी, मित्रसप्तमी, त्रितयसप्तमी) पूर्वदिने उपोष्य कृतस्नपनः स्नात्वा रविं सम्पूज्य ब्राह्मणान् भोजयेत्।

मार्गशीर्षशुक्लनवमी—(नन्दिनी)। मार्गशीर्षशुक्लैकादशी—

इति। चम्पाभिधेति—(मल्हारिमाहात्म्ये)-मार्गे भाद्रपदे शुक्ला षष्ठी वैधृतिसंयुता। रविवारेण संयुक्ता सा चम्पेतीह विश्रुता। विश्वेश्वरदर्शनमिति—(स्मृत्यन्तरे)-मार्गशीर्षेऽमले पक्षे षष्ठ्यां वारेंऽशुमालिनः। शततारागते चन्द्रे लिङ्गंस्याद्दृष्टिगोचरमिति शीघ्रलिङ्गदर्शनं कार्य्यम्)।

नन्दासप्तमीति—(कालविवेके)-या तु मार्गशिरे मासि शुक्लपक्षे तु सप्तमी। नन्दा सा कथिता वीर सर्वानन्दकरी तथा। स्नानदानादिकं सर्वमस्यामक्षयमुच्यते। शुक्लपक्षे तु सप्तम्यां नक्षत्रं सवितुर्भवेत्। यदा प्रथममेवेशं तदा सा भद्रतां व्रजेत्। स्नपनं च देवेऽपि घृतेन कथितं बुधैरिति। मित्रसप्तमीति—(ब्रह्मपुराणे)-नन्दा मार्गशिरे शुक्ला सप्तम्यानन्ददायिनी। जयन्ती नाम सा प्रोक्ता पुण्या पापहरा स्मृता। यद्विष्णोर्दक्षिणं नेत्रं तद्देवाकृतिमत्पुनः। अदितेः कश्यपाज्जातो मित्रो नाम दिवाकरः। सप्तम्यां तेन साख्याता लोकेऽस्मिन्मित्रसप्तमी। षष्ठ्यां च स्नपनं कार्य्यं तस्मै मित्राय धीमतेइति। त्रितयसप्तमीति—यो मार्गशीर्षे सितसप्तमीदिने तत्संयोगे जगतः प्रसूतिम्। सम्पूज्य भानुं विधिनोपवासी गन्धधूपान्नवरोपहारैरिति।

नन्दिनीति—मासि मार्गशिरे वीर शुक्लपक्षे तु या भवेत्। नन्दिनी महापुण्या नवमी परिकीर्तितेति।

(मोक्षदा) अस्यां सुनामद्वादशीव्रतम् । अरण्यद्वादशीव्रतम् । धरणीव्रते मत्स्यद्वादशीव्रतम् ।

मार्गशीर्षशुक्लद्वादशी—अस्यां साध्यव्रतम् । द्वादशादित्यव्रतम् । जनार्दनपूजा च ।

मार्गशीर्षशुक्लत्रयोदशी—अस्यामारभ्य अनङ्गत्रयोदशीव्रतम् । अस्यामेव यमादर्शनव्रतम् ।

मार्गशीर्षशुक्लचतुर्दशी—अस्यामारभ्य शिवचतुर्दशीव्रतम् । अत्र पिशाचमोचनतीर्थे स्नात्वा श्राद्धं कार्यम् । शिवपूजने पूर्वविद्धा । श्राद्धे अपराह्णव्यापिनी । अज्ञातनामपिशाचादि उद्दिश्य एकोद्दिष्टे मध्याह्नव्यापिनी ग्राह्या ।

मोक्षदेति—मार्गशीर्षे सिते पक्षे मोक्षानामेति नामतः । सर्वस्तु तद्व्रतं कृत्वा द्विजे पुण्यं प्रदीपनामित्यादि । सुनामद्वाद०—शृणुष्वैकमना भूप सुनामद्वादशीं शुभाम् । सर्वपापहरां स्वर्ग्यां भुक्तिमुक्तिप्रदायिकामित्यादि । अरण्यद्वादशी० । (भविष्योत्तरे)—मार्गशीर्षे सिते पक्षे एकादश्यां दिनोदये । स्नात्वा नरः सोपवासः कृत्वा पूजां जनार्दनस्येत्यादि । मत्स्यद्वादशीव्रतमिति—(वाराहपुराणे)— मार्गस्य शुक्लपक्षे तु दशम्यां नियतात्मवान् । स्नात्वा देवार्चनं कृत्वा अग्निकार्यं यथाविधि इति ।

साध्यव्रतमिति—(विष्णुधर्मोत्तरे)—मनो मन्तास्तथा प्राणो नरः पानश्च वीर्यवान् । चितिर्हयो नयश्चैव हंसो नारायणस्तथा विभुश्चापि प्रभुश्चैव साध्या द्वादश कीर्तिताः । पूजयेच्छुक्लपक्षे तु द्वादश्यां मार्गशीर्षतः । कृत्वा व्रतं वत्सरमेतदिष्टं प्राप्नोति सर्वां नु मनोरथमेव । तत्रोष्य कालं सुचिरं मनुष्यो राजा भवेद्वा द्विजपुङ्गवो वेति । द्वादशादित्यव्रतमिति—पूजयेद्द्वादशादित्यान् एकार्चं दशोपितः । मार्गशीर्षादथारभ्य द्वादश्यां नियतव्रत इत्यादि ।

मार्गशीर्षपूर्णिमा—(दत्तात्रेयजयन्ती)—इयं त्रिदोषव्यापिनी ग्राह्या शिष्टसमाचारात्। अस्यां मृगशिरयुक्तायां ससुवर्णचूर्णितलवण-दानेन सौभाग्यभाग्भवेत्। अस्यां चन्द्रपूजा च विधेया। चन्द्र-

जनार्दनपूजेति—(स्कान्दे)—मार्गशीर्षे सिते पक्षे द्वादश्यां नियतः शुचिः कृतोपवासो देवेशं समभ्यर्च्य जनार्दनमित्यादि।

अनङ्गत्रयोदशीव्रतमिति—(भविष्यपुराणे)—मार्गशीर्षेऽमले पक्षे त्रयोदश्यां समाहितः। स्नाने नद्यां तडागे वा गृहे वा कूप तोऽपि वा। कृत्वाभ्यर्च्य महादेवं विधानाच्छशिभूषणम्। लिङ्ग-रूपं च सम्भूतमनङ्गं यत्प्रतिष्ठितम्। तदनङ्गमिति प्रोक्तं पूजये-द्भक्तितो व्रतीत्यादि। यमादर्शनव्रतमिति—(भविष्ये)—पूर्वाह्णे मार्गशीर्षादौ वर्षमेकं निरन्तरम्। त्रयोदश्यां सौम्यदिने श्राद्धं-काङ्क्षा रवर्जितः। यमनाम्ना द्विजानष्टौ पञ्च चैवमथाह्वयेदित्यादि।

शिवचतुर्दशीव्रतमिति—(मत्स्यपुराणे)—त्रिषु लोकेषु विख्याता नाम्ना शिवचतुर्दशी। मार्गशीर्षे त्रयोदश्यां सितायामेकभोजन इत्यादि। स्नानमिति—(काशीखण्डे)—मार्गशीर्षचतुर्दश्यां कपर्दी-श्वरसन्निधौ। स्नात्वाऽन्यत्रापि मरणान्न पैशाच्यमवाप्नुयुरित्यादि।

दत्तात्रेयजयन्तीति—(सह्याद्रिखण्डे)—मार्गशीर्षे वर्षमन्हि दशेऽन्हि च सुनिर्मले। मृगशीर्षयुते पूर्णिमायां गुरुस्य च वासरे। जनयामास देदीप्यमानं पुत्रं सती शुभम्। तं विष्णुमागतं ज्ञात्वा अत्रिर्नामाकरोत्स्वयम्। दत्तवान्स्वस्वपुत्रत्वाद्दत्तात्रेयइतीश्वर-मिति। सौभाग्यभागिनि—(निर्णयामृते विष्णुः)—मार्गशीर्षशुक्ल-पञ्चदश्यां मृगशिरोयुक्तायां चूर्णितलवणस्य सुवर्णनाभं प्रस्थमेकं चन्द्रोदये ब्राह्मणाय प्रतिपादयेत्। अनेन कर्मणा सौभाग्यभागि-भिजायत इति। चन्द्रपूजेति—(ब्रह्मपुरा०)—वामनेत्रं हि यद्-विष्णोः तदेव भुवनत्रयम्। अनसूया यतश्चन्द्रमसृतेनाभ्यषेचयेम्। पौर्णमास्यां च तस्यात्तं पूजयेत्तत्र सर्वदा। शुक्लैः पुष्पैश्च पयसा स्नापयेत्पयसा मुदा। रत्नैर्दीपैश्च बलिभिर्होमैर्ब्राह्मणतर्पणैः।

पौषकृष्णैकादशी—(सफला)। पौषकृष्णद्वादशी—अस्यां सुरूपद्वादशीव्रतम्। सुजन्मद्वादशीव्रतञ्च कार्य्यम्। पौषशुक्लद्वितीया—(आरोग्यव्रतम्)। पौषशुक्लसप्तमी—अस्यामारभ्य संवत्सरसाध्यमुभयसप्तमीव्रतम्। (मार्तण्डसप्तमीव्रतम्)। पौषशुक्लाष्टमी—बुधवारयुता—(महाभद्रा) रौद्रयुता (जयन्ती)। पौषशुक्लैकादशी—(पुत्रदा)—इयं मन्वादिः। पौषशुक्लत्रयोदशी—(अस्यां

त्कुर्य्याज्जलान्ते छन्दसां बहिः। गृह्यसूत्रे—पौषस्य रोहिण्यां मध्यमायां वाष्टकायामध्यायानुत्सृजेदिति।

सफलेति—(पाद्मे)—पौषस्य कृष्णपक्षे वै सफला नामनामतः। नारायणोऽस्य देवोऽस्याः पूजनीयः प्रयत्नत इत्यादि।

सुरूपद्वा०। पौषे मासि तु संप्राप्ते पुष्यर्क्षं तु यदा भवेत्। तस्यां रात्रौ संयतात्मा ध्यात्वा विष्णुं सनातनमिति। सुजन्मद्वा०। (विष्णुधर्मोत्तरे)—पौषे मासि सिते पक्षे द्वादश्यां शक्रदेवता। नक्षत्रयोगगे विष्णुं प्रथमं तु समर्चयेदित्यादि।

आरोग्यव्रतमिति—(वि० ध०)—पौषशुक्लद्वितीयायां गवां शृङ्गोदकेन तु। स्नातः शुक्लाम्बरधरो भूत्वार्कं समुपागत इत्यादि।

महाभद्रेति—(निर्णयामृते)—पौषमासि यदा देवि शुक्लाष्टम्यां बुधो भवेत्। तदा तु सा महापुण्या महाभद्रेति कीर्तिता। तस्यां स्नानं जपो होमस्तर्पणं विप्रभोजनम्। सर्वमेव महादेवि पूजयेत् त्रिविधद्रुमैरिति। जयन्तीति—(तत्रैव)—पौषमासे यदा देवि अष्टम्यां नगजे शुभे। नक्षत्रं जायते पुण्यं यदा वै रौद्रसंज्ञकं तदा तु सा महापुण्या जयन्ती कल्मषापहा। तस्यां स्नानं तथा दानं जपो होमस्तथार्चनम्। सर्वं कोटिगुणं देवि फलं भवति शाश्वतमिति। (रौद्रं भरण्यादि वराहमिहिरः)।

पुत्रदेति—(भविष्योत्तरे)—पुत्रदा नामनाम्नेयं सर्वपापहरा परा। नारायणोऽधिदेवोऽस्याः कामदः सिद्धिदायक इत्यादि।

घृतदानम्) । पौषशुक्लचतुर्दशी—(विरूपाक्षव्रतम्) । पौषशुक्लपूर्णिमा—अस्यां पुष्यनक्षत्रयुतायामलक्ष्मीनाशनं स्नानादिकं कार्य्यम् ईशानव्रतञ्च ।

॥ अथ माघमासकृत्यनिर्णयः ॥

अस्मिन्मासे एकभक्ते कृते सत्कुलोत्पत्तिः । विद्यावाप्तिव्रतं ।

(कृत्यतत्त्वार्णवे)–पौषे मासि त्रयोदश्यां घृतं विप्राय पार्थिव । समभ्यर्च्याच्युतं दद्यात्सर्वान्कामानवाप्नुयादिति । विरूपाक्षव्रतमिति—(विष्णुधर्म्मोत्तरे)–शुक्लपक्षे चतुर्दश्यां विरूपाक्षं तु पूजयेत् । पौषमासादथारभ्य यावत्संवत्सरं भवेत् । कृत्वा व्रतं वत्सरमेतदिष्टं भयं न चाप्नोति स राक्षसेभ्यः । कामानवाप्नोति भवत्यरोगो भयं च राजन्न च तस्य किंचिदिति । स्नानादिकमिति—(निर्णयामृते)–इदं जगत्पुरा लक्ष्म्या त्यक्तमासीत्ततो हरिः । पुरन्दरश्च सोमश्च तथा पुष्यबृहस्पती । पञ्चैते पुष्ययोगेन पौर्णमास्यां तपोबलात् । लक्ष्मीयुक्तं पुनश्चक्रुः सौभाग्योत्सवकेलिभिः । तस्मान्नरैः पुष्ययोगे तत्र सौभाग्यवृद्धये । गौरसर्षपकल्केन समालिप्य स्वकां तनुम् । कृतस्नानैस्ततः कार्य्यमलक्ष्मीनाशनं परमिति । ईशानव्रतमिति—(कालिकापुराणे)–अथो पौष्य चतुर्दश्यां पौर्णमास्यां गुरोर्दिने । पूजयेच्च विधानेन लिङ्गं शार्वं नियोधये । इति ।

इति पौषमासकृत्यनिर्णयः

सत्कुलोत्पत्तिरिति—(विष्णुधर्मे)–माघे मासि द्विजश्रेष्ठ एकभक्तेन यः क्षियेत् । विष्णुशुश्रूषणपरः स कुले जायते सताम् इति । विद्यावाप्तिव्रतमिति—(विष्णुधर्मोत्तरे)–भगवन्कर्मणा केन विद्यावान्पुरुषो भवेत् । स विप्र एव विज्ञेयः पुरुषः पशुरन्यथा । पौष्यां तु समतीतायां प्रतिपत्प्रभृतिक्रमात् । प्राग्वत्तु पूजयेद्देवं तुङ्गशिरसं हरिमित्यादि । (तुङ्गशिरसं हयग्रीवम्) । रविव्रतमिति—माघमासे समुद्युक्तस्त्रिसन्ध्यं योऽर्चयेद्रविम् । लभेत्पाण्मासिकं

तदशक्त एकाहस्नानमपि कुर्यात् । मासपर्यन्तमर्घ्यदानादिनियमाः पालनीयाः । सूर्यप्रीतिकामेन प्रत्यहं दम्पतीभ्यां भोजनवस्त्रे च देये । माघे मलमासे सति मासस्नानं तन्नियमाश्च पालनीयाः । मकरगे सूर्ये मेषे च गुरौ प्रयागे कुम्भयोगः ।

माघकृष्णचतुर्थी—संकष्टचतुर्थी-इयं चन्द्रोदयव्यापिनी ग्राह्या चन्द्रोदये पूजाविधानात् । माघकृष्णसप्तमी—(सर्वाप्तिसप्तमीव्रतम्) माघकृष्णैकादशी—(षट्तिला) । माघकृष्णामावास्या—अस्यां सावित्र्या सह ब्रह्मपूजनम् । एषा रविवारयुक्ता चेदर्धोदयाख्या । माघशुक्लतृतीया—(गुडलवणदानम्) । माघशुक्लचतुर्थी—

संकष्टचतुर्थीति—माघमासे कृष्णपक्षे चतुर्थ्यां व्रतमुत्तमम् । प्रतिमासं प्रकुर्वीत व्रतं संकष्टनाशनमिति ।

सर्वाप्तिसप्तमीति—(भविष्ये)-कृष्णपक्षे तु माघस्य सर्वाप्तिसप्तमीं शृणु । यामुपोष्य समाप्नोति कामानात्मनः स्थिताञ्छिति ।

षट्तिलेति—तिलस्नायी तिलोद्वर्ती तिलहोमी तिलोदकी । तिलदाता च भोक्ता च षट्तिला पापनाशना । षट्तिलैकादशीं देव कीदृशं फलमश्नुते इत्यादि ।

ब्रह्मपूजनमिति—(भविष्योत्तरे)-अमायां माघमासस्य पूजयित्वा पितामहम् । गायत्र्या सहितं देवं वेदवेदाङ्गभूषितमित्यादि ।

अर्धोदयाख्येति—(मदनरत्ने)-माघामायां व्यतीपाते आदित्ये विष्णुदैवते । अर्धोदयं तदित्याहुः सहस्रार्कग्रहैः समम् । (प्रयोगपारिजाते)-अर्धोदयः सविज्ञेयः किंचिन्न्यूनो महोदयः । दिवैव योगशस्तोऽयं न तु रात्रौ कदाचन । (वसिष्ठः)-सूर्यस्यार्धोदये काले ये ते योगाः प्रकीर्तिताः । अर्धोदय इति ख्यातः कोटिसूर्यग्रहैः सम इति । मकरस्थे च दिवानाथे भुजगे च बृहस्पतौ । कुम्भ[illegible] प्रयागे ह्यातिदुर्लभः ।

[illegible]—(भविष्योत्तरे)-माघे शुक्ल तृतीयायां

(कुन्दचतुर्थी)—तत्र नक्ते प्रदोषव्यापिनी ग्राह्या। अत्र कुन्दपुष्पैः शिवपूजा कार्या। इयमेव वरदा चतुर्थी। तत्र पूर्वविद्धा ग्राह्या। (तिलचतुर्थी-गौरीचतुर्थी-शान्तिचतुर्थी)। माघशुक्लपञ्चमी—(श्रीपञ्चमी)—अस्यां वसन्तोत्सवारम्भः

गुडस्य लवणस्य च। दानं श्रेयस्करं राजन्स्त्रीणां पुरुषस्य च। गुडेन तुष्यते देवी लवणेन स्वयं प्रभुरिति।

कुन्दचतुर्थीति—(कूर्मपुराणे)—माघशुक्लचतुर्थ्यां तु कुन्दपुष्पैः सदा शिवम्। संपूज्य योऽहि नक्ताशी सः प्राप्नोति श्रियम् नरः। (देवीपुराणेऽपि)—माघमासे तु संप्राप्ते चतुर्थी कुन्दसंज्ञिता। उपोष्या सा सुरश्रेष्ठ ततोराज्यं भविष्यति। इति—अत्र नक्तोपवासयोर्विकल्पः। वरदेति—(भविष्योत्तरे)—चतुर्थी वरदानाम तस्यां गौरी सुपूजिता। सौभाग्यं मङ्गलं कुर्यात्पञ्चम्यां श्रीरपि स्वयम् इति। तिलचतुर्थीति—(काशीखण्डे)—माघशुक्लचतुर्थ्यां तु नक्तव्रतपरायणाः। येऽत्र ढुण्ढेऽर्चयिष्यन्ति तेऽर्घ्याः स्युरसुरद्रुहाम्। विधाय वार्षिकीं यात्रां चतुर्थीं प्राप्य तापसीम्। शुक्लां शुक्लतिलैर्वद्धा प्रारतोश्रान्मोदकान्वृती। तां यात्रां नात्र यः कुर्यान्नैव तिलमोदकैः। उपसर्गसहस्रैस्तु सहन्तव्यो ममाज्ञया। होमं तिलाज्यद्रव्येण यः करिष्यति भक्तितः। तस्यां चतुर्थ्यं मन्त्रज्ञस्तस्य मन्त्रः प्रसेत्स्यतीति। गौरीचतुर्थीति—(कू०पु०) उमाचतुर्थ्यां माघे तु शुक्लायां योगीनीगणैः। प्राग्भचयित्वा स्रष्टा च भूपः स्वाङ्गात्स्वकैर्गणैरित्यादि। शान्तिचतुर्थीति—(भविष्यपुराणे)—माघे मासि तथा शुक्ला या चतुर्थी महामते। सा सर्वशान्तिदा नित्यं शान्तिं कुर्यात्सदैव हि इति।

श्रीपञ्चमीति—(वीरसर्वस्वे)—माघे मासि सिते पक्षे पञ्चमी या श्रियः प्रिया। तस्यां पूर्वाह्ण एवेह कार्यः सारस्वतोत्सवः इति। वसन्तोत्सवारम्भ इति—(पुराणसमुच्चये)—माघमासि सुरश्रेष्ठ शुक्लायां पञ्चमीतिथौ। रतिकामौ तु सम्पूज्य कर्तव्यः सुमहो-

कार्यः। अत्रोत्तरदिन एव पूर्वाह्णव्यापिनी ग्राह्या। अन्यदा तु पूर्वा। मध्याह्नः पूजाकालः पूजाप्रधानत्वादिति टीकाकारः। चैत्रशुक्ले श्रीपञ्चमीति दिवोदासः। इयं वसन्तपञ्चमीति भट्टोजिदीक्षितः।

माघशुक्लषष्ठी—(मन्दारषष्ठी)। माघशुक्लसप्तमी—(अचलासप्तमी—रथसप्तमी)।

माघशुक्लाष्टमी—(भीष्माष्टमी)—सा च मध्याह्नव्यापिनी ग्राह्या। अत्र भीष्मोद्देशेनैकोद्दिष्टश्राद्धम्, तर्पणं च कार्यम्। एतच्च तर्पणं जीवत्पितृकेणापि कार्यम्। अत्र जीवत्पितृकस्य नाधिकारः इति कौस्तुभे। एतच्चापसव्येन कार्यम्।

माघशुक्ला नवमी—(महानन्दा)। माघशुक्लैकादशी—(जया)। माघशुक्लद्वादशी—(तिलद्वादशी, भीष्मद्वादशी) माघशुक्ल-

---

स्तवः। दातानि च प्रदेयानि तेन तुष्यति माधव इति।

मन्दारषष्ठीति—माघस्यामलपक्षे तु पञ्चम्यां लघुभुङ् नरः। दन्तकाष्ठं ततः कृत्वा स्वपेद्भूमौ जितेन्द्रियइत्यादि।

श्राद्धं तर्पणं चेति—(पाद्मे)—माघे मासि सिताष्टम्यां सतिलं भीष्मतर्पणम्। श्राद्धं चैव तु ये कुर्युः कुरोः सन्ततिभागिनः। (मदनरत्ने)—अत्र श्राद्धं काम्यं तर्पणं नित्यं। ब्राह्मणाद्याश्च ये वर्णा दद्युर्भीष्माय नोजलम्। संवत्सरकृतं तेषां पुण्यं नश्यति सत्तमइति प्रत्यवायश्रवणात् जीवत्पितृकेणापीति—(पाद्मे)—जीवत्पितापि कुर्वीत तर्पणं यमभीष्मयोरिति। नाधिकारइति—सपितुः पितृकृत्येषु नाधिकारः कथञ्चन इति निषेधात्–पितृशब्दस्यात्रजनकवाचित्वासम्भवेन संस्कारवाचित्वात् पुत्रपौत्रोचितां क्रियामित्यनेन पितृकृत्यस्यप्राकृत्याच्चेति (कौस्तुभकारः)।

महानन्देति—(भविष्ये)—माघमासे तु या शुक्ला नवमी लोकपूजिता। महानन्देति सा प्रोक्ता सदानन्दकरी नृणां। तस्यां स्नानं तथा दानं जपोहोमउपोषणं। सर्वं तदक्षयं प्रोक्तं यदस्यां

चतुर्दशी (आरटन्ती) यमतर्पणम् । [illegible] ॥

माघशुक्लपूर्णिमा—अस्यां मघायुक्तायां तिलैः श्राद्धं तिलादिदानं च कुर्यात् । इयमेवयोगविशेषेण महामाघी । श्राद्धे अपराह्णिका ग्राह्या । अस्यां शिवपूजनञ्चकार्य्यम् । तत्रपौर्वाह्णिकी ग्राह्या ।

क्रियते नरैः इति । जयेति—(भ०)—कथयिष्यामि राजेन्द्र शुक्ले माघस्य या भवेत् । जयानामेति विख्याता सर्वपापहरापरेत्यादि । तिलद्वादशीति-(ब्राह्मे) माघेतु शुक्लद्वादश्यां यतोहि भगवान्पुरा । तिलानुत्पादयामास तपः कृत्वा सुदारुणम् । तिलानामाधिपत्ये तु विष्णुस्तत्र कृतः सुरैः । तस्यामुपोषितः स्नातस्तिलैस्तस्यां यजेद्धरिं । तिलतैलेन दीपाश्च देया देवगृहेषु च । निवेदयेत्तिलानेव होतव्याश्च तथा तिलाः । तिलान्दत्वा च विप्रेभ्योभक्षयेच्च तिलानि इति । (तिलैरिति मध्यमणिन्यायेन स्नानयजनाभ्यां संबध्यते-तिलैः स्नात्वा तिलैः पूजयेदित्यर्थः) । भीष्मद्वादशीति—(पाद्मे)—यथाकृतमिदं वीर तव नाम्ना भविष्यति । सा भीष्मद्वादशीत्येषा सर्वपापहरा शुभेति । आरटन्तीति—(ब्रह्मपुराणे)-माघकृष्णचतुर्दश्यां विष्णोर्देहान्मरीचय । ततोविभज्य बन्धुभ्यः कृसरं भोजयेत्स्वयम् । तत्रारुणोदये स्नात्वा यमं सम्पूज्य तस्मै मसभिर्नाममिः ससतिलोदकाञ्जलीन्दत्वा तिलहोमादिकं कृत्वा पितृभ्यः श्राद्धं दत्वा ब्राह्मणेभ्यः कृसरान्नभोजनं दत्वा स्वयमपि कृसरान्नं भुञ्जीत ।

श्राद्धमिति—(विष्णुः)—माघी मघायुक्ताचेत्तस्यां तिलैः श्राद्धं कृत्वा पूतीभवेदिति । महामाघीति—(गार्ग्यः)—मेषराशौ यदा सौरिः सिंहे चन्द्रबृहस्पती । भास्करः श्रवणर्क्षे च महामाघीति सा स्मृतेति । (विस्तृतविचारस्तु विषयविवेचिन्यां महत्पूर्विकाविचारे द्रष्टव्यः)-शिवपूजनञ्चेति—पौर्णमास्यां तु यामाघे पूजयेद्विधिवच्छिवम् । सोऽश्वमेधमवाप्नोति शिवलोके महीयते इति ।

इति माघमासकृत्यनिर्णयः

कार्यः। अत्रोत्तरदिन एव पूर्वाह्णव्यापिन्युत्तरा। अन्यदा तु पूर्वा। मध्याह्नः पूजाकालः पूजाव्रतत्वादिति टीकाकारः। चैत्रशुक्ले श्रीपञ्चमीति दिवोदासः। इयं वसन्तपञ्चमीति भट्टोजिदीक्षितः।

माघशुक्लषष्ठी—(मन्दारषष्ठी)। माघशुक्लसप्तमी—(अचलसप्तमी—रथसप्तमी)।

माघशुक्लाष्टमी—(भीष्माष्टमी)—सा च मध्याह्नव्यापिनी ग्राह्या। अत्र भीष्मोद्देशेनैकोद्दिष्टश्राद्धम् तर्पणं च कार्यम्। एतच्च तर्पणं जीवत्पितृकेणापि कार्यम्। अत्र जीवत्पितृकस्य नाधिकारः इति कौस्तुभे। एतच्चापसव्येन कार्यम्।

माघशुक्ला नवमी—(महानन्दा)। माघशुक्लैकादशी—(जया)। माघशुक्लद्वादशी—(तिलद्वादशी,भीष्मद्वादशी)माघशुक्ल-

---

त्सवः। दातानि च प्रदेयानि तेन तुष्यति माधव इति।

मन्दारषष्ठीति—माघस्यामलपक्षे तु पञ्चम्यां लघुभुङ् नरः। दन्तकाष्ठं ततः कृत्वा स्वपेद्भूमौ जितेन्द्रियइत्यादि।

श्राद्धं तर्पणं चेति—(पाद्मे)—माघे मासि सिताष्टम्यां सतिलं भीष्मतर्पणम्। श्राद्धं चैव तु ये कुर्युः कुर्वाः सन्ततिभागिनः। (मदनरत्ने)—अत्र श्राद्धं काम्यं तर्पणं नित्यं। ब्राह्मणाद्याश्च ये वर्णादद्युर्भीष्माय नोजलम्। संवत्सरकृतं तेषां पुण्यं नश्यति सत्तमइति प्रत्यवायश्रवणात्। जीवत्पितृकेणापीति—(पाद्मे)—जीवत्पितापि कुर्वीत तर्पणं यमभीष्मयोरिति। नाधिकारइति—सवितुः पितृकृत्येषु नाधिकारः कथञ्चन इति निषेधात्—पितृशब्दस्यात्रजनकवाचित्वासम्भवेन संस्कारवाचित्वात् पुत्रपौत्रोचिता क्रियामित्यनेन पितृकृत्यत्वप्राकत्याच्चेति (कौस्तुभकारः)।

महानन्देति—(भविष्ये)—माघमासे तु या शुक्ला नवमी लोकपूजिता। महानन्देति सा प्रोक्ता सदानन्दकरी नृणां। तस्यां स्नानं तथा दानं जपोहोमउपोषणं। सर्वं तदक्षयं प्रोक्तं यदस्यां

चतुर्दशी (आरटन्ती) यमतर्पणम् ।

माघशुक्लपूर्णिमा—यस्यां मघायुक्तायां तिलैः श्राद्धं तिलादि-
दानं च कुर्य्यात् । इयमेवयोगविशेषेण महामाघी । श्राद्धे अपरा-
ह्णिहका ग्राह्या । यस्यां शिवपूजनञ्चकार्य्यम् । तत्र पौर्वाह्णिहकी ग्राह्या ।

...क्षिपते नरैः इति । जयेति—(भ०)-कथयिष्यामि राजेन्द्र शुक्ले
...माघस्य या भवेत् । जयानामेति विख्याता सर्वपापहरापरेत्यादि ।
...तिलद्वादशीति-(ब्राह्मे) माघेतु शुक्लद्वादश्यां यतोहि भगवान्पुरा ।
...तिलानुत्पादयामास तपः कृत्वा सुदारुणम् । तिलानामाधिपत्ये
... विष्णुस्तत्र कृतः सुरैः । तस्यामुपोषितः स्नातस्तिलैस्तस्यां यजे-
...रिं । तिलतैलेन दीपाश्च देया देवगृहेषु च । निवेदयेत्तिलानेव
...तव्याश्च तथा तिलाः । तिलान्दत्वा च विप्रेभ्यो भक्षयेच्च तिलानि-
...ति । (तिलैरिति मध्यमणिन्यायेन स्नानयजनाभ्यां संबध्यते-
...लैः स्नात्वा तिलैः पूजयेदित्यर्थः) । भीष्मद्वादशीति—(पाद्मे)-
...कृतमिदं वीर तव नाम्ना भविष्यति । सा भीष्मद्वादशीत्येषा
...र्वपापहरा शुभेति । आरटन्तीति—(ब्रह्मपुराणे)-माघकृष्णा-
...दश्यां विष्णोर्देहान्मरीचय । ततोविभज्य बन्धुभ्यः कृसरं
...जपेत्स्वयम् । तत्रातर्कोदये स्नात्वा यमं सम्पूज्य तस्मै सप्त-
...र्नामभिः सप्ततिलोदकाञ्जलीन्दत्वा तिलहोमादिकं कृत्वा
...भ्यः श्राद्धं दत्वा ब्राह्मणेभ्यः कृसरान्नभोजनं दत्वा स्वयमपि
...रान्नं भुञ्जीत ।

श्राद्धमिति—(विष्णुः)-माघी मघायुक्ताचेत्तस्यां तिलैः श्राद्धं
...ा पूतीभवेदिति । महामाघीति—(गार्ग्यः)-मेषराशौ यदा
...ः सिंहे चन्द्रबृहस्पती । भास्करः श्रवणर्क्षे च महामाघीति
...स्मृतेति । (विस्तृतविचारस्तु विषयविवेचिन्यां महत्पूर्विका-
...रे द्रष्टव्यः)-शिवपूजनञ्चेति—पौर्णमास्यां तु यो माघे पूजये-
...वेच्छिवम् । सोऽश्वमेधमवाप्येह शिवलोके महीयत इति ।

इति माघमासकृत्यनिर्णयः

॥ अथ फाल्गुनमासकृत्यनिर्णयः ॥

अस्मिन्मासे एकभक्ते कृते ऐश्वर्यप्राप्तिः । प्रातः स्नान
विहितम् । गोविन्दप्रीतये व्रीह्यादिदानं देयम् । पुष्पार्थमत्र को

फाल्गुनकृष्णाष्टमी—(जानकीपूजा) । फाल्गुनकृष्णैका
—(विजया) ।

फाल्गुनकृष्णचतुर्दशी—(शिवरात्रिः) सा च निशीथ
पिनी ग्राह्या । पूर्वदिन एवार्धरात्रव्यापिनी तदा पूर्वा । उत्तर
एवार्धरात्रव्यापिनी तदोत्तरा । दिनद्वये निशीथव्याप्तौ त्रयोद
युतैव प्रशस्ता । कुहूयुक्ता तु निन्द्या । अत्र व्रते उपवासपू
जागरात्मककर्मत्रयं कार्यम् । यामत्रयादर्वाक् चतुर्दशीसम

एकभक्त इति—(महाभारते)—अग्रदेवं तु यो मासमेकभक्त
मः क्षियेत् । ऐश्वर्यमतुलं श्रेष्ठं पुमान्स्त्री वा प्रपद्यत इति । प्रा
स्नानमिति—प्रातःस्नायी भवेन्नित्यं द्वौ मासौ माघफाल्गुनौ
व्रीह्यादिदानमिति—(वा० पुरा०)—फाल्गुने व्रीहयो गावो वस्त्रं कृष्
जिनान्वितम् । गोविन्दप्रीतये भक्त्या दातव्यं पुरुषर्षभेति ।
जानकीपूजेति—फाल्गुनस्य कृष्णाष्टम्यां महीपते इत्युपक्रम
जाता दाशरथेः पत्नी तस्मिन्नहनि जानकी । उपोषितो रघुप
समुद्रस्य तटे तदा । सर्वसस्यैश्च कुस्तस्मात्तत्कर्तव्यं एवं हि
साप्यस्तस्य सम्पूज्या विप्रसंबन्धिबान्धवाः । रामपत्नीं च सम्पूज
सीतां जनकनन्दिनीमिति । विजयेति—(स्कान्दे)—कथयिष्यामि
राजेन्द्र कृष्णा या फाल्गुने भवेत् । विजया नाम नाम्ना
कर्त्तृणां जयदा परेत्यादि ।
शिवरात्रिरिति—(कालमाधवे)—शिवरात्रिशब्देऽपि योगरू
राश्रियते—तत्र शिवस्य रात्रिः शिवरात्रिः इति तत्पुरुषसमासेन
योगेन वर्तमानः शब्दो रूढ्या माघकृष्णचतुर्दशीरूपे कालविशेषे

नियम्यते । शिवस्य रात्रिर्यस्मिन्व्रते इति बहुव्रीहिसमासेन प्रवृत्तः शब्दो रूढ्या व्रतविशेषे नियम्यते । शिवरात्रिव्रतमेकादशीजयन्तीव्रतवत्संयोगपृथक्त्वन्यायेन नित्यं काम्यं चेत्युभयविधम्। तत्र नित्यत्वमकरणप्रत्यवाय वीप्सानित्यनिश्चलशब्दैरवगन्तव्यं। तत्राकरणे प्रत्यवायः (स्कन्दपुराणे)–पठ्यते–परात्परतरं नास्ति शिवरात्रिः परात्परम् । न पूजयति भक्त्येशं रुद्रं त्रिभुवनेश्वरम्। जन्तुर्जन्मसहस्रेषु भ्रमते नात्र संशयः । इति (वीप्सापि)–वर्षे वर्षे महादेवि नरोनारी पतिव्रता । शिवरात्रौ महादेवं कामं भक्त्या प्रपूजयेत् । (नित्यनिश्चलशब्दावपि)–माघकृष्णचतुर्दश्यां यः शिवे शयितव्रतः । मुमुक्षुः पूजयेन्नित्यं स लभेदीप्सितं फलमिति । अर्णवो यदि वा शुष्येत् क्षीयते हिमवानपि । मेरुमन्दारलङ्काश्च श्रीशैलोविन्ध्य एव च । चलन्त्येते कदाचिद्वै निश्चलं हि शिवव्रतमिति । काम्यत्वं फलश्रवणादवगन्तव्यम् । (स्कान्दे)–शिवञ्च पूजयित्वा तु यो जागर्ति चतुर्दशीम् । मातुः पयोधररसं न पिबेत् स कदाचन । यदीच्छेद्वाञ्छितान् भोगान् दिवि देवमनोरमान् । आगमोक्तविधिं कृत्वा प्राप्नोति परमं पदम् । ममभक्तस्ततो देवि शिवरात्रिमुपोषकः । गणत्वमक्षयं दिव्यं अक्षयं शिवशासनम् । सर्वान्भुक्त्वा महाभोगान् मृतोभूयो न जायते इति। (काम्यव्रतस्येशानसंहितायां) वर्षसंख्या पठ्यते । एवमेतद् व्रतं कुर्यात् प्रतिसंवत्सरं यती । द्वादशाब्दिकमेतत्स्याच्चतुर्विंशाब्दिकन्तु वा । सर्वान् कामानवाप्नोति प्रेत्य चेह च मानवः इति । नित्यकाम्यरूपस्यास्य व्रतस्य सर्वाधिकारित्वमपि तत्रैव—शिवरात्रिव्रतं नाम सर्वपापप्रणाशनम् । आचण्डालमनुष्याणां भुक्तिमुक्तिप्रदायकमिति । निशीथव्यापिनीति—तत्रैव–पूर्वेद्युरपरेद्युर्वा महानिशि चतुर्दशी । व्याप्ता सा दृश्यते यस्यां तस्यां कुर्याद् व्रतं नर इति । त्रयोदशीयुतेति—(कारणे)–त्रयोदशीदिवापूर्णा रात्रौ चैव चतुर्दशी । उत्तमा शिवरात्रिः स्याद्रात्रौ तु शिवमर्चयेत् । (विजयागमे)–त्रयोदशी शिवामूर्तिः शिवदेहश्चतुर्दशी । तयोः

चतुर्दश्यन्ते पारणम् । ऊर्ध्वगामिन्यां चतुर्दशीमध्य एव पारणम् । एतस्यां वा मासशिवरात्रिव्रतारम्भः । अत्र शिवरात्रिनिर्णयः । यत्तु प्रदोषव्यापिनी ग्राह्येति तत्संन्यस्तविषयमिति ।

समागमः पुण्यः शिवदेहश्चतुर्दशी । त्रयोदशी भगाकारा लिङ्गाकारा चतुर्दशी । तयोः समागमः पुण्यः शिवयोगः स उच्यते । (स्मृतिसमुच्चये)—धनुः कर्कटयश्वास्य कुम्भमीनवृषालिषु । कामविद्धो हरः पूज्यः सर्वाभीष्टफलप्रदः । कुहूयुक्तेति—त्रयोदश्यां चतुर्दश्या निशिमिश्रणमुत्तमम् । चतुर्दशीत्वमाविद्धा प्राणहानिं च कारयेत् । (योगजे) चतुर्दशी तु सम्पूर्णा कुहूतिथ्या समन्विता । तत्र जागरणं नृणां ब्रह्महत्यासमं भवेत् । अमा चतुर्दशी पूज्या रौरवं नरकं व्रजेत् । (शिवपुराणे)—चतुर्दशीदिने रात्रौ कुहूयोगो भवेद्यदि । तत्र जागरणं नृणां ब्रह्महत्याशताधिकम् । कर्मत्रयमिति—(नागरखण्डे)—उपवासप्रभावेन बलादपि च जागरात् । शिवरात्रिस्तथा नित्यं तस्य लिङ्गस्य पूजया । अक्षयान् लभते भोगान् शिवसायुज्यमाप्नुयादिति । पारणमिति—(माधवे)—पूर्वविद्धायामुपवासस्तदा परेद्युः किन्तिथ्यन्तपारणं भवति किम्वा तिथिमध्ये शास्त्रन्तु पक्षद्वयेऽपि समानम् । तिथ्यन्तपारणवचनानि जन्माष्टमीनिर्णये उदाहृतानि । तिथिमध्यपारणवचनन्तु—(स्कन्दपुराणे पठ्यते)—उपोषणं चतुर्दश्यां चतुर्दश्यां तु पारणम् । कृतैः सुकृतलक्षैश्च लभ्यते वाथवा नवा । ब्रह्मा स्वयं चतुर्वक्त्रैः पञ्चवक्त्रैस्तथाप्यहम् । सिक्थे सिक्थे फलं तस्य शक्तो वक्तुं न पार्वति । ब्रह्माण्डोदरमध्ये तु यानि तीर्थानि सन्ति वै । संस्थितानि भवन्तीह भूतायां पारणे कृते । तिथीनामेव सर्वासामुपवासव्रतादिषु । तिथ्यन्ते पारणं कुर्याद् विना शिवचतुर्दशीमिति । बाढम्—अस्ति हि द्विविधं शास्त्रम् । यदा यामत्रयादर्वागेव चतुर्दशी समाप्यते तदा तिथ्यन्ते पारणं । यदा चतुर्दशी यामत्रयमतिक्रामति तदा चतुर्दशीमध्ये पूर्वाह्णे पारणं कुर्यादिति ।

फाल्गुनकृष्णामावास्या—इयं युगादिः । शतभिषानक्षत्रयुक्तायामस्यां श्राद्धादिकं पितॄणां महातृप्तिप्रदम् । पूर्वभाद्रपदाधनिष्ठायुक्ता चेत्तदपि श्राद्धं कार्यम् । अस्यां रुद्रादिपूजा च विहिता इयं मन्वादिरपि ।

फाल्गुनशुक्लतृतीया—(सौभाग्यतृतीया) । फाल्गुनशुक्लचतुर्थी—(विघ्नहरचतुर्थीव्रतम्) । फाल्गुनशुक्लाष्टमी—अस्यां

व्रतारम्भ इति—(स्कन्दपु०)—आदौ मार्गशिरे मासे दीपोत्सवदिने तथा । गृह्णीयान्माघमासे वा द्वादशीव्रतमुपोषयेत् । इति । संन्यस्तविषयमिति—(विश्वरूपनिबन्धे)—मोक्षमार्गरतानां च मुनीनामूर्ध्वरेतसाम् । तेषामेव तु सा प्रोक्ता सामावास्या चतुर्दशी । शतभिषानक्षत्रयुक्तायामिति—(विष्णुपुराणे)—माघासिते पञ्चदशी कदाचिदुपैति योगं यदि वारुणेन । ऋक्षेण कालः सपरः पितॄणां नह्यल्पपुण्यैरुपलभ्यतेऽसौ । पूर्वभाद्रयुतेति—तत्रैव—चेद्भाद्रपदात्तु पूर्वः काले तदा यत्क्रियते पितृभ्यः । श्राद्धे परां तृप्तिमवाप्नुवन्ति युगान्सहस्रं पितरश्च तेन । इति । धनिष्ठायुक्ता चेति—(भारते)—माघामावास्याप्रकरणे—काले धनिष्ठा यदि नाम तस्मिन्भवेच्च भूपाल तदा पितृभ्यः । दत्तं तिलान्नं प्रददाति तृप्तिं वर्षायुतं तत्कुलजैर्मनुष्यैरिति । रुद्रादिपूजेति—(लैङ्गे)—फाल्गुनप्रक्रमे—अस्याममायां पूज्यास्च रुद्रोऽग्निर्ब्राह्मणास्तथा । माषोदनैः पोलिकाभिः पूज्यश्चात्मा सबान्धवइति । सौभाग्यतृतीयेति—(वाराहपुराणे)—अतः परं महाराज सौभाग्यकरणं व्रतम् । शृणु येनाशु सौभाग्यं स्त्रीषु सोऽप्युपजायते । फाल्गुनस्य तु मासस्य तृतीया शुक्लपक्षगा । उपासितव्या नक्तेन शुचिना सत्यवादिना । सश्रीकं च हरिं पूज्य रुद्रं वा सोमया सह । या श्रीः सा गौरिजा प्रोक्ता यो हरिः स त्रिलोचनइति । विघ्नहरचतुर्थीति—(वाराहपुराणे)—चतुर्थ्यां फाल्गुने मासि गृहीतव्यं व्रतं त्विदम् । नक्ताहारेण राजेन्द्र तिलानां पारणं स्मृतम् । तदेवाग्नौ च

ऽपि भद्रान्तं प्रतीक्ष्य "शेषः सूर्य्योदयः— स्मृतः" इति परिभाषानुसारिसूर्य्योदयपूर्वभाविघटिकाद्वयात्पूर्वं होलिकापूजनं कार्य्यम्। यदा तु परदिने प्रदोषस्पर्शाभावः पूर्वदिने भद्रारहितकालाभावः तदा पूर्वदिनएवोक्तसमये भद्रापुच्छे होलिकापूजनं कार्य्यं। यदा तु प्रतिपत्क्षयदिनद्वयेऽपि पूर्णिमा या प्रदोषस्पर्शाभावः उक्तसमये भद्रापुच्छकालाभावो तदा सर्वत्रैव भद्रायामपि कार्य्यं। ननु परत्र सायान्हादौ यदा पूर्वदिने रात्रिः सर्वा भद्रायुक्ता उत्तरदिने प्रदोषश्च पौर्णमासीशेषयुक्तोऽपि चन्द्रग्रहणाक्रान्तः तदा सूर्य्यास्तोत्तरं भद्रा-

---

यदा। प्रतिपद्वर्धमाना तु तदा सा होलिका स्मृता। (तदा द्वितीयदिने सा प्रतिपत्)-घटिकाद्वयात्पूर्वमिति—(पुराणसमुच्चये)-दिनार्धात्परतोऽपि स्यात्फाल्गुनी पूर्णिमा यदि। रात्रौ भद्रावसाने च होलिकां तत्र दीपयेत् (तथा भविष्योत्तरे)-होलां भद्रावसाने च निशि स्वान्ते प्रदीपयेत्। भद्रापुच्छेति—पृथिव्यां यानि कार्य्याणि शुभान्यशुभानि च। तानि सर्वाणि सिद्ध्यन्ति विष्टिपुच्छे न संशयः इति। भद्रायामपीति—(शिवरहस्ये)-पूर्वविद्धा प्रकर्तव्या फाल्गुनी पूर्णिमा सदा। तथा(बृहद्यमः)-श्रावणी दुर्गनवमी दूर्वा चैव हुताशनी। पूर्वविद्धा प्रकर्तव्या शिवरात्रिर्बलेर्दिनमिति। उक्तविषयएवैतद्वाक्य: साफल्यात्-दिवा भद्रा यदा रात्रौ रात्रिभद्रा यदा दिवा। सा भद्रा भद्रदा यस्माद्भद्रा कल्याणकारिणीति। शुभे वर्ज्यमिति—(धर्मसिन्धौ)-होलिकाग्रहणमनुकापनं प्रमदाह दिवसोऽत्र पंचमः। तत्परं च करिदिनसंज्ञकं दिनं वर्जितं सकलकर्मसु भयम्। इति—ग्रहणापत्तमत्तदाहेषु निर्णयविभागेन पूर्वदिनकरिदिनयोर्निर्णय इत्यपि तत्रैव। दोलोत्सवइति—(ब्राह्मे)-नरो दोलागतं दृष्ट्वा गोविन्दं पुरुषोत्तमम्। फाल्गुन्यां संयतो भूत्वा गोविन्दस्य पुरं व्रजेदिति। शशांकव्रतमिति—(विष्णुधर्मोत्तरे)-शशांकपूर्णिमामेनां शृणुष्व गदतो मम। उपोष्य न नरः सोमं

सत्वेपि पूर्वदिन एव कार्य्यम् । होलिकादिनं करिदिनं तदुत्तरदिनं च शुभे वर्ज्यम् । अत्रापि होलिकोत्सवः कार्य्यः । अस्यामेवाशोकव्रतम् । लक्ष्मीनारायणव्रतञ्च । एषा फाल्गुनीयुक्ता चेत्तस्यां शय्यादानं कार्य्यम् ।

॥ अथ चैत्रमासकृत्यनिर्णयः ॥

अस्मिन्मासे एकभक्तव्रतम् गौरीव्रतञ्च कार्य्यम् । चैत्रकृष्ण प्रतिपत्—(वसन्तोत्सवः)—सा चोदयिकी ग्राह्येति निर्णयसिन्धुकारः दिनद्वये उदये सत्वे पूर्वा । पूर्वविद्धा ग्राह्येति अनन्तदेवः प्रातरुत्थाय श्वपचस्पृष्टास्नानादिकं कार्य्यम् । होलिकाविभूतिवन्दनञ्च कार्य्यम् । अत्र तैलाभ्यङ्गो नित्यः । आम्रपुष्पप्राशनञ्च कार्य्यम् ।

प्राप्नोति श्री तथापि वा। फाल्गुनामलपक्षस्य पौर्णमास्यां नृपोत्तम। मृज्जलेन नरः स्नात्वा दत्वा शिरसि वै मृदमित्यादि। लक्ष्मीनारायणव्रतमिति—(वि० ध०)–पञ्चदश्यां शुक्लपक्षे फाल्गुनस्य नरोत्तम। पाखण्डपतिताश्चैव तथैवान्त्यावसायिनइत्यादि। शय्यादानमिति—(विष्णुः)–फाल्गुनो फाल्गुनीयुक्ता चेत्स्यात्तस्यां ब्राह्मणाय संस्कृतं स्वास्तीर्णं शयनं निवेद्य भार्य्यां मनोज्ञां पद्मवतीं द्रविणवतीं चाप्नोति नार्य्यपि भर्तारमिति।

इति फाल्गुनमासकृत्यनिर्णयः

एकभक्तव्रतमिति—(भारते)–चैत्रे तु नियतो मासमेकभक्तेन यः क्षिपेत्। सुवर्णमणिमुक्ताढ्ये कुले महति जायत इति। गौरीव्रतमिति—(मात्स्ये)–वर्जयित्वा मधौ यस्तु दधिक्षीरं घृतैक्षवं। दद्याद् वस्त्राणि सूक्ष्माणि रसपात्रफलानि वा। संपूज्य विप्रमिथुनं गौरी मे प्रीयतामिति। एतद्गौरीव्रतं नाम भवानीलोकदायकमिति।

चैत्रकृष्णद्वितीया—अस्यां महोत्सवः। चैत्रकृष्णाष्टमी—अस्यां संतानाष्टमीव्रतं । एषैव शीतलाष्टमी सा च सप्तमीयुता ग्राह्या ।

(पूर्वविद्धेति)—वत्सरादौ वसन्तादौ बलिराज्ये तथैव च । पूर्वविद्धैव कर्त्तव्या प्रतिपत्सर्वदाबुधैरिति । तथाचानन्तदेवः । इदं सर्वं कार्य्यं होलिकानन्तरं कर्त्तव्यत्वात् पूर्वविद्धायां प्रतिपद्येव कार्य्यम् । स्पृष्ट्वेति—(भविष्योत्तरे)—चैत्रे मासे महाबाहो पुण्ये तु प्रतिपद्दिने । यस्तत्र श्वपचं स्पृष्ट्वा स्नानं कुर्य्यान्नरोत्तमः । न तस्य दुरितं किंचिन्नाधयोव्याधयोनृप इति । विभूतियन्दनमिति—प्रवृत्ते मधुमासे तु प्रतिपत्सु विभूतये । कृत्वा चावश्यकार्य्याणि संतर्प्य पितृदेवता। यंदगे द्धोलिकाभूतिं सर्वदुष्टोपशान्तये इति । अन्यच्च-गोमहिष्यादियत्किंचित्तत्सर्वं भूषयेन्नृप चैलवस्त्रादिभिः सर्वैस्तोरणाबरततोनयेदिति । नित्यइति-वत्सरादौ वसन्तादौ इति पूर्वोदाहृतवचने वसन्तादिग्रहणस्यानन्यार्थत्वात् पूर्णिमायां होलोत्सवे फाल्गुन्यामिति फाल्गुनविद्धप्रतिपद्ग्राह्यार्थमिति कौस्तुभे । अन्नपुण्यप्राशनमिति-प्रवृत्ते तुषारसमये सितपक्षदश्यां प्रातर्वसन्तसमये समुपस्थिते च । संप्राश्य चूतकुसुमं सहचन्दनेन सत्यंहि पार्थ पुरुषोऽथ समाः सुखी स्यात् । महोत्सव इति-ततः प्रातर्द्वितीयायां पुत्रमित्रादिसंयुतः । नृपतिर्विततै देशे वितानवरशोभिते । सर्वतश्चसमास्तीर्णे रत्नकम्बलशोभिते । उपविश्यासने रम्ये पौरजानपदैः सह । सिन्दूरकुङ्कुमक्षोदपट्टवासैः सचन्दनैः । विकीर्य्य लोकास्ताम्बूलैः संमान्य च पृथक् पृथक् । नृत्यगीतविनोदैश्च कुर्य्यात्काममहोत्सवम् । एवं कुर्वन्न वाप्नोति यावत्संवत्सरं शुभमिति । (विकीर्य्येतिलोकेभ्य एतानि दत्वा)। संतानाष्टमीति—(हेमाद्रौ)-कृष्णाष्टम्यां चैत्रमासे स्नातो नियतमानसइत्यादि। शीतलाष्टमीति-चैत्रमस्यसिते पक्षे चाष्टमी शीतलाह्वया । तमारभ्य प्रकर्तव्यं यावन्मासचतुष्टयमित्यादि । देवज्ञविनोदे—(पराशरः)—सप्तमी सहिता कार्य्या चैत्रकृष्णाष्टमी सदा । नवम्यां नाधिकारोऽस्ति शीतलापूजने मुने । ज्येष्ठामैत्रर्क्ष

चैत्रकृष्णैकादशी पापमोचनी । चैत्रकृष्णत्रयोदशी—रविवार शतभिषायुक्तायामस्यां महावारुणीयोगः । चैत्रकृष्णचतुर्दशी—अस्यां केदारकुण्डोदकपानं कार्य्यम् । अङ्गारकयुक्तायामस्यां गङ्गास्नाने कृते पिशाचत्वनिवृत्तिः । पूर्वा ग्राह्या कृष्णपक्षत्वात् । चैत्रकृष्णामावास्या इयं मन्वादिः—यस्यामारभ्य पितृव्रतम् वह्निव्रतञ्च ।

संयोगे तोयमन्नं समर्पयेत् । बालानां शांतिदश्चैव इति दैवविदो विदुरिति ।

पापमोचनीति—(भविष्योत्तरे)—चैत्रस्यकृष्णपक्षे या भवत्येकादशी शुभा । पापमोचनिका नाम सर्वपापक्षयंकरीत्यादि ।

महावारुणीति—(ब्रह्माण्डपुराणे)- चैत्रासिते वारुणऋक्षयुक्ता त्रयोदशीसूर्य्यसुतस्य वारे योगे शुभे सा महती महत्या गङ्गाजलेऽर्कग्रहकोटितुल्ये । तथा (वाचस्पति निबन्धे) । शनिवारसमायुक्ता सा महावारुणी स्मृता । गङ्गायां यदि लभ्येत कोटिसूर्य्यग्रहाधिकेति ।

केदारकुण्डोदकपानमिति—चैत्रकृष्णचतुर्दश्यामुपवासं विधाय च । केदारोदकपानेन यथा तत्र फलं लभेदित्यादि । पिशाचत्वनिवृत्तिरिति—चैत्रकृष्णचतुर्दश्यामङ्गारकदिने यदि । पिशाचत्वं पुनर्नस्याद्गङ्गायां स्नानभाजनादिति ।

पितृव्रतमिति—(विष्णुधर्मोत्तरे)—चैत्रकृष्णांममारभ्य पञ्चदश्यांनराधिप श्राद्धं तदन्हि कुर्वीत यावत्सम्वत्सरो भवेदिति । वन्हिव्रतमिति—कृत्वा व्रतं वत्सरमेतदिष्टं प्राप्नोति वित्तं सततं पराक्ष्य । धर्मे रतिं रूपमनुत्तमं च कामानभीष्टाननुरूपप्रधान ॥

इति श्रीभाष्याचार्य्य-हरिनामदत्तशास्त्रितनय-समार्तभास्कर-राजमान्य-विद्यावाचस्पति-पं०देवीप्रसादशास्त्रिपर्यन्ते श्रीगङ्गासिंह-कल्पद्रुमे चैत्रशुक्लादिचैत्रकृष्णान्तनिर्णयः

समाप्तश्चायं प्रथमस्तबकः

॥ अथ शुद्धाशुद्धनिर्णयः ॥

मनुस्मृतौ—त्रीणि देवाः पवित्राणि ब्राह्मणानामकल्पयन् । अदृष्टमद्भिर्निर्णिक्तं यच्च वाचा प्रशस्यते । आपः शुद्धा भूमिगता वैतृष्ण्यं यासु गोर्भवेत् । अव्याप्ताश्चेदमेध्येन गन्धवर्णरसान्विताः । अत्रिस्मृतौ—गोदोहने चर्मपुटे च तोयं यन्त्राकरे कारुकशिल्पिहस्ते स्त्रीबालवृद्धाचरितानि यान्यप्रत्यक्षदृष्टानि शुचीनि तानि । प्राकाररोधे विषमप्रदेशे सेनानिवेशे भवनस्य दाहे । आरब्धयज्ञेषु महोत्सवेषु तेष्वेव दोषा न विकल्पनीयाः । प्रपास्वरण्ये घटकस्य कूपे द्रोण्यां जलं कोशविनिर्गतं च । चर्मभाण्डैस्तु धाराभिस्तथा यन्त्रोद्धृतं जलम् । यमस्मृतौ—स्वभावयुक्तमव्याप्तममेध्येन सदा शुचि । भाण्डस्थं धरणीस्थं वा पवित्रं सर्वदा जलम् । इति । (आपस्मृतौ २ अध्यायप्रथमश्लोकः)—देवयात्राविवाहेषु यज्ञप्रकरणेषु च । उत्सवेषु च सर्वेषु स्पृष्टास्पृष्टं न विद्यत इति । नित्यशुद्धः कारुहस्तः पण्यं यच्च प्रसारितम् । ब्रह्मचारिगतं भैक्ष्यं नित्यं मेध्यमिति स्थितिः । गोकुले कन्दुकशालायां तैलचक्रेक्षुयन्त्रयोः । अमीमांस्यानि शौचानि स्त्रीणां च व्याधितस्य च । तथा चात्रिः—आरनालं तथा क्षीरं कन्दुकं दधिसक्तवः । स्नेहपक्वं च तक्रं च शूद्रस्यापि न दुष्यति । लघ्वाश्वलायनस्मृतौ—अपूपसक्तवो धानास्तक्रं दधि घृतं मधु । एतत्पण्येषु भोक्तव्यं भाण्डलेपो न चेद्भवेत् । आपस्तम्बस्मृतौ—गुडस्तक्ररसा ग्राह्या निवृत्तेनापि शूद्रतः । शाकादिकं मृणालानि तुम्बरुः सक्तवस्तिलाः । रसाः फलानि पिण्याकं प्रतिग्राह्या हि सर्वतः मनुस्मृ० । यत्किंचित्स्नेहसंयुक्तं भक्ष्यं भोज्यमगर्हितम् । तत्पर्युषितमप्याद्यं हविःशेषं च यद्भवेत् । चिरस्थितमपि त्वाद्यमस्नेहाक्तं द्विजातिभिः । यवगोधूमजं सर्वं पयसश्चैव विक्रियाः । अत्रिस्मृ० । अन्त्यजस्य तु ये वृक्षा बहुपुष्पफलोपमाः । उपभोग्यास्तु ते सर्वे पुष्पेषु च फलेषु च । आकराद् गतवस्तूनि नाशुचीनि कदाचन । आकराः शुचयः सर्वे वर्जयित्वा सुरालयम् । भृष्टाभृष्टयवाश्चैव तथैव चणकाः स्मृताः । खर्जूरं चैव कर्पूरमन्यद्भृष्टतरं शुचिः । विनोदकेन पक्वं च यदन्नं जातवेदसि । तदन्नं फलवद्ग्राह्यं दुष्टं तन्न दुष्यति । सुमन्त्वङ्गिरसौ—गोरसं चैव सक्तूंश्च तैलपिण्याकमेव च । अपूपान्भक्षयेच्छूद्राद्यच्चान्यत्पयसा कृतम् । इति । हारीतः—कन्दुपक्वं स्नेहपक्वं पायसं दधिसक्तवः । एतान्यपि शूद्रभुजो भोज्यानि मनुरब्रवीत् । इक्षवः फलं मूलं ताम्बूलं तिलमौषधम् । भक्षयित्वापि कर्तव्याः स्नानदानादिकाः क्रियाः । कुलाचारोऽपि कर्तव्य इति शास्त्रविदो विदुः । देशाचारस्तथा धर्म इति प्राह पराशरः । बृहद्विष्णुस्मृ०—ऊर्ध्वं नाभेर्यानि खानि तानि मेध्यानि निर्दिशेत् । यान्यधस्तान्यमेध्यानि देहाच्चैव मलाश्च्युताः । मक्षिका विप्रुषश्छाया गौरश्वः सूर्यरश्मयः । रजो भूर्वायुरग्निश्च सदा मेध्या सदा शुचिः । नोच्छिष्टं कुर्वते मुख्या विप्रुषोऽङ्गं पतन्ति याः । न श्मश्रूणि गतान्यास्यं न दन्तान्तरवेष्टितम् । स्पृशन्ति बिन्दवः पादौ य आचामयतः परान् । भौमिकैस्ते समा ज्ञेया न तैरप्रयतो भवेत् । मनुः—यो यस्य मांसमश्नाति स तन्मांसाद उच्यते । मत्स्यादः सर्वमांसादस्तस्मान्मत्स्यान्विवर्जयेत् । आपस्तम्बः—कारुहस्तगतं पण्यं यच्च कन्यादिनिर्गतम् । स्त्रीबालवृद्धचरितं सर्वमेतच्छुचिर्भवेत् ।

प्रपास्वरण्ये जलेषु वै गिरौ द्रौण्यां जलं कोशविनिसृतं च। श्वपाक चाण्डालपरिग्रहेषु पीत्वा जलं पञ्चगव्येन शुद्धिः। मनुः—सुरां पीत्वा द्विजो मोहादग्निवर्णां सुरां पिवेत्। तया सकाये निर्दग्धे मुच्यते किल्विषात्ततः। गोमूत्रमग्निवर्णं वा पिवेदुदकमेव वा। पयोघृतं वा मरणाद्गोशकृद्रसमेव वा। सुरा वै मलमन्नानां पाप्मा च मलमुच्यते तस्मात् ब्राह्मणराजन्यौ वैश्यश्च न सुरां पिवेत्। गौडी पैष्टी च माध्वी च विज्ञेया त्रिविधा सुरा। यथैवैका तथा सर्वा न पातव्या द्विजोत्तमैः। यस्य कायगतं ब्रह्म मद्येनाप्लाव्यते सकृत्। तस्य व्यपैति ब्राह्मण्यं शूद्रत्वं च स गच्छति।

इन्द्रियाणां निरोधेन रागद्वेषक्षयेण च।
अहिंसया च भूतानाममृतत्वाय कल्पते ॥

इति श्री भाष्याचार्य्य पं० हरिनामदत्तशास्त्रितनय
विद्यावाचस्पति पं० देवीप्रसादशास्त्रिप्रणीते
श्रीगङ्गासिंहकल्पद्रुमे शुद्धाशुद्धनिर्णयः।



वैक्रमीये शुभेवर्षे गजनागग्रहेन्दुके ।
माघस्य कृष्णसप्तम्यामगात्सम्पूर्णतामयम् ॥ १ ॥

भाष्याब्धिर्हरिनामदत्तविबुधो विद्वन्मुरारेः सुतः ।
तत्पुत्रेण विदांवरेण रचिते देवीप्रसादेन वै ।
गंगासिंहनृपेन्द्रकीर्तिकलिते ग्रन्थेऽत्र कल्पद्रुमे ।
सम्पूर्णं खलु निर्णयस्तबकके चेतोहरं चादिमम् ॥ २ ॥

यद्राज्ये सततं प्रजासु कुशलं धर्मश्चसुस्थः सदा ।
शास्त्राणांप्रतिपालकाय जयिने तस्मै यशो भाषिणे ॥
गंगासिंह नरेश्वराय महते ग्रन्थं समर्प्याधुना ।
सञ्जातोऽस्ति कृती कृपास्तु सुधियां देवीप्रसादे द्विजे ॥

सर्वं हि शुद्धं लिखितं मयात्र वृथाभिमानं नहि मान्य कुर्वे ।
स्वाभाविकं विस्मरणं जनेषु विचार्य दृष्टिः सदया विधेया ॥

